भगवद्रामानुजाचार्यविरचितः

वेदान्तदीपः



संस्कृत संशोधन संसत्

अधीना : उच्च शिक्षण विभागः (विश्वविद्यानिलयः)

मेलुकोटे - ५७१ ४३१

संस्कृत-संशोधन-संसत् ग्रन्थमाला - ६०

भगवद्रामानुजाचार्यविरचितः

वे दा न्त दी पः

संस्कृत - संशोधन - संसत्
यादवाद्रिः (मेलुकोटे) - ५७१ ४३१
२००९, २०१४

भगवद्रामानुजग्रन्थमाला
वेदान्तदीपः
संस्कृत-संशोधन-संसत्
यादवाद्रिः (मेलुकोटे) - ५७१ ४३१

प्रधानसम्पादकः
डा.प्रो. भाष्यम् स्वामी, एम्.ए. पिएच्.डि., डि.लिट्
निर्देशकः सहकार्यदर्शी च,
संस्कृत-संशोधन-संसत्, मेलुकोटे

प्रकाशनम्
संस्कृत-संशोधन-संसत्
यादवाद्रिः (मेलुकोटे) - ५७१ ४३१

प्रथमसंस्करणम् - २००९
द्वितीयसंस्करणम् - २०१४
प्रतयः - ५००
मूल्यम् - ₹ १९०-००

अक्षरसंयोजनम् - मुद्रणञ्च
संस्कृत-संशोधन-संसत्
यादवाद्रिः (मेलुकोटे) - ५७१ ४३१
कर्नाटक

Academy of Sanskrit Research series - 60

VEDĀNTADĪPAḤ

of

Bhagavad Rāmānujācārya

Academy of Sanskrit Research

MELKOTE - 571 431

2009, 2014

Bhagavad Rāmānuja Granthamālā
VEDĀNTADĪPA
Academy of Sanskrit Research
Melkote - 571 431

Chief Editor
Dr. Prof. Bhashyam Swamy MA. Ph.D., D.Litt.
Director & Joint Secretary
Academy of Sanskrit Research
Melkote - 571 431

Publisher
Academy of Sanskrit Research
Melkote - 571 431

ISBN. 978-81-85929-83-5

First Edition : 2009
Second Edition : 2014 10.5.16
Copies : 500
PRICE : ₹ 190-00

Typeset & Printed at :
Academy of Sanskrit Research
Melkote - 571 431
Karnataka

सम्पादनमण्डली

प्रधानसम्पादकः

डा.प्रो. भाष्यम् स्वामी *एम्.ए. पिएच्.डि., डि.लिट्*

निर्देशकः सहकार्यदर्शी च, संस्कृत-संशोधन-संसत्, मेलुकोटे

सम्पादकः

विद्वान् एस्. नारायणः, *एम्.ए. (संस्कृत), एम्.ए. (कन्नड)*

संशोधनाधिकारी, संस्कृत-संशोधन-संसत्,

सहायकसंशोधकौ

विद्वान् एस्. एन्. आनन्दाळ्वार्

विदुषी एम्.वि. सावित्री

तान्त्रिकसहायकाः

श्री जवरेगौडः

श्रीमती एम्.बि. भारती

श्रीमती एम्.एन्. सरस्वती

श्री के.एस्. बेट्टस्वामिगौडः

श्री जि.एन्. बेट्टेगौडः

"About this Edition"

Since 1977, the Academy of Sanskrit Research, Melukote, has been the torch bearer of our vast and rich Sanskrit cultural heritage, especially in the sphere of Viśiṣṭādvaita philosophy of Śrī Rāmānujācārya. The Academy has brought out many of the old Sanskrit works into the public domain that are easy to read, understand and contemplate.

Vedāntadipa, a commentary on Brahmasūtra in a condensed form, is one of the gems among the Navagranthas of Śrī Rāmānujācārya. It was published by the Academy in the year 2009. The first edition of Vedāntadīpa was a tremendous success among national and international readers and lovers of Indian philosophy, especially, classical Sanskrit literature, and we are proud to convey that the book ran out of print in a very short time. The demand for the publication of the book has increased globally and the Academy is receiving requests from all the quarters of readers for a re-print edition of the book. Hence the Academy has re-printed Vedāntadipa in 2014 to fulfill the requests of our valuable readers.

On this occasion, the Academy requests all the scholars and readers to read and spread the invaluable knowledge that is conveyed in the monumental work Vedāntadīpa.

The patrons for this great work are the Management of the Academy and the State Government of Karnataka. The Academy is very much grateful for the contributions made by the scholars of the Academy,

the printing team, Art designer and the binders of the book, for making the re-print of the auspicious Vedāntadīpa to happen on time.

We look forward to enterprising years ahead as we have several good and rare publications to be brought out in the year of millennium celebration of our Humanitarian Ācārya par excellence Bhagavad Rāmānujācārya in 2017.

Place : Melkote
Date : 10-04-2014

(S. Kumara)
Director & Registrar (Admin.)
Academy of Sanskrit Research
Melkote

"About this Edition"

Since 1977, the Academy of Sanskrit Research, Melukote, has been the torch bearer of our vast and rich Sanskrit cultural heritage, especially in the sphere of Viśiṣṭādvaita philosophy of Śrī Rāmānujācārya. The Academy has brought out many of the old Sanskrit works into the public domain that are easy to read, understand and contemplate.

Vedāntadipa, a commentary on Brahmasūtra in a condensed form, is one of the gems among the Navagranthas of Śrī Rāmānujācārya. It was published by the Academy in the year 2009. The first edition of Vedāntadīpa was a tremendous success among national and international readers and lovers of Indian philosophy, especially, classical Sanskrit literature, and we are proud to convey that the book ran out of print in a very short time. The demand for the publication of the book has increased globally and the Academy is receiving requests from all the quarters of readers for a re-print edition of the book. Hence the Academy has re-printed Vedāntadipa in 2014 to fulfill the requests of our valuable readers.

On this occasion, the Academy requests all the scholars and readers to read and spread the invaluable knowledge that is conveyed in the monumental work Vedāntadīpa.

The patrons for this great work are the Management of the Academy and the State Government of Karnataka. The Academy is very much grateful for the contributions made by the scholars of the Academy,

the printing team, Art designer and the binders of the book, for making the re-print of the auspicious Vedāntadīpa to happen on time.

We look forward to enterprising years ahead as we have several good and rare publications to be brought out in the year of millennium celebration of our Humanitarian Ācārya par excellence Bhagavad Rāmānujācārya in 2017.

Place : Melkote

Date : 10-04-2014

(S. Kumara)

Director & Registrar (Admin.)

Academy of Sanskrit Research

Melkote

Foreword

As one of the primary objectives of the Academy of Sanskrit Research is to bring out Nine gems of Bhagavad Rāmānujācārya in the form of critical editions. We are delighted to render one of the Gems namely Vedānta Dīpa 'Beacon of Philosophy' to the world of readers.

As an abridgment to the expansive and extensive text Śrī Bhāṣyam, which at times is hard to follow for the uninitiated, Ācārya himself with unbound compassion wrote Vedāntadīpa. This text written on the same lines of Śrī Bhāṣyam, a commentary on Vedāntasūtras, has dealt with the subject matter in an uncomplicated way to make it easily comprehensible to a general reader even.

Bhakti being the substratum, upon which every soul can transit to attain God to be with him serving eternally in the ever blissful abode of Śrīmannārāyaṇa.

I wish to express my sincere thanks to Vidwān S. Narayana; the Research Officer, Vidwān S. Krishnan, Vidwān S.N. Anandalwar, and Vidwān R. Janardhanan, Vidushi M.V. Savithri for their rich contribution by bringing this critical edition in a record time.

I would like to thank the team of Mr. Lokesh-the Artist designer including Vid. H.S. Hanumantha Rao, the Granthapala of the Academy for having brought out unique and effective cover page designs for this edition. Appreciations are also due to the team of DTP & in-house print division consisting of Sri Javare Gowda, Smt. M.B. Bharati, Smt. M.N.Saraswathy, KS. Bettaswamy Gowda & G.N. Bette Gowda.

I will be failing in my duty if I don't thank our President, Sri G. Kumar Naik, I.A.S., the Secretary cum Treasurer, Sri Mahesvara Rao I.A.S. for their source of inspiration and support and also to my beloved colleagues - the Registrar Sri B.S. Krishna Prasad & the Asst. Registrar S.Kumar and all the staff who have directly or indirectly contributed in this endeavor. Thanks are also due to the Binder Mr. Prasanna of Mysore.

My special thanks are due to the members of the Managing Committee for their support and the Government of Karnataka for their timely financial aid without which the Academy could not have undertaken such a monumental works.

I am sure the edition will be well received by the Sanskrit Scholarly World and would be used as a useful guide in any of their related research activities.

1st March 2009
Melkote

Dr. Prof. Bhashyam Swamy
Director & Joint secretary

INTRODUCTION

Ācārya Rāmānuja one the of trinity of Ācāryas (Śaṅkara and Madhva) the propounder of Viśiṣṭādvaita school of thought is beleived to have written nine works. These are 1) Vedārthasaṅgraha, a concise statement of philosophical doctrines of the Vedas, with special reference to Upaniṣads. 2) Vedāntasāra, a commentary on the Vedāntasūtras in a very brief way. 3) Vedāntadīpa, the book under discussion, which is a longer commentary on Vedāntasūtras vis-a-vis-Vedāntasāra. 4) Śrī Bhāṣya- an exhaustive commentary written on Vedānta-Sūtras, wherein all other schools are ably and systamatically refuted to establish the Viśiṣṭādvatic way of interpretation is the summum bonum of Vedic, Upaniṣadic passages. 5) Śaraṇāgatigadya - a prose poetry with its of beauty of flow of words of unconditional devotion poured out to God, and complete surrender unto His will. 6) Śrīraṇgagadya - another devotional outpouring in poetic prose, for the Lord of the famous shrine at Srirangam, and its description. 7) Śrīvaikuṇṭhagadya - a poem in prose eulozing the exalted abode of the Lord Śrīmannārāyana, and his glories. 8) Gītā-Bhāṣya - a commentary on Bhagavad-Gītā and 9) Nityagrantha - a handy book guiding a Śrīvaiṣṇava in his daily worship of the Lord. We continue to present in the series of Ācārya Rāmānuja's nine gems, Vedāntadīpa here.

Vedāntadīpa is an abridgement of comprehensive Magnum opus 'Śrī Bhāṣya' of Ācārya Rāmānuja. 'Śrī Bhāṣya' by virtue of its enormity, of depth of interpretation of Vedānta sūtras, is not as comprehensible as 'Vedāntadīpa'. This scholastic work of Ācārya Rāmānuja though appreciated well in the circle of the learned, the purpose of ultimate knowledge reaching the common reader remained unfulfilled. The ever

compassionate Ācārya Rāmānuja with his humantarian concern took up the task of simplification of his original commentary written to 'Brahmasūtras', to make it understandable to one and all, wrote 'Vedāntadīpa'. True to its epithet 'Vedāntadīpa, holds its position of 'Beacon of ultimate philosophy'. The condensed form of commentary of 'Brahmasūtras' is not short on its lucid interpretation of the import.

Alluding to every authentic text to firmly expound the theory of principles of Nature of god (Supreme Being) individual self, and matter, their relation to each other, Ācārya Rāmānuja has shown, the coherence among the statements of upaniṣads, purāṇas and others. (Jīvātma) Individual self being sub-servient to the Supreme Being, through undivided devotion to Him (Supreme Being) could attain to the abode of eternal bliss of Śrīmanārāyaṇa, (Parambrahma). The school of Viśiṣṭādvaita strongly professes above all, the unconditional love and devotion unto the god as the only way to attain Salvation that is `serving the Lord in his abode eternally beyond the grasp of transmigration of birth and death.

Dr. Prof. Bhashyam Swamy
Director & Joint secretary

प्रस्तावना

परमार्थस्वरूपप्रतिपादकाः ग्रन्थाः उपनिषदः । वेदानां अन्ते विद्यमानत्वात् वेदान्ताः इति प्रसिद्धाः । उपनिषत्सु प्रतिपादितान् विषयान् तत्त्वं क्रमबद्धरूपेण विवरीतुं भगवान् बादरायणः ताः सर्वा अपि परीक्ष्य वेदान्तसूत्राणि रचयामास । तान्येव ब्रह्मसूत्राणि, शारीरकसूत्राणि, वेदान्तसूत्राणि इत्यादिनामभिः प्रसिद्धानि । अत्र सन्ति चत्वारोऽध्यायाः समन्वय-अविरोध-साधन-फलाख्याः । तत्र परब्रह्म एव जिज्ञास्यं, तदेव समस्तजगत्कारणं इत्युपक्रम्य मुक्तिस्वरूपं निरूप्य उपसंह्रियते । शारीरकं शास्त्रं मुमुक्षुभिः ज्ञातव्यान् तत्त्व-हित-पुरुषार्थान् बोधयति । भगवद्रामानुजाचार्यैः एव वेदान्तदीपस्य अन्ते एवं प्रतिपादितम् - **'अतः मुमुक्षुभिः ज्ञातव्यं निरस्तनिखिलदोषगन्धं अनवधिकातिशयासंख्येयकल्याणगुणाकरं, निखिलजगदेककारणं परं ब्रह्म तज्ज्ञानं च मोक्षसाधनम् - असकृदावृत्तस्मृतिसन्तानरूपम् - उपासनात्मकम्; उपासनफलं च अर्चिरादिना ब्रह्म सम्पद्य स्वस्वरूपभूतज्ञानादिगुणाविर्भावपूर्वक अनन्तमहाविभूत्यन-वधिकातिशयानन्दब्रह्मानुभवो अपुनरावृत्तिरूप इति शारीरकशास्त्रेण उक्तं भवति'** इति ।

भगवद्रामानुजाचार्याणां प्रधानकृतिः ब्रह्मसूत्रभाष्यम् 'श्रीभाष्यम्' । पूर्वपक्षनिरसनपूर्वं स्वसिद्धान्तं विशिष्टाद्वैतं वेदवेदान्तोदितं तत्र सम्यक् निरूपयामासतुः । अतिगम्भीरं दुरवगम्यं सूक्ष्मं च श्रीभाष्यं ज्ञातुं नातीव सुलभम् कष्टसाध्यं च तत् । ततः पामराणामपि साधारणजनानां कृते श्रीभाष्यस्य तात्पर्यं अवबोधयितुं वेदान्तदीपं रचयामासतुः, तदनु वेदान्तसारमपि । सिद्धान्तं ज्ञातव्यार्थं प्रथमं सूत्रार्थः, पूर्वपक्षः, सिद्धान्तः इति क्रमेण अस्मिन् ग्रन्थे प्रतिपादिताः । श्रीवेदान्तदेशिकाः अधिकरणसारावल्यां वेदान्तसूत्रस्य सूत्रसंख्याः, अध्यायसंख्याः षोडशपादानां विषयाः एषु श्लोकेषु सङ्गृहीताः वर्तन्ते । यथा -

सौत्री संख्या शुभाशीरधिकृतिगणना चिन्मयी ब्रह्मकाण्डे
तादर्थ्येऽनन्तरत्वेऽप्यधिकरणभिदा नाल्पसारैः प्रकल्प्या ।
अक्षोर्म्याशाऽहिकाष्ठाद्विरदमुनिवसूर्म्यद्रितत्त्वातिशक्र -
र्यक्षैरक्षैः प्रयाजैरिह भवति रसैः पादनीतिप्रबन्धः ।। १६ ।।

शास्त्रं त्वेतत्समन्वित्यविहतिकरणप्राप्तिचिन्ताप्रधानै -
रध्यायैः षोडशाङ्घ्रि द्विकयुगभिदुरं षट्कभेदादिनीत्या ।
तत्राद्यं वक्ति सिद्धं विषयमपि परं तत्प्रतिद्वन्द्वियुग्मं
स्वप्राप्तेः साधनं च स्वयमिति हि परं ब्रह्म तत्रापि चिन्त्यम् ।। १७ ।।

स्रष्टा देही स्वनिष्ठो निरवधिमहिमाऽपास्तबाधः श्रितासः
स्वात्मादेरिन्द्रियादे रुचितजननकृत् संसृतौ तन्त्रवाही ।
निर्दोषत्वादिरम्यो बहुजनपदं स्वार्हकर्मप्रसाद्यः
पापच्छिद् ब्रह्मनाडीगतिकृदतिवहन् साम्यदश्चात्र वेद्यः ।। १९ ।। इति च ।

पाठान्तरस्य कृते अस्माकं संसदि विद्यमानानां चतुर्णां ताळपत्राणां साहाय्यं स्वीकृतम्। तेषां सङ्केतः एवं दत्तः ।

१. संख्या ४९३७ तेलुगुलिपिः - क   ३. संख्या ५०२९ ग्रन्थलिपिः - ग
२. संख्या ५०६३ ग्रन्थलिपिः - ख   ४. संख्या ५०५३ ग्रन्थलिपिः - घ

अन्ते च अनुबन्धे सूत्राणां अकारादिसूचनी, अधिकरणानाम् अकारादिसूचनी, प्रमाणानाम् अकारादिसूचनी, सङ्केताक्षरसूचनी इत्यादिकमुपनिबद्धं वर्तते ।

अयं ग्रन्थः संसदा भगवद्रामानुजग्रन्थमाला निगमेन प्राकाश्यमानं वर्तते । अद्यावधि संसदा श्रीभाष्यम्, वेदार्थसंग्रहः, वेदान्तसारः, गीताभाष्यम्, नित्यग्रन्थानाम् संस्कृतावृत्तयः विमर्शात्मकसम्पादनात्मिका प्रकाशिताः । इदानीं वेदान्तदीपः तस्यामेव मालिकायां प्राकाश्यं नियमानः तदत्र इमं ग्रन्थरत्नं भवतां हस्ते समर्प्यते इति सामोदमावेद्यते । वाचकाः सहृदयाः भवन्तः इमं यथापूर्वं स्वागतीकृत्य नन्दयन्तु अस्मान् इति विश्वसिमः ।

कार्तज्ञ्यम् -

अस्य ग्रन्थस्य सम्पादनकार्ये संसदः, निर्देशकाः सहकार्यदर्शिनश्च श्री उ.वे. विद्वान् भाष्यं स्वामीजीमहोदयाः आवश्यकान् सर्वान् मार्गदर्शनान् प्रदाय अस्मान् प्रोत्साहितवन्तः। तेभ्यः हार्दं कार्तज्ञ्यमर्पयामि । तथा संशोधनसहायकाः विद्वान् एस्. कृष्णन्, विद्वान् जनार्दनः, विद्वान् एस्.एन्. आनन्दाळ्वार्, विद्वान् के.एन्. रङ्गप्रियः, विदुषी एम्.वि. सावित्री, गणकयन्त्रकार्यकर्तारः श्री जवरेगौडः, श्रीमती एम्.बि. भारती, श्रीमती एम्.एन् सरस्वती, मुद्रणकार्यकर्तारौ श्री के.एस्. बेट्टस्वामिगौडः, श्री जि.एन्. बेट्टेगौडः, मुखपुटविन्यासकारः विद्वान् हेच्.एस्. हनुमन्तरावः, कलाकारः श्री लोकेशः, कार्यालयस्य कुलसचिवः श्री कृष्णप्रसादः, उपकुलसचिवः एस्. कुमारः, अन्येऽन्ये च आवश्यकान् सर्वान् सहकारान् प्रदाय कार्यमेतन्निर्वोढुं महान्तमानुकूल्यमापादितवन्तः इति तेभ्यः कार्तज्ञ्यमर्पयामि । श्रीमान् यदुशैलदीपः यदुगिरिनायिकासमेतः नारायणः प्रसीदतु ।।

विद्वज्जनविधेयः
एस्. नारायणः

विषयसूचनी

* * *

।। श्रीः ।।

श्रीमते रामानुजाय नमः

भगवद्रामानुजाचार्यविरचितः

वेदान्तदीपः

[मङ्गलाचरणम्]

श्रियःकान्तोऽनन्तो वरगुणगणैकास्पदवपुः ।
हताशेषावद्यः परमखपदो वाङ्मनसयोः ।।

अभूमिर्भूमिर्यो नतजनदृशामादिपुरुषो ।
मनस्तत्पादाब्जे परिचरणसक्तं भवतु मे ।।

प्रणम्य शिरसाऽऽचार्यंस्तदादिष्टेन वर्त्मना ।
ब्रह्मसूत्रपदान्तस्थवेदान्तार्थः प्रकाश्यते ।।

अत्र [1]इयमेव[1] हि वेदविदां प्रक्रिया - अचिद्वस्तुनः स्वरूपतः, स्वभावतश्च अत्यन्तविलक्षणः, तदात्मभूतः चेतनः, प्रत्यगात्मा । तस्मात् बद्धात् [2]मुक्तात् नित्याच्च[2], निखिलहेयप्रत्यनीकतया [3]कल्याणगुणैक[3]तानतया च, सर्वावस्थचिदचिद्व्यापकतया, [4]धारकतया[4], नियन्तृतया, शेषितया च अत्यन्तविलक्षणः, परमात्मा । यथोक्तं भगवता -

'द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च ।
क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते ।।

---

१. इयं-ग,घ   २. मुक्ताच्च-ग   ३. कल्याणैकतया-क -कल्याणैकतामतया-ख,ग,घ   ४. आधारतया-ग

उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः ।
यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वरः ।।
यस्मात् क्षरमतीतोऽहमक्षरादपि चोत्तमः ।
अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः' ।। (भ.गी.१५-१६,१७,१८) इति ।

श्रुतिश्च - 'प्रधानक्षेत्रज्ञपतिर्गुणेशः' (श्वे.उ.६-१६) 'पतिं विश्वस्यात्मेश्वरम्' (तै.ना.उ.११-३) 'अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः' (तै.ना.उ.११-५) इत्यादिका ।

कूटस्थः मुक्तस्वरूपम्;

'ये त्वक्षरमनिर्देश्यमव्यक्तं पर्युपासते ।
सर्वत्रगमचिन्त्यं च कूटस्थमचलं ध्रुवम् '।। (भ.गी.१२-३)

इत्यादिव्यपदेशात् । सूत्रकारश्चैवमेव वदति - 'नेतरोऽनुपपत्तेः' (ब्र.सू.१-१-१७) '[1]भेदव्यपदेशात्[1]' (ब्र.सू.१-१-१८) 'अनुपपत्तेस्तु न शारीरः' (ब्र.सू.१-२-३) 'कर्मकर्तृव्यपदेशाच्च' (ब्र.सू.१-२-४) 'शब्दविशेषात्' (ब्र.सू.१-२-५) 'सम्भोगप्राप्तिरिति चेन्न, वैशेष्यात्' (ब्र.सू.१-२-८) 'न च स्मार्तमतद्धर्माभिलापाच्छारीरश्च' (ब्र.सू.१-२-२०) 'उभयेऽपि हि भेदेनैनमधीयते' (ब्र.सू.१-२-२१) 'विशेषणभेदव्यपदेशाभ्यां च नेतरौ' (ब्र.सू.१-२-२३) 'मुक्तोपसृप्यव्यपदेशाच्च' (ब्र.सू.१-३-२) 'स्थित्यदनाभ्यां च' (ब्र.सू.१-३-६) 'इतरपरामर्शात् स इति चेन्नासम्भवात्' (ब्र.सू.१-३-१७) 'उत्तराच्चेत्, आविर्भूतस्वरूपस्तु' (ब्र.सू.१-३-१८) 'सुषुप्त्युत्क्रान्त्योर्भेदेन' (ब्र.सू.१-३-४३) 'पत्यादिशब्देभ्यः' (ब्र.सू.१-३-४४) 'अधिकं तु भेदनिर्देशात्' (ब्र.सू.२-१-२२) 'अधिकोपदेशात्तु बादरायणस्यैवं तद्दर्शनात्' (ब्र.सू.३-४-८) जगद्व्यापारवर्जं प्रकरणादसन्निहितत्वाच्च (ब्र.सू.४-४-१७) 'भोगमात्रसाम्यलिङ्गाच्च' (ब्र.सू.४-४-२१) इत्यादिभिः ।

न च अविद्याकृतम् उपाधिकृतं वा भेदमाश्रित्य एते [2]निर्देशाः[2];
'इदं ज्ञानमुपाश्रित्य मम साधर्म्यमागताः ।
सर्गेऽपि नोपजायन्ते प्रलये न व्यथन्ति च' ।। (भ.गी. १४-२)

---

१. भेदव्यपदेशाच्च-क,ख,घ २. निर्देशा इति-ग

'तदा विद्वान् पुण्यपापे विधूय निरञ्जनः परमं साम्यमुपैति' (मुं.उ.३-३-३) 'मुक्तोपसृप्य-व्यपदेशाच्च' (ब्र.सू.१-३-२) 'उत्तराच्चेदाविर्भूतस्वरूपस्तु' (ब्र.सू.१-३-१८) 'सम्पद्याविर्भावः स्वेन शब्दात्' (ब्र.सू.४-४-१) 'जगद्व्यापारवर्जं प्रकरणादसन्निहितत्वाच्च' (ब्र.सू.४-४-१७) भोगमात्रसाम्यलिङ्गाच्च' (ब्र.सू.४-४-२१) इति 'सर्वाविद्योपाधि-विनिर्मुक्त'[1]मधिकृत्यैव भेदोपपादनात् ।

श्रुतिस्मृतिसूत्रेषु सर्वत्र भेदे निर्दिष्टे, चिदचिदीश्वरस्वरूपभेदः स्वाभाविको विवक्षितः - इति निश्चीयते । 'सर्वं खल्विदं ब्रह्म तज्जलानिति शान्त उपासीत' (छां.उ.३-१४-१) 'वाचाऽऽरम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्' (छां.उ.६-१-४) 'सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम्' (छां.उ.६-२-१) तदैक्षत बहु स्यां प्रजायेयेति । तत् तेजोऽसृजत' (छां.उ.६-२-३) 'सन्मूलाः सोम्येमाः सर्वाः प्रजाः सदायतनाः सत्प्रतिष्ठाः' (छां.उ.६-८-६) ऐतदात्म्यमिदं सर्वम् । तत् सत्यम् । स आत्मा । तत् त्वमसि श्वेतकेतो' (छां.उ.६-८-७) 'क्षेत्रज्ञं चापि मां विद्धि' (भ.गी.१३-२) 'तदनन्यत्वमारम्भणशब्दादिभ्यः' (ब्र.सू.२-१-१५) इति - परस्य ब्रह्मणः कारणत्वम्, कृत्स्नस्य चिदचिदात्मकप्रपञ्चस्य कार्यत्वम्, कारणात् कार्यस्य [2]अनन्यत्वं च[2] उच्यमानम्, एवमेवोपपद्यते ।

सर्वावस्थस्य चिदचिद्वस्तुनः परमात्मशरीरत्वम्, परमात्मनश्च आत्मत्वम्, 'यः पृथिव्यां तिष्ठन्.......यस्य पृथिवी शरीरम्,' (बृ.उ.५-७-७) 'य आत्मनि तिष्ठन्..... यस्यात्मा शरीरम् य आत्मानमन्तरो यमयति' (बृ.उ.मा.पा.५-७-२६) 'यस्याव्यक्तं शरीरम् यस्याक्षरं शरीरम् यस्य मृत्युः शरीरम् एष सर्वभूतान्तरात्मा अपहतपाप्मा दिव्यो देव एको नारायणः' (सुबा.उ.७) 'अन्तः प्रविष्टश्शास्ता जनानां सर्वात्मा' (तै.आ.३-११-३) इत्यादि, श्रुत्यैवोपदिष्टमिति, सूक्ष्मचिदचिद्वस्तुशरीरः परमात्मा, कारणम्; स एव परमात्मा, स्थूलचिदचिद्वस्तुशरीरः, कार्यमिति कारणावस्थायां कार्यावस्थायां च चिदचिद्वस्तुशरीरकतया तत्प्रकारः परमात्मैव सर्वशब्दवाच्य इति, परमात्मशब्देन सर्वशब्दसामानाधिकरण्यं मुख्यमेव उपपन्नतरम् ।

---

१. सर्वोपाधिविनिर्मुक्तं-क २. अनन्यत्वं-क,घ

'अनेन जीवेनात्मनाऽनुप्रविश्य नामरूपे व्याकरवाणि' (छां.उ.६-३-२) 'तत् सृष्ट्वा तदेवानुप्राविशत् तदनुप्रविश्य सच्च त्यच्चाभवत्' (तै.आ.६-२-३) [1]इत्यादि[1] श्रुतिरेव [2]इममर्थ[2]मुपपादयति । सर्वमात्मतयाऽनुप्रविश्य [3]तत्तच्छरीरत्वेन[3] सर्वप्रकारतया, स एव सर्वशब्दवाच्यो भवतीत्यर्थः । 'बहुस्याम्' (छां.उ.६-२-३) इति बहुभवनसंकल्पोऽपि, नामरूपविभागानर्हसूक्ष्मचिदचिद्वस्तु [4]शरीरक[4] तया एकधावस्थितस्य, विभक्तनामरूप-[5]चिदचिच्छरीरकतया[5] बहुप्रकारताविषयः इति वेदवित्प्रक्रिया ।

ये पुनः - निर्विशेषकूटस्थस्वप्रकाशनित्यचैतन्यमात्रं ब्रह्म ज्ञातव्यतयोक्तं - इति वदन्ति; तेषाम्, 'जन्माद्यस्य यतः' (ब्र.सू.१-१-२) 'शास्त्रयोनित्वात्' (ब्र.सू.१-१-३) 'तत्तु समन्वयात्' (ब्र.सू.१-१-४) 'ईक्षतेर्नाशब्दम्' (ब्र.सू.१-१-५) [6]इत्यादेः[6] 'जगद्व्यापारवर्जं प्रकरणादसंनिहितत्वाच्च' (ब्र.सू.४-४-१७) 'भोगमात्रसाम्यलिङ्गाच्च' (ब्र.सू.४-४-२१) 'अनावृत्तिश्शब्दादनावृत्तिश्शब्दात्,' (ब्र.सू.४-४-२२) इत्यन्तस्य सूत्रगणस्य, ब्रह्मणो जगत्कारणत्वबहुभवनसङ्कल्परूपेक्षणाद्यनन्तविशेषप्रतिपादनपरत्वात्, सर्वं सूत्रजातम्, सूत्रकारोदाहृताः - 'यतो वा इमानि भूतानि जायन्ते' (तै.भृ.१-२) 'तदैक्षत बहु स्यां प्रजायेयेति' (छां.उ.६-२-३) इत्याद्याः [7]सर्वश्रुतयश्च[7] न सङ्गच्छन्ते ।

अथोच्येत - 'येनाश्रुतम् श्रुतम्' (छां.उ.६-१-३) इति एकविज्ञानेन सर्वविज्ञानं प्रतिज्ञाय, 'यथा सोम्यैकेन मृत्पिण्डेन' (छां.उ.६-१-४) इति एकमृत्पिण्डारब्धघटशरावादीनां तन्मृत्पिण्डादनन्य[8]द्रव्यतया[8] तज्ज्ञानेन तेषां ज्ञाततैव, ब्रह्मज्ञानेन तदारब्धस्य कृत्स्नस्य चिदचिदात्मकस्य जगतः, तस्मादनतिरिक्तवस्तुतया ज्ञातता सम्भवति - इत्युपपाद्य, 'सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम्' (छां.उ.६-२-१) इति, इदंशब्दवाच्यस्य चिदचिदात्मकप्रपञ्चस्य, सृष्टेः प्राक्, निखिलभेदप्रहाणेन सच्छब्द[9]वाच्येनैकतापत्तिं[9], घटशरावाद्युत्पत्तेः प्राक् उत्पादकमृत्पिण्डैकतापत्तिवत् अभिधाय -

'तदैक्षत बहु[10]स्याम्[10]' (छां.उ.६-२-३) इति, तदेव सच्छब्दवाच्यं परं ब्रह्म, चिदचिदात्मकप्रपञ्चरूपेण आत्मनो बहुभवनम्, एकमृत्पिण्डस्य घटशरावादिरूपेण बहुभवनवत् संकल्प्य, आत्मानमेव तेजःप्रभृतिजगदाकारेण असृजत - इति च अभिधाय,

१. इति-घ २. अमुमर्थ-ग ३. तच्छरीरत्वेन-घ ४. शरीर-घ ५. चिदचिद्वस्तु शरीर-घ ६. इत्यादि-घ ७. श्रुतयश्च-ख ८. प्राप्यतया-क ९. वाच्यतयैकतापत्तिम्-घ १०. स्याम् प्रजायेय-क,घ

'ऐतदात्म्यमिदं सर्वं तत् सत्यं स आत्मा तत् त्वमसि' (छां.उ.६-८-७) [1]इत्यभिधानात्[1], ब्रह्मैकमेव अविद्याकृतेन, [2]पारमार्थिकेन[2] वा उपाधिना सम्बद्धं देवादिरूपेण बहुभूतम् इति[3]वेदविद्भिः[3] अभ्युपगन्तव्यम् - इति, तदयुक्तम्, 'ज्ञाज्ञौ द्वावजावीशनीशौ' (श्वे.उ.१-९) 'नित्यो नित्यानां चेतनश्चेतनानामेको बहूनां यो विदधाति कामान्' (श्वे.उ.६-१३) (कठ.उ.५-१३) इत्यादिश्रुतिभिः, जीवानां अजत्वनित्यत्वबहुत्ववचनात् । यदि - घटशरावादेरुत्पत्तेः प्राक् एकीभूतस्य मृद्द्रव्यस्य उत्पत्त्युत्तरकालभाविबहुत्ववत्, सृष्टेः प्राक् एकीभूतस्यैव ब्रह्मणः, सृष्ट्युत्तर[4]कालीनं[4] नानाविधजीवरूपेण बहुत्वं [5]उच्येत[5], तदा - जीवानाम् अजत्वनित्यत्वबहुत्वादि विरुध्येत, सूत्रविरोधश्च ।

'इतरव्यपदेशाद्धिताकरणादिदोषप्रसक्तिः' (ब्र.सू.२-१-२१) इति ब्रह्मैव देवमनुष्यादि-[6]जीवस्वरूपेण[6] बहुभूतं [7]चेत्[7], आत्मनो हिताकरणादिदोषप्रसक्तिः - इत्युक्त्वा, 'अधिकं तु भेदनिर्देशात्' (ब्र.सू.२-१-२२) इति, जीवात् ब्रह्मणः अर्थान्तरत्वमुक्तम् । तथा च, 'वैषम्यनैर्घृण्ये न सापेक्षत्वात्' (ब्र.सू.२-१-३४) इति, देवादिविषमसृष्टिप्रयुक्तपक्षपातनैर्घृण्ये, जीवानां, [8]पूर्वपूर्वकर्मापेक्षत्वाद्विषमसृष्टेः[8] - इति परिहृते । तथा, 'न कर्माविभागादिति चेन्नानादित्वादुपपद्यते चाप्युपलभ्यते च' इति, (ब्र.सू.२-१-३५) 'सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम्' (छां.उ.६-२-१) इति, सृष्टेः प्राक् अविभागवचनात्, सृष्टेः प्राक् जीवानामभावात् [9]तत्कर्म[9] न सम्भवतीति परिचोद्य, जीवानां तत्कर्मप्रवाहाणां च अनादित्वात् - इति परिहृतम् । 'नात्मा श्रुतेर्नित्यत्वाच्च ताभ्यः' (ब्र.सू.२-३-१८) इति आत्मन उत्पत्त्यभावश्च उक्तः, नित्यत्वं च । स्वाभ्युपगमविरोधश्च । आमोक्षात् [7]जीवभेदस्य[7] अनादित्वं [10]सर्वैरेव हि[10] वेदान्तिभिरभ्युपगम्यते ।

अतः - श्रुतिविरोधात्, सूत्रविरोधात्, स्वाभ्युपगमविरोधाच्च सृष्टेः प्राक् एकत्वावधारणं नामरूपविभागाभावाभिप्रायम्, नामरूपविभागानर्हसूक्ष्मचिदचिद्वस्तुभेदसहं च - इति सर्वैः अभ्युपगम्यते ।

इयांस्तु विशेषः - अविद्यापरिकल्पनेऽपि उपाधिपरिकल्पनेऽपि, ब्रह्मव्यतिरिक्तस्य अविद्यासम्बन्धिनश्च उपाधिसम्बन्धिनश्च चेतनस्य अभावात्, अविद्योपाधिसम्बन्धौ तत्कृताश्च दोषा ब्रह्मण एव भवेयुः - इति ।

---

१. इत्याद्युपपादनात्-क -इत्याद्युपादानात्-ग २. अपारमार्थिकेन वा-क -अपारमार्थिकेन-ग ३. वैदिकैः-क,ख,ग,घ ४. कालं-घ ५. उच्यते-ख,ग ६. रूपेण-ग ७. चेत्तदा-क,ख,घ ८. पूर्वकर्मापेक्षत्वात्-ग ९. तत्तत्कर्म-क,ख,ग १०. सर्वैरेवं-क,ग

सन्मात्रब्रह्मवादेऽपि - प्राक्सृष्टेः सन्मात्रं ब्रह्म एकमेव, सृष्ट्युत्तरकालं भोक्तृभोग्यनियन्तृरूपेण [1]त्रिधा[1] भूतं चेत्, घटशरावमणिकवत्, जीवेश्वरयोः - उत्पत्तिमत्त्वम् अनित्यत्वञ्च स्यात् ।

अथ - [2]एकत्वा[2]पत्तिवेलायामपि, भोक्तृभोग्यनियन्तृशक्तित्रयमवस्थितम् - इति चेत्, किमिदं शक्तित्रयशब्दवाच्यम्? इति विवेचनीयम् ।

यदि - सन्मात्रस्यैकस्यैव भोक्तृ-भोग्य-नियन्तृरूपेण परिणामसामर्थ्यं[3]शक्तित्रय[3] शब्दवाच्यम्, एवं तर्हि मृत्पिण्डस्य घटशरावादिपरिणाम[4]समर्थस्य[4] तदुत्पादकत्वमिव, ब्रह्मण ईश्वरादीनामुत्पादकत्वम् इति, तेषामनित्यत्वमेव ।

अथ - ईश्वरादीनां सूक्ष्मरूपेणावस्थितिरेव शक्तिः - इत्युच्येत, तर्हि [5]तदतिरिक्तस्य सन्मात्रस्य[5] ब्रह्मणः प्रमाणाभावात् तदभ्युपगमे च [6]तदुत्पाद्यतया[6] ईश्वरादीनाम् अनित्यत्वप्रसङ्गाच्च, त्रयाणां नामरूप[7]विभागानर्ह[7] सूक्ष्मदशा[8]पत्तिरेव[8] प्राक्सृष्टेः एकत्वाव[9]धारणावसेया[9] इति वक्तव्यम् । न तदा [10]तेषां ब्रह्मात्मकत्वादेकत्वावधारणं[10] विरुध्येत ।

अतः [11]सर्वावस्थावस्थितस्य[11] चिदचिद्वस्तुनः, ब्रह्मशरीरत्वश्रुतेः सर्वदा सर्वशब्दैः ब्रह्मैव [12]तत्तच्छरीरक[12]तया [13]तत्तद्विशिष्टमेव अभिधीयते[13] इति, स्थूलचिद[14]चिद्वस्तुविशिष्टं[14] ब्रह्मैव कार्यभूतं जगत्, नामरूपविभागानर्हसूक्ष्मचिदचिद्वस्तुविशिष्टं ब्रह्म कारणम् इति, तदेव मृत्पिण्डस्थानीयम्, 'सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम्' (छां.उ.६-२-१) इत्युच्यते, तदेव विभक्तनामरूपचिदचिद्वस्तुविशिष्टं ब्रह्म कार्यम् - इति सर्वं समञ्जसम् ।

श्रुतिन्यायविरोधस्तु तेषां, भाष्ये प्रपञ्चित इति नेह प्रतन्यते । भाष्योदितोऽधिकरणार्थः, [15]ससूत्रविवरणः[15] सुखग्रहणाय[16]सङ्क्षेपेण[16] उपन्यस्यते ।

तत्र प्रथमे पादे - प्रधानपुरुषावेव जगत्कारणतया वेदान्ताः प्रतिपादयन्ति इत्याशंक्य, सर्वज्ञं सत्यसंकल्पं निरवद्यं समस्तकल्याणगुणाकरं ब्रह्मैव जगत्कारणतया प्रतिपादयन्ति इत्युक्तम् ।

---

१. त्रेधा-क २. एकता-ख,ग,घ ३. शक्ति-क,ग,घ ४. सामर्थ्यस्य-ग ५. तदतिरिक्तस्य-ग ६. तदुत्पादकतया-क ७. रूपानर्ह-क,ख,ग ८ पत्तिमात्रमेव-क,घ ९. अवसेयं-क,ख,ग १०. तदा तेषां बहुत्वादेकत्वावधारणं-क,ख,घ -तदा तेषां बहुत्वादेकत्वावधारणं हि-ग ११. सर्वावस्थस्य-क,ख,ग १२. तत्तच्छरीरतया-क,ख,ग १३. चिद्विशिष्टं-क,ख १४. ससूत्रनिरूपणमुखेन-क १५. सूत्रविवरण-ख १६. सङ्ग्रहेण-क,ख,ग

द्वितीयतृतीय[1]चतुर्थ[1]पादेषु कानिचित् वेदान्तवाक्यानि प्रधानादिप्रतिपादनपराणि इति, तन्मुखेन सर्वाक्षेपमाशंक्य, तान्यपि ब्रह्मपराणि - इत्युक्तम् । तत्रास्पष्टजीवादिलिङ्गकानि वाक्यानि द्वितीये निरूपितानि; स्पष्टलिङ्गकानि तृतीये; चतुर्थे तु प्रधानानादिप्रतिपादनच्छायानुसारीणीति विशेषः ।

अतः - प्रथमेऽध्याये सर्वं वेदान्तवाक्यजातं सार्वज्ञ्यसत्यसङ्कल्पत्वादियुक्तं ब्रह्मैव, जगत्कारणतया प्रतिपादयति - इति स्थापितम् ।

द्वितीयेऽध्याये - तस्यार्थस्य दुर्धर्षणत्वप्रतिपादनेन द्रढिमा - उच्यते ।

तत्र प्रथमे पादे - सांख्यादिस्मृतिविरोधात् न्यायविरोधाच्च [2]प्रसक्तो दोषः[2] परिहृतः ।

द्वितीये तु - सांख्यादिवेदबाह्यपक्षप्रतिक्षेपमुखेन [3]तस्यैवा[3]दरणी[4]यता स्थिरीकृता[4] ।

तृतीयचतुर्थयोः - वेदान्तवाक्यानाम् [5]अन्योन्यविप्रतिषेधादिदोषगन्धाभावख्यापनाय[5] वियदादीनां ब्रह्मकार्यताप्रकारः विशोध्यते ।

तत्र तृतीये पादे च चिदचित्प्रपञ्चस्य ब्रह्मकार्यत्वे [6]सत्यपि[6], अचिदंशस्य स्वरूपान्यथाभावेन कार्यत्वम्, चिदंशस्य स्वभावान्यथाभावेन ज्ञानसंकोचविकासरूपेण कार्यता उदिता ।

चतुर्थे तु - जीवोपकरणानामिन्द्रियादीनामुत्पत्तिप्रकारः, इति प्रथमेन "अध्यायद्वयेन मुमुक्षुभिः उपास्यं निरस्तनिखिलदोषगन्धम्", अनवधिकातिशयासंख्येय[7]कल्याणगुणगणं[7], निखिलजगदेककारणं ब्रह्म - इति प्रतिपादितम् ।

"उत्तरेण" द्वयेन - ब्रह्मोपासनप्रकारः, तत्फलभूतमोक्षस्वरूपञ्च चिन्त्यते ।

तत्र तृतीयस्य प्रथमे पादे - [8]ब्रह्मोपासिसिषोत्पत्तये[8] जीवस्य संसरतो दोषाः [9]कीर्तिताः[9] ।

द्वितीये च - [10]उपासिसिषोत्पत्तय[10] एव" ब्रह्मणो निरस्तनिखिलदोषताकल्याणगुणाकरतारूपोभयलिङ्गता प्रतिपाद्यते ।

तृतीये तु - ब्रह्मोपासनैकत्वनानात्वविचारपूर्वकम् उपासनेषु उपसंहार्यानुपसंहार्यगुणविशेषाः प्रपञ्चिताः ।

---

१. चतुर्थेषु-क,ख,ग २. प्रसक्तदोषः-ख ३. अस्यैव-ख ४. यत्वम् स्थिरीकृतम्-ग ५. अन्योन्यविरोदादिदोषाभावज्ञापनाय-क ६. सत्यप्यस्य-क,ख,ग ७. कल्याणगुणाकरम्-ग ८. ब्रह्मौपासिसिषोत्पत्तये-क ९. प्रकीर्तिताः-क,ख,ग १०. उपासनेच्छोत्पत्तय-ख

चतुर्थे तु - उपासनस्य वर्णाश्रमधर्मेतिकर्तव्यताकत्वमुक्तम् ।

चतुर्थेऽध्याये - ब्रह्मोपासनफलचिन्ता क्रियते ।

तत्र प्रथमे पादे - ब्रह्मोपासनफलं वक्तुम् उपासन [१]स्वरूप[१]पूर्वकोपासनानुष्ठानप्रकारः, विद्यामाहात्म्यञ्च उच्यते ।

द्वितीये तु ब्रह्मोपासीनानां ब्रह्मप्राप्तिगत्युपक्रमप्रकारः चिन्तितः ।

[२]तृतीये तु[२] - अर्चिरादिगतिस्वरूपम्, अर्चिरादिनैव ब्रह्मप्राप्तिः - इति च प्रतिपाद्यते ।

[३]चतुर्थे तु - मुक्तस्य ब्रह्मानुभवप्रकारश्चिन्त्यते[३] ।

अतो मुमुक्षुभिर्ज्ञातव्यं निरस्तनिखिलदोषगन्धम् [४]अनवधि[४]कातिशयासंख्येयकल्याण[५]गुणाकरं[५] निखिलजगदेककारणं परंब्रह्म, तज्ज्ञानञ्च मोक्षसाधनम् असकृदावृत्तस्मृतिसन्तानरूपम् उपासनात्मकम्, [६]उपासनफलञ्च[६] अर्चिरादिना परंब्रह्म उपसम्पद्य स्वस्वरूपभूतज्ञानादिगुणाविर्भावपूर्वकानन्तमहाविभूत्यनवधिकातिशयानन्दब्रह्मानुभवाऽपुनरावृत्तिरूपः इति शारीरकशास्त्रेण उक्तं भवति ।

समन्वयाध्यायः

प्रथमः पादः - अयोगव्यवच्छेदपादः

१. जिज्ञासाधिकरणम् - १-१-१

[अधिकरणार्थः- सिद्धेऽपि वस्तुनि शब्दानां व्युत्पत्तिसमर्थनेन ब्रह्मणो जिज्ञास्यत्वसाधनम्]

१. अथातो ब्रह्मजिज्ञासा १-१-१

ब्रह्ममीमांसाविषयः । सा किमारम्भणीया? उत अनारम्भणीया? इति संशयः ।

तदर्थं परीक्ष्यते - वेदान्ताः; किं ब्रह्मणि प्रमाणम्? उत नेति । 'तदर्थं परीक्ष्यते' - परिनिष्पन्नेऽर्थे शब्दस्य बोधनसामर्थ्यावधारणं सम्भवति? न? इति ।

न सम्भवति इति पूर्वः पक्षः ।

सम्भवति इति राद्धान्तः ।

---

१. स्वरूपनिरूपणपूर्वकोपास-क -स्वरूपनिरूपणशोधनपूर्वकोपास-घ २. तृतीये-क ३. चतुर्थे तु अर्चिरादिना ब्रह्मप्राप्तस्य मुक्तस्य ब्रह्मानुभवप्रकारः पुनरावृत्तिश्च फलमिति प्रच्छिद्यते-ख ४. गन्धानवधि-क ५. गुणगणाकरम्-क ६. उपासनञ्च-ग

यदा न सम्भवति, तदा परिनिष्पन्नेऽर्थे शब्दस्य बोधनसामर्थ्याभावात्, सिद्धरूपे ब्रह्मणि न वेदान्ताः प्रमाणमिति तद्विचाराकारा ब्रह्ममीमांसा न आरम्भणीया ।

यदा सम्भवति, तदा सिद्धेऽप्यर्थे शब्दस्य बोधनसामर्थ्य[१]सम्भवात्[१], वेदान्ताः ब्रह्मणि प्रमाणमिति, सा च आरम्भणीया स्यात् ।

[२]अत्र[२] पूर्वपक्षवादी मन्यते - वृद्धव्यवहारादन्यत्र व्युत्पत्त्यसम्भवात्, व्यवहारस्य च कार्यबुद्धिपूर्वकत्वेन कार्य एवार्थे शब्दशक्त्यवधारणात्, परिनिष्पन्नेऽर्थे ब्रह्मणि न वेदान्ताः प्रमाणमिति, तद्विचाररूपा ब्रह्ममीमांसा नारम्भणीया - इति ।

सिद्धान्तस्तु - बालानां मातापितृप्रभृतिभिः अम्बातातमातुल[३]शशि[३]पशुपक्षिमृगादिषु अङ्गुल्या निर्दिश्य [४]तत्तदभिधायिनः शब्दान्[४] प्रयुञ्जानैः क्रमेण बहुशः शिक्षितानां तत्तच्छब्दश्रवणसमनन्तरं स्वात्मानामेव तदर्थबुद्ध्युत्पत्तिदर्शनात्, शब्दार्थयोः सम्बन्धान्तरादर्शनात् संकेतयितृपुरुषाज्ञानाच्च बोध्यबोधकभाव एव शब्दार्थयोः सम्बन्धः इति निश्चिन्वानानां [५]परिनिष्पन्नेऽर्थे[५] शब्दस्य बोधकत्वावधारणं सम्भवतीति, ब्रह्मणि [६]वेदान्तवाक्यानां[६] प्रामाण्यात् [७]तदर्थविचाराकारा[७] ब्रह्ममीमांसा आरम्भणीया - [८]इति[८] ।।

सूत्रार्थस्तु - अथ इति आनन्तर्ये । अतः इति च वृत्तस्य हेतुभावे । ब्रह्मणो जिज्ञासा ब्रह्मजिज्ञासा [९]ज्ञातुमिच्छा जिज्ञासा । इच्छायाः[९] [१०]इष्यमाण[१०]प्रधानत्वादिष्यमाणं ज्ञानमिहाभिप्रेतम्, पूर्ववृत्तात् अल्पास्थिरफलकेवलकर्माधिगमादनन्तरं तत एव हेतोः अनन्तस्थिरफलब्रह्माधिगमः कर्तव्यः इति ।।

।। इति जिज्ञासाधिकरणम् ।। १ ।।

२. जन्माद्यधिकरणम् (१-१-२)

[अधिकरणार्थः-ब्रह्मणः सर्वकर्तृत्वम्]

२. जन्माद्यस्य यतः (१-१-२)

तैत्तिरीयके - 'यतो वा इमानि भूतानि जायन्ते । येन जातानि जीवन्ति यत् प्रयन्त्यभिसंविशन्ति । तद्विजिज्ञासस्व । तद्ब्रह्म' (तै.उ.भृ.१-२) इत्येतद्वाक्यं विषयः ।

किमेतत् जिज्ञास्यतया प्रतिज्ञातं ब्रह्म, जगज्जन्मादिकारणतया लक्षणतः प्रतिपादयितुं शक्नोति? न वा - इति संशयः ।

---

१. सद्भावात्-क २. तत्र-क,ख,ग,घ ३. शिशु-क ४. तत्तदभिधायिशब्दान्-क,ख,ग
५. परिनिष्पन्नेप्यऽर्थे-ग ६. वेदान्तानां-क,ख,ग ७. तदर्थविचार-ग ८. इति-अथाऽतो ब्रह्मजिज्ञासा -क,ख
९. इच्छायाः-क,ग १०. इष्यमाणं-क

न शक्नोति - इति पूर्वः पक्षः । कुतः? [1]जगज्जन्मादीनाम्[1] उपलक्षणतया, विशेषणतया [2]वा[2] ब्रह्मलक्षणत्वासम्भवात् ।

उप[3]लक्षणत्वे हि[3]! उपलक्ष्यस्य आकारान्तरयोगः अपेक्षितः । न चेह तदस्ति । अतः उपलक्षणत्वं न सम्भवति ।

विशेषणत्वेऽपि अनेकविशेषणविशिष्टतया अपूर्वस्यैकस्य प्रतिपादकत्वं न सम्भवति । विशेषणानां व्यावर्तकत्वेन विशेषणबहुत्वे ब्रह्मबहुत्वप्रसक्तेः ।

राद्धान्तस्तु - एकस्मिन् अविरुद्धानां विशेषणानाम् अनेकत्वेऽपि श्यामत्वयुवत्वादि विशिष्टदेवदत्तवत् जगज्जन्मादिविशिष्टं ब्रह्मैकमेव [4]विशेष्यं भवति[4] । [5]उपलक्षणत्वे[5] [6]जन्मा[6]दिभिरूपलक्ष्यस्य ब्रह्मशब्दावगतबृहत्वाद्याकाराश्च सन्तीति जगज्जन्मादिकारणं ब्रह्म इति लक्षणतः प्रतिपादयितुं [7]शक्नोति इति[7] ।

[8]सूत्रार्थः[8] - अस्य विविधविचित्रभोक्तृभोग्य[9]पूर्णस्य[9] जगतः यतो जन्मादि, तत् ब्रह्म इति प्रतिपादयितुं शक्नोति एतद्वाक्यं इति ।। २ ।।

।। इति जन्माद्यधिकरणम् ।। २ ।।

३. शास्त्रयोनित्वाधिकरणम् (१-१-३)

[अधिकरणार्थः-ब्रह्मणः शास्त्रैकगम्यत्वम्]

३. शास्त्रयोनित्वात् (१-१-३)

'यतो वा इमानि' (तै.उ.भृ.१-२) इत्यादि वाक्यमेव विषयः ।

तत् किं जगत्कारणे ब्रह्मणि प्रमाणम्? उत न? - इति संशयः ।

नैतत् प्रमाणम् - इति पूर्वः पक्षः । अनुमानसिद्धब्रह्मविषयत्वात् । प्रमाणान्तराविषये हि! शास्त्रं प्रमाणम् । जगतः सावयवत्वेन कार्यत्वात्, [10]कार्यस्य[10] [11]स्वोपादनोपकरण[11]-सम्प्रदानप्रयोजनाद्यभिज्ञकर्तृकत्वात्, जगन्निर्माण[12]कार्यचतुरः[12] कर्मपरवश-

१. जन्मादीनाम्-ग २. च-क,ख,ग,घ ३. लक्षणत्वेऽपि-ख ४. भवति-क,ख,ग,घ ५. उपलक्षणत्वेऽपि-क,ख,ग,घ ६. जगज्जन्मा-घ ७. शक्नोति-ग ८. सूत्रार्थस्तु-क,ख ९. रूपस्य-ग १०. कार्यस्य च-क,ख,ग,घ ११. चो पादन-ग १२. चतुरः-क,ख,ग,घ

परिमितशक्त्यादिक्षेत्रज्ञविलक्षणः सर्वज्ञः [१]सर्वशक्तः[१] सर्वेश्वरः अनुमानसिद्ध इति, न तस्मिन्, 'यतो वा इमानि भूतानि' (तै.उ.भृ.१-२) इत्यादिवाक्यं प्रमाणम् - इति ।

राद्धान्तस्तु - जगतः कार्यत्वेऽपि एकदैव एकेनैव कृत्स्नं जगत् निर्मितम् [२]इत्यत्र[२] प्रमाणाभावात्; क्षेत्रज्ञानामेव विलक्षणपुण्यानां ज्ञानशक्तिवैचित्र्यसम्भावनया कदाचित् कस्यचित् जगदेकदेशनिर्माणसामर्थ्यसम्भवात्, तदतिरिक्तपुरुषानुमानं न सम्भवतीति शास्त्रैकप्रमाणकत्वात् [३]ब्रह्मणः तत्प्रतिपादकत्वेन, तस्मिन्[३] 'यतो वा इमानि भूतानि' (तै.उ.भृ.१-२) इत्यादिवाक्यं प्रमाणम् - इति ।

[४]शास्त्रं[४] योनिः यस्य, कारणं प्रमाणम्, तद् ब्रह्मशास्त्रयोनिः प्रमाणान्तराविषयत्वेन शास्त्रैकप्रमाणकत्वात् ब्रह्मणः, तस्मिन्, 'यतो वा इमानि' (तै.उ.भृ.१-२) इत्यादिवाक्यं प्रमाणम् - [५]इति सूत्रार्थः[५] ।। ३ ।।

।। इति शास्त्रयोनित्वाधिकरणम् ।। ३ ।।

४. समन्वयाधिकरणम् (१-१-४)

[अधिकरणार्थः- ब्रह्मणः स्वतः परमपुरुषार्थतया अन्वयः]

४. तत्तु समन्वयात् (१-१-४)

ब्रह्मणः शास्त्रप्रमाणकत्वं सम्भवति? न? इति विचार्यते ।

न सम्भवति - इति पूर्वः पक्षः । कुतः? प्रवृत्तिनिवृत्त्यन्वयविरहिणो ब्रह्मणः स्वरूपेण अपुरुषार्थत्वात्, पुरुषार्थ[६]बोधकत्वेन[६] च शास्त्रस्य प्रामाण्यात्, मोक्षसाधनब्रह्मध्यानविधिपरत्वेऽपि, असत्यपि ब्रह्मणि तद्ध्यानविधानसम्भवात्, न ब्रह्मसद्भावे तात्पर्यमिति ब्रह्मणः शास्त्रप्रमाणकत्वं न सम्भवति - इति ।

राद्धान्तस्तु - अतिशयितगुणपितृपुत्रादिजीवनज्ञानवत् अनवधिकातिशयानन्द-[७]स्वरूप[७]ब्रह्मज्ञानस्य निरतिशयपुरुषार्थत्वात् तस्य शास्त्रप्रमाणकत्वं सम्भवति, 'आनन्दो

१. सर्वशक्तिः-क,ख,ग २. इति-क,ख,ग ३. निखिलजगदेककारणस्य परस्य ब्रह्मणो-ख,घ
४. सूत्रार्थस्तु शास्त्रं-ग ५. इति-घ ६. अवबोधित्वेन-क,ख,ग ७. रूप-ख

ब्रह्म' (तै.भृ.६-१) 'यदेष आकाश आनन्दो न स्यात्' (तै.आ.७-१) 'यतो वाचो निवर्तन्ते अप्राप्य मनसा सह । आनन्दं ब्रह्मणो विद्वान्' (तै.आ.४-१) 'इत्यादिभिः'[1] अनवधिकातिशयानन्दस्वरूपं ब्रह्म इति हि प्रतिपाद्यते ।

अतो ब्रह्म स्वेन परेण वाऽप्यनुभूयमानं निरतिशयानन्दस्वरूपमेवेति तत्प्रतिपादन-परस्यैव साक्षात् पुरुषार्थान्वयः । प्रवृत्तिनिवृत्तिपरस्य तु तत्साध्यफलसम्बन्धात् पुरुषार्थान्वयः इति ।

सूत्रार्थः - तु शब्दः प्रसक्ताऽशङ्कानिवृत्त्यर्थः । तत् - पूर्वसूत्रोदितं ब्रह्मणः शास्त्रयोनित्वं सिद्ध्यति । समन्वयात् सम्यक् पुरुषार्थतया अन्वयः समन्वयः । वेदितुः निरतिशयानन्दस्वरूपत्वेन परमपुरुषार्थरूपे परे ब्रह्मणि वेदकतया शास्त्रस्यान्वयात् ब्रह्मणः शास्त्रप्रमाणकत्वं सिद्ध्यत्येव इति ।। ४ ।।

।। इति समन्वयाधिकरणमम् ।। ४ ।।

५. ईक्षत्यधिकरणम् (सू.५-१२)

[अधिकरणार्थः-सृष्ट्यनुगुणेक्षणकर्तृ अचेतनभूतप्रधानेतरत् परं ब्रह्म]

५. ईक्षतेर्नाशब्दम् (१-१-५)

'येनाश्रुतं श्रुतं भवति' (छां.उ.६-१-३) इत्यादि जगत्कारणवादि[2]वेदान्त[2]वेद्यं विषयः । तत् किं साङ्ख्योक्तं प्रधानम्? उत अनवधिकातिशयानन्दं ब्रह्म इति संशयः ।

प्रधानम् - इति पूर्वपक्षः । कुतः? प्रतिज्ञादृष्टान्तान्वयेन अनुमानाकारवाक्यवेद्यत्वात् । 'येनाश्रुतं श्रुतं भवति' (छां.उ.६-१-३) इत्यादिना 'एकविज्ञानेन सर्वविज्ञानं प्रतिज्ञाय', 'यथा सोम्यैकेन मृत्पिण्डेन' (छां.उ.६-१-४) इति दृष्टान्तेन [3]हि उपपद्यते[3], एवम् आनुमानिकमेव एतद्वाक्यवेद्यम् - इति निश्चीयते । 'सदेव सोम्येदम्' (छां.उ.६-२-१) इति सच्छब्दः प्रधानविषयः । 'तदैक्षत बहु स्याम्' (छां.उ.६-२-३) इति च गौणमीक्षणं भवितुमर्हति; 'तत्तेज ऐक्षत' (छां.उ.६-२-३) इत्यादिगौणेक्षणसाहचर्याच्च ।

१. इत्येवमादिभिः-क,ख,घ २. वेदान्तवाक्य-क,ख,ग ३. उपपद्यते-क,ख,ग,घ

राद्धान्तस्तु - 'तदैक्षत बहु स्याम्' (छां.उ.६-२-३) इति बहुभवनसंकल्परूपेक्षणान्वयात्, 'सदेव सोम्य' (छां.उ.६-२-१) इति कारणवाचिसच्छब्दविषयो न अचेतनं प्रधानम्; अपि तु सार्वज्ञ्यसत्यसङ्कल्प[1]त्वादियुक्तं[1] परं ब्रह्मैव - इति निश्चीयते । न च अनुमानाकारम् एतद्वाक्यम्; हेत्वनुपादानात् । अन्यज्ञानेन अन्यज्ञानासम्भवपरिजिहीर्षया तु दृष्टान्तोपादानम् । न च मुख्येक्षणसम्भवे गौणपरिग्रहसम्भवः । तेजःप्रभृतिष्वपि न गौणमीक्षणम्, तेज आदिशब्दानां तेजःप्रभृति[2]शरीरकस्या[2]न्तर्यामिणो वाचकत्वात् इति परमेव ब्रह्म जगत्कारणवादिवेदान्तवेद्यम् - इति ।

सूत्रार्थः - '[3]ईक्षतेरिति[3]' ईक्षतिधात्वर्थः ईक्षणम् । शब्दः प्रमाणं यस्य न भवति, तत् अशब्दं [4]परोक्तम्[4] आनुमानिकं प्रधानम् । 'सदेव सोम्येदम्' (छां.उ.६-२-१) इति जगत्कारणतया प्रतिपादितान्वयिनः ईक्षणव्यापारात् न अचेतनम् अशब्दं तत्; अपि तु सर्वज्ञं [5]सत्यसङ्कल्पं ब्रह्मैव[5] जगत्कारणम् इति निश्चीयते - इति ।। ५ ।।

६. गौणश्चेन्नात्मशब्दात् (१-१-६)

'तत्तेज ऐक्षत' (छां.उ.६-२-३) इति अचेतनगतगौणेक्षणसाहचर्यात्, 'तदैक्षत' (छां.उ.६-२-३) [6]इत्यत्र[6] ईक्षतिः गौणः - इति चेत् न - आत्मशब्दात् । सच्छब्दाभिहिते ईक्षितरि 'ऐतदात्म्यमिदं सर्वं तत् सत्यं स आत्मा' (छां.उ.६-८-७) इति श्रूयमाणात् चेतनवाचिनः आत्मशब्दात् अयम् ईक्षतिः मुख्य एव इति प्रतीयते । 'ऐतदात्म्य'मिदं सर्वम्' (छां.उ.६-८-७) इति तेजः प्रभृतीनामपि तदात्मकत्वावगमात् तेजःप्रभृतीक्षणमपि मुख्यमेव इत्यभिप्रायः ।। ६ ।।

७. तन्निष्ठस्य मोक्षोपदेशात् (१-१-७)

'इतश्च सच्छब्दाभिहितं न प्रधानम् । अपि तु परमेव ब्रह्म; 'तत्त्वमसि' (छां.उ.६-८-७) इति सदात्मकतया प्रत्यगात्मानुसन्धाननिष्ठस्य 'तस्य तावदेव चिरं यावन्न विमोक्ष्ये अथ संपत्स्ये' (छां.उ.६-४-३) इति मोक्षोपदेशात् [7]तत्कारणं[7] परमेव ब्रह्म ।। ७ ।।

---

१. युक्तं-क,ख २. शरीरस्य-क,ग ३. ईक्षतिः-क,ख,ग ४. परम्-ख ५. ब्रह्मैव-क,ख,ग ६. इति-क,ग
७. न तत्कारणमपि तु-ग

८. हेयत्वावचनाच्च । (१-१-८)

यदि प्रधानम् इह कारणतया विवक्षितम्, तदा तस्य मोक्षविरोधित्वात् हेयत्वम् उच्येत । न चोच्यते । अतश्च न प्रधानम् ।। ८ ।।

९. प्रतिज्ञाविरोधात् (१-१-९)

'प्रधानवादे'[1] प्रतिज्ञा च विरुध्यते - 'येनाश्रुतं श्रुतम्' (छां.उ.६-१-३) इति वक्ष्यमाणकारणविज्ञानेन चेतनाचेतनमिश्रकृत्स्नप्रपञ्चज्ञानं हि प्रतिज्ञातम् । चेतनांशं प्रति प्रधानस्य अकारणत्वात्, तज्ज्ञानेन चेतनांशो न ज्ञायत इति न प्रधानं कारणम् ।। ९ ।।

१०. स्वाप्ययात् (१-१-१०)

'स्वमपीतो भवति.... सता सोम्य तदा सम्पन्नो भवति' (छां.उ.६-८-१) इति जीवस्य सुषुप्तस्य '[2]स्वाप्ययश्रुतेः'[2] । स्वकारणे हि अप्ययः स्वाप्ययः । जीवं प्रति प्रधानस्य अकारणत्वात् स्वाप्ययश्रुतिः विरुध्यते । अतश्च न प्रधानम्, अपि तु ब्रह्मैव ।। १०।।

११. गतिसामान्यात् । (१-१-११)

इतरोपनिषद्गतिसामान्यात् अस्यां च उपनिषदि न प्रधानं कारणं विवक्षितम् । इतरासु च उपनिषत्सु - 'यः सर्वज्ञः सर्ववित् - तस्मादेतत्ब्रह्म नामरूपमन्नञ्च जायते' (मुं.उ.१-१-१०) 'पराऽस्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च' (श्वे.उ ६-८) 'स कारणं करणाधिपाधिपः' (श्वे.उ.६-९) 'आत्मनि खल्वरे विज्ञाते सर्वमिदं [3]विदितम्[3]' (बृ.उ.६-५-६) 'तस्य ह वा एतस्य महतो भूतस्य निश्वसितमेतद्यदृग्वेदः' (बृ.उ.६-५-११) 'पुरुष एवेदं सर्वं यद्भूतं यच्च भव्यम्' (पु.सू.२) 'तस्माद्विराडजायत' (पु.सू.५) 'आत्मा वा इदमेक एवाग्र आसीत् - स इमान् लोकानसृजत' (ऐत.उ.१-१-१) तस्माद्वा एतस्मादात्मन

---

१. प्रधानकारणवादे-ख,ग २. स्वाप्ययश्श्रूयते-क,ख,घ ३. विज्ञातं भवति-क,ख,ग,घ

आकाशः सम्भूतः (तै.उ.आन.१-२) 'एको ह वै नारायण आसीत् - स एकाकी [1]न रमते[1]' (महो.१-१) इति सर्वज्ञः पुरुषोत्तम एव कारणतया प्रतिपाद्यते । अस्याश्च तद्गतिसामान्यात् अत्रापि स एव कारणतया प्रतिपादनमर्हतीति [2]च न[2] प्रधानम् ।। ११ ।।

१२. श्रुतत्वाच्च । (१-१-१२)

'[3]श्रुतमेव हि[3]' अस्यामुपनिषदि - 'आत्मत एवेदं सर्वम्' (छां.उ.७-२६-१) इति । अतश्च 'सदेव [4]सोम्य[4]' (छां.उ.६-२-१) इत्यादिजगत्कारणवादिवेदान्तवेद्यं न प्रधानम्; सर्वज्ञंसत्यसङ्कल्पं परमेव [5]ब्रह्मेति[5] स्थितम् ।। १२ ।।

।। इति ईक्षत्यधिकरणम् ।। ५ ।।

६. आनन्दमयाधिकरणम् (१-१-६) (सू.१३-२०)

[अधिकरणार्थः-आनन्दमयः परं ब्रह्मैव, न जीवः]

१३. आनन्दमयोऽभ्यासात् (१-१-१३)

तैत्तिरीयके - 'तस्माद्वा एतस्मादात्मन आकाशस्सम्भूतः' (तै.आन.१-२) इति प्रकृत्य 'तस्माद्वा एतस्माद्विज्ञानमयात् । अन्योऽन्तर आत्माऽऽनन्दमयः' ।। (तै.आन.५-२) इत्यत्र जगत्कारणतयाऽवगत आनन्दमयः किं प्रत्यगात्मा? उत परमात्मा इति संशयः ।

प्रत्यगात्मा - इति पूर्वः पक्षः । कुतः? 'तस्यैष एव शारीर आत्मा' (तै.आन.५-१) इति आनन्दमयस्य शारीरत्वश्रवणात् । शारीरो हि शरीरसम्बन्धी । स च प्रत्यगात्मैव । तस्य चेतनत्वेन ईक्षापूर्विका [6]च सृष्टिः[6] उपपद्यत - इति ।

राद्धान्तस्तु - 'सैषाऽनन्दस्य मीमांसा भवति । (तै.आन.८-१) इत्यारभ्य 'यतो वाचो निवर्तन्ते । अप्राप्य मनसा सह । आनन्दं ब्रह्मणो विद्वान्' (तै.आन.९-१) इति निरतिशयदशाशिरस्कः अभ्यस्यमान आनन्दः प्रत्यगात्मनोऽर्थान्तरभूतस्य परस्यैव ब्रह्मण

---
१. रमेत-क,ग २. न च-ग ३. श्रुतमेव-क ४. सोम्येदं-ख ५. ब्रह्मेव-ख ६. सृष्टिः-ग

इति निश्चीयते । 'शारीरात्मत्वञ्च' परमात्मन एव । 'तस्माद्वा एतस्मादात्मन आकाशस्सम्भूतः' (तै.आन.१-२) इति आकाशादिजगत्कारणतयाऽवगत एव अन्नमयस्य शारीर आत्मा इति प्रतीयते; आत्मान्तरानिर्देशात् ।

श्रुत्यन्तरेषु पृथिव्यक्षरादीनां शरीरत्वं परमात्मन आत्मत्वञ्च श्रूयते - 'यस्य पृथिवी शरीरम्' (सु.उ.७) इत्यारभ्य, 'एष सर्वभूतान्तरात्माऽपहतपाप्मा दिव्यो देव एको नारायणः' (सु.उ.७) इति । अन्नमयस्याऽऽत्मैव प्राणमयादिषु, 'तस्यैष एव शारीर आत्मा यः पूर्वस्य' (तै.आन.५-१) इति अनुकृष्यत इति प्रत्यगात्मनो विज्ञानमयस्य [2]च स एव[2] शारीर आत्मा । आनन्दमये तु, 'तस्यैष एव शारीर आत्मा । यः पूर्वस्य' (तै.आन.५-१) इति निर्देशः, आनन्दमयस्य अनन्यात्मत्वप्रदर्शनार्थः । अतः जगत्कारणतया निर्दिष्ट आनन्दमयः परमात्मैव इति ।

सूत्रार्थस्तु - आनन्दमयशब्दनिर्दिष्टः आकाशादिजगत्कारणभूतः प्रत्यगात्मनोऽर्थान्तरभूतः परमात्मा ।

कुतः? [3]तस्या[3]नन्दस्य' निरतिशयत्वप्रतीतिबलात् । 'स एको मानुष आनन्दः । ते ये शतम्' (तै.आन.१) इत्याद्यभ्यासात्, तस्य च प्रत्यगात्मनि असम्भावितस्य तदतिरिक्ते परमात्मन्येव सम्भवात् ।। १३ ।।

१४. विकारशब्दान्नेति चेन्न प्राचुर्यात् (१-१-१४)

'आनन्दमयः' इति विकारार्थात् मयट्च्छब्दात् न अयम् अविकृतः परमात्मा । अस्य च विकारार्थत्वमेव युक्तम्; 'अन्नमयः' इति विकारोपक्रमादिति चेत् न; प्रत्यगात्मन्यपि, 'न जायते म्रियते वा' (कठ.उ.१-२-१८) इत्यादि विकारप्रतिषेधात् प्राचुर्यार्थ एव अयं मयट् इति निश्चयात् । अस्मिंश्चानन्दे, 'यतो वाचो निवर्तन्ते' (तै.आन.९-१) इति

१. शरीरत्वं च-ग २. स एव क,ख,ग,घ ३. अस्य-क,ख,ग

वक्ष्यमाणात् प्राचुर्यात्, अयम् आनन्दप्रचुरः परमात्मैव । न हि अनवधिकातिशयरूपः प्रभूतानन्दः प्रत्यगात्मनि सम्भवति ।। १४ ।।

१५. तद्धेतुव्यपदेशाच्च (१-१-१५)

'एष ह्येवानन्दयाति' (तै.आन.७-१) इति जीवान् प्रति आनन्दयितृत्वव्यपदेशात्(च्च) [१]अयं[१] परमात्मैव ।। १५ ।।

१६. मान्त्रवर्णिकमेव च गीयते (१-१-१६)

'सत्यं ज्ञानमनन्तं ब्रह्म' (तै.आन.१-१) इति मन्त्रवर्णोदितं ब्रह्मैव, 'तस्माद्वा एतस्मादात्मनः' (तै.आ.१-२) इत्यारभ्य, 'आनन्दमयः' [२]इति[२] च गीयते । ततश्चानन्दमयो ब्रह्म ।। १६ ।।

प्रत्यगात्मनः [३]परिशुद्धं स्वरूपं[३] मन्त्रवर्णोदितम् इत्याशङ्क्याऽऽह -

१७. नेतरोऽनुपपत्तेः (१-१-१७)

परस्माद्ब्रह्मणः इतरः प्रत्यगात्मा न मन्त्रवर्णोदितः; तस्य, इति विपश्चित्वानुपपत्तेः; विविधं पश्यच्चित्वं हि विपश्चित्वम्; । तच्च, 'सोऽकामयत बहु स्यां प्रजायेय' (तै.आन.६-२) इत्यादिवाक्योदितनिरुपाधिकबहुभवनसङ्कल्पं[४]रूपं[४] सर्वज्ञत्वम् । तत्तु प्रत्यगात्मनः परिशुद्धं[५]स्यापि[५] न सम्भवति, 'जगद्व्यापारवर्जं [६]प्रकरणादसन्निहितत्वाच्च (ब्र.सू.४-४-१७) इति[६] वक्ष्यमाणत्वात् । अतः परं ब्रह्मैव मान्त्रवर्णिकम् ।। १७ ।।

१८. भेदव्यपदेशाच्च । (१-१-१८)

'भीषाऽस्माद्वातः पवते' (तै.आन.८-१) इत्यादिना अग्निवायुसूर्यादिजीव[७]वर्गस्य[७] आनन्दमयात् प्रशासितुः, प्रशासितव्यत्वेन भेदो व्यपदिश्यते । अतश्च आनन्दमयः परमात्मा इति । '[८]योजनान्तरम्[८]' -

---

१. चायम्-ख २. इति-क,ख,ग ३. परिशुद्ध-क,ग ४.पूर्वकम्-क,ख,ग ५. स्वरूपस्यापि-ग ६. प्रकरणादि-क,ख,ग,घ ७. वर्गस्यापि ८. योजना-ग

'तस्माद्वा एतस्माद्विज्ञानमयात् । अन्योऽन्तर आत्माऽऽनन्दमयः' (तै.आन.५-२) इति विज्ञानमयाज्जीवात्, आनन्दमयस्य भेदो व्यपदिश्यते । विज्ञानमयो [1]हि जीव[1] एव; न बुद्धिमात्रम्, मयट्छ्रुतेः । अतश्चानन्दमयः परमात्मा ।। १८ ।।

१९. कामाच्च नानुमानापेक्षा । (१-१-१९)

'सोऽकामयत' (तै.आन.६-२) इत्यारभ्य, 'इदं सर्वमसृजत' (तै.आन.६-२) इति कामादेव जगत्सर्गश्रवणात् अस्यानन्दमयस्य जगत्सर्गे -

न अनुमानगम्यप्रकृत्य[2]पेक्षाऽपि प्रतीयते[2] । [3]प्रत्यगात्मनः[3] [4]यस्य[4] कस्यचिदपि सर्गे प्रकृत्यपेक्षाऽस्ति । अतश्च अयं प्रत्यगात्मनोऽन्यः परमात्मा ।। १९ ।।

२०. अस्मिन्नस्य च तद्योगं शास्ति । (१-१-२०)

'रसो वै सः । रसं ह्येवायं लब्ध्वानन्दी भवति' (तै.आन.७-१) इति अस्मिन् आनन्दमये रसशब्दनिर्दिष्टे, '[5]अस्य[5]' 'अयं' शब्दनिर्दिष्टस्य जीवस्य, तल्लाभादानन्दयोगं शास्ति शास्त्रम् । प्रत्यगात्मनो यल्लाभात् आनन्दयोगः, स तस्मादन्यः परमात्मैवेति आनन्दमयः परं ब्रह्म ।। २० ।।

।। इति आनन्दमयाधिकरणम् ।। ६ ।।

७. अन्तरधिकरणम् (१-१-७) (सू.२१-२२)

[अधिकरणार्थः-अक्ष्यादित्यान्तर्वर्तित्वेन उपास्यत्वमपि न जीवविशेषस्य, किन्तु परमात्मन एव]

२१. अन्तस्तद्धर्मोपदेशात् । (१-१-२१)

छान्दोग्ये - 'य एषोऽन्तरादित्ये हिरण्मयः पुरुषो दृश्यते' (छां.उ.१-६-६) 'य एषोऽन्तरक्षिणि पुरुषो दृश्यते' (छां.उ.१-७-५) इति अक्ष्यादित्याधारतया श्रूयमाणः पुरुषः, किं जीवविशेषः? उत परमपुरुषः? इति संशयः । जीवविशेषः - इति पूर्वः पक्षः । कुतः? सशरीरत्वात् । शरीरसंयोगो हि! कर्मवश्यस्य जीवस्य स्वकर्मफलभोगाय - इति ।

---

१. जीव -क,ग २. प्रेक्षा प्रतीयते-घ ३. प्रत्यगात्मनो हि-क,घ ४. हि यस्य-ख ५. अस्य जीवस्य-क

राद्धान्तस्तु - 'स एष सर्वेभ्यः पाप्मभ्यः उदितः' (छां.उ.१-६-७) इत्यादिना अपहतपाप्मत्व[1]पूर्वक[1]सर्वलोककामेशत्वोपदेशात्, [2]तेषां च[2] जीवेष्वसम्भवात्, अयम् अक्ष्यादित्याधारः पुरुषोत्तम एव । स्वासाधारणविलक्षणरूपवत्वं च ज्ञानबलैश्वर्यादि-कल्याणगुणवत् तस्य सम्भवति । श्रूयते च तद्रूपस्य अप्राकृतत्वम्, 'आदित्यवर्णं तमसस्तु पारे' (पु.सू.) इत्यादौ ।

सूत्रार्थस्तु - आदि[3]त्याद्यन्त[3]श्श्रूयमाणः पुरुषः, परं ब्रह्म; [4]तदसाधारणाद[4]पहत-पाप्मत्वादिधर्मोपदेशात् ।। २१ ।।

२२. भेदव्यपदेशाच्चान्यः (१-१-२२)

'य आदित्ये तिष्ठन्नादित्यादन्तरः' (बृ.उ.५-७-१३) 'य आत्मनि तिष्ठन्नात्मनोऽन्तरः' (बृ.उ.मा.पा.५-७-२६) [5]इत्यादिभिः[5] जीवात् भेदव्यपदेशाच्च अयं जीवादन्यः परमात्मैव ।। २२ ।।

।। इति अन्तरधिकरणम् ।। ७ ।।

८. आकाशाधिकरणम् । (१-१-८)

[अधिकरणार्थः - आकाशत्वेन उपास्यः परमात्मैव न भौतिकाकाशः]

२३. आकाशस्तल्लिङ्गात् । (१-१-२३)

छान्दोग्ये अस्य लोकस्य का गति[6]रिति । आकाश[6] इति होवाच - 'सर्वाणि ह वा इमानि भूतान्याकाशादेव समुत्पद्यन्ते आकाशं प्रत्यस्तं यन्ति' (छां.उ.१-९-१) इत्यत्र - आकाशशब्दनिर्दिष्टं जगत्कारणं, किं प्रसिद्धाकाशः? उत समस्तचिद[7]चिद्वस्तुविलक्षणं[7] ब्रह्म? - इति संशयः । प्रसिद्धाकाशः - इति पूर्वः पक्षः । कुतः? आकाशशब्दस्य लोके तत्रैव व्युत्पत्तेः, 'यतो वा इमानि' भूतानि (तै.उ.भृ.१-२) इत्यादिसामान्यलक्षणस्य, सदादिशब्दानामपि साधारणत्वेन, 'आकाशादेव समुत्पद्यन्ते' (छां.उ.१-९-१) इति विशेषे पर्यवसानात् । ईक्षणादयोऽपि 'आकाश' एव [8]जगत्कारणम्[8] इति निश्चिते सति, गौणा वर्णनीयाः - इति ।

---

१. पूर्वकम्-क २. तेषां-क,ग ३. त्यान्तः-ख,ग,घ ४. तदसाधारणा-क,ख,ग - तदसाधारण सर्वेश्वरत्व अपहतपाप्मोदयादि-घ ५. इत्यादि, इत्यादिना-क,ख,ग,घ ६. का गतिः-ग ७. चिद्विलक्षणम्-क,घ ८. कारणम्-क,ग

राद्धान्तस्तु - 'सर्वाणि ह वा इमानि भूतानि' (छां.उ.१-९-१) इति प्रसिद्धवन्निर्देशात्, प्रसिद्धेश्च ईक्षापूर्वकत्वात्, [1]चिदचिद्वस्तु[1]विलक्षणं सर्वज्ञं ब्रह्म [2]आकाशशब्दः[2] अनिर्दिष्टम् - इति ।

सूत्रार्थस्तु-आकाशशब्दनिर्दिष्टं परमेव ब्रह्म प्रसिद्धवन्निर्दिश्यमानात् [3]जगत्कारणत्वादि[3]-लिङ्गात् ।। २३ ।।

।। इति आकाशाधिकरणम् ।। ८ ।।

९. प्राणाधिकरणम् (१-१-९)

[अधिकरणार्थः - प्राणत्वेनोपास्यः परमात्मैव : न भूतचतुर्थो वायुः]

२४. अत एव प्राणः । (१-१-२४)

छान्दोग्ये - 'प्रस्तोतर्या देवता प्रस्तावमन्वायत्ता' (छां.उ.१-११-४) इति प्रस्तुत्य, 'कतमा सा देवतेति । (छां.उ.१-११-४) प्राण इति होवाच, सर्वाणि ह वा इमानि भूतानि प्राणमेवाभिसंविशन्ति; प्राणमभ्युज्जिहते; सैषा देवता प्रस्तावमन्वायत्ता' (छां.उ.१-११-५) इत्यत्र निखिलजगत्कारणतया प्राणशब्दनिर्दिष्टः, किं प्रसिद्धः प्राणः? उत उक्तलक्षणं ब्रह्म? इति संशयः । प्रसिद्धप्राणः - इति पूर्वः पक्षः । कुतः? सर्वस्य जगतः प्राणायत्तस्थितिदर्शनात्, स एव निखिलजगदेककारणतया निर्देशमर्हति इति ।

राद्धान्तस्तु - शिलाकाष्ठादिषु [3]अचेतनेषु चेतनस्वरूपेषु च[3] प्राणायत्तस्थित्यभावात्, 'सर्वाणि ह वा' [4]इमानि भूतानि[4] (छां.उ.१-९-१) इति प्रसिद्धवन्निर्देशादेव हेतोः, प्राणशब्दनिर्दिष्टं परमेव ब्रह्म । सूत्रमपि व्याख्यातम् ।

।। इति प्राणाधिकरणम् ।। ९ ।।

१०. ज्योतिरधिकरणम् (१-१-१०) (सू.२५-२८)

[अधिकरणार्थः - ज्योतिष्ट्वेनोपास्यं, जिज्ञास्यं ब्रह्मैव : न आदित्यादिकम्]

२५. ज्योतिश्चरणाभिधानात् । (१-१-२५)

छान्दोग्ये - 'अथ यदतः परो दिवो ज्योतिर्दीप्यते विश्वतः पृष्टेषु सर्वतः पृष्टेष्वनुत्तमेषूत्तमेषु लोकेषु इदं वाव तद् यदिदमस्मिन्नन्तः पुरुषे ज्योतिः' (छां.उ.३-१३-७)

---

१. चिदचित्-क,ग,घ २. आकाश-ग ३. अचेतनेषु च-ख,घ ४. इमानि-घ

इत्यत्र जगत्कारणत्व[1]व्याप्त[1]निरतिशयदीप्तियुक्ततया [2]ज्योतिश्शब्दनिर्दिष्टं, किं[2] प्रसिद्धादित्यादिज्योतिः? उत परमेव ब्रह्म? इति संशयः । प्रसिद्धज्योतिः - इति पूर्वः पक्षः । कुतः? 'इदं वाव तद्यदिदमस्मिन्नन्तः पुरुषे ज्योतिः'? (छां.उ.३-१३-७) इति कौक्षेयज्योतिषा प्रसिद्धेन ऐक्यावगमात्, स्ववाक्ये तदतिरिक्तपरब्रह्मासाधारण-लिङ्गादर्शनाच्च ।

राद्धान्तस्तु - प्रसिद्धज्योतिषोऽन्यदेव परं ब्रह्म इह निरतिशयदीप्तियुक्तं ज्योतिश्शब्दनिर्दिष्टम् । कुतः? '[3]पादोऽस्य सर्वा भूतानि, त्रिपादस्यामृतं दिवि' (छां.उ.३-१२-६) इति[3] पूर्ववाक्ये द्युसम्बन्धितया निर्दिष्टस्यैव चतुष्पदो ब्रह्मणः । 'अथ यदतः परो दिवो ज्योतिः' (छां.उ.३-१३-७) इत्यत्र प्रत्यभिज्ञानात् । तच्च परमेव ब्रह्म इति विज्ञातम्; सर्वेषां भूतानां तस्य पादत्वेन व्यपदेशात् । एवं परब्रह्मत्वे निश्चिते, कौक्षेयज्योतिषः तदात्मकत्वानुसन्धानं फलायोपदिश्यते - इति ज्ञायते ।

सूत्रार्थस्तु - ज्योतिश्शब्दनिर्दिष्टं परं [4]ब्रह्म[4]; अस्य ज्योतिषः पूर्ववाक्ये सर्वभूतचरणत्वाभिधानात् । सर्वभूतपादत्वञ्च परस्यैव ब्रह्मण उपपद्यते ।। २५ ।।

२६. छन्दोऽभिधानान्नेति चेन्न तथा चेतोऽर्पणनिगमात् तथाहि दर्शनम् । (१-१-२६)

'गायत्री वा इदं सर्वम्' (छां.उ.३-१२-१) इति गायत्र्याख्यच्छन्दसः प्रकृतत्वात् सर्वभूतपादत्वेन गायत्र्या एवाभिधानात् न ब्रह्म इति चेत् -

नैतत् । तथा चेतोऽर्पणनिगमात् । गायत्री यथा भवति, तथा ब्रह्मणि चेतोऽर्पणोपदेशात् । गायत्रीसादृश्यं चतुष्पात्वम्, ब्रह्मण्यनुसन्धेयम् इत्युपदिश्यते; गायत्र्याः सर्वात्मकत्वानुपपत्तेः इत्यर्थः । तथा हि दर्शनम् - [5]तथा हि[5] अन्यत्रापि छन्दस एवं सादृश्यात् छन्दश्शब्देनाभिधानं दृश्यते - 'ते वा एते पञ्चान्ये पञ्चान्ये दश सम्पद्यन्ते' (छां.उ.४-३-८) इत्यारभ्य 'सैषा विराडन्नात्' (छां.४-३-८) इति ।। २६ ।।

---

१. व्याप्ति-ख २. ज्योतिश्शब्दनिर्दिष्टं प्रसिद्धादित्यादि ज्योतिः-ग ३. पादोऽस्य विश्वाभूतानि-क,ग
४. ब्रह्मैव प्रमेव ब्रह्म-ग ५. तथा-तथा अन्यत्रापि हि-क,ख

२७. भूतादिपादव्यपदेशोपपत्तेश्चैवम् । (१-१-२७)

भूत-पृथिवी-शरीर-हृदयानि निर्दिश्य, 'सैषा चतुष्पदा' (छां.उ.३-१२-५) **इति** 'भूतादीनां पादत्वव्यपदेशश्च'[1] ब्रह्मण्येवोपपद्यत इति, ब्रह्मैव गायत्रीशब्दनिर्दिष्टम् **इति** गम्यते ।। २७ ।।

२८. उपदेशभेदान्नेति चेन्नोभयस्मिन्नप्यविरोधात् । (१-१-२८)

'[2]पादोस्य सर्वा भूतानि त्रिपादस्यामृतं दिवि[2]' (छां.उ.३-१२-६) इति पूर्ववाक्योदितं परं ब्रह्मैवास्तु । तथापि - 'अथ यदतः परो दिवो ज्योतिः' (छां.उ.३-१३-७) **इति द्युसम्बन्धमात्रेण** नेह तत् प्रत्यभिज्ञायते; तत्र चात्र च उपदेशप्रकारभेदात् । **तत्र हि** 'दिवि' इति, द्यौः सप्तम्या निर्दिश्यते । इह च, 'दिवः परो ज्योतिः' (छां.उ.३-१३-७) **इति पञ्चम्या** । ततो न प्रतिसन्धानम् इति चेत् न; उभयस्मिन्नपि व्यपदेशे उपरिस्थितिरूपार्थैक्येन प्रतिसन्धानाविरोधात् । यथा 'वृक्षाग्रे श्येनः' 'वृक्षाग्रात्परतः श्येनः' इति ।। २८ ।।

।। इति ज्योतिरधिकरणम् ।। १० ।।

११. इन्द्रप्राणाधिकरणम् । (१-१-११) (सू.२९-३२)

[अधिकरणार्थः - इन्द्रत्वेनोपास्यः परमात्मैव न तु शचीपतिरिन्द्रः]

२९. प्राणस्तथाऽनुगमात् । (१-१-२९)

कौषीतकिब्राह्मणे प्रतर्दनविद्यायाम्, 'त्वमेव मे वरं वृणीष्व यं त्वं **मनुष्याय** हिततमं मन्यसे' (कौषी.उ.३-३) इति प्रतर्दनेनोक्तः इन्द्रः, 'प्राणोऽस्मि **प्रज्ञात्मा तं** मामायुरमृतमित्युपास्स्व' (कौषी.उ.३-१४) इत्याह । अत्र हिततमोपासनकर्मतया **निर्दिष्टः** इन्द्रप्राणशब्दाभिधेयः, किं जीवः? उत परमात्मा इति - संशयः । **जीवः इति - पूर्वः** पक्षः । कुतः? इन्द्रशब्दस्य जीवविशेषे प्रसिद्धेः, प्राणशब्दस्यापि [3]तत्समानाधिकरणस्य[3] स एवार्थ इति, 'तन्मामायुरमृतमित्युपास्स्व' (कौषी.उ.३-१४) इति **तस्यैव** उपास्यत्वोपदेशात् इति ।

राद्धान्तस्तु - इन्द्रप्राणशब्दनिर्दिष्टं जीवादर्थान्तरभूतं **परं** ब्रह्म, 'स एष **प्राण एव** प्रज्ञात्माऽऽनन्दोऽजरोऽमृतः' (कौषी.उ.३-६२) इति इन्द्रप्राण**शब्दनिर्दिष्टस्यैव**, जीवेष्वसम्भावितानन्दत्वाजरत्वामृत[4]त्वादि[4] - श्रवणात् ।

---

१. भूतादिपादव्यपदेशोपपत्तेश्चेदम्-क २. पादोऽस्य विश्वाभूतानि-क,ख,ग ३. तत्सामान्याधिकरण्यस्य-क ४. त्व-क,ख,घ

सूत्रार्थस्तु - उपास्यतयोपदिष्टम् इन्द्रप्राणशब्दाभिधेयं परं ब्रह्म[1] । तथा इति प्रकारवचनः । [1]परब्रह्म[1]प्रकारभूतेषु आनन्दादिषु अस्य अनुगमात् ।। २९ ।।

३०. न वक्तुरात्मोपदेशादिति चेदध्यात्मसम्बन्धभूमा ह्यस्मिन् (१-१-३०)

नायमुपास्यः परमात्मा - 'मामेव विजानीहि' (कौषी.उ.३-८) 'तं मामायुरमृत-मित्युपास्स्व' (कौषी.३-१४) इति प्रज्ञातजीवभावस्य इन्द्रस्य वक्तुः स्वात्मन [2]उपास्यत्वोपदेशात्[2] । उपक्रमे जीवभावनिश्चये सति, उपसंहारस्य तदनुगुणतया नेयत्वात् इति चेत् -

न; अध्यात्मसम्बन्धभूमा हि अस्मिन् - आत्मनि सम्बन्धः, अध्यात्मसम्बन्धः; तस्य भूमा बहुत्वम् । जीवादर्थान्तरभूताऽऽत्मासाधारणधर्मसम्बन्धबहुत्वम् अस्मिन् प्रकरणे उपक्रमप्रभृति [3]आ उप[3]संहारात् उपलभ्यते । उपक्रमे तावत् - 'यं त्वं मनुष्याय हिततमं मन्यसे' (कौषी.उ.३-१) इति हि अनेनोच्यमानम् उपासनं परमात्मोपासनमेव; तस्यैव हिततमत्वात् । तथा, 'एष एव साधु कर्म कारयति' (कौषी.उ.३-६४) इत्यादिसाध्वसाधुकर्मणोः कारयितृत्वं परमात्मन एव धर्मः । तथा 'तद् यथा रथस्यारेषु नेमिरर्पिता नाभावरा अर्पिताः' एवमेवैता भूतमात्राः प्रज्ञामात्रास्वर्पिताः प्रज्ञामात्राः प्राणेऽर्पिताः' (कौषी.३-६१) इति सर्वाधारत्वञ्च तस्यैव धर्मः, आनन्दादयश्च; 'एष लोकाधिपतिरेष सर्वेशः' (कौषी.३-६६) इति च । हि इति हेतौ । अतः परं ब्रह्मैवायम् इत्यर्थः ।। ३० ।।

परमात्मैवोपस्यश्चेत्; कथमिन्द्रः मामुपास्स्वेत्युपदिदेश? इत्यत आह -

३१. शास्त्रदृष्ट्या तूपदेशो वामदेववत् । (१-१-३१)

इन्द्रस्य जीवस्यैव सतः, स्वात्मत्वेनोपास्यभूतपरमात्मोपदेशोऽयं शास्त्रदृष्ट्या ।

'अन्तः प्रविष्टः शास्ता जनानां सर्वात्मा' (तै.आर.३-११-३) 'तत्वमसि' (छां.उ.६-८-७) 'य आत्मनि तिष्ठन्नात्मनोऽन्तरो यमात्मा न वेद यस्यात्मा शरीरं य आत्मानमन्तरो यमयति स त आत्माऽन्तर्याम्यमृतः' (बृ.उ.मा.पा.५-७-२६) 'एष सर्वभूतान्तरात्माऽपहतपात्मा दिव्यो देव एको नारायणः' (सुबा.३-७) इत्यादीनि हि

---

१. परं ब्रह्म-क,घ २. उपास्यत्वेनोपदेशात्-ख ३. उप-क,ग,घ

शास्त्राणि परमात्मानं जीवात्मन आत्मतया उपदिदिशुः । अतो जीवात्मवाचिनः शब्दाः जीवात्म[1]शरीरं[1] परमात्मानमेव वदन्तीति शास्त्र[2]दृष्टार्थस्य तस्य[2], 'मामेव विजानीहि' (कौषी.उ.३-८) 'मामुपास्स्व' (कौषी.उ.३-१४) इति स्वात्मशब्देन परमात्मोपदेशः न विरुध्यते । यथा - [3]वामदेवः[3] [4]शास्त्रदृष्ट्या[4] स्वात्मशरीरकं परमात्मानं पश्यन्, 'अहम्' इति परमात्मानम् अवोचत्, 'तद्धैतत् पश्यन् ऋषिर्वामदेवः प्रतिपेदे अहं मनुरभवं सूर्यश्चाहं कक्षीवानृषिरस्मि विप्र' इति ।। ३१ ।।

३२. जीवमुख्यप्राणलिङ्गान्नेति चेन्नोपासात्रैविध्यादाश्रितत्वादिह तद्योगात् । (१-१-३२)

'त्रिशीर्षाणां त्वाष्ट्रमहनम्' । (कौषी.उ.१-३-९) 'अरुन्मुखान् यतीन् सालावृकेभ्यः प्रायच्छम्' (कौषी.उ.१-३-१०) 'यावदस्मिन् शरीरे प्राणो वसति तावदायुः' (कौषी.उ.३-३-१५) इति [5]जीवमुख्यप्राणलिङ्गात्[5] न अध्यात्मसम्बन्धभूम्ना परमात्मत्वनिश्चयः इति चेत् -

न; परमात्मन एव स्वाकारेण, जीवशरीरकत्वेन, प्राणशरीरकत्वेन, च [6]उपासा[6]त्रैविध्याद्धेतोः [7]तत्तच्छब्दे[7]नाभिधानम् इति निश्चीयते । अन्यत्रापि [8]ब्रह्मोपासना[8]त्रैविध्यस्याश्रितत्वात् 'सत्यं ज्ञानमनन्तं [9]ब्रह्म[9]' (तै.आन.१-१) 'आनन्दो ब्रह्म' (तै.भृ.६-१) इति स्वाकारेणोपास्यत्वम्; 'सच्च त्यच्चाभवत्' (तै.आन.६-३) इत्यादिना भोक्तृशरीरकत्वेन भोग्यशरीरकत्वेन च । इह प्रतर्दनविद्यायामपि [10]तस्य त्रैविध्यस्य[10] सम्भवात् । अतः इन्द्रप्राणशब्दनिर्दिष्टः परमात्मा ।। ३२ ।।

।। इति इन्द्रप्राणाधिकरणम् ।। ११ ।।

।। इति भगवद्रामानुजाचार्यविरचिते वेदान्तदीपे प्रथमाध्यायस्य प्रथमः पादः ।।

---

१. शरीरकम्-क,ख,ग,घ २. दृष्ट्या-ग ३. वामदेववत्-क ४. शास्त्रतस्य-ख,घ ५. जीवमुख्यप्राणयोः लिङ्गात्-क,घ ६. उपासना-क,ग,घ ७. तत्तच्छरीरशब्दे-ख ८. ब्रह्मोपासने-क,ख,ग,घ ९. ब्रह्मेति-क,घ १०. त्रैविध्यस्य-क,घ

प्रथमाध्यायस्य द्वितीयपादः - अन्ययोगव्यवच्छेदपादः

(अधि.६.सू.३३)

१२. सर्वत्र प्रसिद्ध्यधिकरणम् (१-२-१) (सू.१-८)

[अधिकरणार्थः-ब्रह्मण एव सर्वात्मभावेनाऽवस्थानम्; न जीवस्य]

३३. सर्वत्र प्रसिद्धोपदेशात् (१-२-१)

छान्दोग्ये श्रूयते, 'सर्वं खल्विदं ब्रह्म तज्जलानिति शान्त उपासीत । अथ खलु क्रतुमयोऽयं पुरुषः यथाक्रतुरस्मिन् लोके पुरुषो भवति, तथेतः प्रेत्य भवति । स क्रतुं कुर्वीत' । (छां.उ.३-१४-१) '[१]मनोमयः प्राणशरीरः[१]' (छां.उ.३-१४-२) इति । अत्र, 'सर्वं खल्विदं ब्रह्म' (छां.उ.३-१४-१) इति [२]सर्वात्मकत्वेन[२] निर्दिष्टं ब्रह्म किं प्रत्यगात्मा? उत परमात्मा इति - संशयः ।

प्रत्यगात्मा इति - पूर्वः [३]पक्षः[३] । [४]सर्वत्र तादात्म्योपदेशो[४] हि तस्यैवोपपद्यते परस्य तु ब्रह्मणः सकलहेयप्रत्यनीककल्याणैकतानस्य समस्तहेयाकारं सर्वतादात्म्यं, विरोधादेव न सम्भवति । प्रत्यगात्मनो हि कर्मनिमित्तो ब्रह्मादिस्तम्बपर्यन्तसर्वभाव उपपद्यते । सृष्ट्यादिहेतुत्वञ्च [५]तत्तत्कर्म[५]निमित्तत्वेन सृष्ट्यादेः उपपद्यते । ब्रह्मशब्दो[६]ऽपि[६] बृहत्त्वगुणयोगेन, 'तस्मादेतद् ब्रह्म नाम रूपमन्नञ्च जायते' (मुं.उ.१-१-१०) इतिवत् तत्रैव वर्तते ।

राद्धान्तस्तु - 'तज्जलान्' (छां.उ.३-१४-१) इति, 'सर्वं खल्विदं ब्रह्म' (छां.उ.३-१४-१) इति [७]तज्जन्म[७]स्थितिलयहेतुकं तदात्मकत्वं प्रसिद्धवन्निर्दिश्यमानं परस्यैव ब्रह्मण उपपद्यते । परस्मात् ब्रह्मण [८]एव हि[८] जगज्जन्मस्थितिलयाः प्रसिद्धाः - 'सोऽकामयत बहु स्यां प्रजायेयेति' (तै.आ.६-२) 'इदं सर्वमसृजत' (तै.आ.६-२) इत्यादिषु । तथा सर्वात्मकत्वञ्च जन्मादिहेतुकं [९]परस्यैव ब्रह्मणः[९] प्रसिद्धम् ।

'सन्मूलाः सोम्येमाः सर्वाः प्रजाः सदायतनाः सत्प्रतिष्ठाः' (छां.उ.६-८-४) 'ऐतदात्म्यमिदं सर्वम्' (छां.उ.६-८-७) इति । हेयप्रत्यनीककल्याणैकतानात्मनश्च परस्य

---

१. मनोमयः प्राणशरीरो भारूप इत्यत्र-ख २. सर्वात्मत्वेन-ख ३. पक्षः कुतः-घ ४. सर्वतादाम्योपदेशो-क,ग,घ ५. तत्कर्म-क,ग ६. हि-क ७. यज्जन्म-क,ग,घ -जगज्जन्म-ख ८. एव-ख,घ ९. परस्यैव-क,ख,ग,घ

[1]हेयाकरसर्वभूतात्मत्वम् अविरुद्धम्;[1] 'यः पृथिव्यां तिष्ठन् - यस्य पृथिवी शरीरम्' (बृ.उ.५-७-७) 'य आत्मनि तिष्ठन् यस्यात्मा शरीरम्, स त आत्माऽन्तर्याम्यमृतः' (बृ.उ.५-७-३) इत्यादिना शरीरात्मभावेन सर्वात्मत्वोपपादनात्; शरीरात्मनोश्च स्वभावव्यवस्थानात् । सर्वं ब्रह्म इति सामानाधिकरण्यनिर्देशश्च, सर्वशब्दस्य सर्वशरीरके ब्रह्मण्येव प्रवृत्तेः उपपद्यते । शरीरवाची हि शब्दः शरीरिणि आत्मन्येव पर्यवस्यति; देवमनुष्यादिशब्दवत् ।

सूत्रार्थस्तु - सर्वत्र '[2]सर्वं खल्विदं ब्रह्म' (छां.उ.३-१४-१) इति[2] निर्दिष्टे वस्तुनि [3]सर्वशब्दवाच्ये[3] सामानाधिकरण्येन तदात्मतया निर्दिष्टं परं ब्रह्मैव, [4]कुतः[4]? प्रसिद्धोपदेशात्; 'तज्जलान् इति सर्वमिदं ब्रह्म खलु' इति प्रसिद्धवत् [5]तस्योपदेशात्[5] । सर्वात्मकत्वस्योपदेशाच्च। [6]तदेव[6] हि जगज्जन्मस्थितिलयहेतुत्वेन वेदान्तेषु प्रसिद्धम् ।

३४. विवक्षितगुणोपपत्तेश्च । (१-२-२)

मनोमयत्वादिकाः सत्यसङ्कल्पत्वमिश्रा विवक्षिता गुणाः परस्मिन्नेव [7]उपपद्यन्ते[7] ।। २ ।।

३५. अनुपपत्तेस्तु न शारीरः (१-२-३)

एतेषां गुणानाम् अनन्तदुःखमिश्रपरिमितसुखलवभागिनि अज्ञे कर्मपरवशे शारीरे प्रत्यगात्मनि अनुपपत्तेश्च अयं न शारीरः; अपि तु परमेव ब्रह्म ।। ३ ।।

३६. कर्मकर्तृव्यपदेशाच्च । (१-२-४)

'एतमितः प्रेत्याभिसम्भवितास्मि' (छां.उ.३-१४-४) इति प्राप्यतया उपास्यो निर्देश्यते; प्राप्तृतया च जीवः । अतश्च जीवादन्यदेव इदं परं ब्रह्म ।। ४ ।।

३७. शब्दविशेषात् (१-२-५)

'एष म आत्माऽन्तर्हृदये' (छां.उ.३-१४-३) इति शारीरः षष्ठ्या निर्दिष्टः; उपास्यः प्रथमया । अतश्च जीवादन्यः ।। ५ ।।

---

१. हेयाकारसर्वभूतात्मकत्वमपि विरुद्धम्-क,घ २. सर्वं खल्विदं इति-क,घ ३. सर्वशब्द-क,ख,ग,घ ४. ब्रह्म परमेव-ख,घ ५. सर्वात्मकत्वोपदेशात्-ख -सर्वात्मकत्वस्योपदेशात्-घ ६. तिदेव-ग ७. हि उपपद्यन्ते-ख,घ

३८. स्मृतेश्च । (१-२-६)

'सर्वस्य चाहं हृदि सन्निविष्टो मत्तः स्मृतिर्ज्ञानमपोहनं च' (भ.गी.१५-१५) इति [1]स्मृते (ति?) श्च । अतश्च[2] जीवादन्यः उपास्यः परमात्मा ।। ६ ।।

३९. अर्भकौकस्त्वात्तद्व्यपदेशाच्च नेति चेन्न निचाय्यत्वादेवं व्योमवच्च (१-२-७)

'एष म आत्माऽन्तर्हृदये' (छां.उ. ३-१४-३) इति अल्पस्थानत्वात्, 'अणीयान् व्रीहेर्वा यवाद्वा' (छां.उ. ३-१४-१) इति अल्पत्वव्यपदेशाच्च न परं ब्रह्म - इति चेत्,

न - निचाय्यत्वादेवम् । एवमुपास्यत्वात् हेतोः अल्पायतनत्व(अल्पत्वं) व्यपदेशः, न स्वरूपाल्पत्वेन; 'ज्यायान् पृथिव्याः' (छां.उ.३-१४-३) इत्यादिना सर्वस्माज्ज्यायस्त्वोपदेशात् । ज्यायसोऽप्यस्य हृदयायतनावच्छेदेन अल्पत्वानुसन्धानम् उपपद्यते । व्योमवत् यथा महतोऽपि व्योम्नः सूची[2]पथा[2]दिषु अल्पत्वानुसन्धानम् । चशब्दोऽवधारणे । तद्वदेवेत्यर्थः। स्वाभाविकं चास्य महत्त्वम् [3]अत्राभिधीयत[3] इत्यर्थः ।

'ज्यायान् पृथिव्या ज्यायानन्तरिक्षाज्ज्यायान् दिवो ज्यायानेभ्यो लोकेभ्यः' (छां.उ.३-१४-३) इति हि अनन्तरमेव उपदिश्यते ।। ७ ।।

४०. सम्भोगप्राप्तिरिति चेन्न वैशेष्यात् । (१-२-८)

[4]यदि - उपासक[4]शरीरे हृदये अयमपि वर्तते, ततः तद्वदेव अस्यापि शरीरप्रयुक्तसुखदुःखसम्भोगप्राप्तिः - इति चेत्; न; हेतु वैशेष्यात् । न हि शरीरान्त[5]र्वर्तित्वमात्रमेव[5] सुखदुःखोपभोगहेतुः; अपि तु कर्मपरवशत्वम्, तत्तु अपहतपाप्मनः परमात्मनः न सम्भवति ।। ८ ।।

।। इति सर्वत्रप्रसिद्ध्यधिकरणम् ।। १ ।।

---

१. स्मृतेश्च-क,ग,घ २. पाशा-ख ३. अत्र व्यपदिश्यते-क,ख,ग,घ ४. यद्यप्युपासक-क ५. वर्तित्वमेव-क,ग,घ

१३. अत्त्रधिकरणम् (१-२-२) (सू.९-१२)

[अधिकरणार्थः- सर्वजगत्संहाररूपम् अत्तृत्वम् परमात्मन एव : न जीवस्य]

४१. अत्ता चराचरग्रहणात् । (१-२-९)

कठवल्लीष्वाम्नायते, - 'यस्य ब्रह्म च क्षत्रं चोभे भवत ओदनः । मृत्युर्यस्योपसेचनं क इत्था वेद यत्र सः' (कठ.उ.२-२५) इति । अत्र ओदनोपसेचनसूचितः अत्ता किं जीवः? उत परमात्मा - इति संशयः । जीव - इति - पूर्वः पक्षः । [१]कुतः? भोक्तृत्वस्य[१] कर्मनिमित्तत्वात्, जीवस्यैव तत्सम्भवात्।

राद्धान्तस्तु - [२]सर्वोपसंहारे[२] मृत्यूपसेचनम् अदनीयं चराचरात्मकं कृत्स्नं जगदिति तस्यैतस्य अत्ता परमात्मैव ।

न चेदं कर्मनिमित्तं भोक्तृत्वम्; अपि तु जगत्सृष्टिस्थितिलयलीलस्य परमात्मनो, जगदुपसंहारित्वरूपं भोक्तृत्वम् ।

सूत्रार्थः- ब्रह्मक्षत्रौदनस्यात्ता परमात्मा, ब्रह्मक्षत्रशब्देन चराचरस्य कृत्स्नस्य जगतो ग्रहणात् । मृत्सूपसेचनो ह्योदनो न ब्रह्मक्षत्रमात्रम्; अपि तु तदुपलक्षितं चराचरात्मकं कृत्स्नं जगदेव ।

४२. प्रकरणाच्च । (१-२-१०)

'महान्तं विभुमात्मानं मत्वा धीरो न शोचति' (कठ.उ.२-२२) 'नायमात्मा प्रवचनेन [३]लभ्यो न मेधया[३]' (मुं.उ.२-२३) इति परस्यैव हि इदं प्रकरणम् । अतश्च अयं परमात्मा ।। १०।।

[४]ननु अनन्तरम्,[४] 'ऋतं पिबन्तौ सुकृतस्य लोके गुहां प्रविष्टौ परमे परार्ध्ये' (कठ.३-१) इति द्वयोः कर्मफलादनश्रवणात्, परमात्मनश्च कर्म[५]फलादनानन्वयात्[५], अन्तःकरणद्वितीयो जीव एव तत्र अत्तेति प्रतीयते । अतः अत्रापि स एव जीवः अत्ता भवितुमर्हति इत्याशङ्क्याह -

---

१. भोक्तृत्वस्य-ख २. लभ्यः-क,ख,ग -न बहुना श्रुतेन-घ ३. सर्वोपसंहारि-क -सर्वोपसंहारी-ग
४. अनन्तरम्-क,ख,ग,घ ५. फलान्वयात्-क,ख -फलानन्वयसम्भवात्-ग

४३. गुहां प्रविष्टावात्मानौ हि तद्दर्शनात् । (१-२-११)

गुहां प्रविष्टौ [1]जीवात्म-परमात्मानौ[1] । जीवद्वितीयः परमात्मैव तत्र प्रतीयत इत्यर्थः । स्वयमनश्नतोऽपि परमात्मनः, प्रयोजकतया पानेऽन्वयो[2]विद्यते[2] । जीवद्वितीयः परमात्मा इति कथमवगम्यते? तद्दर्शनात् - तयोरेव हि अस्मिन् प्रकरणे गुहाप्रवेशव्यपदेशो दृश्यते - 'तं दुर्दर्शं गूढमनुप्रविष्टं गुहाहितं गह्वरेष्टं पुराणम् ।

'अध्यात्मयोगाधि[3]गमेन[3] देवं मत्वा धीरो हर्षशोकौ जहाति'। (कठ.उ.२-१२) इति परमात्मनः; 'या प्राणेन सम्भवत्यदितिर्देवतामयी । गुहां प्रविश्य तिष्ठन्ती या भूतेभिर्व्यजायत' (कठ.उ.४-७) इति जीवस्य । कर्मफलानि अत्तीत्यदितिः - जीवः ।। ११ ।।

४४. विशेषणाच्च । (१-२-१२)

अस्मिन् प्रकरणे हि उपक्रमप्रभृति उपसंहारात् जीवपरमात्मानावेव उपास्यत्वोपासकत्वप्राप्यत्वप्राप्तृत्वादिभिः विशेष्येते, 'महान्तं विभुमात्मानं मत्वा धीरो न शोचति' (कठ.उ.२-२२) 'विज्ञानसारथिर्यस्तु मनः प्रग्रहवान् नरः । सोऽध्वनः पारमाप्नोति तद्विष्णोः परमं पदम्' ।। (कठ.उ.३-९) इत्यादिषु अतश्च अत्ता परमात्मा ।। १२ ।।

।। इति अत्त्रधिकरणम् ।। २ ।।

१४. अन्तराधिकरणम् (१-२-३) (सू.१३-१८)

[अधिकरणार्थः- अक्ष्याधारपुरुषत्वं परमात्मन एव; न जीवादेः]

४५. अन्तर उपपत्तेः । (१-२-१३)

छान्दोग्ये, 'य एषोऽक्षिणि पुरुषो दृश्यते एष आत्मेति होवाचैतदमृतमभयमेतद्ब्रह्म' (छां.उ.४-१५-१) इत्यत्र अक्ष्याधारः पुरुषः किं प्रतिबिम्बात्मजीवदेवता[4]विशेषान्यतमः[4]? उत परमात्मा - इति संशयः । एष्वन्यतमः - इति पूर्वः पक्षः । कुतः? 'य एष दृश्यते' इति प्रसिद्धवत् साक्षात्कारनिर्देशात् ।

---

१. हि जीवात्म-घ २. दृश्यते-घ ३. योगाधिगमने-ख ४. विशेष्वन्यतम-क,ग,घ

राद्धान्तस्तु - परमात्मैवायम् अक्ष्याधारः पुरुषः । अक्षिपुरुषसम्बन्धितया [1]श्रूयमाणा हि[1] निरुपाधिकात्मत्वामृतत्वाभयत्वब्रह्मत्वसंयद्वामत्वादयः परमात्मन्येव उपपद्यन्ते । प्रसिद्धवन्निर्देशश्च 'यश्चक्षुषि तिष्ठन्' (बृ.उ.५-७-२२) इत्यादिश्रुत्यन्तरप्रसिद्धेः उपपद्यते । साक्षात्कारश्च, तदुपासननिष्ठानां योगिनाम् ।

सूत्रार्थस्तु - अक्ष्यन्तरः परमात्मा, संयद्वामत्वादीनां गुणानाम् [2]अत्रैवो[2]पपत्तेः ।। १३ ।।

४६. स्थानादिव्यपदेशाच्च । (१-२-१४)

स्थानम् - स्थितिः । परमात्मन एव, 'यश्चक्षुषि तिष्ठन्' (बृ.उ.५-७-२२) इत्यादौ चक्षुषि स्थितिनियमनादीनां व्यपदेशाच्च अयं परमात्मा ।। १४ ।।

४७. सुखविशिष्टाभिधानादेव च । (१-२-१५)

'प्राणो ब्रह्म कं ब्रह्म खं ब्रह्म' (छां.उ.४-१०-५) इति सुखविशिष्टतया [3]प्रकृतस्य परस्यैव[3] ब्रह्मणः अक्ष्याधारतया उपास्यत्वाभिधानाच्च अयं परमात्मा । एवकारः अस्यैव हेतोः नैरपेक्ष्यावगमाय ।। १५ ।।

'प्राणो ब्रह्म कं ब्रह्म खं ब्रह्म' (छां.उ.४-१०-५) इत्यत्र सुखविशिष्टं परमेव ब्रह्म अभिहितमिति [4]कथमिद[4]मवगम्यते? यावता नामादिवत् प्रतीकोपासनमेव इत्याशङ्क्याह -

४८. अत एव च स ब्रह्म । (१-२-१६)

यतः तत्र [5]भवभयभीताय[5] उपकोसलाय ब्रह्मस्वरूपजिज्ञासवे, 'कं च तु खं च न विजानामि' (छां.उ.४-१०-५) इति पृच्छते, 'यद्वाव कं तदेव खं, यदेव खं तदेव कम्' (छां.उ.४-१०-५) इति अन्योन्यव्यवच्छेदकतया अपरिच्छिन्नसुखस्वरूपं ब्रह्म इत्यभिधाय, 'प्राणं च हास्मै तदाकाशं चोचुः' (छां.उ.४-१०-५) इत्युक्तम् । अत एव खशब्दाभिधेयः स आकाशोऽपरिच्छिन्नसुखविशिष्टं परं ब्रह्मैव ।। १६ ।।

४९. श्रुतोपनिषत्कगत्यभिधानाच्च । (१-२-१७)

श्रुतोपनिषत्कैः अधिगत[6]परब्रह्म[6]याथात्म्यैः ब्रह्मप्राप्तये या गतिः अर्चिरादिका अधिगन्तव्यतया अवगता श्रुत्यन्तरे, तस्याश्च इहाक्षिपुरुषं श्रुतवतः अधिगन्तव्यतया,

१. श्रूयमाणा-क,ख,ग,घ २. तत्रैव-ख,घ ३. प्रकृतस्यैव परस्य-क,ख,ग,घ ४. कथमवगम्यते-क,ख,ग ५. भवभीताय-घ ६. ब्रह्म-क,ग,घ

'तेऽर्चिषमेवाभिसम्भवन्ति' (छां.उ.४-१५-५) इत्यादिना अभिधानात् अक्षिपुरुषः परमात्मा ।। १७ ।।

५०. अनवस्थितेरसम्भवाच्च नेतरः (१-२-१८)

परमात्मन इतरः जीवादिकः । तस्य 'अक्ष्णि'[1]नियमेन अनवस्थितेः अमृतत्वसंयद्वामत्वादीनां चासम्भवात् न सः अक्ष्याधारः ।। १८ ।।

।। इति अन्तराधिकरणम् ।। ३ ।।

१५. अन्तर्याम्यधिकरणम् । (१-२-४) (सू.१९-२१)

[अधिकरणार्थः- ब्रह्मणः सर्वान्तर्यामित्वम्; न जीवस्य]

५१. अन्तर्याम्यधिदैवाधिलोकादिषु तद्धर्मव्यपदेशात् । (१-२-१९)

बृहदारण्यके -'यः पृथिव्यां तिष्ठन् पृथिव्या अन्तरो यं पृथिवी न वेद यस्य पृथिवी शरीरं यः पृथिवीमन्तरो यमयति एष त आत्माऽन्तर्याम्यमृतः' (बृ.उ.५-७-७) इत्यादिषु सर्वेषु पर्यायेषु श्रूयमाणः अन्तर्यामी किं प्रत्यगात्मा? उत परमात्मा - इति संशयः । प्रत्यगात्मा - इति पूर्वः [2]पक्षः[2]; वाक्यशेषे 'द्रष्टा..... श्रोता....... मन्ता' (बृ.उ.५-७-२७) इति द्रष्टृत्वादिश्रुतेः, नान्योऽतोऽस्ति द्रष्टा' (बृ.उ.५-७-२७) इति द्रष्ट्रन्तरनिषेधाच्च ।

राद्धान्तस्तु - पृथिव्याद्यात्मपर्यन्तसर्वतत्त्वानां [3]सर्वैस्तै[3]रदृष्टेन एकेन नियमनं निरुपाधिकामृतत्वादिकञ्च परमात्मन एव धर्म इति अन्तर्यामी परमात्मा । द्रष्टृत्वादिश्च रूपादिसाक्षात्कारः । स च, 'पश्यत्यचक्षुः' (श्वे.उ.३-१९) इत्यादिना परमात्मनोऽप्यस्ति । 'नान्यातोऽस्ति द्रष्टा' (बृ.उ.५-७-२७) इति च जीवेनादृष्टान्तर्यामिद्रष्टृवत् अन्तर्यामिणाप्यदृष्टद्रष्ट्रन्तरनिषेधपरः ।

सूत्रार्थः - अधिदैवाधिलोकादिपदचिह्नितेषु वाक्येषु श्रूयमाणः अन्तर्यामी परमात्मा, सर्वान्तरत्वसर्वाविदितत्वसर्वशरीरकत्व[4]सर्वनियमनसर्वात्मत्वा[4]मृतत्वादिपरमात्म[5]धर्माणां[5] व्यपदेशात् ।। १९ ।।

---

१. अक्षिणि-ख,घ २. पक्षः कुतः ?-घ ३. सर्वैरेते-क,घ -सर्वै-ग -सर्वैरभि-ख ४. सर्वनियन्तृत्वसर्वात्मत्व-ग ५. परमात्मासाधारणधर्माणां-घ

५२. न च स्मार्तमतद्धर्माभिलापाच्छारीरश्च । (१-२-२०)

स्मार्तं प्रधानम्; शारीरः प्रत्यगात्मा । स्मार्तं च शारीरश्च न अन्तर्यामी; तयोरसम्भावि[१]तोक्त[१]धर्माभिलापात् । यथा - स्मार्तस्य अचेतनस्य असम्भावनया न अन्तर्यामित्वप्रसक्तिः, तथा प्रत्यगात्मनोऽपि इत्यर्थः ।। २० ।।

५३. उभयेऽपि हि भेदेनैनमधीयते । (१-२-२१)

उभये - काण्वाः माध्यन्दिना अपि, 'यो विज्ञाने तिष्ठन्' (बृ.उ.५-७-२६) 'य आत्मनि तिष्ठन्' (बृ.उ.मा.पा.५-७-२६) इति यतः प्रत्यगात्मनो भेदेन एनम् - अन्तर्यामिणम् [२]अधीयते[२], अतः अयं तदतिरिक्तः परमात्मा ।। २१ ।।

।। इति अन्तर्याम्यधिकरणम् ।। ४ ।।

१६. अदृश्यत्वादिगुणकाधिकरणम् । (१-२-५) (सू.२२-२४)

[अधिकरणार्थः- अदृश्यत्वादिगुणकं ब्रह्मैव; न प्रधानपुरुषौ]

५४. अदृश्यत्वादिगुणको धर्मोक्तेः । (१-२-२२)

आथर्वणे - 'अथ परा यया तदक्षरमधिगम्यते' 'यात्तदद्रेश्यम्' (मुं.उ.१-१-६) इत्यारभ्य 'यद्भूतयोनिं परिपश्यन्ति धीराः' (मुं.उ.१-१-६) 'अक्षरात्परतः परः' (मुं.उ.२-१-२) इत्यादौ किं प्रधानपुरुषौ प्रतिपाद्येते? उत परमात्मैव - इति संशयः ।

प्रधानपुरुषौ - इति पूर्वः [३]पक्षः[३] । पृथिव्याद्यचेतनगतदृश्यत्वादीनां प्रतिषेधात् तज्जातीयाचेतनं प्रधानमेव भूतयोन्यक्षरमिति प्रतीयते । तथा 'अक्षरात्परतः परः' (मुं.उ.२-१-२) इति [४]चैतस्या[४]धिष्ठाता पुरुष एव इति ।

राद्धान्तस्तु - उत्तरत्र 'यस्सर्वज्ञः सर्ववित्' (मुं.उ.१-१-१०) इति प्रधानपुरुषयोः असम्भावितं सार्वज्ञ्यम् अभिधाय, 'तस्मादेतद् ब्रह्म नाम रूपमन्नञ्च जायते' (मुं.उ.१-१-१०)

इति सर्वज्ञात् सत्यसङ्कल्पात् जगदुत्पत्तिश्रवणात्, पूर्वोक्तम् अदृश्यत्वादिगुणकं भूतयोन्यक्षरम्, 'अक्षरात्परतः परः' (मुं.उ.२-१-२) इति च [५]निर्दिष्टं[५] तदक्षरं परं ब्रह्मैव इति विज्ञायते ।

---

१. तात्म-ग २. अभिधीयते-घ ३. पक्षः । कुतः ?-घ ४. च तस्या-क,ख,ग,घ ५. निर्दिष्टं च-क,ख,घ

[1]सूत्रार्थः[1] - अदृश्यत्वादिगुणकः, परमात्मा; [2]सर्वज्ञत्वादि[2] तद्धर्मोक्तेः ।। २२ ।।

विशेषणभेदव्यपदेशाभ्याञ्च नेतरौ । (१-२-२३)

[3]विशिनष्टि[3] हि प्रकरणं प्रधानात् भूतयोन्यक्षरम्; एकविज्ञानेन सर्व[4]विज्ञानादिना[4] तथा, 'अक्षरात्परतःपरः' (मुं.उ.२-१-२) इति अक्षरात् अव्याकृतात् परतोऽवस्थितात् पुरुषात् पर इति पुरुषाञ्च अस्य भूतयोन्यक्षरस्य भेदो व्यपदिश्यते । अतश्च न प्रधानपुरुषौ; अपि तु परमात्मैवात्र निर्दिष्टः ।। २३ ।।

५६. रूपोपन्यासाञ्च । (१-२-२४)

'अग्निर्मूर्धा' (मुं.उ.२-१-४) इत्यादिना [5]समस्तस्य चिदचिदात्मकस्य[5] प्रपञ्चस्य [6]भूतयोन्यक्षर[6]रूपत्वेन उपन्यासाञ्च अयमदृश्यत्वादिगुणकः परमात्मा ।। २४ ।।

।। इति अदृश्यत्वादिगुणाधिकरणम् ।। ५ ।।

१७. वैश्वानराधिकरणम् । (१-२-६) (सू.२५-३३)

[अधिकरणार्थः- वैश्वानरशब्दार्थः परमात्मैव जाठराग्न्यादिकम्]

५७. वैश्वानरः साधारणशब्दविशेषात् । (१-२-२५)

छन्दोग्ये, 'आत्मानमेवेमं वैश्वानरं सम्प्रत्यध्येषि । तमेव नो ब्रूहि' (छां.उ.५-११-६) इत्यारभ्य, 'यस्त्वेतमेवं प्रादेशमात्रमभिविमानमात्मानं वैश्वानरमुपास्ते' (छां.उ.५-१८-१) इत्यत्र किम् अयं [7]वैश्वानरः[7], परमात्मेति शक्यनिर्णयः, उत न - इति संशयः ।

अशक्यनिर्णयः - इति पूर्वः पक्षः, वैश्वानरशब्दस्य जाठराग्नौ, महाभूततृतीये देवताविशेषे, परमात्मनि च वैदिकप्रयोगदर्शनात्; अस्मिन् प्रकरणे सर्वेषां लिङ्गोपलब्धेश्च ।

राद्धान्तस्तु - 'को न आत्मा किं ब्रह्म' (छां.उ.५-११-१) इति सर्वेषां जीवानामात्मभूतं [8]ब्रह्म[8] किमिति प्रक्रमात्, उत्तरत्र च, 'आत्मानं वैश्वानरम्' (छां.उ.५-१८-१) इति ब्रह्मशब्दस्थाने सर्वत्र वैश्वानरशब्दप्रयोगाञ्च वैश्वानरात्मा [9]सर्वेषां जीवानां[9] आत्मभूतं परं ब्रह्म इति विज्ञायते ।

१. सूत्रार्थस्तु-ग २. सार्वज्ञ्यादि-क,ख -सार्वज्ञत्वादि धर्मोक्तेः-ग ३. तदा विशिनष्टि-ख ४. इत्यादिना-घ ५. समस्तचिदचिदात्मक-क,ख,ग,घ ६. भूतयोन्यक्षरस्य रूपत्वेन-घ ७. वैश्वानरात्मा-ख,घ ८. परं ब्रह्म-घ ९. सर्वेषां-क,ख,ग

[1]सूत्रार्थः[1] - वैश्वानरशब्दनिर्दिष्टः परमात्मा; वैश्वानरशब्दस्य अनेकार्थसाधारणस्यापि अस्मिन् प्रकरणे [2]परमात्मा[2]साधारणविशेषणैः सर्वात्मत्वादिभिः विशेष्यमाणत्वात् । विशेष्यत इति विशेषः ।। २५ ।।

५८. स्मर्यमाणमनुमानं स्यादिति । (१-२-२६)

स्मर्यमाणं - प्रत्यभिज्ञायमानम् । अनुमीयते[3]ऽनेनेति[3] अनुमानम् । इति शब्दः प्रकारवचनः । इत्थं रूपं स्मर्यमाणं वैश्वानरस्य परमात्मत्वे अनुमानं स्यात्; द्युप्रभृतिपृथिव्यन्तम् अवयवविभागेन वैश्वानरस्य रूपम् इहोपदिष्टम् - 'अग्निर्मूर्धा चक्षुषी चन्द्रसूर्यौ' (मुं.उ.२-१-४) 'द्यां मूर्धानं यस्य विप्रा वदन्ति'(आ.सि.श्लो.३) [4]इति[4] श्रुतिस्मृतिप्रसिद्धं परमपुरुषरूपम् इह प्रत्यभिज्ञायमानं वैश्वानरस्य [5]परमात्मत्वे[5] लिङ्गं स्यात् इत्यर्थः ।। २६ ।।

५९. शब्दादिभ्योऽन्तः प्रतिष्ठानाच्च नेति चेन्न तथा दृष्ट्युपदेशादसम्भवात् पुरुषमपि चैनमधीयते । (१-२-२७)

अनिर्णयमाशङ्क्य परिहरति - शब्दादिभ्योऽन्तः प्रतिष्ठानाच्च - इति । [6]शब्दस्तावत्[6] वाजिनां वैश्वानरविद्याप्रकरणे, 'स एषोऽग्निर्वैश्वानरः' (छां.उ.५-१८-२) इति वैश्वानरसमानाधिकरणोऽग्नि शब्दः । अस्मिन् [7]प्रकरणे च[7] 'हृदयं गार्हपत्यः' (छां.उ.५-१८-२) इत्यारभ्य वैश्वानरस्य हृदयादिस्थानस्य अग्नित्रयपरिकल्पनं प्राणाहुत्याधारत्वं [8]च इत्यादि[8] प्रतीयते । वाजिनामपि, 'स यो ह वैतमेवमग्निं वैश्वानरं पुरुषविधं पुरुषेऽन्तः प्रतिष्ठितं वेद' इति वैश्वानरस्य शरीरान्तःप्रतिष्ठितत्वं [9]प्रतीयते[9] । अतः एतैर्लिङ्गैः वैश्वानरस्य जाठराग्नित्वप्रतीतेः, न अयं परमात्मेति शक्यनिर्णयः - इति चेत्, तन्न; तथा दृष्ट्युपदेशात् । दृष्टिः-उपासनम् । तथा उपासनोपदेशात् इत्यर्थः । जाठराग्निशरीरतया वैश्वानरस्य परमात्मन उपासनं हि अत्रोपदिश्यते । 'अयमग्निर्वैश्वानरः, पुरुषोऽन्तः प्रतिष्ठितः' इत्यादौ ।

---

१. सूत्रार्थस्तु-क २. परब्रह्म-क,ख,ग,घ ३. अनुमीयते इति-ख ४. इत्यादि-ख,घ ५. परमपुरुषत्वे-ख,घ ६. शब्दादिभ्यो शब्दस्तावत्-घ ७. प्रकरणे-क,ग ८. इत्यादि-क,ग ९. गम्यते-घ

कथमवगम्यते? इति चेत्, असम्भवात्; केवलजाठराग्नेः त्रैलोक्यशरीरत्वाद्य-सम्भवात् । पुरुषमपि [1]चैनमधीयते[1] । चशब्दः प्रसिद्धौ । वाजिनः तत्रैव, 'स एषोऽग्निर्वैश्वानरो यत्पुरुषः' (अग्नि.र.१०-५-६) इति एनं वैश्वानरं पुरुषमपि हि अधीयते । पुरुषश्च परमात्मैव, 'पुरुष एवेदं सर्वम्' (पु.सू.२) 'पुरुषान्न परं किञ्चित्' (कठ.उ.३-१०) इत्यादिषु प्रसिद्धेः ।। २७ ।।

६०. अत एव न देवता भूतञ्च । (१-२-२८)

यतः त्रैलोक्यशरीरः असौ वैश्वानरः, यतश्च निरुपाधिकपुरुषशब्दनिर्दिष्टः; अत एव न अग्न्याख्या देवता, महाभूततृतीयश्च वैश्वानरः शङ्कनीयः ।। २८ ।।

६१. साक्षादप्यविरोधं जैमिनिः । (१-२-२९)

अग्निशरीरतया वैश्वानरस्य उपासनार्थं अग्निशब्दसामानाधिकरण्यनिर्देश इत्युक्तम् । विश्वेषां नराणां नेतृत्वादिना सम्बन्धेन यथा वैश्वानरशब्दः परमात्मनि वर्तते, तथैव [2]अग्निशब्दस्यापि वृत्तौ[2] न कश्चिद्विरोधः - इति जैमिनिराचार्यो मन्यते ।। २९ ।।

'यस्त्वेतमेवं प्रादेशमात्रमभिविमानमात्मानं वैश्वानरम्' (छां.उ.५-१८-१) इति द्युप्रभृतिपृथिव्यन्तप्रदेश[3]सम्बन्धितया[3] मात्रया [4]परिच्छिन्नत्वम्[4], अनवच्छिन्नस्य परमात्मनो वैश्वानरस्य कथमुपपद्यत इत्यत्राह -

६२. अभिव्यक्तेरित्याश्मरथ्यः । (१-२-३०)

अनवच्छिन्नस्यैव परमात्मनः [5]उपासना[5]भिव्यक्त्यर्थं, द्युप्रभृतिपृथिव्यन्तप्रदेश-परिच्छिन्नत्वम् - इति आश्मरथ्य आचार्यो मन्यते ।। ३० ।।

द्युप्रभृति[6]प्रदेशावच्छेदेन[6] अभिव्यक्तस्य परमात्मनो द्युभ्वादित्यादीनां मूर्धाद्यवयव-कल्पनं किमर्थम्? इति चेत्; तत्राह -

६३. अनुस्मृतेर्बादरिः । (१-२-३१)

अनुस्मृतिः - उपासनम्, ब्रह्मप्राप्तये तथा उपासनार्थं [7]मूर्ध[7]प्रभृतिपादान्तदेह-परिकल्पनम् इति बादरिराचार्यो मन्यते ।। ३१ ।।

---

१. चैनमभिधीयते-घ २. अग्निशब्दस्य अग्रनयनादिना योगेन साक्षात्परमात्मनि वृत्तौ-क,ख,ग,घ
३. सम्बन्धिन्या-क,ख,ग,घ ४. मात्रयावच्छिन्नत्व-क,ग,घ ५. उपासका-ख,घ ६. प्रदेशपरिच्छिन्नत्वं-घ
७. मूर्धद्यु-घ

अयं वैश्वानरः परमात्मा त्रैलोक्यशरीरोपास्यः [1]उपादीयते[1] चेत् - 'उर एव वेदिर्लोमानि बर्हिर्हृदयं गार्हपत्यः' (छां.उ.५-१८-२) इत्यादिना उपासकशरीरावयवानां [2]गार्हपत्यादिवत्व[2]परिकल्पनं किमर्थम् [3]इत्यत्राह[3] -

६४. सम्पत्तेरिति जैमिनिस्तथा हि दर्शयति । (१-२-३२)

वैश्वानरविद्याङ्गभूतायाः उपासकैः अहरहः क्रियमाणायाः प्राणाहुतेः अग्निहोत्रत्वसम्पादनाय [4]गार्हपत्यादित्व[4]परिकल्पनम् इति । जैमिनिराचार्यो मन्यते । तथा हि अग्निहोत्रसम्पत्तिमेव दर्शयति इयं श्रुतिः प्राणाहुतिं विधाय, अथ य एवं विद्वानग्निहोत्रं जुहोति' (छां.उ.५-२४-२) इति । उक्तानामर्थानां पूजितत्वख्यापनायाचार्यग्रहणम् ।। ३२ ।।

६५. आमनन्ति चैनमस्मिन् । (१-२-३३)

एनं परमपुरुषं वैश्वानरं द्युभ्वादिदेहम् अस्मिन् उपासकदेहे प्राणाग्निहोत्रेण आराध्यत्वाय आमनन्ति हि, 'तस्य ह वा एतस्य वैश्वानरस्य मूर्धैव सुतेजाः' (छां.उ.५.१८.२) इत्यादिना । [5]उपासक[5]मूर्धादिपादान्ता एव द्युप्रभृतयः परमपुरुषस्य मूर्धादय इति प्राणाग्निहोत्रवेलायाम् अनुसन्धेया इत्यर्थः ।। ३३ ।।

।। इति वैश्वानराधिकरणम् ।। ६ ।।

।। इति श्रीभगवद्रामानुजविरचिते वेदान्तदीपे प्रथमस्याध्यायस्य द्वितीयः पादः ।।

प्रथमाध्यायस्य तृतीयपादः - अन्ययोगव्यवच्छेदपादः
(अधि १०, सू.४४)

१०. द्युभ्वाद्यधिकरणम् (१-३-१) (सू.१-६)

[अधिकरणार्थः-द्युपृथिव्यादीनाम् आयतनं परमात्मैव, न जीवः]

६६. द्युभ्वाद्यायतनं स्वशब्दात् । (१-३-१)

[6]आथर्वणे[6] - 'यस्मिन् द्यौः पृथिवी चान्तरिक्षमोतं मनः सह प्राणश्च सर्वैः । तमेवैकं [7]जानथात्मानमन्या[7] वाचो विमुञ्चथ । अमृतस्यैष सेतुः' ।। (मुं.उ.२-२-५) इत्यत्र द्युपृथिव्यादीनामायतनं किं जीवः? उत परमात्मा? - इति संशयः ।

जीवः - इति पूर्वः पक्षः, [8]मनः[8] प्रभृतीन्द्रियाधारत्वश्रुतेः, उत्तरत्र नाडीसम्बन्धात्, जायमानत्वश्रुतेश्च ।

---

१. उपदिश्यते-क,ख,ग,घ २. गार्हपत्यादि-क,ख,ग,घ ३. इत्यत आह-ख ४. गार्हपत्यादि-क,ख,ग,घ ५. उपसकस्य-ख ६. अथर्वणे-ग ७. जानत्मानम्-ग ८. कुतः? मनः-घ

राद्धान्तस्तु - निरुपाधिकात्मत्वामृतसेतुत्वयोः परमात्मधर्मयोः श्रवणात् [1]परमात्मैव[1] अयम् । [2]सर्वं[2] नियन्तृतया आप्नोति इति हि आत्मा । अमृतस्य प्रापकतया सेतुश्च स एव। नाडीसम्बन्धः, बहुधा [3]जायमानत्वञ्च[3], 'सन्ततं सिराभिस्तु लम्बत्याकोशसन्निभम्' (तै.ना.उ.११-८) 'अजायमानो बहुधा विजायते' (तै.आर.३-१३-३) इत्यादिषु सर्वसमाश्रयणीयत्वाय अजहत्स्वभावस्यैव परमात्मनोऽपि [4]दृश्यते - इति[4] ।

सूत्रार्थस्तु - [5]द्युपृथिव्यादी[5]नामायतनं, परमात्मा; स्वशब्दात् - (स्वासाधारणा-[6]त्मशब्दात्[6]) ।। १ ।।

६७. मुक्तोपसृप्यव्यपदेशाच्च । (१-३-२)

'तदा विद्वान् पुण्यपापे विधूय निरञ्जनः परमं साम्यमुपैति' (मुं.उ.३-१-३) 'तथा विद्वान्नामरूपाद्विमुक्तः परात् परं पुरुषमुपैति दिव्यम्' (मुं.उ.३-२-८) [7]इति च[7] बन्धान्मुक्तस्य प्राप्यतया व्यपदेशाच्च अयं परमात्मा ।। २ ।।

६८. नानुमानमतच्छब्दात् प्राणभृच्च । (१-३-३)

[8]आनुमानम्[8] - अनुमानगम्यं प्रधानम् । यथा तद्वाचिशब्दाभावात् तदिह न गृह्यते; तथा प्राणभृदपि इत्यर्थः । अतश्च अयं परमात्मा ।। ३ ।।

६९. भेदव्यपदेशात् । (१-३-४)

'अनीशया शोचति मुह्यमानः । जुष्टं यदा पश्यत्यन्यमीशम्' (मुं.उ.३-१-२) [9]इत्यादिना[9] जीवात् भेदेन व्यपदेशाच्च अयं परमात्मा ।। ४ ।।

७०. प्रकरणात् । (१-३-५)

'अथ परा, यया तदक्षरमधिगम्यते' (मुं.उ.१-१-५) इत्यादिना परमात्मन एव प्रकृतत्वात् ।। ५ ।।

७१. स्थित्यदनाभ्याञ्च । (१-३-६)

'तयोरन्यः पिप्पलं स्वाद्वत्ति अनश्नन्नन्यो अभिचाकशीति' (मुं.उ.३-१-१) इति कर्मफलमनश्नतः [10]परमात्मनः दीप्यमानतया[10] स्थितेः, जीवस्य कर्मपरवशतया

---

१. परमात्मधर्मश्रवणात्-क २. सर्व-क,ग,घ ३. तस्यैव धर्मः-घ ४. दृश्यते-क,ख,ग,घ ५. द्यावा-पृथिव्यादी-ग ६. आत्मत्वादिशब्दात्-ग -आत्मादि-क,घ ७. पुण्यपापे विधूय नामरूपाद्विमुक्तः इति च-क,ख,ग,घ ८. अनुमानम्-क ९. इत्यादि-क -इत्यादिषु-ग १०. परमात्मनोपमानतया-क

तत्फलादनाच्च, परमात्मनो जीवात् भेदावगमात्, अमृतसेतुः द्युभ्वाद्यायतनं न जीवः । 'अदृश्यत्वादिगुणकः' (ब्र.सू.१-२-२२) इत्यनेन परमात्मत्वे [1]स्थापितेऽपि[1] नाडी[2]सम्बन्ध[2]बहुधाजायमान[3]त्वलिङ्गात्[3] [4]या अवान्तरप्रकरण[4]विच्छेदाशङ्का; सा निराकृता, 'द्युभ्वाद्यायतनम्' (ब्र.सू.१-३-१) इति । वैश्वानरस्य त्रैलोक्यशरीरत्वादिना परमात्मत्वनिर्णय इति, मध्ये वैश्वानरविद्या निरूपिता ।। ६ ।।

।। इति द्युभ्वाद्यधिकरणम् ।। १ ।।

१९. भूमाधिकरणम् । (१-३-२) (सू.७-८)

[अधिकरणार्थः- 'भूम'शब्दवाच्यं, सत्यशब्दनिर्दिष्टं परं ब्रह्मैव; न जीवादिः]

७२. भूमा सम्प्रसादादध्युपदेशात् । (१-३-७)

छान्दोग्ये - 'यत्र नान्यत्पश्यति नान्यच्छृणोति नान्यद्विजानाति स भूमा' (छां.उ.७-२४-१) इत्यत्र भूमशब्दनिर्दिष्टः निरतिशयवैपुल्यविशिष्टसुख[5]स्वरूपः, किं प्रत्यगात्मा[5]? उत परमात्मा? इति संशयः ।

प्रत्यगात्मा इति पूर्वः[6]पक्षः[6] । 'तरति शोकमात्मवित्' (छां.उ.७-१-३) इति प्रक्रम्य, नामादिपरम्परया उत्तरोत्तरभूयस्त्वेन प्रश्नप्रतिवचनाभ्यां प्रवृत्तस्य आत्मोपदेशस्य प्राणशब्दनिर्दिष्टे प्रत्यगात्मनि समाप्तिदर्शनात् प्रत्यगात्मन एव भूमसंशब्दनम् इति निश्चीयते ।

राद्धान्तस्तु - यद्यपि प्रश्नप्रतिवचनाभ्याम् उत्तरोत्तरभूयस्त्ववचनं प्राणे पर्यवसितम्, तथापि प्राणवेदिनोऽतिवादित्वमुक्त्वा, 'एष तु वा अतिवदति यः सत्येनातिवदति' (छां.उ.७-१६-१) इति तु शब्देन उपासकभेदं प्रतिपाद्य, तस्य सत्योपासकस्य पूर्वस्मादाधिक्योपदेशात्, सत्यशब्दा[7]भिधेयं[7] परं ब्रह्मैव भूमविशिष्टम् - इति ।

सूत्रार्थस्तु - भूमगुणविशिष्टं परं ब्रह्मैव; सम्प्रसादादध्युपदेशात् । सम्प्रसादः प्रत्यगात्मा, 'एष सम्प्रसादोऽस्माच्छरीरात् समुत्थाय परंज्योतिरुपसम्पद्य' (छां.उ.८-३-४) इत्याद्युपनिषत्प्रसिद्धेः; 'एष तु वा अतिवदति' (छां.उ.७-१६-१) इति प्रत्यगात्मनोऽधिकतयोपदेशात् । अतिवादित्वं हि स्वोपास्याधिक्यवादित्वम् ।। ७ ।।

---

१. स्थापिते-ख २. सम्बन्धे-क -सम्बन्धात्-ग ३. जायमानलिङ्गात्-घ ४. या प्रकरण-क,ख,ग,घ ५. रूपः प्रत्यगात्म-घ ६. पक्षः । कुतः?-घ ७. अवसेयम्-क,ग,घ

७३. धर्मोपपत्तेश्च । (१-३-८)

स्वाभाविकामृतत्व स्वमहिमप्रतिष्ठितत्व सर्वात्मत्व सर्वोत्पत्तिहेतुत्वादीनां भूम्नि श्रूयमाणानां धर्माणां परस्मिन्नेव ब्रह्मण्युपपत्तेश्च भूमा परं ब्रह्मैव ।। ८ ।।

।। इति भूमाधिकरणम् ।। २ ।।

२०. अक्षराधिकरणम् (१-३-३) (सू.९-११)

[अधिकरणार्थः- 'अक्षर'शब्दवाच्यः प्रधानस्याऽपि आधारतया निर्दिष्टः परमात्मैव]

७४. अक्षरमम्बरान्तधृतेः । (१-३-९)

वाजिनां गार्गिप्रश्ने - 'स होवाचैतद्वै तदक्षरं गार्गि ब्राह्मणा अभिवदन्ति अस्थूलमनण्वह्रस्वमदीर्घमलोहितमस्नेहमच्छायम्' (बृ.उ.५-८-७) इत्यत्र अक्षरशब्द[१]निर्दिष्टं[१] प्रधानम् जीवो वा? उत परमात्मा? इति संशयः ।

प्रधानम्, जीवो वा; न परमात्मा - इति पूर्वः [१]पक्षः[१] । 'कस्मिन्नु खल्वाकाश ओतश्च प्रोतश्च' (बृ.उ.५-८-६) इत्युक्ते, आकाशाधारतया उच्यमानम् अक्षरं प्रधानम्; जीवो वा; प्रधानस्य विकाराधारत्वात्, [२]जीवस्याचिद्वस्त्वाधारत्वात्; न परमात्मा - इति[२] ।।

राद्धान्तस्तु - 'यदूर्ध्वं गार्गि दिवः' (बृ.उ.५-८-६) इत्यारभ्य, कालत्रयवर्तिनः कृत्स्नस्य आधारतया निर्दिष्टः आकाशः अव्याकृतमेव; न वायुमान् आकाशः । ततः पश्चात् 'कस्मिन्नु खल्वाकाश ओतश्च प्रोतश्च' । (बृ.उ.५-८-६) इति पृष्टे तदाधारतया उच्यमानम् एतदक्षरं न प्रधानं भवितुमर्हति । नापि जीवः, 'एतस्य वा अक्षरस्य प्रशासने गार्गि; सूर्याचन्द्रमसौ विधृतौ तिष्ठतः' (बृ.उ.५-८-८) इत्यारभ्य प्रशासनात् सर्वाधारत्वश्रुतेः ।

सूत्रार्थस्तु - 'एतद्वै तदक्षरं गार्गि' (बृ.उ.५.८.७) इति निर्दिष्टमक्षरं परमात्मा, अम्बरान्तधृतेः - अम्बरम् - वायुमान् आकाशः, अम्बरान्तः - अम्बरपार[३]भूतम्[३]; अम्बरकारणमिति यावत् । कारणापत्तिरेव हि कार्यस्यान्तः । [४]स च अम्बरान्तः[४] अव्याकृतं प्रधानम्, तस्य धृतेः - धारणात् । अव्याकृतस्यापि [५]धृतेः तदक्षरं[५] परमात्मैव इत्यर्थः ।। ९ ।।

---

१. पक्षः । कुतः?-घ २. आधारत्वात्-ख,घ ३. भूतः-क,ख,ग ४. स चायमम्बरान्तः-ख ५. धृतेः अक्षरं-ग -अक्षरं-क

एवं तर्हि जीवो भवितुमर्हति, [1]तस्य[1] प्रधानधृत्युपपत्तेः इत्याशङ्क्याह -

७५. सा च प्रशासनात् । (१-३-१०)

सा च अम्बरान्तधृतिः, 'एतस्य वा अक्षरस्य प्रशासने [2]गार्गि सूर्याचन्द्रमसौ[2]' (बृ.उ.५-८-८) इति प्रशासनात् श्रूयते । प्रशासनम् - प्रकृष्टं शासनम् अप्रतिहताज्ञा । न च अप्रतिहताज्ञया कृत्स्नस्य चिदचिदात्मकस्य जगतो धृतिः [3]जीवे उपपद्यते[3] । अतो न जीवः ।। १० ।।

७६. अन्यभावव्यावृत्तेश्च । (१-३-११)

अन्य भावः अन्यत्वम् । अस्य अक्षरस्य परमपुरुषादन्यत्वं व्यावर्तयति वाक्यशेषः, 'अदृष्टं द्रष्टृ' (बृ.उ.५-८-९) इत्यादिना सर्वैरदृष्टम् एतदक्षरं सर्वस्य द्रष्टृ इत्यादि प्रधान[4]जीव[4] असम्भावनीयार्थप्रतिपादनात् ।। ११ ।।

।। इति अक्षराधिकरणम् ।। ३ ।।

२१. ईक्षतिकर्माधिकरणम् । (१-३-४)

[अधिकरणार्थः- 'पुरुषमीक्षते' इत्युक्तेक्षणक्रियाकर्मभूतः 'पुरुष'शब्दवाच्योऽर्थः परमात्मैव; न समष्टिपुरुषः]

७७. ईक्षतिकर्मव्यपदेशात् सः । (१-३-१२)

[5]आथर्वणिकानां[5] सत्यकामप्रश्ने, 'यः पुनरेतं त्रिमात्रेण ओमित्यनेनैवाक्षरेण परं पुरुषमभिध्यायीत' (प्र.उ.५-५) इत्यारभ्य, 'स सामभिरुन्नीयते ब्रह्मलोकम् - स [6]एतस्माज्जीवघनात्[6] परात्परं पुरिशयं पुरुषमीक्षते' (प्र.उ.५-५) इत्यत्र, ध्यायतीक्षतिकर्मतया व्यपदिष्टः [7]परः पुरुषः[7], किं हिरण्यगर्भः? उत [8]परब्रह्म[8]भूतः पुरुषोत्तमः? - इति संशयः ।

हिरण्यगर्भ इति पूर्वः [9]पक्षः[9] । [10]पूर्वत्र एकमात्रं[10] प्रणवम् उपासीनस्य मनुष्य[11]लोक[11]प्राप्तिं फलम्, द्विमात्रम् उपासीनस्य अन्तरिक्षलोकप्राप्तिञ्च फलम् अभिधाय, अनन्तरम्, 'यः पुनरेतं त्रिमात्रेण' (प्र.उ.५-५) इति त्रिमात्रं प्रणवम् उपासीनस्य फलत्वेन उच्यमानब्रह्मलोकस्थपुरुषेक्षणकर्मभूतः चतुर्मुख एव इति विज्ञायते, मनुष्यलोकान्तरिक्षलोकसाहचर्यात् ब्रह्मलोकोऽपि क्षेत्रज्ञलोकः इति निश्चयात् ।

---

१. इति तस्यापि-क २. गार्गि-क,ख,ग,घ ३. जीवस्य नोपपद्यते-क -जीवस्योपपद्यते-ख ४. जीवयोः-क,ख,ग,घ ५. अथर्वणिकानां-क,ग ६. एतस्माज्जीवात्-ख ७. परमपुरुषः-क,ख,घ ८. परमात्म-घ ९. पक्षः । कुतः?-घ १०. पूर्वमत्रैकमात्रम्-क ११. लोकस्य-क

राद्धान्तस्तु - 'परात् परं पुरिशयं पुरुषमीक्षते' (प्र.उ.५.५) इति ईक्षतिकर्मतया निर्दिष्टपुरुषविषये श्लोके, 'तमोङ्कारेणैवायतनेनान्वेति विद्वान् यत्तच्छान्तमजरममृतमभयं परञ्च' (प्र.उ.५-७) इति निरुपाधिकशान्तत्वामृतत्वादिव्यपदेशात् परमात्मैव अयं इति निश्चीयते । एवं परमात्मत्वे निश्चिते ब्रह्मलोकशब्दश्च तत्स्थानमेव अभिदधातीति अवगम्यते । [१]तद्विषयतया उदाहृते च[१] श्लोके, 'यत्तत् कवयो [२]वेदयन्ते' (प्र.उ.५-७) 'तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः[२]' (सुबा.उ.६) [३]इत्येवमादिभिः[३] सूरिभिर्दृश्यत्ववचनं तदेव द्रढयति ।

सूत्रार्थस्तु - ईक्षतिकर्म सः परमात्मा, ध्यायतीक्षत्योरेकविषयत्वेन ध्यायतिकर्मापि स एवेत्यर्थः; व्यपदेशात् तद्विषयतया 'शान्तमजरममृतमभयं परञ्च' इति परमात्मधर्माणां व्यपदेशात् ।। १२ ।।

।। इति ईक्षतिकर्माधिकरणम् ।। ४ ।।

२२. दहराधिकरणम् । (१-३-५) (सू.१३-२२)

[अधिकरणार्थः- दहराकाशशब्दवाच्यः परमात्मैव, न भूताकाशः, नाऽपि प्रत्यगात्मा]

७८. दहर उत्तरेभ्यः । (१-३-१३)

छान्दोग्ये - 'अथ यदिदमस्मिन् ब्रह्मपुरे दहरं पुण्डरीकं वेश्म दहरोऽस्मिन्नन्तरः आकाशः, तस्मिन् यदन्तस्तदन्वेष्टव्यम् तद्वाव विजिज्ञासितव्यम्' (छां.उ.८-१-१) इत्यत्र हृदयपुण्डरीकमध्यवर्ती [४]दहरवाक्ये[४] श्रूयमाणः किं भूताकाशः? उत जीवः? अथ परमात्मा? - इति संशयः ।

प्रथमं तावत् भूताकाश इति युक्तमाश्रयितुम् - इति [५]पूर्वः पक्षः;[५] आकाशशब्दस्य भूताकाशे प्रसिद्धिप्राचुर्यात्, आकाशान्तर्वर्तिनः अन्यस्य अन्वेष्टव्यताऽप्रतीतेश्च ।

राद्धान्तस्तु - 'किं तदत्र विद्यते, यदन्वेष्टव्यम्' (छां.उ.८-१-२) इति चोदिते, '[६]यावान् वा अयमाकाशः[६]' (छां.उ.८-१-३) इत्यारभ्य, 'एतत् सत्यं ब्रह्मपुरम्' (छां.उ.८-१-५) इत्यन्तेन दहराकाशस्य अतिमहत्त्वसर्वाश्रयत्वाजरत्वसत्यत्वाद्यभिधाय, 'अस्मिन् कामाः समाहिताः' (छां.उ.८-१-५) इति आकाशान्तर्वर्तिनोऽन्वेष्टव्याः कामाः इति प्रतिपाद्य,

---

१ तद्विषयोदाहृते-क,ग,घ २. वेदयन्ते-क,ग ३. इति-क,ख,ग ४.दहराकाशे-ख -दहराकाशः-क,ग
५ प्रथमः पक्षः । कुतः?-घ ६. तावानेषोन्तर्हृदयाकाशः-क,घ

कोऽयं दहराकाशशब्दनिर्दिष्टः? के तदाश्रयाः कामाः? इत्यपेक्षायाम्, 'एष आत्माऽपहतपाप्मा' (छां.उ.८-१-५) इत्यारभ्य, 'सत्यसङ्कल्पः' (छां.उ.८-१-५) इत्यन्तेन आकाशशब्दनिर्दिष्टः आत्मा, कामाश्च अपहतपाप्मत्वादयः तद्विशेषणभूताः इति प्रतिपादयद्वाक्यम् अपहतपाप्मत्वादि[१]विशिष्टपरमात्मानमाह[१] । उपक्रमे च [२]अन्वेष्टव्यतया[२] प्रतिज्ञातः आकाशः आत्मा, एतद्विशेषणभूताः अपहतपाप्मत्वादयः कामा इति [३]वाक्यं ज्ञापयत्,[३] 'अथ य इहात्मानमनुविद्य व्रजन्त्येतांश्च सत्यान् कामान्, तेषां सर्वेषु लोकेषु कामचारो भवति' (छां.उ.८-१-६) इत्युपसंहरति । अतः अयं दहराकाशः अपहतपाप्मत्वादिविशिष्टः परमात्मा इति निश्चीयते, न भूताकाशादिः इति ।

एवं तर्हि अस्मिन् वाक्ये - 'अथ य एष सम्प्रसादोऽस्माच्छरीरात् समुत्थाय' (छां.उ.८.३.४) इति प्रत्यगात्मप्रतीतेः तस्य च उत्तरत्र इति प्रत्यगात्मप्रतीतेः, तस्य च उत्तरत्र प्रजापतिवाक्येऽपहतपाप्मत्वादिगुणकत्वावगमात्, प्रत्यगात्मैव दहराकाशः - इति पूर्वपक्षी मन्यते ।

[४]राद्धान्ती तु[४] - प्रत्यगात्मा कर्मपरवशतया जागरितस्वप्नसुषुप्त्याद्यवस्थाभिः, तिरोहितापहतपाप्म[५]त्वादिकः[५] परमात्मानमुपसम्पन्नः तत्प्रसादादाविर्भूतगुणकः, प्रजापतिवाक्ये प्रतिपादितः । दहराकाशस्तु अतिरोहितनिरुपाधिकापहतपाप्मत्वादिकः प्रत्यगात्मन्यसम्भावनीयजगद्विधरणसमस्तचिदचिद्वस्तुनियमनाद्यनन्तगुणकः प्रतिपन्नः इति, नायं प्रत्यगात्मा दहराकाशः, अपि तु परमात्मैव - इति मन्यते ।

सूत्रार्थस्तु - दहराकाशः परं ब्रह्म, उत्तरेभ्यः - [६]उत्तरवाक्यगतेभ्यः[६] अपहत-पाप्मत्वादिपरमात्मासाधारणधर्मेभ्यो हेतुभ्यः ।। १३ ।।

७९. गतिशब्दाभ्यां तथा हि दृष्टं लिङ्गञ्च । (१-३-१४)

अस्मिन् दहराकाशे सर्वासां प्रजानाम् [७]अजानतीनाम्[७] अहरहः या गतिः श्रूयते, यश्च दहरा[८]काशाव[८]मर्शरूपैतच्छब्दसमानाधिकरणतया प्रयुक्तो ब्रह्मलोकशब्दः, ताभ्यां

---

१. विशिष्टमात्मानमाह-क,ख,ग,घ २. कर्मतयान्वेष्टव्यतया-ग -अतः उपक्रमेदहरोऽस्मिन्नन्तराकाश इति निर्दिष्टः आत्मा, तस्मिन् यदन्तरिति कामाः तदन्वेष्टव्यम् इति च तदुभयं अन्वेष्टव्यमिति उपदिष्टम् इत्यधिकः पाठः । -क,ख,घ ३. ज्ञापयत्-ख,ग,घ ४. राद्धान्तस्तु-ख ५. त्वादिगुणकः-क ६. उत्तरेभ्यो वाक्येभ्यः-ग -उत्तरेभ्यो वाक्यगतेभ्यो-क,ख,घ ७. प्रजानां तमजानतीनाम्-ख ८. काशपरा-क,ख,ग,घ

दहराकाशः परं ब्रह्म इत्यवगम्यते, 'तद्यथा हिरण्यनिधिं निहितमक्षेत्रज्ञा उपर्युपरि सञ्चरन्तो न विन्देयुः, एवमेवेमाः सर्वाः प्रजा अहरहर्गच्छन्त्य एतं ब्रह्मलोकं न विन्दन्ति अनृतेन हि प्रत्यूढाः' ।। (छां.उ.८-३-४) इति । तथा हि दृष्टम् - तथा हि अन्यत्र परस्मिन् ब्रह्मणि एवंरूपं गमनं दृष्टम् - 'एवमेव खलु सोम्येमाः सर्वाः प्रजाः सति सम्पद्य न विदुः सति [1]सम्पत्स्यामहे इति[1]' (छां.उ.६-९-२) 'स त आगम्य न विदुः सत आगच्छामह' (छां.उ.६-१०-२) [2]इति[2] । तथा ब्रह्मलोकशब्दश्च परस्मिन् [3]ब्रह्मण्येव[3] दृष्टः - 'एष ब्रह्मलोकः सम्राडिति होवाच' (बृ.उ.६-३-३३) इति । लिङ्गञ्च-मा भूत् अन्यत्र दर्शनम्, अस्मिन् प्रकरणे सर्वासां प्रजानां श्रूयमाणम् अहरहर्गमनं ब्रह्मलोकशब्दश्च दहराकाशस्य परमात्मत्वे पर्याप्तं लिङ्गम् । चशब्दोऽवधारणे । एतदेव पर्याप्तमित्यर्थः ।

८०. धृतेश्च महिम्नोऽस्यास्मिन्नुपलब्धेः । (१-३-१५)

अस्य धृत्याख्यस्य परमात्मनो महिम्नः, अस्मिन् दहराकाशे उपलब्धेः अयं, परमात्मा । धृतिः - जगद्विधरणं परमात्मनो [4]महिमा इति अन्यत्रावगम्यते[4], 'एष सर्वेश्वर एष भूताधिपतिरेष भूतपालः एष सेतुर्विधरण एषां लोकानामसम्भेदाय' (बृ.उ.६-४-२२) इति । [5]सा च[5] अस्मिन् दहराकाशे उपलभ्यते, 'अथ य आत्मा स सेतुर्विधृतिः एषां लोकानामसम्भेदाय' (छां.उ. ८-४-१) इति ।। १५ ।।

८१. प्रसिद्धेश्च । (१-३-१६)

'को ह्येवान्यात् कः प्राण्यात्, यदेष आकाश आनन्दो न स्यात्' (तै.उ.आन.७) 'सर्वाणि ह वा इमानि भूतान्याकाशादेव समुत्पद्यन्ते' (छां.उ.१-९-१) इत्यादिषु आकाशशब्दस्य परस्मिन् ब्रह्मणि प्रसिद्धेः । आकाशशब्द एव [6]परमात्मधर्मविशेषितो[6] भूताकाशशङ्कां निवर्तयतीत्यर्थः ।। १६ ।।

८२. इतरपरामर्शात् स इति चेन्नासम्भवात् । (१-३-१७)

परमात्मन इतरः - जीवः; 'अथ य एष सम्प्रसादोऽस्माच्छरीरात् समुत्थाय' (छां.उ.८-३-४) इति जीवस्य परामर्शात् स एव दहराकाशः इति चेत् - तन्न; पूर्वोक्तानां गुणानां तस्मिन् असम्भवात् ।। १७ ।।

---

१. सम्पत्स्याम इति समये आगम्य-क २. इति च-ख,ग,घ ३. ब्रह्मणि-क,ख,ग,घ ४. महिमेत्यवगम्यते-ग
५. स च-क,ख,ग,घ ६. परमात्मविशेषितो-क

८३. उत्तराच्चेदाविर्भूतस्वरूपस्तु । (१-३-१८)

उत्तरात् - प्रजापति[१]वचनात्[१] अपहतपाप्मत्वादिगुणको जीवः अवगम्यते - इति चेत्, तन्न; जागरिताद्यवस्थाभिः अनादिकालप्रवृत्ताभिः पुण्यपापरूपकर्ममूलाभिः तिरोहितगुणकः परब्रह्मोपासनजनिततदुपसम्पत्त्या आविर्भूतस्वरूपः असौ जीवः तत्र प्रजापतिवाक्ये अपहतपाप्मत्वादिगुणकः कीर्तितः । दहराकाशस्तु अतिरोहितस्वरूपः अपहतपाप्मत्वादिगुणकः इति अस्मिन् दहराकाशे न [२]जीवशङ्का[२] ।। १८ ।।

दहरवाक्ये जीवपरामर्शः किमर्थं इति चेत्, तत्राह -

८४. अन्यार्थश्च परामर्शः । (१-३-१९)

'अस्मात् शरीरात्समुत्थाय परं ज्योतिरुपसम्पद्य स्वेन रूपेणाभिनिष्पद्यते' (छां.उ.८-३-४) इति [३]परज्योति[३]स्वरूपदहराकाशोप[४]सम्पत्त्याऽस्य[४] जीवस्य अनृततिरोहितस्वरूपस्य स्वरूपाविर्भावो भवतीति दहराकाशस्य जगद्विधरणादिवत्, जीवस्वरूपाविर्भावापादनरूपसम्पद्विशेषप्रतिपादनार्थो जीवपरामर्शः ।। १९ ।।

८५. अल्पश्रुतेरिति चेत् तदुक्तम् । (१-३-२०)

'दहरोऽस्मिन्' (छां.उ.८-१-१) इति अल्पपरिमाणश्रुतिः आराग्रोपमितस्य जीवस्यैव उपपद्यते; न तु सर्वस्मात् ज्यायसो ब्रह्मणः इति चेत्, तत्र यदुत्तरं वक्तव्यम्, तत् पूर्वमेवोक्तम्, 'निचाय्यत्वात्' इत्यनेन ।। २० ।।

८६. अनुकृतेस्तस्य च । (१-३-२१)

अनुकृतिः - अनुकारः; तस्य परमात्मनः अनुकाराद्धि जीवस्य आविर्भूतस्वरूपस्य अपहतपाप्मत्वादिगुणकत्वम् । अतः अनुकर्तुः जीवात्, अनुकार्यः [५]परब्रह्मभूतो[५] दहराकाशः, अर्थान्तरभूत एव । तदनुकारश्च तत्साम्या[६]पत्तिः[६] श्रूयते, 'यदा पश्यः पश्यते रुक्मवर्णं कर्तारमीशं पुरुषं ब्रह्मयोनिम् । तदा विद्वान् पुण्यपापे विधूय निरञ्जनः परमं साम्यमुपैति' ।। (मुं.उ.३-१-३) इति ।। २१ ।।

---

१. वाक्यात्-क,ख,ग,घ २. जीवशङ्का-ख,घ ३. परंज्योति-क,ख,ग,घ ४. सम्पत्त्य-घ ५. परमात्मभूतो-ग
६. पत्तिश्च-ख

८७. अपि स्मर्यते । (१-३-२२)

स्मर्यते च तदुपासनात् तत्साम्यापत्तिरूपा अनुकृतिः जीवस्य, 'इदं ज्ञानमुपाश्रित्य मम साधर्म्यमागताः । सर्गेऽपि नोपजायन्ते प्रलये न व्यथन्ति च' ।। (भ.गी.१४-२) इति ।।

।। इति दहराधिकरणम् ।। ५ ।।

२३. प्रमिताधिकरणम् । (१-३-६) (सू.२३-२४)

[अधिकरणार्थः - 'अङ्गुष्ठमात्रः पुरुषः - हृदये' इत्युक्ताङ्गुष्ठप्रमाणप्रमितः पुरुषः परमात्मैव; न कर्मपरवशो जीवः । 'हृदयपरिमितावस्थया सर्वयन्ता प्रभुः']

८८. शब्दादेव प्रमितः (१-३-२३)

कठवल्लीष्वाम्नायते - 'अङ्गुष्ठमात्रः पुरुषो मध्य आत्मनि तिष्ठति । ईशानो भूतभव्यस्य न ततो विजुगुप्सते । एतद्वै [1]तत्[1]', (कठ.उ.३-४-१२) 'अङ्गुष्ठमात्रः पुरुषो ज्योतिरिवाधूमकः' (कठ.उ.२-४-१३) तथोपरिष्टात्, - 'अङ्गुष्ठमात्रः पुरुषोऽन्तरात्मा सदा जनानां हृदये सन्निविष्टः' (कठ.उ.३.६.१७) इति ।

अत्र अङ्गुष्ठप्रमितो जीवात्मा? उत परमात्मा? इति संशयः । जीवात्मा - इति पूर्वः [2]पक्षः[2]; अन्यत्र [3]स्वीकृतस्पष्ट[3]जीवभावे पुरुषे अङ्गुष्ठप्रमितत्वश्रुतेः, 'प्राणाधिपः सञ्चरति स्वकर्मभिः । अङ्गुष्ठमात्रो रवितुल्यरूपः' (श्वे.उ.५-७-८) इति ।

राद्धान्तस्तु - तत्र 'स्वकर्मभिः' इति जीवभावनिश्चयवदत्रापि, 'ईशानो भूतभव्यस्य' (कठ.उ.२-४-१२) इति भूतभव्येशितृत्वदर्शनात् परमात्मैव - इति ।

सूत्रार्थस्तु - [4]शब्दादेव प्रमितः[4] - अङ्गुष्ठप्रमितः परमात्मैव, 'ईशानो भूतभव्यस्य' (कठ.उ.२-४-१२) इति परमात्मवाचिशब्दात् ।। २३ ।।

कथम् अनवच्छिन्नस्य परमात्मनः अङ्गुष्ठप्रमितत्वम् इत्याशङ्क्याह -

८९. हृद्यपेक्षया तु मनुष्याधिकारत्वात् । (१-३-२४)

उपासनार्थम् उपासकहृदये वर्तमानत्वात्, उपासकहृदयस्य अङ्गुष्ठमात्रत्वात् तदपेक्षया इदमङ्गुष्ठप्रमितत्वम् । मनुष्याणामेव उपासकत्वसम्भावनया मनुष्यान् अधिकृत्य

---

१. तत् उत्तरत्र च-क,ख,घ २. पक्षः । कुतः?-घ ३. स्पष्ट-क,ख,ग,घ ४. प्रमितः-क,ख,ग,घ

प्रवृत्तत्वात् शास्त्रस्य, मनुष्यहृदयापेक्षया इदमुक्तम् ।। स्थितं तावत् उत्तरत्र समापयिष्यते ।। २४ ।।

।। इति प्रमिताधिकरणम् ।। ६ ।।

२४. देवताधिकरणम् । (१-३-७) (सू.२५-२९)

[अधिकरणार्थः-श्रुत्युक्तब्रह्मोपासनाधिकारः देवानामप्यस्त्येव]

९०. तदुपर्यपि बादरायणः सम्भवात् । (१-३-२५)

मनुष्याधिकारं ब्रह्मोपासनशास्त्र[1]मित्युक्तम्[1] ; तत्प्रसङ्गेन देवादीनामपि ब्रह्मविद्यायाम् अधिकारः अस्ति, [2]न वा?[2] इति चिन्त्यते ।

[3]न देवादीनाम् अधिकारः[3] अस्ति-इति पूर्वः पक्षः; परिनिष्पन्ने ब्रह्मणि शब्दस्य प्रामाण्य[4]सम्भवेऽपि[4], देवादीनां विग्रहादिमत्त्वे प्रमाणाभावात्, मन्त्रार्थवादानामपि विधिशेषतया विग्रहादिसद्भावपरत्वा[5]भावात्[5] विग्रहवन्निर्वर्त्याहरहरनुष्ठीयमानविवेकादि साधनसप्तकसंस्कृतमनोनिष्पाद्योपासननिर्वृत्तौ तेषां सामर्थ्याभावात् ।

राद्धान्तस्तु - जगत्सृष्टिप्रकरणेषु नामरूपव्याकरणश्रुत्यैव देवादीनां [6]विग्रहादिमत्त्वं[6] सिध्यति । देवादीनां देहेन्द्रियादिकरणमेव हि नामरूपव्याकरणम् ; मन्त्रार्थवादयोश्च तदुपलब्धेः, तयोः अनुष्ठेयप्रकाशनस्तुतिपरत्वेऽपि तदुपपत्तये [7]तत्सद्भावे प्रमाणत्वात्[7] देवादीनां विग्रहादिमत्त्वसिद्धिः; न हि विग्रहादिमत्तया स्तुतिः प्रकाशनं च तदभावे सम्भवति । अतः सामर्थ्यसम्भवात् अस्त्येव अधिकारः ।

सूत्रार्थस्तु - तदुपर्यपि तेभ्यः मनुष्येभ्यः उपरिवर्तमानानां देवादीनामपि अधिकारः अस्ति । [8]यद्वा तत् ब्रह्मोपासनम्, उपरि देवादिष्वपि सम्भवति; तेषामपि[8] ब्रह्मस्वरूपतदुपासनप्रकारज्ञानतदर्थित्वतदुपादानसामर्थ्यसम्भवात् । पूर्वोपार्जितज्ञाना-विस्मरणात् ज्ञानसम्भवः, [9]तापत्रयाभिहति[9]पूर्वकब्रह्मगुण[10]ज्ञानाच्च[10] अर्थित्वसम्भवः, सृष्टिवाक्यमन्त्रार्थवादेषु विग्रहवत्त्वादिदर्शनात् सामर्थ्यसम्भवश्च - इति भगवान् बादरायणो मन्यते ।। २५ ।।

---

१. मित्युक्ते-क,घ २. न-क,ख,ग,घ ३. देवादीनामधिकारो न-ख,घ -न देवानामस्तीति-ग ४. सद्भावेऽपि-क ५. भावाच्च-ख,घ ६. विग्रहवत्त्वं सिध्यति-क,ग ७. तत्सद्भावे प्रामाण्यात्-ख,घ -तत्सम्भवे प्रामाण्यात्-क,ग ८. तेषामपि-क,ख,ग,घ ९. तापत्रयाभिभव-क १०.शरीरज्ञानाच्च-ग

९१. विरोधः कर्मणीति चेन्नानेकप्रतिपत्तेर्दर्शनात् । (१-३-२६)

कर्मणि - यागादौ । विग्रहवत्त्वे सति एकस्य युगपदनेकयागेषु सन्निधानानुपपत्तेः विरोधः प्रसज्यते - इति चेत् - तन्न, शक्तिमतां सौभरिप्रभृतीनां युगपदनेकशरीर-प्रतिपत्तिदर्शनात् ।। २६ ।।

९२. शब्द इति चेन्नाऽतः प्रभवात् प्रत्यक्षानुमानाभ्याम् । (१-३-२७)

'विरोधः' 'इति वर्तते'[1] । मा भूत् कर्मणि विरोधः, शब्दे तु वैदिके विरोधः प्रसज्यते । विग्रहवत्त्वे हि तेषां सावयवत्वेन उत्पत्तिविनाशयोगात् उत्पत्तेः प्राक् विनाशादूर्ध्वं च, वैदिकानाम् इन्द्रादिशब्दानाम् अर्थशून्यत्वम् अनित्यत्वं वा स्यात् इति चेत् -

तन्न; अतः प्रभवात् - अतः वैदिकादेव शब्दात्, इन्द्रादेः प्रभवात् । पूर्वपूर्वेन्द्रादौ विनष्टे, वैदिकात् इन्द्राद्याकृतिविशेषवाचिनः शब्दात् इन्द्राद्याकृतिविशेषं स्मृत्वा, तदाकारमपरमिन्द्रादिकं सृजति प्रजापतिः इति, वैदिकस्य शब्दस्य न कश्चिद्विरोधः । न हि देवदत्तादिशब्दवत् इन्द्रादिशब्दाः व्यक्तिविशेषे सङ्केतपूर्वकाः प्रवृत्ताः [2]अपि तु गवादि[2]शब्दवत् आकृतिविशेषवाचिन इति, तेषामपि नित्य एव वाच्यवाचकभावः ।

वैदिकात् - इन्द्रादिशब्दात् अर्थविशेषं स्मृत्वा कुलालादिरिव घटादिकं प्रजापतिः सृजति इति कुतोऽवगम्यते?

प्रत्यक्षाऽनुमानाभ्याम् - श्रुतिस्मृतिभ्यामित्यर्थः । श्रुतिस्तावत् - 'वेदेन रूपे व्याकरोत्सतासती प्रजापतिः' (तै.ब्रा.२-६-२) तथा 'स भूरिति व्याहरत् स भूमिमसृजत' (तै.ब्रा.२-२-२) इत्यादिका । स्मृतिरपि - 'सर्वेषाञ्च(तु) स नामानि कर्माणि च पृथक् पृथक् । वेदशब्देभ्य एवादौ पृथक् संस्थाश्च निर्ममे' ।। (म.स्मृ.१-२१) 'नाम रूपञ्च भूतानां कृत्यानाञ्च प्रपञ्चनम् । वेदशब्देभ्य एवादौ देवादीनां चकार सः ।।' (वि.पु.१-५-६३) इत्यादिका ।। २७ ।।

९३. अत एव च नित्यत्वम् । (१-३-२८)

यतः प्रजापतिः वैदिकात् शब्दात् अर्थाकारं स्मृत्वा तदाकारं सर्वं सृजति, अतश्च वसिष्ठविश्वामित्रादीनां मन्त्रसूक्तादिकृत्त्वेऽपि, मन्त्रादिमयस्य वेदस्य नित्यत्वं

१. विरोध इत्यनुवर्तते-ख २. अपि तदभावादि-ख

तिष्ठत्येव; प्रजापतिर्हि नैमित्तिकप्रलयानन्तरम् । 'मन्त्रकृतो वृणीते' (आ.प्र.१-७) 'विश्वामित्रस्य सूक्तं भवति' (तै.सं.५-२-४) इत्यादिवेदशब्देभ्योऽनधीतमन्त्रादि दर्शनशक्तवसिष्ठाद्याकृतिविशेषं स्मृत्वा, वसिष्ठत्वादिपदप्राप्तये अनुष्ठितकर्मविशेषांश्च अनुस्मृत्य, [1]तदाकारविशेषान्[1] तान् वसिष्ठादीन् सृजति; ते च अनधीत्यैव वेदैकदेशभूतमन्त्रादीन् स्वरतो वर्णतश्च अस्खलितान् पठन्ति । तत् एषां मन्त्रादिकृत्त्वेऽपि वेदनित्यत्वम् उपपद्यते ।। २८ ।।

प्रजापतिप्रभृतिषु सर्वेषु तत्त्वेषु अव्याकृतपर्यन्तेषु, अव्याकृतपरिणाम[2]रूपेषु[2] शब्दमयेषु [3]वेदेषु च[3] विनष्टेषु अव्याकृतसृष्ट्यावृत्तौ कथं वेदस्य नित्यत्वम् इत्यत आह -

१४. समाननामरूपत्वाच्चावृत्तावप्यविरोधो दर्शनात् स्मृतश्च । (१-३-२९)

अव्याकृतसृष्ट्यावृत्तावपि सृज्यानां समाननामरूपत्वादेव न कश्चिद्विरोधः । आदिसर्गेऽपि हि परमपुरुषः पूर्व[4]संस्थानं[4]जगत् स्मरन् [5]सृजति[5]; वेदांश्च पूर्वानुपूर्वीविशिष्टान् आविष्कृत्य हिरण्यगर्भाय [6]ददातीति[6] । पूर्वसंस्थानमेव जगत् सृजति इति, कथमवगम्यते? दर्शनात्, स्मृतेश्च - दर्शनं श्रुतिः, 'अहोरात्राणि विदधद्विश्वस्य मिषतो वशी, सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पयत् । 'दिवं च पृथिवीं चान्तरिक्षमथो सुवः' ।। (तै.ना.४४) इति । 'यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै' (श्वे.उ.६-१८) इति च; स्मृतिरपि, 'यथर्तुष्वृतुलिङ्गानि नानारूपाणि पर्यये । 'दृश्यन्ते तानि तान्येव तथा भावा युगादिषु' ।। (वि.पु.१-५-६५) इति ।

एतदेव [7]वेदस्य[7] नित्यत्वम् - यत् पूर्वपूर्वोच्चारणक्रमविशेषं स्मृत्वा तेनैव क्रमेण उच्चार्यमाणत्वम् । परमपुरुषोऽपि स्वस्वरूपस्वाराधनतत्फलयाथात्म्यावबोधि वेदं स्वस्वरूपवत् नित्यमेव पूर्वानुपूर्वीविशिष्टं स्मृत्वा आविष्करोति । अतः देवादीनां ब्रह्मविद्याधिकारे न कश्चिद्विरोधः ।। २९ ।।

।। इति देवताधिकरणम् ।।

---

१. तदाकारान्-क,ख,ग,घ २. रूप-क,ख,ग,घ ३. वेदेषु-क ४. प्राकृत-क,ख,ग ५. तथैव सृजति-क,ख,ग,घ
६. ददाति-क,ख,ग,घ ७. एतदेव च वेदस्य-ख

२५. मध्वधिकरणम् । (१-३-८) (सू.३०-३२)

[अधिकरणार्थः-वस्वादिपदं प्राप्तानामपि मधुविद्यादिषु अधिकारः]

९५. मध्वादिष्वसम्भवादनधिकारं जैमिनिः । (१-३-३०)

छान्दोग्ये - 'असौ वा आदित्यो देवमधु' (छां.उ.३-१-१) इत्युपक्रम्य, 'तद्यत् प्रथमममृतं तद्वसव उपजीवन्ति' (छां.उ.३-६-१) इत्युक्त्वा, 'स य एतदेवममृतं वेद, वसूनामेवैको भूत्वाऽग्निनैव मुखेनैतदेवामृतं दृष्ट्वा तृप्यति (छां.उ.३-६-३) इत्यादिना ऋग्यजुस्सामादिवेदोदितकर्मसम्पाद्यरसाधारतया मधुमयस्य आदित्यस्य पूर्वदक्षिण [1]पश्चिमोत्तरोर्ध्वांशान्[1] वसुरुद्रादित्यमरुत्साध्यनाम्नां देवगणानां भोग्यत्वेन अभिधाय, तैः भुज्यमानाकारेण आदित्यांशान् उपास्यान् उपदिश्य, तानेव आदित्यांशान् तथाभूतान् प्राप्यान् उपदिशति । एवमादिषु उपासनेषु [2]वस्वादित्यादीनाम्[2] अधिकारोऽस्ति [3]न वा[3]- इति संशयः ।

नास्त्यधिकारः - इति पूर्वः [4]पक्षः[4]; [5]वस्वादीनाम्[5] उपास्यान्तर्गतत्वेन कर्मकर्तृभावविरोधात्, प्राप्यस्य वसुत्वादेः प्राप्तत्वाच्च ।

राद्धान्तस्तु - ब्रह्मण एव तदवस्थस्य उपास्यत्वात् वस्वादीनां सतां स्वावस्थब्रह्मानुसन्धानाविरोधात्, कल्पान्तरे वसुत्वादेः प्राप्यत्वाविरोधाच्च वस्वादी[6]नामधिकारः[6] सम्भवति - इति ।

सूत्रार्थस्तु - मधुविद्यादिषु वस्वादीनामनधिकारं जैमिनिर्मन्यते; असम्भवात् [7]वस्वादीनामेव[7] उपास्यानाम् उपासकत्वासम्भवात्, वसुत्वादेः प्राप्तत्वादेव प्राप्यत्वासम्भवाच्च ।। ३० ।।

९६. ज्योतिषि भावाच्च । (१-३-३१)

'तं देवा ज्योतिषां ज्योतिरायुर्होपासतेऽमृतम्' (बृ.उ.६-४-१६) इति, ज्योतिषि - परस्मिन् ब्रह्मणि, देवमनुष्ययोः अधिकारसाधारण्ये सत्यपि, 'ज्योतिषां ज्योतिः परं ब्रह्म

---

१. ऊर्ध्वाद्यंशान्-ख २. वस्वादीनाम्-क,ख -वस्वादित्यानाम्-घ ३. न-क,ख,ग,घ ४. पक्षः । कुतः?-घ ५. वस्वादित्यादीनाम्-ख,ग ६. नामप्यधिकारः-क,ख,ग,घ ७. वसूनामेव-ख,घ

देवा उपासते' इति विशेषवचनं वस्वादीनां कर्मकर्तृभावविरोधात्, तेषु तेषाम् [1]अनधिकारं[1]द्योतयति । देवाः इति सामान्यवचनञ्च वस्वादिविशेषविषयम् इत्यवगम्यते, अन्येषामविरोधात् ।। ३१ ।।

१७. भावं तु बादरायणोऽस्ति हि । (१-३-३२)

'तु' शब्दः पक्षं व्यावर्तयति । वस्वादीनां मधुविद्यादिषु अधिकार[2]सद्भावं[2]भगवान् बादरायणो मन्यते । अस्ति हि वस्वादीनामेव उपास्यत्वं प्राप्यत्वञ्च । इदानीं वसूनामेव सतां कल्पान्तरे वसुत्वस्य प्राप्यत्वसम्भवात् प्राप्यत्वं सम्भवति । स्वात्मनां ब्रह्मभावानुसन्धानसम्भवात् उपास्यत्वञ्च सम्भवति । 'य एतामेवं ब्रह्मोपनिषदं वेद' (छां.उ.३-११-३) [3]इति हि[3] [4]कृत्स्नाया मधुविद्यायाः[4] ब्रह्मविद्यात्वम् अवगम्यते ।। ३२ ।।

।। इति मध्वधिकरणम् ।। ८ ।।

२६. अपशूद्राधिकरणम् । (१-३-९) (सू.३३-३९)

[अधिकरणार्थः-त्रैवर्णिकेतरेषां ब्रह्मविद्यासु अनधिकारः]

१८. शुगस्य तदनादरश्रवणात् तदाद्रवणात् सूच्यते हि । (१-३-३३)

ब्रह्मविद्यायां शूद्रस्यापि अधिकारः अस्ति न - इति संशयः ।

अस्ति - इति पूर्वः [5]पक्षः[5]; अर्थित्वसामर्थ्यसम्भवात् । शूद्रस्य अनग्निविद्यत्वेऽपि मनोवृत्ति[6]मात्रत्वात्[6] उपासनस्य सम्भवति हि सामर्थ्यम् । ब्रह्मस्वरूपतदुपासनप्रकारज्ञानञ्च इतिहासपुराणश्रवणादेव निष्पद्यते । अस्ति हि शूद्रस्यापि इतिहासपुराणश्रवणानुज्ञा, 'श्रावयेच्चतुरो वर्णान् कृत्वा ब्राह्मणमग्रतः' (म.स्मृ.) इति । तथा तत्रैव विदुरादीनां ब्रह्मनिष्ठत्वं दृश्यते । उपनिषत्स्वपि - 'आजहारेमाः शूद्राऽनेनैव मुखेनालापयिष्यथाः' (छां.उ.४-२-५) इति शूद्रशब्देन आमन्त्र्य ब्रह्मविद्योपदेशदर्शनात् [7]शूद्रस्यापि इह[7] अधिकारः सूच्यते ।

राद्धान्तस्तु - उपासनस्य मनोवृत्ति[8]मात्रत्वेऽपि[8] अनधीतवेदस्य [9]शूद्रस्य[9] उपासनोपायभूतज्ञानासम्भवात्, न सामर्थ्यसम्भवः । कर्मविधिवत् [10]उपासना[10]विधयोऽपि

---

१. अधिकारम्-ख २. भावम्-घ ३. इति-ख,ग ४. कृत्स्नायां मधुविद्यायाम्-ग ५. पक्षः । कुतः?-घ ६. मात्रनिवृत्तित्वात्-ग ७. शूद्रस्यापि-क,ख,ग,घ ८. मात्रनिवृत्तित्वेऽपि-ग ९. शूद्रस्य इति नास्ति-घ १०. उपासन-क,ख,ग,घ

त्रैवर्णिकविषयाध्ययनगृहीतस्वाध्यायोत्पन्नज्ञानमेव उपासनोपायतया स्वीकुर्वते । [1]इतिहासादयोऽपि[1] स्वाध्यायसिद्धमेव ज्ञानम् उपबृंह[2]यन्तीति[2] ततोऽपि नास्य ज्ञानलाभः । श्रवणानुज्ञा तु पापक्षयादिफला ।

विदुरादीनां तु भवान्तरवासनया ज्ञानलाभात् ब्रह्मनिष्ठत्वम् । शूद्र इति आमन्त्रणमपि न चतुर्थवर्णत्वेन, अपि तु ब्रह्मविद्यावैकल्यात् 'शुक्' अस्य सञ्जाता इति । अतो न शूद्रस्याधिकारः ।

सूत्रार्थस्तु - ब्रह्मविद्यावैकल्येन [3]हंसोक्तानादर[3]वाक्यश्रवणात् तदैव आचार्यं प्रति आद्रवणाच्च आचार्येण [4]तस्य[4] शुश्रूषोः विद्याऽलाभकृता शुक् सूच्यते । 'हि' शब्दो हेतौ । यस्मात् अस्य शुक् सूच्यते, अतः शोचनात् शूद्र इति कृत्वा आचार्यो रैक्कः जानश्रुतिं शूद्र इत्यामन्त्रयते; न जातियोगेन इत्यर्थः ।। ३३ ।।

९९. क्षत्रियत्वगतेश्च । (१-३-३४)

अस्य शुश्रूषोः क्षत्रियत्वावगतेश्च न जातियोगेन शूद्र इत्यामन्त्रणम्; [5]प्रकरण प्रक्रमे[5] हि 'बहुदायी' (छां.उ.४-१-१) इत्यादिना दानपतित्वबहुतरपक्वान्न[6]दायित्व[6]-क्षत्तृप्रेषणबहु[7]ग्रामादि[7] प्रदानैः अस्य जानश्रुतेः शुश्रूषोः क्षत्रियत्वं प्रतीतम् ।। ३४ ।।

१००. उत्तरत्र चैत्ररथेन लिङ्गात् । (१-३-३५)

उपरिष्टाच्च अस्यां [8]विद्यायां[8] ब्राह्मणक्षत्रिययोरेव अन्वयो दृश्यते 'अथ ह शौनकं च कापेयमभिप्रतारिणञ्च' (छां.उ.४-३-५) [9]इत्यादिना[9] ।

अभिप्रतारी हि चैत्ररथः क्षत्रियः । अभिप्रतारिणः चैत्ररथत्वं, क्षत्रियत्वं च कापेयसाहचर्यात् लिङ्गात् अवगम्यते । प्रकरणान्तरे हि कापेयसहचारिणः चैत्ररथत्वं क्षत्रियत्वञ्च अवगतम् । 'एतेन वै चैत्ररथं कापेया अयाजयन्' (ताण्ड्य.२-१२-५) इति, 'तस्माच्चैत्ररथो नामैकः क्षत्रपतिरजायत' (शत.११-५-३१३) [10]इति च[10] । अतः अस्यां विद्यायाम् अन्वितो ब्राह्मणादितरः जानश्रुतिरपि क्षत्रियो भवितुमर्हति ।। ३५ ।।

---

१. इतिहासाद्यपि-क,ग,घ -इतिहासादीन्यपि-ख २. यतीति-घ ३. हंसोक्तात्मानादर-क,ग,घ ४. अस्य-क,घ ५. प्रकरणोपक्रमे-क,ख,ग,घ ६. प्रदायित्व-क,ख ७. ग्राम-क,ख,ग ८. ब्रह्मविद्यायां-ग ९. इत्यादौ-क,ख,ग,घ १०. इति-क,ग

१०१. संस्कारपरामर्शात् तदभावाभिलापाच्च । (१-३-३६)

विद्योपदेशे, 'उप त्वा नेष्ये' (छां.उ.४-४-५) इति उपनयनसंस्कारपरामर्शात्, शूद्रस्य तदभाववचनाच्च [१]अनधिकारः[१] । 'न शूद्रे पातकं किञ्चिन्न च संस्कारमर्हति' (म.स्मृ.१०-१२६) इति हि निषिध्यते ।। ३६ ।।

१०२. तदभावनिर्धारणे च प्रवृत्तेः । (१-३-३७)

'नैतदब्राह्मणो विवक्तुमर्हति । समिधं सौम्याहर' (छां.उ.४-४-५) [२]इति शुश्रूषोर्जाबालेः[२] शूद्रत्वाभावनिश्चय एवोप[३]देशे प्रवृत्तेः[३] न अधिकारः ।। ३७ ।।

१०३. श्रवणाध्ययनार्थप्रतिषेधात् । (१-३-३८)

शूद्रस्य श्रवणाध्ययनादीनि हि प्रतिषिध्यन्ते, 'तस्माच्छूद्रसमीपे नाध्येतव्यम्' इति । अनुपशृण्वतः अध्ययनादिः न सम्भवति ।। ३८ ।।

१०४. स्मृतेश्च । (१-३-३९)

स्मर्यते च शूद्रस्य वेदश्रवणादौ दण्डः, 'अथ हास्य वेदमुपशृण्वतः त्रपुजतुभ्यां [४]श्रोत्रप्रतिपूरणम्[४], उदाहरणे जिह्वाच्छेदो धारणे शरीरभेदः' (गौ.ध.सू.१-२-१) इति ।। ३९ ।।

।। इति अपशूद्राधिकरणम् ।। ९ ।।

(६) प्रमिताधिकरणशेषः । (सू.४०-४१)

प्रासङ्गिकं परिसमाप्य प्रकृतं [५]परिसमापयति[५] -

१०५. कम्पनात् । (१-३-४०)

अङ्गुष्ठप्रमितप्रकरणमध्ये, 'यदिदं किञ्च जगत्सर्वं प्राण एजति निस्सृतम् महद्भयं वज्रमुद्यतम्' (कठ.उ.६-२) 'भयादस्याग्निस्तपति' (कठ.उ.६-३) इत्यादौ प्राणशब्द [६]निर्दिष्टाङ्गुष्ठप्रमित[६][७]जनितभयनिमित्तात्[७] अग्निवायुसूर्यप्रभृतिकृत्स्नजगत्कम्प[८]नाच्छ्रूयमाणात्[८] अङ्गुष्ठप्रमितः परमात्मैव इति निश्चीयते ।। ४० ।।

---

१. नाधिकारः-क,ख,ग २. इति-क,ख,ग,घ ३. देशप्रवृत्तेः-क,ग -देशप्रवृत्तेश्च-ख,घ ४. पूरणम्-ग
५. समापयति-क,ख,ग,घ ६. निर्दिष्टस्याङ्गुष्ठप्रमितस्या-क,ग ७. जातभयात्-ख -जनितभयात्-घ
८. नाच्छ्रूयमाणाच्च-क,ख,ग,घ

१०६. ज्योतिर्दर्शनात् । (१-३-४१)

[1]अस्मिन्नेव[1] प्रकरणे तत्सम्बन्धितया 'न तत्र सूर्यो भाति' (कठ.उ.५-१५) इत्यारभ्य, 'तस्य भासा सर्वमिदं विभाति' (कठ.उ.५-१५) इति सर्वेषां [2]छादकस्या[2]नवधिकातिशयस्य भाश्शब्दाभिहितस्य ब्रह्मभूतस्य परस्य ज्योतिषो दर्शनाच्च अङ्गुष्ठप्रमितः परमात्मा ।। ४१ ।।

।। इति प्रमिताधिकरणशेषः ।। ६ ।।

२७. अर्थान्तरत्वादिव्यपदेशाधिकरणम् । (१-३-१०) (सू.४२-४४)

[अधिकरणार्थः-नामरूपनिर्वोढा आकाशः परमात्मा]

१०७. आकाशोऽर्थान्तरत्वादि व्यपदेशात् । (१-३-४२)

छान्दोग्ये - 'आकाशो ह वै नामरूपयोर्निर्वहिता ते यदन्तरा तद् ब्रह्म तदमृतं स आत्मा' (छां.उ.८-१४-१) इत्यत्र आकाशशब्दनिर्दिष्टः, किं मुक्तात्मा? उत परमात्मा? इति संशयः ।

मुक्तः - इति पूर्वः [3]पक्षः[3], 'धूत्वा शरीरमकृतं कृतात्मा ब्रह्मलोकमभिसम्भवामि' (छां.उ.८-१३-१) इति मुक्तस्य अनन्तरप्रकृतत्वात् ।

राद्धान्तस्तु - 'नामरूपयोर्निर्वहिता ते यदन्तरा' (छां.उ.८-१४-१) इति स्वयम् अस्पृष्टनामरूपतया नामरूपयोः निर्वोढृत्वेन श्रूयमाणः अयमाकाशो बद्धमुक्तोभयावस्थात् प्रत्यगात्मनः अर्थान्तरत्वात् परमात्मैव ।

सूत्रार्थस्तु - आकाशः परमात्मा, [4]तस्य[4] नामरूपयोः निर्वोढृत्वतदस्पर्श-[5]लक्षणार्थान्तरत्व[5]व्यपदेशात्; प्रत्यगात्मनो [6]ह्यर्थान्तरभूत[6] एव नामरूपयोर्निर्वोढा । बद्धावस्थस्तावत् नामरूपाभ्यां स्पृष्टः तत्परवशश्चेति न निर्वोढा; मुक्तस्यापि जगद्व्यापारराहितत्वात् न निर्वोढृत्वम् । आदिशब्देन निरुपाधिक[7]ब्रह्मत्वामृतत्वात्मत्वादीनि[7] गृह्यन्ते; तानि निरुपाधिकानि मुक्तस्यापि न सम्भवन्ति ।। ४२ ।।

[8]ननु तत्त्व[8]मस्यादिना ऐक्यव्यपदेशात्, 'नेह नानाऽस्ति', (बृ.उ.६-४-१९) इति भेदप्रतिषेधाच्च न प्रत्यगात्मनोऽर्थान्तरभूतः परमात्मा इत्याशङ्क्याह-

---

१. तस्मिन्नेव-क,ख,ग,घ २. द्योतकस्य-ग ३. पक्षः । कुतः?-घ ४. अस्य-क,ख,ग,घ
५. लक्षणान्तर-घ ६. अर्थान्तरभूत-ख,घ ७. ब्रह्मत्वामृतत्वादीनि-ग ८. तत्त्व-घ

१०८. सुषुप्त्युत्क्रान्त्योर्भेदेन । (१-३-४३)

'व्यपदेशात्' इति वर्तते । 'प्राज्ञेनाऽऽत्मना सम्परिष्वक्तः' (बृ.उ.६-३-२१) 'प्राज्ञेनाऽऽत्मनाऽन्वारूढः' (बृ.उ.६-३-३५) इति सुषुप्त्युत्क्रान्त्योः लुप्तसकलविशेषविज्ञानात्, प्रत्यगात्मनः तदानीमेव सर्वज्ञतया [1]भेद[1]व्यपदेशात् प्रत्यगात्मनोऽर्थान्तरभूत एव परमात्मा ।। ४३ ।।

१०९. पत्यादिशब्देभ्यः । (१-३-४४)

परिष्वञ्जके प्राज्ञे, श्रूयमाणेभ्यः पत्यादिशब्देभ्यश्च अयं प्रत्यगात्मनः अर्थान्तरभूतः परमात्मा, 'सर्वस्याधिपतिः सर्वस्य वशी सर्वस्येशानः' (बृ.उ.६-४-२२) इत्यादौ । ऐक्योपदेशभेदप्रतिषेधौ तु ब्रह्मकार्यत्वनिबन्धनाविति । 'तज्जलानिति' (छां.उ.३-१४-१) 'सर्वं खल्विदं ब्रह्म' (छां.उ.३-१४-१) इत्यादि श्रुतिभिरेव व्यक्तौ ।। ४४ ।।

।। इति अर्थान्तरत्वादिव्यपदेशाधिकरणम् ।।

।। इति श्री भगवद्रामानुजविरचिते वेदान्तदीपे प्रथमस्याध्यायस्य तृतीयः पादः ।।

प्रथमाध्यायस्य चतुर्थः पादः-अन्ययोगव्यवच्छेदपादः (अधि.८,सू.२९)

२८. आनुमानिकाधिकरणम् । (सू.१-७)

[अधिकरणार्थः-'अव्यक्त'शब्दार्थः न सांख्योक्तम् प्रधानं; किन्तु न शरीरमेव]

११०. आनुमानिकमप्येकेषामिति चेन्न, शरीररूपकविन्यस्तगृहीतेर्दर्शयति च । (१-४-१)

[2]कठवल्लीषु[2] - 'इन्द्रियेभ्यः परा ह्यर्था अर्थेभ्यश्च परं मनः । मनसश्च परा बुद्धिर्बुद्धेरात्मा महान् परः' । (कठ.उ.३-१०) 'महतः परमव्यक्तमव्यक्तात् पुरुषः परः । पुरुषान्न परं किञ्चित् सा काष्ठा सा परा गतिः' ।। (कठ.उ.३-११) इत्यत्र किं साङ्ख्योक्तं प्रधानम् अव्यक्तशब्दाभिधेयम्? उत न? - इति संशयः ।

प्रधानम् - इति पूर्वः [3]पक्षः[3] । 'महतः [4]परम्[4]' [5]इत्यादितत्तन्त्र[5]प्रक्रियाप्रत्यभिज्ञानात्, 'पुरुषान्न परं किञ्चित्' (कठ.उ.३-११) इति पञ्चविंशक[6]पुरुषातिरिक्ततत्त्व[6]निषेधाच्च ।

---

१. भेदेन-क,ख,ग,घ   २. कठवल्लीष्वाम्नायते-क,ख,ग,घ   ३. पक्षः । कुतः?-घ   ४. परमव्यक्तम्-क,ख,ग,घ   ५. इत्यादितन्त्र-क,ग,घ   ६. पुरुषातिरिक्तत्त्व-घ

राद्धान्तस्तु - न अव्यक्तशब्देन प्रधानम् इह गृह्यते; पूर्वत्र 'आत्मानं रथिनं विद्धि शरीरं रथमेव च' (कठ.उ.३-३) इत्यादिना[1]उपासना[1]निर्वृत्तये वश्येन्द्रियत्वापादनाय, [2]ये आत्म[2]शरीरबुद्धिमनइन्द्रियविषयाः, रथि-रथ-सारथि-प्रग्रह-हयगोचरत्वेन रूपिताः तेषु वशीकार्यत्वे पराः, 'इन्द्रियेभ्यः पराः' (कठ.उ.३-१०) इत्यादिनोच्यन्ते । तत्र चेन्द्रियादयः स्वशब्देनैव गृह्यन्ते । रथत्वेन रूपितं शरीरम् इह (अव्यक्त परिणामत्वेन) अव्यक्तशब्देन गृह्यत इति, न इह [3]तत्तन्त्र[3]प्रक्रियाप्रत्यभिज्ञागन्धः । 'अव्यक्तात् पुरुषः परः' (कठ.उ.३-११) इति च न पञ्चविंशकः; अपि तु प्राप्यः परमात्मैव । अन्तर्यामितया उपासनस्यापि उपायभूत इति, स इह वशीकार्यकाष्ठात्वेन 'पुरुषान्न परं किञ्चित्' (कठ.उ.३-११) इत्युक्तः ।

सूत्रार्थस्तु - एकेषां कठानां शाखायाम्, आनुमानिकं प्रधानं जगत्कारणत्वेन 'महतः परमव्यक्तम्' (कठ.उ.३-११) इत्याम्नायते इति चेत् - तन्न; अव्यक्तशब्देन शरीराख्यरूपक[4]विन्यस्तस्य[4] गृहीतेः - पूर्वत्र आत्मादिषु रथिरथादिरूपकविन्यस्तेषु रथत्वेन रूपितस्य शरीरस्य अत्र अव्यक्तशब्देन गृहीतेः इत्यर्थः । अतो वशीकार्यत्वे पराः इहोच्यन्ते । दर्शयति च एनमर्थं वाक्यशेषः, इन्द्रियादीनां नियमनप्रकारं प्रतिपादयन् ; 'यच्छेत् वाङ्मनसी' (कठ.उ.३-१३) इत्यादिः ।। १ ।।

शरीरस्याव्यक्तशब्दवाच्यत्वाशङ्का कथम् अव्यक्तशब्दस्य शरीरं वाच्यं भवति इत्याशङ्क्याह -

१११. सूक्ष्मं तु तदर्हत्वात् । (१-४-२)

तुशब्दः अवधारणे । सूक्ष्मम् अव्यक्तमेव अवस्थान्तरापन्नं शरीरं भवति; तदवस्थस्यैव कार्यार्हत्वात् ।। २ ।।

यदि रूपकविन्यस्ता आत्मादय एव वशीकार्यत्वे पराः, 'इन्द्रियेभ्यः [5]परा[5]' (कठ.उ.३-१०) इत्यादिना गृह्यन्त; तर्हि, 'अव्यक्तात् पुरुषः परः । पुरुषान्न परं किञ्चित्' (कठ.उ.३-११) इति पुरुषग्रहणं किमर्थम् इत्यत आह -

११२. तदधीनत्वादर्थवत् । (१-४-३)

अन्तर्यामिरूपेणावस्थित[6]पुरुषाधीनत्वात्[6] आत्मादिकं सर्वं [7]रथि-रथ[7]त्वादिना रूपितम्, अर्थवत् प्रयोजनवत् भवति । अत उपासननिर्वृत्तौ वशीकार्यकाष्ठा परमपुरुष

१. ह्युपासन-क,ख,ग,घ २. आत्म-क,ग,घ ३. तन्त्र-ग,घ ४. विन्यस्तगृहीतेः-ख ५. पराह्यर्थाः-घ
६. परमात्माधीनत्वात्-घ ७. रथि-क,ग,घ

इति, तदर्थमिह रूपकविन्यस्तेषु [1]परिगृह्य[1]माणेषु, (परस्यापि) पुरुषस्यापि ग्रहणम् । उपासननिर्वृत्त्युपायकाष्ठा पुरुषः प्राप्यश्चेति । 'पुरुषान्न परं किञ्चित् सा काष्ठा सा परा गतिः' (कठ.उ.३-११) इत्युक्तम् । भाष्यप्रक्रियया वा नेयमिदं सूत्रम् -परमपुरुषशरीरतया तदधीनत्वात् भूतसूक्ष्मम् अव्याकृतमर्थवत् इति, तदिह अव्यक्तशब्देन गृह्यते, न अब्रह्मात्मकं [2]स्वनिष्ठं[2] तन्त्रसिद्धम् - इति ।। ३ ।।

११३. ज्ञेयत्वावचनाच्च । (१-४-४)

यदि [3]तन्त्रसिद्धप्रक्रिया[3] इहाभिप्रेता, तदा अव्यक्तस्यापि ज्ञेयत्वं वक्तव्यम् । '[4]व्यक्ताव्यक्तज्ञ[4]विज्ञानात्' (सां.का.२) [5]इति हि तत्प्रक्रिया[5] । न हि अव्यक्तम् इह ज्ञेयत्वेनोक्तम् । अतश्च [6]अत्र न[6] तन्त्रप्रक्रियागन्धः ।। ४ ।।

११४. वदतीति चेन्न प्राज्ञो हि प्रकरणात् । (१-४-५)

'अशब्दमस्पर्शम्' (कठ.उ.३-१५) इत्युपक्रम्य - 'महतः परं ध्रुवं निचाय्य तं मृत्युमुखात् प्रमुच्यते' (कठ.उ.३-१५) इति प्रधानस्य ज्ञेयत्वम् अनन्तरमेव वदति इयं श्रुतिः इति चेत् - तन्न, 'अशब्दमस्पर्शम्' (कठ.उ.३-१५) इत्यादिना प्राज्ञः परमपुरुष एव हि अत्र उच्यते, 'सोऽध्वनः पारमाप्नोति तद्विष्णोः परमं पदम्' (कठ.उ.३-९) 'एष सर्वेषु भूतेषु गूढोऽऽत्मा न प्रकाशते' (कठ.उ.३-१२) इति प्राज्ञस्यैव प्रकृतत्वात् ।। ५ ।।

११५. त्रयाणामेव चैवमुपन्यासः प्रश्नश्च । (१-४-६)

अस्मिन् प्रकरणे - 'येयं प्रेते विचिकित्सा मनुष्ये' (कठ.उ.१-२१) इत्यारभ्य आसमाप्तेः, [7]परमपुरुषतदुपासनो[7]पासकानां त्रयाणामेव, एवं - ज्ञेयत्वेन उपन्यासः प्रश्नश्च दृश्यते; न प्रधानादेः तान्त्रिकस्यापि अतश्च न प्रधानम् इह ज्ञेयत्वेनोक्तम् ।। ६ ।।

११६. महद्वच्च । (१-४-७)

यथा - 'बुद्धेरात्मा महान् परः' (कठ.उ.३-१०) इति आत्मशब्दसामानाधिकरण्यात् महच्छब्देन न तान्त्रिकं महत्तत्वं गृह्यते, एवम् अव्यक्तशब्देनापि न तान्त्रिकं प्रधानम् ।। ७ ।।

।। इति आनुमानिकाधिकरणम् ।। १ ।।

---

१. गृह्य-क,ख,ग,घ   २. स्वनिष्ठ-ग   ३. तन्त्रप्रक्रिया-घ   ४. व्यक्ताव्यक्त-घ   ५. मेक्षंवदद्भिः तान्त्रिकैः तथाभ्युपगमात्-ग -इति इह तत्प्रक्रिया-घ   ६. अत्र-ग   ७. परमपुरुषतदुपास्यो-ख,घ

२९. चमसाधिकरणम् । (१-४-२) (सू.८-१०)

[अधिकरणार्थः-प्रकृत्यादीना ब्रह्मात्मकता]

११७. चमसवदविशेषात् । (१-४-८)

श्वेताश्वतरे - 'अजामेकां लोहितशुक्लकृष्णां बह्वीः प्रजाः सृजमानां सरूपाः । अजो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्यः' ।। (श्वे.उ.४-५) इत्यत्र किम् अजाशब्देन तन्त्रसिद्धा प्रकृतिः अभिधीयते? उत ब्रह्मात्मिका? इति संशयः । तन्त्रसिद्धा - इति पूर्वः [1]पक्षः[1]; 'अजामेकाम्' (श्वे.उ.४-५) इत्यस्याः अकार्यत्वप्रतीतेः, [2]बह्वीनां प्रजानां[2] स्वातन्त्र्येण कारणत्वश्रवणाच्च ।

राद्धान्तस्तु - न तन्त्रसिद्धायाः प्रकृतेः अत्र ग्रहणम् जननविरहश्रवणमात्रेण तन्त्रसिद्धायाः प्रकृतेः प्रतीतिनियमाभावात् । न हि यौगिकानां शब्दानाम् अर्थप्रकरणादिभिः [3]विशेष्य[3]व्यवस्थापकैर्विना विशेषे वृत्तिनियमसम्भवः । न च अस्याः स्वातन्त्र्येण सृष्टिहेतुत्वम् इह प्रतीतम्; अपि तु सृष्टिहेतुत्वमात्रम् । तत् ब्रह्मात्मिकायाश्च न विरुद्धम् । अत्र तु ब्रह्मात्मिकाया एव शाखान्तरसिद्धायाः एतत्सरूपमन्त्रोदितायाः प्रत्यभिज्ञानात्, सैवेति निश्चीयते ।

सूत्रार्थस्तु - न अयम् अजाशब्दः तन्त्रसिद्धप्रधानविषयः कुतः?

चमसवत् अविशेषात् । यथा 'अर्वाग्बिलश्चमसः' (बृ.उ.४-२-३) इति मन्त्रे चमस[4]साधनत्व[4]योगेन प्रवृत्तस्य चमसशब्दस्य शिरसि[5]प्रवृत्तौ[5] । 'यथेदं तच्छिरः; एष ह्यर्वाग्बिलश्चमसः' इति वाक्यशेषे विशेषो दृश्यते; - तथा, 'अजामेकाम्' (श्वे.उ.४-५) इति अजाशब्दस्य तन्त्रसिद्धप्रधाने वृत्तौ विशेषाभावात् न तद्ग्रहणं न्याय्यम् ।। ८ ।।

अस्ति तु ब्रह्मात्मिकाया एव ग्रहणे विशेषः इत्याह -

ज्योतिरुपक्रमा तु तथा ह्यधीयत एके । (१-४-९)

ज्योतिः - ब्रह्म यस्याः उपक्रमः - कारणम्, सा - ज्योतिरुपक्रमा । तु - शब्दः अवधारणे । ब्रह्मकारणिकैव एषा अजा; तथा हि अधीयत एके । यथारूपः अयम्

---

१. पक्षः कुतः?-घ २. बह्वीना स्वातन्त्रेण-क ३. विषय-ग ४. चमस भक्षणसाधनत्व-ग ५. वृत्तौ - ख,ग,घ

अजायाः प्रतिपादको मन्त्रः, तथारूपमेव मन्त्रं ब्रह्मात्मिकायाः तस्याः प्रतिपादकम् अधीयत एके शाखिनः । 'अणोरणीयान् महतो महीयान्' (तै.ना.१०-१) इत्यादिना ब्रह्म प्रतिपाद्य, 'सप्त प्राणाः प्रभवन्ति तस्मात् सप्तार्चिषः समिधः सप्तजिह्वाः । सप्त इमे लोका येषु चरन्ति प्राणा गुहाशयान्निहिताः सप्तसप्त ।। अतः समुद्रागिरयश्च सर्वे' (तै.ना.१०-२,३) इत्यादिना ब्रह्मण उत्पन्नत्वेन ब्रह्मात्मकतया सर्वानुसन्धानविधानसमये, 'अजामेकां लोहितशुक्लकृष्णां बह्वीं प्रजां जनयन्तीं सरूपाम्' (तै.ना.उ.१०-५) इति प्रतिपाद्यमाना ब्रह्मात्मिकैवेति, तत्प्रत्यभिज्ञानात् इहापि अजा ब्रह्मात्मिकैव इति निश्चीयते ।। ९ ।।

अजात्वं ज्योतिरुपक्रमात्वं च कथमुपपद्यते? इत्यत आह -

११९. कल्पनोपदेशाच्च मध्वादिवदविरोधः । (१-४-१०)

कल्पना सृष्टिः, 'सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पयत्' (तै.ना.१-४४) इत्यादिदर्शनात् । 'अस्मान्मायी सृजते विश्वमेतत्' (श्वे.उ.४-९) इति हि सृष्टिः इह उपदिश्यते । प्रलयवेलायाम् एषा प्रकृतिः परमपुरुषाश्रया 'कारणावस्था अतिसूक्ष्मावयवा'[१] शक्तिरूपेण अवतिष्ठते; तदवस्थाऽभिप्रायेण अस्याः अजात्वम् । सृष्टिवेलायां पुनः तच्छरीरात् ब्रह्मणः स्थूलावस्था जायते; तदवस्था ज्योतिरुपक्रमा इति न कश्चिद्विरोधः ।

मध्वादिवत् यथा आदित्यस्य एकस्यैव कार्यावस्थायाम् - 'असौ वा आदित्यो देवमधु' (छां.उ. ३-१-१) इति वस्वादिभोग्यरसाधारतया मधुत्वम्, तस्यैव 'अथ तत ऊर्ध्व उदेत्य नैवोदेता नास्तमेतैकल एव मध्ये स्थाता' (छां.उ ३-११-१) इत्यादिना नामरूपप्रहाणेन कारणावस्थायां सूक्ष्मस्य एकस्यैवावस्थानं न विरुध्यते; - तद्वत् ।। १० ।।

।। इति चमसाधिकरणम् ।। २ ।।

३०. सङ्ख्योपसङ्ग्रहाधिकरणम् । (१-४-३) (सू.११-१३)

[अधिकरणार्थः-कपिलमतानङ्गीकारेऽपि पञ्चजनशब्दार्थसिद्धिः]

१२०. न सङ्ख्योपसङ्ग्रहादपि नानाभावादतिरेकाच्च । (१-४-११)

वाजसनेयके, 'यस्मिन् पञ्च पञ्चजना आकाशश्च प्रतिष्ठितः । तमेवमन्य आत्मानं विद्वान् ब्रह्मामृतोऽमृतम्' ।। (बृ.उ. ६-४-१७) इत्यत्र, किं साङ्ख्योक्तानि पञ्चविंशतितत्त्वानि

१. कारणावस्थातिसूक्ष्मा-क,ग,घ

प्रतिपाद्यन्ते? उत न? इति संशयः । तान्येव - इति पूर्वः [1]पक्षः[1] । 'पञ्च पञ्चजनाः' (बृ.उ.६-४-१७) इति हि पञ्चसङ्ख्याविशिष्टाः पञ्चजनाः पञ्चविंशतिः सम्पद्यन्ते ।

(पञ्च पञ्चजनाः? इत्यत्र पञ्चजनशब्देन पञ्चविंशतितत्त्वानां ग्रहणम् इति कापिलाः)

कथम्? पञ्चजना इति समाहारविषयोऽयं समासः; 'पञ्चपूल्यः' इतिवत् । पञ्चभिर्जनैरारब्धः समूहः पञ्चजनः । पञ्चजनीत्यर्थः । लिङ्गव्यत्ययश्छान्दसः । 'पञ्चजनाः' इति बहुवचनात् समूहबहुत्वं च अवगम्यते । ते च कतीत्यपेक्षायां 'पञ्च पञ्चजनाः' इति पञ्चशब्दविशेषिताः पञ्चजनसमूहा इति, [2]पञ्चविंशति[2]तत्त्वानि भवन्ति । मोक्षाधिकारात् तान्त्रिकाण्येव इति निश्चीयन्ते । एवं निश्चिते सति, 'तमेवं मन्य आत्मानं विद्वान् ब्रह्मामृतोऽमृतम्' (बृ.उ.६-४-१७) इति पञ्चविंशकमात्मानं ब्रह्मभूतं विद्वान् अमृतो भवति - [3]इति[3] ।

राद्धान्तस्तु - 'यस्मिन् पञ्च पञ्चजना आकाशश्च प्रतिष्ठितः' (बृ.उ.६-४-१७) इति यच्छब्दनिर्दिष्टब्रह्माधारत्वात् [4]तदा आधेयानां[4] तत्त्वानां ब्रह्मात्मकत्वं अवगम्यते । यच्छब्दनिर्दिष्टं च 'तमेवं मन्य [5]आत्मानम्[5]' (बृ.उ.६-४-१७) इति तच्छब्देन परामृश्य, '[6]ब्रह्मामृतोऽमृतम्[6]' (बृ.उ.६-४-१७) इति निर्देशात् ब्रह्म - इति निश्चीयते । अतो न तान्त्रिकप्रसङ्गः ।

सूत्रार्थस्तु - 'पञ्च पञ्चजनाः' (बृ.उ.६-४-१७) इत्यत्र पञ्चविंशतिसङ्ख्योपसङ्ग्रहादपि न तान्त्रिकाणि इमानि तत्त्वानि; यस्मिन् इति यच्छब्दनिर्दिष्टब्रह्माधारतया तान्त्रिकेभ्यो नानाभावात् - एषां तत्त्वानां पृथग्भावादित्यर्थः । अतिरेकाच्च - तान्त्रिकेभ्यस्तत्त्वातिरेक-प्रतीतेश्च यस्मिन्निति निर्दिष्टमतिरिक्तम्, आकाशश्च । 'न संख्योपसङ्ग्रहादपि' इत्यपि शब्देन संख्योपसङ्ग्रहो न सम्भवतीत्याह; आकाशस्य पृथङ्निर्देशात् । अतः पञ्चजनाः इति न समाहार[7]विषयः, अपि तु[7] 'दिक्सङ्ख्ये संज्ञायाम्' (पा.सू.२-१-५०) इति संज्ञाविषयः, पञ्चजनसंज्ञिताः [8]केचित्[8], ते च [9]पञ्चैवेति[9]; सप्त सप्तर्षयः इतिवत् ।। ११ ।।

१२१. प्राणादयो वाक्यशेषात् । (१-४-१२)

पञ्चजनसंज्ञिताः पञ्च पदार्थाः प्राणादय इति, वाक्यशेषात् अवगम्यते । 'प्राणस्य प्राणमुत चक्षुषश्चक्षुः श्रोत्रस्य श्रोत्रमन्नस्यान्नं मनसो ये मनो विदुः' (बृ.उ.मा.पा.६-४-१८) इति । ब्रह्मात्मकानि इन्द्रियाणि 'पञ्च पञ्चजनाः' इति निर्दिष्टानि । जननाच्च जनाः ।। १२।।

---

१. पूर्वपक्षः-घ २. पञ्चविंशतिः-ख,ग,घ ३. इति हि भवति-ख ४. आधेयानां-ख,घ ५. आत्मानम् विद्वान् ब्रह्मामृतोऽमृतम्-क,ख,ग,घ ६. ब्रह्मामृतम्-ख ७. विषयः-ख,ग ८. ते के कतिचित्-ग ९. पञ्चैव-ख,ग,घ

काण्वपाठे - अन्नवर्जितानां चतुर्णां [1]निर्देशात्[1] पञ्चजनसंज्ञितानि इन्द्रियाणि इति कथं [2]ज्ञायते?[2] इत्यत्राह -

१२२. ज्योतिषैकेषामसत्यन्ने । (१-४-१३)

एकेषां - काण्वानां, वाक्यशेषे असति अन्नशब्दे वाक्योपक्रमगतेन, 'तं देवा ज्योतिषां ज्योतिः' (बृ.उ.६-४-१६) इति ज्योतिश्शब्देन पञ्चजनाः इन्द्रियाणि इति [3]विज्ञायन्ते[3] ।

कथम्? 'ज्योतिषां ज्योतिः' (बृ.उ.६-४-१६) इति ब्रह्मणिनिर्दिष्टे प्रकाश[4]कानां[4] प्रकाशकं ब्रह्म इति प्रतीयते । के ते प्रकाशकाः? इत्यपेक्षायाम्, 'पञ्च पञ्चजनाः' (बृ.उ.६-४-१७) इति अनिर्ज्ञातविशेषाः पञ्चसंख्यासंख्याताः [5]प्रकाशकानि[5] पञ्चेन्द्रियाणि इत्यवगम्यते । अतः, 'यस्मिन् पञ्च पञ्चजना आकाशश्च प्रतिष्ठितः' (बृ.उ.६-४-१७) इति इन्द्रियाणि भूतानि च [6]ब्रह्मणि प्रतिष्ठितानि[6] इति न [7]तान्त्रिकतत्त्वगन्धः[7] ।। १३ ।।

।। इति संख्योपसंग्रहाधिकरणम् ।। ३ ।।

३१. कारणत्वाधिकरणम् । (१-४-४) (सू.१४-१५)

[अधिकरणार्थः-सद्रूपस्य ब्रह्मण एव जगत्कारणतां; न कापिलस्य प्रधानस्य]

१२३. कारणत्वेन चाकाशादिषु यथाव्यपदिष्टोक्तेः । (१-४-१४)

जगत्कारणवादीनि वेदान्तवाक्यानि, किं प्रधान[8]कारणता[8]वादैकान्तानि? उत ब्रह्म[9]कारणता[9]वादैकान्तानि? - इति संशयः ।

प्रधान[10]कारणता[10]वादैकान्तानि - इति पूर्वः [11]पक्षः[11]; 'सदेव सोम्येदमग्र आसीत्' (छां.उ.६-२-१) इति क्वचित् सत्पूर्विका सृष्टिः आम्नायते; अन्यत्र, 'असदेवेदमग्र आसीत्' (छां.उ.६-२-१) तथा, 'असद्वा इदमग्र आसीत्' (तै.आन.७-१) तथा - 'तद्धेदं तर्ह्यव्याकृतमासीत् तन्नामरूपाभ्यां व्याक्रियत' (बृ.उ.३-४-७) इति । अव्याकृतं हि प्रधानम् । अतः प्रधान[12]कारणता[12]वादनिश्चयात् तदेकान्तान्येव ।

---

१. निर्देशे-क,ख,ग २. विज्ञायते-क,ग ३. विज्ञायते-ख,घ ४. प्रकाशकानामपि-ख,घ ५. प्रकाशकाः-ख,घ ६. ब्रह्म-ख ७. तान्त्रिकत्त्वगन्धः-ख ८. कारण-क,ख,ग,घ ९. कारण-क,ख,ग,घ १०. कारण-क,ख,ग,घ ११. पक्षः । कुतः?-घ १२. कारण-क,ख,ग,घ

राद्धान्तस्तु - 'सत्यं ज्ञानमनन्तं ब्रह्म' (तै.आन.१-१) 'इत्युपक्रम्य[१], 'तस्माद्वा एतस्मादात्मन आकाशस्सम्भूतः' (तै.आन.१-२) 'तदैक्षत बहु स्यां प्रजायेयेति; तत्तेजोऽसृजत' (छां.उ.६-२-३) इत्यादिषु सर्वज्ञस्य परस्य ब्रह्मणः कारणत्वप्रतिपादनात्, तस्यैव ब्रह्मणः कारणावस्थायां नामरूपविभागसम्बन्धितया सद्भावाभावात्, असदव्याकृतादिशब्देन व्यपदेश इति [२]ब्रह्मकारणता[२]वादैकान्त्यान्येव ।

सूत्रार्थस्तु - आकाशादिपदचिह्नितेषु 'तस्माद्वा एतस्मादात्मन [३]आकाशः सम्भूतः[३]' (तै.आन.१-२) इत्यादिषु सर्वज्ञस्य परस्य ब्रह्मणः कारणत्वप्रतिपादनात्, सर्वेषु सृष्टिवाक्येषु यथा[४]व्यपदिष्टस्यैव[४] कारणत्वेनोक्तेः [५]ब्रह्मकारणता[५]वादैकान्तानि । यथाव्यपदिष्टम् सार्वज्ञ्यादियुक्ततयाऽस्माभिर्व्यपदिष्टम् ।। १४ ।।

तथा सति 'असद्वा इदमग्र आसीत्' इति किं ब्रवीति? इत्यत आह-

१२४. समाकर्षात् । (१-४-१५)

'सोऽकामयत बहु स्यां प्रजायेयेति' (तै.आन.६-२) इति, बहुभवनसङ्कल्पपूर्वकं जगत् सृजतो ब्रह्मणः सर्वज्ञस्य, असद्वा इदमग्र 'आसीत्' (तै.आ.७-१) इत्यत्र समाकर्षात्, कारणावस्थायां नामरूपसम्बन्धित्वाभावेन, असदिति ब्रवीति । एवं 'तद्धेदं तर्ह्यव्याकृतमासीत्' (बृ.उ.३-४-७) इत्यादिषु, 'स एष इहानुप्रविष्ट आनखाग्रेभ्यः' (बृ.उ.३-४-७) '[६]पश्यत्यचक्षुः[६]' (श्वे.उ.३-१९) इत्यादि पूर्वापरपर्यालोचनया तत्र तत्र सर्वज्ञस्य समाकर्षो द्रष्टव्यः ।। १५ ।।

।। इति कारणत्वाधिकरणम् ।। ४ ।।

३२. जगद्वाचित्वाधिकरणम् । (१-४-५) (सू.२६-१८)

[अधिकरणार्थः-जगत् परब्रह्मकारणकमेव; न पुरुषपदवाच्यजीवकारणकम्]

१२५. जगद्वाचित्वात् । (१-४-१६)

[७]कौषीतकिनाम्[७] 'ब्रह्म ते ब्रुवाणि' (कौषी.उ.४-४) इत्युपक्रम्य, 'यो वै बालाक एतेषां पुरुषाणां कर्ता यस्य वैतत्कर्म स वै वेदितव्यः' (कौषी.उ.४-२६) [८]इत्यत्र[८] वेदितव्यतया उपदिष्टः, साङ्ख्यतन्त्रसिद्धः पुरुषः? उत परमात्मा? इति संशयः ।

---

१. इत्यारभ्य-घ २. ब्रह्मकारण-क,ख,ग,घ ३. आकाशः इत्यादिषु-क,ख,ग,घ ४. यथा व्यपदिष्टत्वेनैव-ग
५. कारण-क,ख,ग,घ ६. पश्यन् चक्षुः-घ ७. कौषीतकीनां बालाक्यजातशत्रुसंवादे-क,ख,ग,घ
८. इतीरितम्-क

पुरुष एव प्रकृतिवियुक्तः इति पूर्वः [1]पक्षः[1]; 'यस्य चैतत्कर्म' (कौषी.उ.४-२६) इति पुण्यपापरूपकर्मसम्बन्धितयोपलक्षितत्वात् ।

राद्धान्तस्तु - 'यस्य चैतत्कर्म' (कौषी.उ.४-२६) इति कर्मशब्दस्य, क्रियत इति व्युत्पत्त्या जगद्वाचित्वात्, कृत्स्नं जगत् यस्य कार्यम्, स परमपुरुष एव वेदितव्यतया उपदिष्टो भवति इति । सूत्रमपि व्याख्यातम् ।। १६ ।।

१२६. जीवमुख्यप्राणलिङ्गान्नेति चेत्तद्व्याख्यातम् । (१-४-१७)

'एवमेवैष प्रज्ञात्मैतैरात्मभिर्भुङ्क्ते' (कौषी.उ.४-४४)इत्यादिभोक्तृत्वरूपजीवलिङ्गात्, 'अथास्मिन् प्राण एवैकधा भवति' (कौषी.उ.४-३९) इति मुख्यप्राणलिङ्गाच्च न अयं परमात्मा-इति चेत्, तस्य परिहारः प्रतर्दनविद्यायामेव व्याख्यातः । [2]पूर्वापरप्रकरण[2]-पर्यालोचनया परमात्म[3]परमिदं[3]वाक्यम् इति निश्चिते सति, अन्यलिङ्गानि तदनुगुणतया नेतव्यानि इत्यर्थः ।। १७ ।।

[4]ननु - 'तौ[4] ह सुप्तं पुरुषमाजग्मतुः' (कौषी.उ.४-१८) इति [5]प्राणनामभिः आमन्त्रणा[5]श्रवणयष्टिघातोत्थापनादिना शरीरेन्द्रियप्राणाद्यतिरिक्तजीवात्मसद्भावप्रतिपादनपरम् [6]इदं वाक्यम् इत्यवगम्यते[6], इत्यत उत्तरं पठति -

१२७. अन्यार्थं तु जैमिनिः प्रश्नव्याख्यानाभ्यामपि चैवमेके । (१-४-१८)

तुशब्दः शङ्कानिवृत्त्यर्थः । जीवसङ्कीर्तनम् अन्यार्थम् जीवातिरिक्तब्रह्मसद्भावप्रतिबोधनार्थम् इति प्रश्नप्रतिवचनाभ्याम् अवगम्यते ।

प्रश्नस्तावत् जीव[7]प्रतिपादनानन्तरम्[7], 'क्वैष एतद्बालाके पुरुषोऽशयिष्ट' (कौषी.उ.४-३५) इत्यादिकः [8]सुषुप्त[8]जीवाश्रयविषयतया परमात्मपरः इति निश्चितः।

प्रतिवचनमपि 'अथास्मिन् प्राण एवैकधा भवति' (कौषी.उ.४-३९) इत्यादिकं परमात्मविषयमेव । सुप्तपुरुषाश्रयतया हि प्राणशब्दनिर्दिष्टः परमात्मैव, 'सता सोम्य तदा सम्पन्नो भवति' (छां.उ.६-८-१) इत्यादिभ्यः । जैमिनिग्रहणम् उक्तस्यार्थस्य पूज्यत्वाय ।

---

१. पक्षः । कुतः?-घ   २. प्रकरणपूर्वापर-क,ख,ग,घ   ३. परं-क,ख,ग,घ   ४. तौ-क,ख,ग,घ
५. प्राणादीनामभिमन्त्रण-घ   ६. वाक्यमितिगम्यते-ख,ग -इदं वाक्यमितिगम्यते-क -वाक्यमित्यत गम्यते-घ
७. प्रतिपादनादुपरिष्टात्-क,ग   ८. सुप्त-ख,घ

अपि चैवमेके - एके वाजसनेयिनः, इदमेव बालाक्यजातशत्रुसंवादगतं प्रश्नप्रतिवचनरूपं वाक्यं, परमात्मविषयं स्पष्टम् अधीयते 'क्वैष एतत्' (कौषी.उ.४-३५) इत्यादि, 'य एषोऽन्तर्हृदय आकाशस्तस्मिंच्छेते' (बृ.उ.४-१७) इत्येतदन्तम् ।। १८ ।।

।। इति जगद्वाचित्वाधिकरणम् ।। ५ ।।

३३. वाक्यान्वयाधिकरणम् । (१-४-६) (सू.१९-२२)

[अधिकरणार्थः-वाक्यविशेषः उपास्यतया विहितं ब्रह्मैव; न पुरुषः]

१२८. वाक्यान्वयात् । (१-४-१९)

बृहदारण्यके मैत्रेयीब्राह्मणे - 'न वा अरे पत्युः कामाय पतिः प्रियो भवति, आत्मनस्तु कामाय' इत्यारभ्य 'आत्मा वा अरे द्रष्टव्यश्श्रोतव्यो मन्तव्यो निदिध्यासितव्यः' (बृ.उ.६-५-६) इत्यादौ द्रष्टव्यतया निर्दिष्टः पुरुषः, तन्त्रसिद्धः? उत परमात्मा? इति संशयः ।

तन्त्रसिद्धः पञ्चविंशक एव - इति पूर्वः [1]पक्षः[1] पति-जाया-पुत्र-वित्त-मित्र पश्वादिप्रियसम्बन्ध्यात्मा, न परमात्मा भवितुमर्हति । स एव हि, 'आत्मा वा अरे द्रष्टव्यः' (बृ.उ.६-५-६) इति प्रतिपाद्यते ।

राद्धान्तस्तु - न पत्यादीनां कामाय पत्यादयः प्रिया भवन्ति, 'आत्मनस्तु कामाय' इत्युक्त्वा, 'आत्मा वा अरे द्रष्टव्यः' (बृ.उ.६-५-६) इति निर्दिष्टः आत्मा, जीवातिरिक्तः सत्यसङ्कल्पः सर्वज्ञः: परमात्मैव; यत्सङ्कल्पा[2]यत्तं[2] पत्यादीनां [3]स्वसम्बन्धिनः[3] प्रतिप्रियत्वम्, स हि सत्यसङ्कल्पः परमात्मा । आत्मज्ञानेन सर्वज्ञानादयोऽपि वक्ष्यमाणाः परमात्मन्येव सम्भवन्ति ।

सूत्रार्थस्तु - वाक्यस्य कृत्स्नस्य परमात्मन्येवान्वयात्, द्रष्टव्यतया-निर्दिष्ट आत्मा, परमात्मैव; 'अमृतत्वस्य तु नाऽऽशाऽस्ति वित्तेन' (बृ.उ.६-५-३) 'आत्मनि खल्वरे दृष्टे श्रुते मते विज्ञाते इदं सर्वं विदितम्' (बृ.उ.६-५-६) 'इदं सर्वं यदयमात्मा' (बृ.उ.६-५-७) 'तस्य ह वा एतस्य महतो भूतस्य [4]निश्वसितमेतत् यदृग्वेदः[4]' (बृ.उ.४-४-१०) 'येनेदं सर्वं विजानाति, तं केन विजानीयात्' (बृ.उ.४-४-१४) इति हि! कृत्स्नस्य वाक्यस्य परमात्मनि अन्वयो दृश्यते ।। १९ ।।

---

१. पक्षः । कुतः?-घ २. यत्तं हि-क,ग ३. स्व सम्बन्धिनम्-क,ख,ग,घ ४. निश्वसितमेतत्-ख,घ

'एतेभ्यो भूतेभ्यस्समुत्थाय तान्येवानुविनश्यति' (बृ.उ.४-४-१२) इति जीवलिङ्गस्य मतान्तरेण निर्वाहमाह -

१२९. प्रतिज्ञासिद्धेर्लिङ्गमाश्मरथ्यः । (१-४-२०)

एकविज्ञाने सर्वविज्ञानप्रतिज्ञासिद्धये, जीवस्य परमात्म[1]कार्यतया[1]परस्मादात्मनोऽनन्यो जीव इति, जीवशब्देन परमात्मनोऽभिधानम् इत्याश्मरथ्यमतम् ।। २० ।।

१३०. उत्क्रमिष्यत एवं भावादित्यौडुलोमिः । (१-४-२१)

'परं ज्योतिरुपसम्पद्य स्वेन रूपेणाभिनिष्पद्यते' (छां.उ.८-३-४) इति शरीरात् उत्क्रमिष्यतः [2]अस्य जीवस्य[2] [3]परमात्म[3]भावात् जीवशब्देन [4]परमात्मनोऽभिधानम्[4] इति औडुलोमिराचार्यो [5]मेने[5] ।। २१ ।।

१३१. अवस्थितेरिति काशकृत्स्नः (१-४-२२)

'य आत्मनि तिष्ठन्' (बृ.उ.मा.पा.५-७-२६) इत्यादिभिः जीवात्मनि [6]अन्तरात्मतया[6] परमात्मनः अवस्थितेः, जीवात्मशब्दस्य परमात्मनि पर्यवसानात्, जीवात्मशब्देन परमात्मनः अभिधानम् इति काशकृत्स्न आचार्यो मन्यते । इदमेव सूत्रकाराभिमतम् इत्यवगम्यते; त्रयाणाम् अन्योन्यविरोधात्, इतः परमवचनाच्च ।। २२ ।।

।। इति वाक्यान्वयाधिकरणम् ।। ६ ।।

३४. प्रकृत्यधिकरणम् (१-४-७) (सू.२३-२८)

[अधिकरणार्थः-ब्रह्मण एव जगन्निमित्तता जगदुपादानता च]

१३२. प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधात् । (१-४-२३)

परं ब्रह्म, किं जगतो निमित्तकारणमात्रम्? उत उपादानकारणमपि? इति संशयः । निमित्तकारणमात्रम् - इति पूर्वः [7]पक्षः[7]; मृत्कुलालादौ निमित्तोपादनयोर्भेद-दर्शनात्; 'अस्मान्मायी [8]सृजते विश्वमेतत्[8]' (श्वे.उ.४-९) इत्यादिभिः भेदप्रतिपादनात्, ब्रह्मणः [9]अविकारत्व[9]श्रुतिविरोधाच्च ।

---

१. कार्यत्वेन-क,ग   २. मुक्तस्य जीवस्य-ख,ग -जीवस्य-घ   ३. परब्रह्म-क,ख,ग,घ   ४. परमात्माभिधानात्-क,ख,ग,घ   ५. मन्यते-क,ख,घ   ६. आत्मतया-क,ग,घ   ७. पक्षः । कुतः?-घ   ८. सृजत-क,ख,ग,घ   ९. विकरत्व-ग -विकार-क,ख -अविकार-घ

राद्धान्तस्तु - 'येनाश्रुतं श्रुतम्' (छां.उ.६-१-३) इति [1]ब्रह्मविज्ञानेन सर्वविज्ञान[1]-प्रतिज्ञानान्यथानुपपत्त्या, 'यथा सोम्यैकेन मृत्पिण्डेन सर्वं मृण्मयम्' (छां.उ.६-१-४) इति [2]मृत्तत्कार्य[2]दृष्टान्तेन [3]तदुपपादनाच्च[3] जगदुपादानकारणमपि ब्रह्मैव इति विज्ञायते । प्रमाणान्तरावसितसकलवस्तुविलक्षणस्य शास्त्रैकसमधिगम्यस्य परस्य ब्रह्मणः सर्वज्ञस्य सर्वशक्तेः, कार्यकारणोभयावस्थायामपि स्वशरीरभूतचिदचित्प्रकारतयाऽवस्थितस्य एकस्यैव, निमित्तत्वम् उपादानत्वं च अविरुद्धम् । [4]शरीरभूता[4]चिद्वस्तुगतो विकार इति, [5]कार्यावस्थावस्थितस्यापि[5] शरीरिणः परमात्मनः [6]अविकारित्वं सिद्धमेव[6] । चिदचिद्वस्तुशरीरस्य ब्रह्मण एवोपादानत्वेऽपि, ब्रह्मणि अपुरुषार्थविकारास्पर्शप्रदर्शनाय हि, 'अस्मान्मायी सृजते विश्वमेतत् तस्मिंश्चान्यो मायया सन्निरुद्धः' (श्वे.उ.४-९) इति व्यपदेशः ।

प्रतिज्ञादृष्टान्तानुपरोधात्, उपादानं च ब्रह्मैव इति सूत्रार्थः ।। २३ ।।

१३३. अभिध्योपदेशाच्च । (१-४-२४)

'सोऽकामयत [7]बहु स्याम्' (तै.आन.६-२) 'तदैक्षत बहु स्यां प्रजायेय[7]' (छां.उ.६-२-३) इति स्रष्टुः ब्रह्मणः स्वस्यैव जगदाकारेण [8]बहुभवन[8]चिन्तनोपदेशाच्च [9]जगदुपादानं निमित्तं च[9] ब्रह्मैव इति निश्चीयते ।। २४ ।।

१३४. साक्षाच्चोभयाम्नानात् । (१-४-२५)

'किं स्विद्वनं क उ स वृक्ष आसीत्' (तै.ब्रा.२-८-९-१५) इत्यादिना जगदुपादाननिमित्तादौ पृष्टे, 'ब्रह्म वनं ब्रह्म स वृक्ष आसीत् - ब्रह्माध्यतिष्ठत्' (यजु.आर.२-८-७-७६) इति उपादानं निमित्तं च उभयं ब्रह्मैव इति हि साक्षादाम्नायते । अतश्च उभयं ब्रह्म ।। २५ ।।

---

१. ब्रह्मज्ञानेन सर्वज्ञानप्रतिज्ञानात्-क,ख,ग,घ २. मृत्पिण्डेन-ख,घ ३. तदुपादानोपदनाच्च-ख ४. स्वशरीर-भूतचिद-ख -शरीरभूतचिद-घ ५. कार्यावस्थस्यापि-क,ख,ग,घ ६. अविकारत्वं स्थितमेव-क,ख,ग,घ ७. बहुस्यां प्रजायेयेति-क,ख,ग,घ ८. बहाकारेण-घ ९. जगदुपादानं-क,ग,घ

१३५. आत्मकृतेः । (१-४-२६)

'तदात्मानं स्वयमकुरुत' (तै.आन.७-१) इति स्रष्टुः आत्मन एव जगदाकारेण कृतिः उपदिश्यते; अतश्च उभयं ब्रह्मैव । नामरूपभावाभावाभ्याम् एकस्य कर्मकर्तृभावो न [1]विरुद्धः[1] ।। २६ ।।

यदि आत्मानमेव ब्रह्म जगदाकारं करोति, तर्हि ब्रह्मणः अपहतपाप्मत्वादिकम् अनवधिकातिशयानन्दस्वरूपत्वं सर्वज्ञत्वम् इत्यादि सर्वं विरुध्यते; अज्ञत्वासुखित्व-कर्मवश्यत्वादिविपरीतरूपत्वात् जगतः, इत्यत उत्तरं पठति -

१३६. परिणामात् । (१-४-२७)

अज्ञब्रह्मविवर्तवादे हि! तद्भवत्येव; अज्ञानस्य, तत्कार्यरूपानन्तापुरुषार्थस्य च वेदान्तजन्यज्ञाननिवर्त्यस्य ब्रह्मण्येव अन्वयात् तदा शास्त्रस्य भ्रान्तजल्पितत्वापाताच्च । [2]अविभक्तनामरूपसूक्ष्म[2]चिदचिद्वस्तुशरीरकस्य ब्रह्मणो विभक्तनामरूपस्थूलचिदचिद्वस्तु-शरीरत्वेन परिणामो हि वेदान्तेषु उपदिश्यते, 'तद्धेदं तर्ह्यव्याकृतमासीत् । तन्नामरूपाभ्यां व्याक्रियत' (बृ.उ.३-४-७) [3]इत्येवमादिभिः[3] । अपुरुषार्थाश्च [4]विकाराः[4], शरीर-भूतचिदचिद्वस्तुगताः । कारणावस्थायां कार्यावस्थायाञ्च आत्मभूतं ब्रह्म अपहत-पाप्मत्वादिगुणकमेव । स्थूलसूक्ष्मावस्थस्य कृत्स्नस्य चिदचिद्वस्तुनः ब्रह्मशरीरत्वम् ब्रह्मणश्च, तदात्मत्वम्, '[5]यः पृथिव्यां तिष्ठन्-यस्य[5] पृथिवी शरीरम्' (बृ.उ.५-७-७) इत्यारभ्य, 'यस्याव्यक्तं शरीरम्, यस्याक्षरं शरीरम्, यस्य मृत्युः शरीरम्, एष सर्वभूतान्तरात्मा [6]अपहतपाप्मा दिव्यो देवः[6]' (सुबा.उ.७) इत्येवमादिश्रुतिशतसमधिगतम् । अतः सर्वमनवद्यम् ।। २७ ।।

१३७. योनिश्च हि गीयते । (१-४-२८)

'यद् भूतयोनिं परिपश्यन्ति धीराः' (मुं.उ.१-१-६) 'कर्तारमीशं पुरुषं ब्रह्म योनिम्' (मुं.उ.३-१-३) इत्यादिषु सर्वस्य भूतजातस्य परमपुरुषो योनित्वेन गीयते । हि शब्दो हेतौ । यस्मात् योनिः इति गीयते, तस्माच्च उपादानमपि ब्रह्म । योनिशब्दश्च उपादानकारणपर्यायः ।। २८ ।।

।। इति प्रकृत्यधिकरणम् ।। ७ ।।

---

१. विरुद्ध्यते-क,ख,ग,घ २. नामरूपातिसूक्ष्म-क,ग ३. इत्येवमादिषु-ख ४. विकाराश्च-ख ५. यस्य-क,ख,ग,घ ६. अपहतपाप्मा-क,ख,ग,घ

३५. सर्वव्याख्यानाधिकरणम् । (१-४-८)

[अधिकरणार्थः-सर्ववेदान्तगतानां सर्वेषां जगत्कारणत्वपरवाक्यानां ब्रह्मपरत्वमेव]

१३८. एतेन सर्वे व्याख्याता व्याख्याताः । (१-४-२९)

'यतो वा इमानि' (तै.भृ.१-२) इत्यादिषु उदाहृतेषु वाक्येषु, 'जन्माद्यस्य यतः' (ब्र.सू.१-१-२) इत्यादि[1]नोक्त[1]न्यायकलापेन, सर्वे वेदान्ताः ब्रह्मपराः व्याख्याताः । पदाभ्यासः अध्यायपरिसमाप्तिद्योतनार्थः ।। २९ ।।

।। इति सर्वव्याख्यानाधिकरणम् ।। ८ ।।

।। इति श्री भगवद्रामानुजविरचिते वेदान्तदीपे प्रथमस्याध्यायस्य चतुर्थः पादः।।

।। समाप्तश्च प्रथमोऽध्यायः ।।

* * *

१.नोक्तेन-ख,घ

अविरोधाध्यायः (अधि.३३, सू.१४९)

प्रथमः पादः - स्मृतिपादः (अधि.१०, सू.३६)

३६. स्मृत्यधिकरणम् । (२-१-१) (सू.१-२)

[अधिकरणार्थः-ब्रह्मणो जगत्कारणत्ववादीनां वेदान्तानां, कपिलस्मृतिविरोध-शङ्कानिरासः]

१३९. स्मृत्यनवकाशदोषप्रसङ्ग इति चेन्नान्यस्मृत्यनवकाशदोष-प्रसङ्गात् (२-१-१)

वेदान्तानां समस्तचिद[1]चिद्विलक्षणा[1]स्पृष्टहेयगन्ध[2]सर्वज्ञताऽऽ[2]द्यनन्तकल्याण-गुणाकरब्रह्मैकपरत्वं प्रतिपादितं, [3]कापिलादि[3]स्मृतिविरोधेन चालयितुं शक्यम्? उत न इति संशयः ।

शक्यम् - इति पूर्वः [4]पक्षः[4]; श्रुतिविरुद्धायाः स्मृतेः अनादरणीयत्वे स्थितेऽपि वेदान्तवेद्यार्थस्य दुर्ग्रहत्वेन अल्पश्रुतैः मन्दमतिभिः आप्तप्रणीतस्मृत्युपबृंहणेन [5]विना[5] तेषां निश्चयः नोपपद्यते । [6]कपिलस्मृतिः[6] केवलतत्त्वपरेति तथैव हि उपबृहणं न्याय्यम् । अन्यथा आप्तप्रणीतायाः केवलतत्त्वपरायाः तस्या अनवकाशप्रसङ्गः - इति, वेदान्तवेद्यं जगत्कारणं प्रधानम् ।

राद्धान्तस्तु - वेदान्तस्य उपबृंहणापेक्षत्वेऽपि आप्ततममन्वादिस्मृतिभिः [7]वेदान्ताऽविरोधिनीभिः[7] एव उपबृंहणं न्याय्यम्; अन्यथा तासां बह्वीनाम् अनवकाशप्रसङ्गः महानयं दोषः स्यात् । न च तासां धर्मप्रतिपादनांशोपबृंहणत्वेन सावकाशत्वम् । यतः धर्माणामपि स्वरूपं परब्रह्मभूतपरमपुरुषाराधनत्वं, '[8]इष्टापूर्तं बहुधा जातं जायमानं विश्वं विभर्ति भुवनस्य नाभिः । तदेवाग्निस्तद्वायुस्तत्सूर्यस्तदु चन्द्रमाः' । (तै.ना.१-६) 'यज्ञैस्त्वमिज्यसे नित्यं सर्वदेवमयाच्युत' (वि.पु.५-२०-९८) इत्यादि श्रुतिस्मृतिभिः । सूत्रमपि[8] व्याख्यातम् ।। १ ।।

---

१. चिद्वस्तुविलक्षण-क २. सार्वज्ञ्या-क,ख,ग,घ ३. तत्कापिलादि-ग ४. पक्षः । कुतः?-घ ५. विना निश्चयः-क,ख,ग ६. कपिलादिस्मृतिः-ग -कापिलस्मृतिः-क ७. वेदान्ताविरोधिभिः एव-ख ८. सूत्रमपि-ग -सूत्रं च-क

अतीन्द्रियार्थसाक्षात्कारसमर्थस्य कपिलस्य, वेदान्तानां [1]परब्रह्म[1][2]परत्वानुपलब्धेः[2] प्रधानपरत्वमेव आश्रयणीयम् इत्यत [3]उत्तरम् पठति[3] -

१४०. इतरेषां चानुपलब्धेः । (२-१-२)

इतरेषां मन्वादीनां वेदविदग्रेसराणां [4]सर्वातीन्द्रियार्थ[4]साक्षात्कारसमर्थानां प्रधानपरत्वानुपलब्धेः [5]ब्रह्मपरत्वोपलब्धेश्च ब्रह्मपरत्वमेव[5] आश्रयणीयम् । [6]वेदान्तप्रतिपन्नार्थ[6]विरुद्धायास्तु कपिलोपलब्धेः भ्रान्तिमूलत्वं कल्पयितव्यम् ।। २ ।।

।। इति स्मृत्यधिकरणम् ।। १ ।।

३७. योगप्रत्युक्त्यधिकरणम् । (२-१-२)

[अधिकरणार्थः-वेदान्तविरोधित्वात् योगतन्त्रस्य जगत्कारणत्वे प्रामाण्यनिरासः]

१४१. एतेन योगः प्रत्युक्तः । (२-१-३)

किं वेदान्तानां योगस्मृत्योपबृंहणं न्याय्यम्? उत न? - इति संशयः ।

न्याय्यम् - इति पूर्वः [7]पक्षः[7]; [8]कृत्स्नवेद[8]प्रवर्तनाधिकृतहिरण्यगर्भप्रणीतत्वात् योगस्य; ईश्वरसद्भावाभ्युपगमाच्च । अतः योगस्मृत्युपबृंहितत्वेन वेदान्तानां अब्रह्मात्मक प्रधानोपादानप्रतिपादनपरत्वम् ।

राद्धान्तस्तु - कपिलस्मृतिवत् वेदविरुद्धत्वाविशेषात् [9]अनादरणीयैव योगस्मृतिः[9] । हिरण्यगर्भस्यापि क्षेत्रज्ञत्वेन भ्रमसम्भवात्, योगस्मृतेरपि भ्रान्तिमूलकत्वम् । सूत्रमपि व्याख्यातम् ।। ३ ।।

।। इति योगप्रत्युक्त्यधिकरणम् ।। २ ।।

३८. विलक्षणत्वाधिकरणम् । (२-१-३) (सू.४-१२)

[अधिकरणार्थः-ब्रह्मणो जगदपेक्षया वैलक्षण्यं जगत्कारणत्वाविरोधि]

१४२. न विलक्षणत्वादस्य तथात्वं च शब्दात् । (२-१-४)

किं वेदान्तानां जगत्कारणतया प्रधानपरत्वम्? उत ब्रह्मपरत्वम् - इति संशयः ।

---

१. ब्रह्म-क,ख,ग २. ब्रह्मपरत्वोपलब्धेः-क ३. उत्तरम्-ग,घ ४. सर्वार्थ-क,ख,ग,घ ५. ब्रह्मपरत्वमेव-क,ग,घ ६. वेदान्तवाक्य-ग ७. पक्षः । कुतः?-घ ८. कृत्स्नवेदान्त-ग ९. अनादरः-क,ख,ग,घ

प्रधानपरत्वम् - इति पूर्वः [1]पक्षः[1] । अज्ञत्वादिना जगतो ब्रह्मविलक्षणत्वेन ब्रह्मकार्यत्वप्रतिपादनासम्भवात्, सालक्षण्येन [2]प्रधानकार्यत्व[2][3]प्रतिपादनपरत्वस्य[3] च सम्भवात्।

राद्धान्तस्तु - माक्षिकादिभ्यः क्रिम्यादीनां विलक्षणानाम् उत्पत्तिदर्शनात् ब्रह्मविलक्षणस्य जगतः तत्कार्यत्वं [4]सम्भवत्येव इति[4] ।

सूत्रार्थस्तु - अज्ञत्वेन असुखित्वेन च उपलब्धस्यास्य चिदचिन्मिश्रस्य जगतः सर्वज्ञात् हेयप्रत्यनीकात् निरतिशयानन्दात् ब्रह्मणः विलक्षणत्वेन जगतः ब्रह्मकार्यत्वप्रतिपादनं वेदान्तानां न सम्भवति । तथात्वं विलक्षणत्वं च शब्दात् अवगम्यते; न केवलं प्रत्यक्षाद्युपलब्ध्या, 'विज्ञानं चाविज्ञानं च' (तै.आन.६-३) 'अनीशया शोचति मुह्यमानः' (मुं.उ.३-१-२) 'अनीशश्चात्मा बध्यते भोक्तृभावात्' (श्वे.उ.१-८) इत्यादेः ।। ४ ।।

'आपो वा अकामयन्त' (तै.ब्रा.३-१-५) 'तं पृथिव्यब्रवीत्' (तै.सं.५-५-२) इत्यादौ पृथिव्यादेरपि ज्ञानकार्यं व्यपदिश्यते । तस्मात् '[5]अविज्ञानं च[5]' (तै.आन.६) इत्येतदन्यपरम्, इत्यत [6]उत्तरम् पठति[6] -

१४३. अभिमानिव्यपदेशस्तु विशेषानुगतिभ्याम् । (२-१-५)

'तु'शब्दः चोद्यं व्यावर्तयति । पृथिव्याद्यभिमानिदेवतानाम् अयं व्यपदेशः । कुतः अवगम्यते? विशेषानुगतिभ्याम्, 'विशेषः विशेषण' 'हन्ताहमिमास्तिस्रो देवताः' (छां.उ.६-३-२) इति पृथिव्यादेः देवताशब्देन विशेषणं दृश्यते । 'सर्वा ह वै देवता अहं श्रेयसे विवदमानाः' (बृ.उ.८-१-६) इति च वागादिप्राणपर्यन्तस्य च । [7]तथा अनुगतिः[7] - अनुप्रवेशः । [8]अग्न्यादीनां[8] [9]वागाद्यनुप्रवेशो[9] दृश्यते । 'अग्निर्वाग्भूत्वा मुखं प्राविशत्' (ऐत.उ.२-४) 'आदित्यश्चक्षुर्भूत्वाऽक्षिणी प्राविशत्' (ऐत.उ.२-४) 'वायुः प्राणो भूत्वा नासिके प्राविशत्' (ऐत.उ.२-४) इत्यादौ ।। ५ ।।

---

१. पक्षः । कुतः?-घ २. प्रधान-क,ख,ग,घ ३. प्रतिपादनस्य च-ख,ग ४. सम्भवत्येव-क,ख,ग ५. तस्मात् विज्ञानं च-क,ग ६. उत्तरम्-क,ख,ग,घ ७. अनुगतिः-क -तथानुगतिरपि-ख -अनुगतिः-ग,घ ८. आग्न्यादित्यादेः-क,ख,ग,घ ९. वागादिष्वनुप्रवेशो-क,ख,ग

१४४. दृश्यते तु । (२-१-६)

'तु' शब्दः [1]पक्षं व्यावर्तयति[1] । माक्षिकादिभ्यः विलक्षणानां क्रिम्यादीनाम् उत्पत्तिः दृश्यते । अतः ब्रह्मविलक्षणस्यापि जगतः तत्कार्यत्वं सम्भवति ।। ६ ।।

१४५. असदिति चेन्न प्रतिषेधमात्रत्वात् । (२-१-७)

यदि - कार्यस्य कारणाद्विलक्षणद्रव्यत्वम् अभ्युपगम्यते; तर्हि कारणे कार्यम् [2]न सद्भवतीति[2] असत्कार्यवादः अभ्युपगमः [3]स्यात्, तथा सति - 'सर्वं खल्विदं ब्रह्म' (छां.उ.३-१४-१) इति सामानाधिकरण्यव्यपदेशो न घटत[3] इति चेत् -

तन्न; कार्यकारणयोः सालक्षण्यनियमप्रतिषेधमात्रत्वात् । अस्माभिः पूर्वमभिहितस्य कार्यकारणयोरेकद्रव्यत्वं [4]स्वीकृतमेव[4] । एकमेव कारणावस्थं द्रव्यं, कार्यावस्थां भजमानं [5]सलक्षणावस्थामपि[5] भजते, विलक्षणावस्थामपि इत्यर्थः ।। ७ ।।

१४६. अपीतौ तद्वत्प्रसङ्गादसमञ्जसम् । (२-१-८)

यदि - [5]ब्रह्मैव सर्वज्ञं[5] सत्यसङ्कल्पं निरतिशयानन्दम् अपहतपाप्मत्वादिस्वरूपं तद्विपरीतजगदवस्थां भजते; तर्हि पिण्डत्व[6]घटत्वा[6]वस्थमृद्द्रव्यवत् सर्वज्ञत्वम् अपहतपाप्मत्वमज्ञत्वं कर्मवश्यत्वं च ब्रह्मणः प्रसज्येतेतिविरुद्धार्थाभिधानात्, वेदान्तवाक्यम् असमञ्जसं स्यात् । अपीतौ इति [7]सृष्ट्यादेः प्रदर्शनार्थम्[7] । जगतः ब्रह्मणि अपीतौ, ब्रह्मण उत्पत्तावपि इत्यर्थः । अपीतिः-अप्ययः ।। ८ ।।

१४७. न तु दृष्टान्तभावात् । (२-१-९)

न ब्रह्मणि अज्ञत्वादयः प्रसज्येरन् । अत एव न वेदान्तानां असामञ्जस्यम् । 'तु' शब्दः प्रसक्तस्य असम्भावनीयतां द्योतयति । एकस्यैव अवस्थाद्वयान्वयेऽपि गुणदोष[8]व्यवस्थायां[8] दृष्टान्तसद्भावात् । यथा - 'मनुष्यो जातो बालो युवा स्थविरो भवति'

---

१. पक्षव्यावर्त्यर्थः-क,ख,ग २. असद्भवति-क,ख,घ -न सम्भवतीति-ग ३. स्यात्-ख ४. स्थितमेव-घ
५. ब्रह्मैव-क ६. घटत्वाद्य-घ ७. प्रदर्शनार्थः-क,ग -प्रदर्शनार्थं-ख,घ ८. व्यवस्थाया-क,ख,ग

[1]इत्यत्र[1] मनुष्य[2]शरीरकस्य[2] चेतनस्यैव सर्वावस्थान्वयेऽपि जन्मबालत्वयुवत्वस्थविरत्वादीनि न आत्मनि सङ्गच्छन्ते, [3]तथा[3] [4]ज्ञानसुखदुःखा[4]दयश्च न शरीरे; एवं चिदचिद्वस्तुशरीरकस्य परस्य ब्रह्मणः कार्यकारणोभयावस्थान्वयेऽपि कर्मवश्यत्वाज्ञत्वादयः शरीरभूतचिदचिद्वस्तुगताः । अपहतपाप्मत्वसर्वज्ञत्वादयः परमात्मनि आत्मभूते अवतिष्ठन्ते । सर्वावस्थस्य चिदचिद्वस्तुनः ब्रह्मशरीरत्वं, ब्रह्मणश्च तदात्मत्वम्, 'यस्य पृथिवी शरीरम्' (सुबा.उ.७.) (बृ.उ.५-७-७) [5]इत्याद्यन्तर्यामि[5]ब्राह्मणादिषु अवगतमिति न कश्चिद्विरोधः ।। ९ ।।

१४८. स्वपक्षदोषाच्च । (२-१-१०)

न केवलं ब्रह्मकारणवादस्य निर्दोषतया तत्समाश्रयणम् । प्रधानकारणवादे दोषाच्च, [6]एतत्[6] परित्यज्य, स एव समाश्रयणीयः ।

प्रधानकारणवादे हि निर्विकारस्य चिन्मात्रस्य पुरुषस्य प्रकृतिसंनिधानकृततद्धर्माध्यासमूला जगत्प्रवृत्तिः [7]अभ्युपगम्यते[7] । तत्र प्रकृतिसद्भावमात्रे सन्निधाने सति, मुक्तस्यापि तद्धर्माध्यासप्रसङ्गः; विकारविशेषे सति सन्निधाने, कृत्स्नस्य विकारस्य अध्यासपूर्वकत्वात् न अध्यासस्य विकारो हेतुरिति विरुद्धार्थाभिधानात् असामञ्जस्यदोष इति न तत्पक्षसम्भवगन्धः ।। १० ।।

१४९. तर्काप्रतिष्ठानादपि । (२-१-११)

[8]कपिल[8]तन्त्रस्य तर्कमूलत्वेन शाक्यादितर्कप्रतिहततयाऽस्य तर्कस्य अप्रतिष्ठितत्वाच्च न तत्पक्षसम्भवः ।। ११ ।।

१५०. अन्यथाऽनुमेयमिति चेदेवमप्यनिर्मोक्षप्रसङ्गः । (२-१-१२)

इतः पूर्वं [9]विद्यमानैः तर्कैः अप्रतिहतत्वं[9] यथा सम्भवति - तथा प्रधानकारणवादम् [10]अनुमन्यामहे[10] इति चेत्, तथापि [11]तर्काप्रतिष्ठानदोषात् अनिर्मोक्षप्रसङ्गः[11] दुर्वारः त्वदधिककुतर्ककुशलसद्भावसम्भवात् ।। १२ ।।

।। इति विलक्षणत्वाधिकरणम् ।। ३ ।।

---

१. इति-ख २. शरीरस्य-क,ख,ग ३. यथा-क ४. ज्ञानसुखा-क,ख,ग,घ ५. इत्यन्तर्यामि-ख,घ ६. तम्-ख,घ ७. अभ्युपपद्यते-क,ख,ग ८. कापिल-क,ख,ग,घ ९. विद्यमानः तर्कप्रतिहतत्वम्-क १०. अनुमास्यामहे-क,ख,ग ११. तर्काप्रतिष्ठानादनिर्मोक्षो प्रसङ्गः-क,ख,ग,घ

३९. शिष्टापरिग्रहाधिकरणम् । (२-१-४)

[अधिकरणार्थः-वेदापरिगृहीतसर्वपक्षप्रतिक्षेपः]

१५१. एतेन शिष्टापरिग्रहा अपि व्याख्याताः (२-१-१३)

न परिगृह्यन्ते वैदिकैः इत्यपरिग्रहाः । शिष्टाश्च ते अपरिग्रहाश्च शिष्टपारिग्रहाः। एतेन-तर्काप्रतिष्ठान[1]लक्षण[1][2]कापिलस्मृतिनिरसन[2]हेतुना, परिशिष्टाः कणभक्षादिस्मृतयोऽपि निरस्ताः व्याख्याताः । परमाणुकारणवादः सर्वसंमत इति, न तेषां तर्कस्य अप्रतिष्ठितत्वम् इत्यधिकाऽऽशङ्का ।

तर्कमूलत्वाविशेषात् परमाणूनां शून्यत्वात् द्रव्यत्वादिविवादाच्च, तर्कस्य अप्रतिष्ठितत्वमेवेति परिहारः ।। १३ ।।

।। इति शिष्टापरिग्रहाधिकरणम् ।। ४ ।।

४०. भोक्त्रापत्त्यधिकरणम् । (२-१-५)

[अधिकरणार्थः-परस्य ब्रह्मणः शरीरसम्बन्धाशङ्कितभोक्तृतानिरासः]

१५२. भोक्त्रापत्तेरविभागश्चेत्स्याल्लोकवत् । (२-१-१४)

सर्वात्मभूतस्य परस्य ब्रह्मणः [3]स्वशरीरभूतात्[3] जीवात् निरतिशया[4]नन्द[4] स्वभावतया यो विभाग उक्तः, स किं विभागः सम्भवति? [5]उत न[5] इति ? - संशयः ।

:. न सम्भवति - इति पूर्वः [6]पक्षः[6]; सर्वचिदचिद्वस्तुशरीरतया सशरीरत्वाद्ब्रह्मणः, [6]सशरीरस्य च[6] सुखदुःखयोर्भोक्तृत्वापत्तेः । तदापत्तिश्च 'न ह वै सशरीरस्य सतः प्रियाप्रिययोरपहतिरस्ति अशरीरं वा व सन्तं न प्रियाप्रिये स्पृशतः' (छां.उ. ८-१२-१) इति श्रुतेः ।

राद्धान्तस्तु - स्यादेव विभागो जीवात्, परस्य अकर्मवश्यतया । न [8]शरीरत्व[8]प्रयुक्तः सुखदुःखयोगः; अपि तु शास्त्रवश्यतया तदतिवृत्तिकृतः ।

---

१. लक्षणेन-ख,घ -लक्षण कपिल-क,ग २. कपिलस्मृति निरास-ख ३. स्वशरीरस्य शरीरभूतात्-घ ४. नन्दैक-क,ख,ग ५. न-क,ख,घ ६. पक्षः । कुतः?-घ ७. सर्वशरीर -सशरीर-ग,घ ८. सशरीरत्व-क,ख,ग

'स एकधा [1]भवति त्रिधा भवति[1]' (छां.उ. ७-२६-२) इत्यादिना अवगतशरीरस्य मुक्तस्य सशरीरस्यापि अशास्त्रवश्यतया निरस्तनिखिलदुःखत्वदर्शनात् । [2]यथालोके[2] राजशासनवश्यानां [3]शरीरिणां[3] तच्छासनातिवृत्तिनिमित्तदुःखान्वयेऽपि, राज्ञः [4]सशरीरस्यापि[4] प्रकारान्तरेण साधर्म्येऽपि स्वशासनावश्यतया न तदतिवृत्ति-कृतदुःखान्वयः । [5]विभागः वैलक्षण्यम् । सूत्रमपि[5] व्याख्यातम् ।। २४ ।।

।। इति भोक्त्रापत्त्यधिकरणम् ।। ५ ।।

४१. आरम्भणाधिकरणम् (२-१-६) (सू.१५-२०)

[अधिकरणार्थः-कार्यकारणभावकृतं जगद्ब्रह्मणोः अनन्यत्वम्]

१५३. तदनन्यत्वमारम्भणशब्दादिभ्यः । (२-१-१५)

किं ब्रह्मकार्यं जगत् ब्रह्मणः अन्यत्? उत अनन्यत्? - इति संशयः ।

अन्यत् - इति पूर्वः [6]पक्षः[6]; तथा उपलब्धेः । न हि बुद्धिशब्दान्तरादयः कारणात् कार्यस्य अनन्यत्वे [7]कथञ्चित् उपपद्यन्ते[7] । कारकव्यापारवैयर्थ्यं च अनन्यत्वे । अतो वस्तुविरोधात् अनन्यत्वश्रुतयो लक्षणया नेयाः ।

राद्धान्तस्तु - 'वाचाऽऽरम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्' (छां.उ.६-१-४) 'सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम्' (छां.उ. ६-२-१) 'तदैक्षत बहु स्यां प्रजायेयेति तत्तेजोऽसृजत' (छां.उ. ६-२-३) 'ऐतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत् त्वमसि श्वेतकेतो' (छां.उ. ६-८-७) 'सर्वं खल्विदं ब्रह्म तज्जलानिति' (छां.उ. ३-१४-१) 'तद्धेदं तर्ह्यव्याकृतमासीत्तन्नामरूपाभ्यां व्याक्रियत' (बृ.उ.३-४-७) इत्यादिश्रुतिशतसिद्धं कार्यस्य जगतः, कारणात् ब्रह्मणः अनन्यत्वम् ।

न च अत्र वस्तुविरोधगन्धः । कारणीभूतमृदादिद्रव्यस्यैव पृथुबुध्नोदराद्यवस्थान्तरापत्त्या बुद्धिशब्दान्तरादयोऽपि उपपद्यन्ते । तत एव कारक[8]व्यापाराद्यर्थवत्त्वं च[8] । एवं कारणस्यैव कार्यावस्थायामपि प्रत्यभिज्ञायमानस्य अवस्थान्तरापत्त्यैव सर्वेषु उपपन्नेषु अनुपलब्धद्रव्यान्तरकल्पना, न सम्भवति । तस्मात् 'ब्रह्मकार्यं जगत् ब्रह्मणः अनन्यदेव' ।

---

१. भवति-क,ख,ग,घ २. लोके-क ३. सशरीराणां-क,ख,ग,घ ४. शरीरस्यापि-क,ग ५. सूत्रमपि-क,ख,ग,घ ६. पक्षः । कुतः?-घ ७. कथञ्चिदपि उपपद्यते-घ ८. व्यापारार्थवत्त्वं-घ

[1]सूत्रार्थस्तु[1] - तस्मात् १ब्रह्मणः अनन्यत्वं कार्यस्य जगतः; आरम्भणशब्दादिभ्यो वाक्येभ्यः तत् उपपादयद्भ्यः [2]अवगम्यते[2] । '[3]आरम्भणम्[3]' इति शब्द आदिः एषां पूर्वोक्तनां वाक्यानां; तानि आरम्भणशब्दादीनि । [4]तानि[4] अनन्यत्वम् उपपादयन्ति ।। १५ ।।

१५४. भावे चोपलब्धेः । (२-१-१६)

घटादिकार्यभावे च - 'तदेवेदं मृद्द्रव्यम् इत्थमवस्थितम्' इति कारणस्योपलब्धेश्च, कारणात् [5]अनन्यत्वं कार्यस्य[5] । यथा देवदत्तस्य बालत्वयुवत्वाद्यवस्थाविशिष्टस्य नानन्यत्वम् ।। १६ ।।

१५५. सत्त्वाच्चाऽपरस्य । (२-१-१७)

अपरस्य कार्यस्य कारणे सत्त्वाच्च, कारणात् अनन्यत् कार्यम् । '[6]सर्वमिदं घटशरावादि[6] कार्यं पूर्वाह्ने मृदेवासीत्' इति हि, कारणे कार्यमुपलभ्यते । घटशरावादि संस्थानसंस्थितमेव मृद्द्रव्यं, पूर्वकाले पिण्डाकारमुपलब्धम् - इत्यर्थः ।। १७ ।।

१५६. असद्व्यपदेशान्नेति चेन्न धर्मान्तरेण वाक्यशेषाद्युक्तेः शब्दान्तराच्च (२-१-१८)

'असदेवेदमग्र आसीत्' (छां.उ.६-२-१) 'इदं वा अग्रे नैव किञ्च नासीत्' (तै.ब्रा.२-२-८) इत्यादिषु कारणावस्थायां कार्यस्य असत्त्वव्यपदेशात् 'कारणे कार्यं सत्' इत्येतत् नोपपद्यत - [7]इति चेन्न; 'सत्[7]' इति व्यपदेशहेतुभूतनामरूपावस्थाविरोधि सूक्ष्मावस्थाख्यधर्मान्तरेण योगात्, 'असत्' इति व्यपदिश्यते ।

कथम् इदमवगम्यते? वाक्यशेषात्, युक्तेः, शब्दान्तराच्च । वाक्यशेषस्तावत् - 'तदसदेव सन्मनोऽकुरुत स्याम्' (तै.ब्रा.२-२-८) इति । 'असत्' इति व्यपदिष्टस्यैव मनस्कारप्रतिपादनेन असद्व्यपदेशः धर्मान्तर[8]योगादित्यवगम्यते[8] । युक्तिश्च - धर्मान्तरयोगमेव असद्व्यपदेशहेतुम् अवगमयति । 'घटोऽस्ति, घटो नास्ति' इति सदसद्व्यपदेशयोः घटत्व-कपालत्वयोः परस्परविरोधिधर्मयोरेव हेतुत्वे सिद्धे, [9]तदतिरिक्ता[9]नुपलब्धतुच्छत्वस्य

१. तदनन्यत्वमारम्भणशब्दादिभ्यः-क,घ पुस्तकेषु अधिकः पाठः २. उपपद्यते-क,ख,ग,घ ३. वाचारम्भणम्-क,ख,ग,घ ४. तानि हि-क,ख,ग,घ ५. अनन्यत् कार्यम्-क,ग,घ ६. सर्वमेवेदं घटशरावादिकं-ख ७. इति चेत् तन्न-क,ग,घ ८. योगनिमित्त इत्यवगमयति-क,ख,ग,घ

हेतुत्वकल्पनानुपपत्तेः । तथा शब्दान्तरं च - 'सदेव सोम्येदमग्र आसीत्' (छा.उ.६-२-१) इति समानप्रकरणस्थम् [२]असच्छब्दं[२] धर्मान्तरयोगनिमित्तम् अवगमयति ।। १८ ।।

१५७. पटवच्च । (२-१-१९)

यथा तन्तव एव व्यतिषङ्गविशेषभाजः 'पटः' इति नाम[३]रूपाभ्यां कार्यान्तरादिकं[३] भजन्ते; तद्वत् ब्रह्मापि ।। १९ ।।

१५८. यथा च प्राणादिः । (२-१-२०)

यथा च-वायुः एक एव शरीरे वृत्तिविशेषं भजमानः, प्राणापानादि-नामरूपकार्यान्तराणि भजते; तद्वत् ब्रह्मापीति तदनन्यत्वं जगतः सिद्धम् ।। २० ।।

।। इति आरम्भणाधिकरणम् ।। ६ ।।

४२. इतरव्यपदेशाधिकरणम् । (२-१-७) (सू.२१-२३)

[अधिकरणार्थः-जगत्स्रष्टुर्ब्रह्मणः स्वहिताकरणादिदोषप्रसङ्गनिवारणम्]

१५९. इतरव्यपदेशाद्धिताकरणादिदोषप्रसक्तिः । (२-१-२१)

ब्रह्मणः जगत्कारणत्वं सम्भवति? न? - इति संशयः । न सम्भवति इति - पूर्वपक्षः ।

'[४]अयमात्मा ब्रह्म[४]' (बृ.उ.६-४-५) 'तत्त्वमसि' (छां.उ.६-८-७) इति सामानाधिकरण्येन जीवः ब्रह्म इत्यवगमात्, जगत्सर्गस्य च जीवदुःखहेतुत्वात् आत्महिताकरणादिदोषप्रसक्तेः, सर्वज्ञस्य सत्यसङ्कल्पस्य ब्रह्मणः जगत्कारणत्वानुपपत्तेः । जीवपरयोः भेदवादिन्यः श्रुतयः जगद्ब्रह्मणोः अनन्यत्वं वदता त्वयैव परित्यक्ताः । भेदे सति अनन्यत्वासिद्धेः ।

औपाधिकभेदविषयाः भेदश्रुतयः, स्वाभाविकाभेदविषयाः अभेदश्रुतयः इति चेत् तत्रेदं वक्तव्यम् । स्वभावतः स्वस्मादभिन्नं जीवं किम् अनुपहितं जगत्कारणं ब्रह्म, जानाति? न वा? न जानाति चेत्, सर्वज्ञत्वहानिः । जानाति चेत् स्वस्मादभिन्नस्य

---

१. ततस्तदतिरिक्त-घ २. सच्छब्दं-ग,घ ३. रूपकार्यादिकं-क,ग -रूपकार्यान्तरादिकं-घ ४. कुतः? अयमात्मा-क,ख,ग,घ

जीवस्य दुःखं 'स्वदुःखम्' इति जानतः ब्रह्मणः [1]हिताकरणाहितकरणादि[1] दोषप्रसक्तिः अनिवार्या ।

'जीवब्रह्मणोः अज्ञानकृतः भेदः, तद्विषया भेदश्रुतिः इतिचेत्, तत्रापि, जीवाज्ञानपक्षे [2]पूर्वोक्त[2]विकल्पः तत्फलं च तदवस्थमेव' ।

ब्रह्माज्ञानपक्षे - स्वप्रकाशस्वरूपस्य ब्रह्मणः [3]अज्ञान[3]साक्षित्वं, [4]तत्कृत - जगत्सृष्टिश्च[4] न [5]सम्भवति इति[5] । अज्ञानेन प्रकाशः तिरोहितश्चेत्, तिरोधानस्य प्रकाशनिवृत्तिकरत्वेन, प्रकाशस्यैव स्वरूपत्वात्, स्वरूपनिवृत्तिरेवेति स्वरूपनाशादिदोषाः भाष्ये प्रपञ्चिताः ।

राद्धान्तस्तु - 'अस्मान्मायी सृजते विश्वमेतत्तस्मिंश्चान्यो मायया संनिरुद्धः' (श्वे.उ.४-९) 'तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्न्यो अभिचाकशीति' (मुं.उ.३-१-१) 'प्रधानक्षेत्रज्ञपतिर्गुणेशः' (श्वे.उ.६-१६) 'पृथगात्मानं प्रेरितारं च मत्वा' (श्वे.उ.१-६) इत्यादिभिः प्रत्यगात्मनः अर्थान्तरभूतं ब्रह्मेति अवगमात्, जीव[6]कर्मानुगुणतया[6]जगत्सर्गस्य च ब्रह्मणः लीलाप्रयोजनत्वात्, जगत्कारणत्वं सम्भवत्येव । [7]तत्त्वमस्यादि[7] सामानाधिकरण्यनिर्देशः 'यस्याऽत्मा शरीरम्' (बृ.उ.मा.पा.५-७-२२) इत्यादिश्रुतेः जीवस्य ब्रह्मशरीरत्वात्, तच्छरीरतया जीवप्रकारकब्रह्मप्रतिपादनपरः सूक्ष्मचिदचिद्वस्तुशरीरं ब्रह्म कारणावस्थम्; स्थूलचिदचिद्वस्तुशरीरं ब्रह्मैव कार्यावस्थमिति कार्यकारणयोः अनन्यत्वम् । एवमपि शरीरभूतयोश्चिदचिद्वस्तुनोः शरीरिणो ब्रह्मणश्च दुःखित्वपरिणामित्व[8]हेयप्रत्यनीकत्व-कल्याण[8]गुणाकरत्व[9]स्वभावाः[9] स्वरूप [10]विवेकविषय[10]श्रुतिसिद्धाः तथैव व्यवस्थिता इति, ब्रह्मणः जगत्कारणत्वं सम्भवत्येव ।

सूत्रार्थस्तु - इतरव्यपदेशाद्धिताकरणादिदोषप्रसक्तिः - ब्रह्मण इतरः जीवः । ब्रह्मणो जीवतया व्यपदेशात्, [11]जीवस्य च[11] दुःखित्वात्, हितरूपजगदकरणम्

१. हिताकरणादि-क,ग २. पूर्वोक्तः-क,ख,ग -पूर्वोक्तो दोषः-घ ३. ज्ञान-क,ख,ग ४. तत्कृतसृष्टिः-क,ग ५. सम्भवति-क,ख,ग ६. कर्मानुगुण-क,ख,ग,घ ७. तत्त्वमसीत्यादि-क,ख,ग,घ ८. प्रत्यनीककल्याण-क,ख,ग ९. स्वभाव-क,घ १०. विवेकाः-क -विवेकाश्च-ग ११. जीवस्य-क,ग

अहितरूपजगत्करणम् इत्यादिदोषप्रसक्तिः ब्रह्मणः । अतः [1]ब्रह्मणः जगत्कारणत्वं[1] न सम्भवति [2]इति[2] ।। २१ ।।

अत उत्तरं पठति -

१६०. अधिकन्तु भेदनिर्देशात् । (२-१-२२)

'तु' शब्दः पक्षव्यावृत्त्यर्थः । प्रत्यगात्मनः अधिकम् - अर्थान्तरभूतं ब्रह्म । कुतः ?

भेदनिर्देशात् । 'स कारणं करणाधिपाधिपः' (श्वे.उ.६-९) 'प्रधानक्षेत्रज्ञपतिर्गुणेशः' (श्वे.उ.६-१६) 'पृथगात्मानं प्रेरितारं च मत्वा' (श्वे.उ.१-६) [3]इत्यादिभ्यः[3], प्रत्यगात्मनो जीवात् ब्रह्मणो हि भेदः निर्दिश्यते ।। २२ ।।

१६१. अश्मादिवच्च तदनुपपत्तिः । (२-१-२३)

अश्म-काष्ठ-लोष्ट-[4]तृणादेः अचेतनस्येव[4] अनन्तदुःखाकरजीवस्य निरतिशयानन्द-सत्यसङ्कल्पब्रह्मभावानुपपत्तिश्च । न केवलं भेदश्रुत्या [5]अर्थान्तरता[5] अवगम्यते; वस्त्वनुपपत्त्या च इत्यर्थः ।

जीवसामानाधिकरण्यनिर्देशः-'यस्यात्मा शरीरम्' (बृ.उ.मा.पा.५-७-२२) इत्यादि[6]श्रुतिशत[6]सिद्धजीवप्रकारब्रह्मप्रतिपादनपर [7]इति, अवस्थितेरिति काशकृत्स्नः (ब्र.सू.१-४-२२) इत्यत्रैव प्रतिपादितः[7] ।। २३ ।।

।। इति इतरव्यपदेशाधिकरणम् ।। ७ ।।

४३. उपसंहारदर्शनाधिकरणम् । (२-१-८) (सू.२४-२५)

[अधिकरणार्थः-विचित्रसर्वशक्तेर्ब्रह्मणः, सङ्कल्पमात्रतः विचित्रजगत्सृष्टियोगः]

१६२. उपसंहारदर्शनान्नेति चेन्न क्षीरवद्धि । (२-१-२४)

ब्रह्मणः जगत्कारणत्वं सम्भवति? [8]न वा? इति[8] संशयः । न सम्भवति - इति पूर्वः पक्षः ।

---

१. जगत्कारणत्वं-ख,घ २. इत्यर्थः-क,ख,ग ३. इत्यादिभिः-क,ख,ग,घ ४. तृणादेरिव-क,ग ५. त्वम्-क,ख,ग,घ ६. श्रुति-क,ख,ग,घ ७. इत्यभिप्रायः-क,ग,घ ८. नेति-क,ख,ग,घ

लोके कार्यजननसमर्थस्यापि वस्तुनः [1]तत्तत्कार्य[1]जनने अनेककारकोपसंहारदर्शनात् [2]विचित्रजगज्जन्म[2]समर्थस्यापि ब्रह्मणः असहायस्य जनयितृत्वानुपपत्तेः ।

राद्धान्तस्तु - क्षीरस्य दधिभावे अनन्यापेक्षत्वदर्शनात्, नानेककारकोपसंहार नियमः दृश्यत इति, ब्रह्मणः अनन्यापेक्षस्यैव कारणत्वं सम्भवत्येव । [3]सूत्रमपि[3] व्याख्यातम् । क्षीरवद्धि इति प्रसिद्धवन्निर्देशः चोद्यमान्द्यपरः ।। २४ ।।

१६३. देवादिवदपि लोके । (२-१-२५)

यथा - देवादयः स्वे स्वे लोके स्वापेक्षितानि स्वसङ्कल्पादेव सृजन्ति । तथा ब्रह्मापि । देवादेः शास्त्रावसेयशक्तितया ब्रह्मतुल्यत्वेऽपि, [4]देवादिग्रहणं ब्रह्मणः विचित्रशक्तित्वस्य सुग्रहणायेति मन्तव्यम्[4] ।। २५ ।।

।। इति उपसंहारदर्शनाधिकरणम् ।। ८ ।।

४४. कृत्स्नप्रसक्त्यधिकरणम् । (२-१-९) (सू.२६-३१)

[अधिकरणार्थः-ब्रह्मणो निरवयवस्याऽपि जगत्कारणतायाः श्रुतिप्रतिपन्नतया नाऽसाङ्गत्यम्]

१६४. कृत्स्नप्रसक्तिर्निरवयवत्वशब्दकोपो वा । (२-१-२६)

ब्रह्मणः जगत्कारणत्वं सम्भवति? न? इति संशयः ।

न सम्भवति इति पूर्वः [5]पक्षः[5] । निरवयवस्य ब्रह्मणो जगदुपादानत्वे कृत्स्नस्य ब्रह्मणो जगदाकारेण उपयोगप्रसङ्गात्, तत्परिजिहीर्षया सावयवत्वाभ्युपगमे, 'सदेव सोम्येदमग्र आसीदेक[6]मेवाद्वितीयम्' (छां.उ.६-२-१) इत्यादि[6]कारणावस्थायां निरवयवत्ववाचिशब्दः बाध्येत ।

यद्यपि सूक्ष्मचिदचिद्वस्तुशरीरं ब्रह्म कारणं, स्थूलचिदचिद्वस्तुशरीरं ब्रह्म कार्यम् इत्यभ्युपगम्यते; तथापि शरीरांशस्यापि कार्यत्वाभ्युपगमात् कृत्स्नप्रसक्तिः, निरवयवत्व[7] शब्दबाधो[7] वा ।

राद्धान्तस्तु - सकलेतर[8]विसजातीयं[8] श्रुत्यैकसमधिगम्यं सर्वशक्तियुक्तं ब्रह्म निरवयवमपि, कार्यं च भवति अन्यच्च भवतीति, परिमितशक्तिवस्तुचोद्यं न तत्र प्रसज्यते ।

---

१. तत्कार्य-क,ग २. विचित्रजगज्जनन-क,ख,ग,घ ३. सूत्रं तु निगद-क,ख,ग,घ ४. देवादेः दृष्टान्ततयोपादानं सुखग्रहणाय तस्य सुखग्रहणायेति मन्तव्यम्-ख,ग ५. पक्षः । कुतः?-घ ६. इत्यादि-क,ख,ग ७. बाधो-क -शब्दकोपो वा-ग ८. विजातीयं-ख

यथा जातिवादिनः जातिरेकैव अमूर्ताखण्डमुण्डादिषु अत्यन्तविलक्षणेषु अनन्तेष्वपि परिसमाप्यैव वर्तते । न तत्र इतरवस्तुचोद्यम्; इति । [1]अतः ब्रह्मणः जगत्कारणत्वं[1] सम्भवत्येव ।

सूत्रार्थस्तु - कृत्स्नप्रसक्तिर्निरवयवत्वशब्दकोपो वा - ब्रह्मकारणत्वे ; कृत्स्नस्य ब्रह्मणः कार्यत्वेन उपयोगप्रसङ्गः - निरवयवत्वात् । [2]सावयवत्वे निरवयवत्वशब्दकोपो वा[2]- निरवयवत्ववादिशब्दबाधप्रसङ्ग इत्यर्थः ।। २६ ।।

१६५. श्रुतेस्तु शब्दमूलत्वात् । (२-१-२७)

'तु' शब्दः पक्षव्यावृत्त्यर्थः । श्रुतेः - श्रुति प्रामाण्यात् नैवं प्रसज्यते । शब्दमूलत्वात् शब्दैकमूलत्वेन सकलेतरविसजातीयत्वात् इत्यर्थः ।। २७ ।।

२६६. आत्मनि चैवं विचित्राश्च हि । (२-१-२८)

आत्मनि च एवं - जीवात्मनि अचेतनधर्माऽप्रसक्तिश्च एवं; अचेतनविसजातीयत्वादेव इत्यर्थः । विचित्राश्च हि अचेतनेषु च विसजातीयेषु अग्निजलादिषु विचित्रा हि शक्तयो [3]दृश्यन्ते । एवं परमात्मनः चेतनाचेतनविसजातीयस्य विचित्राः शक्तयः उपपद्यन्ते[3] ।। २८ ।।

१६७. स्वपक्षदोषाच्च । (२-१-२९)

प्रधानादिकारणपक्षे दोषाच्च ब्रह्मैव [4]जगत्कारणम्[4] । तत्र हि - लौकिकवस्तुसजातीयत्वेन प्रधानादेः उक्तदोषः, अन्ये च प्रसज्येरन् ।। २९ ।।

१६८. सर्वोपेता च तद्दर्शनात् । (२-१-३०)

न केवलं सकलेतरविसजातीयत्वेन सर्वशक्त्युपेता परादेवता [5]उच्यते[5] । तद्दर्शनाच्च सर्वशक्तियोगश्रुतेः इत्यर्थः । दर्शयतीति - दर्शनं - श्रुतिः ।

'पराऽस्य शक्तिर्विविधैव [6]श्रूयते[6]' (श्वे.उ.६-८) इत्यादिका ।। ३० ।।

---

१. जगत्कारणत्वम्-क,ख,ग,घ २. सावयवत्वे-क,ख,ग ३. दृश्यन्ते-क,ख,ग,घ ४. कारणम्-क,ख,ग,घ ५. इत्युच्यते-ख,घ ६. श्रूयते-स्वाभाविकीज्ञानबलक्रिया च-ख,ग

१६९. विकरणत्वान्नेति चेत्, तदुक्तम् । (२-१-३१)

उक्तस्यार्थस्य द्रढिम्ने, चोद्यपूर्वकं पूर्वोक्तं स्मारयति । विकरणत्वात् - करणविरहितत्वात् ब्रह्म न कारणम् - इति चेत्, 'न तस्य कार्यं करणं च विद्यते' (श्वे.उ.६-८) इति श्रूयते । तदुक्तम् - [1]अत्र[1] यद्वक्तव्यं तत्पूर्वमेवोक्तम् 'शब्दमूलत्वात्, विचित्राश्च हि' इति । अयमेव परिहारः शब्दैकमूलत्वेन सकलेतरविसजातीयत्वात् ब्रह्मणः विसजातीयानां च शक्तिवैचित्र्यस्य लोकदृष्टत्वात्, सर्वमुपपन्नम् इत्यर्थः ।। ३१ ।।

।। इति कृत्स्नप्रसक्त्यधिकरणम् ।। ९ ।।

४५. प्रयोजनवत्त्वाधिकरणम् । (२-१-१०) (सू.३२-३६)

[अधिकरणार्थः-अवाप्तसमस्तकामस्यापि परस्य ब्रह्मणः, लीलार्थम् सर्वजगत्स्रष्टृत्वोपपत्तिः]

१७०. न प्रयोजनवत्त्वात् । (२-१-३२)

ब्रह्मणो जगत्कारणत्वं सम्भवति? न? - इति संशयः ।

न सम्भवति इति पूर्वः [2]पक्षः[2]; बुद्धिपूर्वारम्भाणां सप्रयोजनत्वात् । ईश्वरस्य च स्वत एव अवाप्तसमस्तकामस्य जगत्सृष्ट्यारम्भे प्रयोजनाभावात् ।

गर्भवासादिदुःखरूपत्वात् सृष्टेः परानुग्रहेणापि न [3]सप्रयोजनत्वम्[3] इति ।

राद्धान्तस्तु - परिपूर्णस्यापि ईश्वरस्य केवललीलाप्रयोजनाय जगत्सृष्ट्याद्यारम्भः सम्भवति । यथा लोके सप्तद्वीपवर्ती मेदिनीम् अधितिष्ठतः महाराजस्य परिपूर्णस्यापि केवल[4]लीलैकफलाः[4] कन्दुकाद्यारम्भाः दृश्यन्ते, तद्वत् ईश्वरस्यापि प्रयोजनाय जगत्सृष्ट्यारम्भः [5]सम्भवति[5] ।

सूत्रार्थस्तु - न प्रयोजनवत्त्वात्-प्रयोजनवत्त्वात्सृष्टेः ईश्वरस्य स्वतः परिपूर्णस्य प्रयोजनाभावात् न स्रष्टृत्वम् ।। ३२ ।।

१७१. लोकवत्तु लीलाकैवल्यम् । (२-१-३३)

लीलाकैवल्यं - लीलायाः प्रयोजनत्वे कैवल्यं सम्भवति । केवलाया लीलायाः सृष्ट्यारम्भप्रयोजनत्वं सम्भवति इत्यर्थः । लोकवत्-यथा लोके, राज्ञः कन्दुकाद्यारम्भे ।। ३३ ।।

---

१. तत्र-ख,ग,घ २. पक्षः । कुतः?-घ ३. प्रयोजनवत्त्वम्-क,ग ४. लीलायै-क,ख,ग,घ
५. सम्भवत्यैव-ग

देवमनुष्यादिविषमसृष्ट्या पक्षपातप्रसङ्गात् दुर्विषहदुःखगर्भत्वेन नैर्घृण्यप्रसङ्गाच्च, परमकारुणिकस्य परमपुरुषस्य [1]परिपूर्णस्य लीलार्थमपि[1] जगत्सर्गः न सम्भवति, इत्याशङ्क्याह -

१७२. वैषम्यनैर्घृण्ये न सापेक्षत्वात् तथा हि दर्शयति । (२-१-३४)

ईश्वरस्य विचित्रजगत्सृष्टौ; देवादि[2]वैषम्यप्रयुक्त[2]पक्षपातः [3]दुःखप्रद[3]जगत्सर्गे नैर्घृण्यं च न [4]सम्भवतः[4] । वैषम्यादौ ईश्वरस्य क्षेत्रज्ञकर्मसापेक्षत्वात् । क्षेत्रज्ञानां पूर्वपूर्वकर्म पर्यालोच्य तत्तत्कर्मानुगुणं विषमं जगत्सृजतीति तत्तत्कर्मैव वैषम्यादिहेतुः इत्यर्थः । [5]तथा देवादिदेहयोगं क्षेत्रज्ञानां तत्तत्कर्मसापेक्षं[5] [6]दर्शयति हि[6] श्रुतिः-'साधुकारी साधुर्भवति पापकारी पापो भवति' (बृ.उ.६-४-५) इति ।। ३४ ।।

१७३. न कर्माऽविभागादिति चेन्नाऽनादित्वादुपपद्यते चाऽप्युपलभ्यते च । (२-१-३५)

सृष्टेः प्राक् कर्म न विद्यते; क्षेत्रज्ञाभावात् । तदभावश्च 'सदेव [7]सोम्येदमग्र आसीत्[7]' (छां.उ.६-२-१) इति अवधारणावगतात् अविभागात् - इति चेत् तन्न; अनादित्वात् क्षेत्रज्ञानां तत्तत्कर्मप्रवाहाणां च । उपपद्यते [8]च[8]-क्षेत्रज्ञस्वरूपानादित्वेऽपि नामरूपविभागाभावात् अविभागश्रुतिः । अन्यथा अकृताभ्यागमकृतविप्रणाशप्रसङ्गात् । उपलभ्यते च श्रुतिस्मृत्योः क्षेत्र[9]ज्ञानामनादित्वम्[9] 'तद्धेदं तर्ह्यव्याकृतमासीत्तन्नामरूपाभ्यां व्याक्रियते' (बृ.उ.३-४-७) इति नामरूपव्याकरणमात्रश्रवणात्, क्षेत्रज्ञानां स्वरूपानादित्वं सिद्धम् । 'ज्ञाज्ञौ द्वावजावीशनीशौ' (श्वे.उ.१-९) 'नित्यो नित्यानां' (श्वे.उ.६-१३) 'प्रकृतिं पुरुषं चैव विद्ध्यनादी उभावपि' (भ.गी.१३-१९) इति, अविभागश्रुतिरपि नामरूपविभागाभावादेव उपपद्यते - इत्यभिप्रायः ।।

[अत्र पाठान्तरम्]

सृष्टेः प्राक्कर्म न विद्यते, क्षेत्रज्ञाभावात् । तदभावश्च 'सदेव सोम्येदमि'त्यवधारणावगतादविभागादिति चेत्; तन्न, अनादित्वात् क्षेत्रज्ञानां तत्तत्कर्मप्रवाहाणां च । 'तद्धेदं तर्ह्यव्याकृतमासीत्तन्नामरूपाभ्यां व्याक्रियते'ति नामरूपव्याकरणमात्रश्रवणात् क्षेत्रज्ञानां

---

१. लीलार्थमपि-क,ख,ग,घ २. वैषम्य-क,ख,ग,घ ३. दुःखगर्भ-क,ख,ग,घ ४. भवतः-क,ग,घ
५. तथाक्षेत्रज्ञानां देवादियोगं-ख,घ -तथा हि-क,ग ६. दर्शयति-क,ग ७. सोम्येदम्-ख -सोम्य-क,ग
८. चानादित्वं-क,ख,ग,घ ९. ज्ञानादित्वम्-क,ख,ग,घ

स्वरूपानादित्वं सिद्धम् । उपपद्यते क्षेत्रज्ञस्वरूपानादित्वेऽपि नामरूपविभागाभावाद-विभागश्रुतिः; अन्यथा अकृताभ्यागमकृतविप्रणाशप्रसङ्गात् । उपलभ्यते च श्रुतिस्मृत्योः क्षेत्रज्ञानामनादित्वम् 'ज्ञाज्ञौ द्वावजावीशनीशौ', 'नित्यो नित्यानाम्', 'प्रकृतिं पुरुषं चैव विद्ध्यनादी उभावपि', 'न जायते' इत्यादिभिः ।। ३५ ।।

१७४. सर्वधर्मोपपत्तेश्च । (२-१-३६)

प्रधानपरमाण्वादिषु अनुपपन्नानाम् 'स्वपक्षदोषात्' (ब्र.सू.२-१-२९) इत्यादिषु उक्तानां सर्वेषां धर्माणां कारणत्वोपपादकानां ब्रह्मणि उपपत्तेश्च ब्रह्मैव कारणम् । प्रधानपरमाण्वादीनां परिमितशक्तिकत्वात् लोकदृष्टवस्तुसजातीयत्वाच्च अनुपपत्तयः सहस्रशः सन्ति । ब्रह्मणः शास्त्रैकसमधिगम्यतया सकलेतरविसजातीयत्वेन अचिन्त्यशक्तित्वात्, सर्वशक्तित्वश्रुतेश्च सर्वम् उपपन्नम् इत्यर्थः ।। ३६ ।।

।। इति प्रयोजनवत्त्वाधिकरणम् ।।

।। इति श्रीभगवद्रामानुजविरचिते वेदान्तदीपे द्वितीयाध्यायस्य प्रथमः पादः ।।

द्वितीयः पादः - तर्कपादः (अधि.८, सू.४२)

४६. रचनानुपपत्त्यधिकरणम् (२-२-१) (सू.१-९)

[अधिकरणार्थः-ब्रह्मानधिष्ठितस्य साङ्ख्योक्तप्रधानस्य जगत्कारणत्वायोगः]

१७७. रचनानुपपत्तेश्च नानुमानं प्रवृत्तेश्च । (२-२-१)

सांख्यतन्त्रसिद्धः प्रधानकारणवादः किं समीचीनयुक्तिमूलः? उत न? इति संशयः ।

समीचीनयुक्तिमूलः - इति पूर्वः [१]पक्षः[१] । घटादिवत् विचित्रसन्निवेशं जगत्, कार्यं; तद्वदेव स्वस्वरूपकारणविशेषारब्धम् । सुखदुःख[२]मोहाद्यात्मकतया[२] सत्त्वाद्यात्मकं जगत्, सत्त्वरजस्तमोमूलकम् । तत्र महदादिपृथिव्यन्तानां [३]घटादिवत् परिणामित्वेन[३]-कारणापेक्षित्वाविशेषात् [४]ते जगदुत्पत्तौ कारणकाष्ठा न भवन्ति[४] । तेषां [५]परिमितत्वेन अपरिमि[५]तजगदुत्पादनाऽशक्तेः । अन्यूनातिरिक्तानि साम्यावस्थानि [६]अपरिमितानि[६] सत्त्वरजस्तमांसि अव्यक्तप्रधानादिशब्दाभिधेयानि जगत्कारणम् ।

---

१. पक्षः । कुतः?-घ २. मोहस्वतया-क,ख,ग,घ ३. घटादिवत्-क ४. तेषु जगदुत्पत्तौ कारणकार्या न भवति-ग ५. घटादिपरिमितत्वेन-ग ६. अपरिमित-क,ग

राद्धान्तस्तु - रथप्रासादादि[1]निर्माणहेतुभूत[1]दार्वादिवत् [2]अचेतनं प्रधानं स्वस्वभावाद्यभिज्ञचेतनानधिष्ठितं विचित्रजगद्रचनाऽसमर्थमिति, न केवलं प्रधानम् कारणम्[2] ।

सूत्रार्थस्तु - रचनानुपपत्तेश्च नानुमानम् - अनुमीयत इति अनुमानम् प्रधानम्, तस्य अचेतनस्य प्राज्ञानधिष्ठितस्य विचित्रसन्निवेशजगद्रचनानुपपत्तेः तन्न कारणम् ।

[3]अचेतनस्य दार्वादेः प्राज्ञानधिष्ठितस्य रथप्रासादादिरचनानुपपत्तेर्दर्शनात् तदधिष्ठितस्य रचनाप्रवृत्तेर्दर्शनाच्च । चकारात्[3] सत्त्वादीनां द्रव्यगुणत्वेन शौक्ल्यादेरिव उपादानकारणत्वासम्भवं समुच्चिनोति । सत्त्वादयो हि कार्यगतलाघवप्रकाशादिहेतुभूताः कारणभूतपृथिव्यादिगताः तत्तत्स्वभावविशेषाः । प्रवृत्तेश्च- अनुपपत्तेः इति वर्तते । प्राज्ञानधिष्ठितस्य प्रधानस्य विचित्र[4]जगद्रचनानुगुणाद्यपरिस्पन्दरूप[4]प्रवृत्त्यनुपपत्तेश्च न प्रधानम् कारणम् ।। १ ।।

१७६. पयोऽम्बुवच्चेत्तत्रापि । (२-२-२)

पयसः अम्बुनश्च यथा प्राज्ञानधिष्ठितस्यैव दधिभावेन [5]नारिकेलचूतादिविचित्र-रस[5]रूपेण च परिणामो दृश्यते, तद्वत् प्रधानस्यापि केवलस्यैव जगदाकारेण परिणाम उपपद्यते इति चेत्, परिहरति-तत्रापीति । तदपि पक्षीकृतम् इत्यर्थः । यत्र [6]रथादिषु[6] अचेतनस्य प्राज्ञाधिष्ठितत्वं दृष्टम्; तद्व्यतिरिक्तं हि सर्वं पक्षीकृतमेव । 'योऽप्सु तिष्ठन्' (बृ.उ.५-७-८) इत्यादिश्रुतेः तदपि प्राज्ञाधिष्ठितम् ।। २ ।।

१७७. व्यतिरेकानवस्थितेश्चानपेक्षत्वात् । (२-२-३)

सर्गव्यतिरेकेण प्रतिसर्गाव[7]स्थया[7] अनवस्थितिप्रसङ्गाच्च केवलं प्रधानम् न कारणम् । अन्यानपेक्षत्वात्, प्रधानस्य सर्वदैव हि सृष्टिः प्रसज्यते ।। ३ ।।

१७८. अन्यत्राभावाच्च न तृणादिवत् । (२-२-४)

धेन्वादिना उपयुक्तं हि तृणोदकादि स्वयमेव क्षीराकारेण परिणमते; तद्वत् प्रधानमपि, इति च वक्तुं न शक्यते । धेन्वादिना उपयुक्तस्यापि तृणादेः क्षीराकारेण परिणामः प्राज्ञाधिष्ठितत्वादेव भवतीति [8]अभ्युपेतव्यम्[8] । कुतः? अन्यत्राभावात् अनडुहाद्युपयुक्तस्य प्रहीणस्य वा तृणादेः क्षीराकारेण परिणामाभावात् ।। ४ ।।

---

१. हेतुभूत-ख,घ २. अचेतनम् प्रधानम् जगत्कारणम्-ख ३. चकारात्-क,ख,ग,घ ४. जगद्रचनानुगुण-परिस्पन्द-क,ग,घ ५. रसादिविचित्र-ग -रसालादिविचित्र-क ६. रथादौ-ख,घ ७. स्थायां-क -स्थाया-ग ८. अभ्युपेतः-घ

१७९. पुरुषाश्मवदिति चेत्तथापि । (२-२-५)

प्राज्ञानधिष्ठितमपि प्रधानं चैतन्यमात्रवपुः निष्क्रियः पुरुषः स्वसंनिधिमात्रेण सर्गादौ प्रवर्तयति; यथा दृक्शक्तियुक्तः गमनशक्तिविकलः पङ्गुः पुरुषः अन्धं दृक्शक्तिविकलं प्रवृत्ति[१]शक्तियुक्तं पुरुषं[१] स्वसन्निधानात् प्रवर्तयति; यथा च अयस्कान्ताश्मा स्वसन्निधानात् अयः प्रवर्तयति तद्वत् इति चेत् -

परिहरति-तथापीति । तद्वदपि प्रधानस्य प्रवृत्तिः न उपपद्यते । तत्र हि पङ्गोः पुरुषस्य गमनशक्तिविकलस्यापि मार्गोपदेशादिव्यापारः कादाचित्को दृश्यते । अन्धस्य चाक्षुषव्यापारविरहेऽपि पङ्ग्वपदेशग्रहणादिः चेतनधर्मः अस्ति । अयस्कान्तमणेरपि अयःप्रवृत्तौ कादाचित्कम् अयःसन्निधानं विद्यते । इह तु सन्निधिमात्रातिरेकी तादृशः कश्चित् विशेषः उभयत्रापि न विद्यते । पुरुषसन्निधानस्य नित्यत्वेन नित्यसर्गप्रसक्तिः । तथा सति [२]प्रतिसर्गाभावः अपवर्गाभावप्रसङ्गश्च[२] ।। ५ ।।

१८०. अङ्गित्वानुपपत्तेश्च । (२-२-६)

इतश्च । गुणानाम् उत्कर्षापकर्षरूपाङ्गाङ्गिभावेन जगत्प्रवृत्तिः [३]प्रतिसर्गावस्थायां साम्यावस्थानाम् एकस्य उत्कर्षरूपाङ्गित्वानुपपत्तेश्च[३] न सम्भवति । तत्रापि उत्कर्षः अस्तीति चेत्-सर्वदा सर्गप्रसङ्गः ।। ६ ।।

१८१. अन्यथाऽनुमितौ च ज्ञशक्तिवियोगात् । (२-२-७)

[४]उक्तप्रकारात् [५]व्यतिरिक्तप्रकारेण[५] प्रधानानुमितौ च प्रधानस्य ज्ञातृत्वशक्तिवियोगात् रचनानुपपत्त्यादयो दोषाः तदवस्थाः ।। ७ ।।

१८२. अभ्युपगमेऽप्यर्थाभावात् । (२-२-८)

प्रधानानुमानाभ्युपगमेऽपि प्रधानेन प्रयोजनाभावात्, न तत् अनुमेयम् । पुरुषस्य भोगापवर्गार्थतया हि प्रधानप्रवृत्तेः सप्रयोजनत्वम् । चैतन्यमात्रवपुषो निष्क्रियस्य नित्य[६]निर्विकारस्य पुरुषस्य[६] इतरेतराध्यासकृतप्रकृतिदर्शनरूपभोगः तद्विवेचनरूपापवर्गश्च न सम्भवति ।

---

१. शक्तम्-ख,घ २. प्रतिसर्गापवर्गाभावश्च -क,ख,ग,घ ३. सर्गप्रतिसर्गश्च-ख,घ ४. न्यस्य या शक्तिः तद्वियोगात् (ज्ञत्व) ज्ञातृत्व शक्ति वियोगात् इत्यर्थः । इत्यधिकः पाठः-ख,घ ५. प्रकारान्तरेण-क,ख,ग,घ ६. निर्विकारस्य-क,ख,ग,घ

निर्विकारस्यैव प्रकृतिसन्निधानेन सम्भवति-इति चेत्, उभयोः नित्यत्वेन सर्वगतत्वेन च सन्निधानस्य नित्यत्वात् अपवर्गासिद्धिः । तथाविधसन्निधेरेव अपवर्ग [1]हेतुत्वे[1] भोगासिद्धिश्च ।। ८ ।।

१८३. विप्रतिषेधाच्चाऽसमञ्जसम् । (२-२-९)

विप्रतिषिद्धं च इदं [2]सांख्यदर्शनम्[2] । प्रकृतेः परार्थतया पुरुषो द्रष्टा भोक्ता अधिष्ठाता इत्याहुः । प्रकृतेश्च पुरुषस्य भोगापवर्गार्थतया सप्रयोजनत्वं च । प्रकृत्यैव साधनभूतया पुरुषः भोगम् अपवर्गं च अश्नुत इति च उक्तेः । [3]स च पुरुषः[3] चैतन्यमात्रवपुः नित्यः निर्विकारः न द्रष्टा न भोक्ता न कर्ता' - इति च । अत एव 'पुरुषो न बध्यते, न च मोक्षसाधनम् अनुतिष्ठति, न च मुच्यते' - इति वदन्ति ।

'प्रकृतिः अचेतनभूतैव पुरुषसन्निधानात् पुरुषधर्मं चैतन्यं स्वस्मिन्, स्वधर्मं कर्तृत्वं पुरुषे, च अनुसन्धाय बध्यते, मोक्षसाधनम् अनुतिष्ठति, मुच्यते' - इति च आहुः ।

अध्यासरूपम् अनुसन्धानं हि चेतनधर्मः । तथा 'प्रकृतिः अनुपकारिणः पुरुषस्य भोगापवर्गस्वरूपं प्रयोजनं [4]साधयति[4] इति उपकारिणी' - इति च आहुः । अध्यासरूपबन्धादयः पुरुषस्य न सन्ति इति चेत्-कस्तस्य उपकारः ? [5]एवमन्योन्य[5] विरुद्धभाषणात् असमञ्जसम् ।। ९ ।।

।। इति रचनानुपपत्त्यधिकरणम् ।। १ ।।

४७. महद्दीर्घाधिकरणम् । (२-२-२) (सू.१०-१६)

[अधिकरणार्थः-तार्किकाभिमतपरमाणुकारणतावादनिरासः]

१८४. महद्दीर्घवद्वा ह्रस्वपरिमण्डलाभ्याम् । (२-२-१०)

किं [6]काणादाभ्युपगतः[6] परमाणुकारणवादः समीचीनयुक्तिमूलः ? उत न ?-इति संशयः ।

समीचीनयुक्तिमूलः-इति पूर्वः [7]पक्षः[7] । अवयवसंयोगात् अवयव[8]व्युत्पत्तेः[8] दर्शनात् अवयवाल्पत्वप्राचुर्याभ्यां सर्षपमहीधरवैषम्यदर्शनाच्च अवयवाल्पत्वकाष्ठा अवश्याभ्युपगमनीया इति परमाणुसिद्धिः ।

---

१. हेतुत्वेन-क,ख,ग,घ २. सांख्यानां दर्शनम्-क,ख,ग,घ ३. पुरुषः-क,ख,ग,घ ४. साधयन्ति सति-घ ५. एवमाद्यन्योन्य-क,ग ६. काणादपक्षः-ग -कणादाभ्युपगतः-ख ७. पक्षः । कुतः?-घ ८. व्युत्पत्ति-क,ख,ग,घ

ते चतुर्विधाः [1]परमाणवः[1] विपाकदशापन्नक्षेत्रज्ञादृष्टसचिवाः परमेश्वराधिष्ठिताः द्व्यणुकादिक्रमेण जगत् [2]आरम्भकाः[2] - इति ।

राद्धान्तस्तु - अवयवाः स्वकीयैः षड्भिः पार्श्वैः संयुज्यमानाः स्वस्मात् महान्तम् अवयविनम् उत्पादयन्तीति [3]परमाणुष्वपि[3] तथैव उत्पादकत्वम् [4]अभ्युपेतव्यम्[4]। तथा सति परमाणवोऽपि सांशाः स्वकीयैरवयवैस्ते च स्वकीयैरिति न क्वचित्कारणस्य व्यवस्थितिः ।

[5]सूत्रार्थस्तु[5] - महद्दीर्घवद्वा ह्रस्वपरिमण्डलाभ्याम् । 'असमञ्जसम्' इति वर्तते । वाशब्दः चार्थे । ह्रस्वपरिमण्डलाभ्यां द्व्यणुकपरमाणुभ्यां महद्दीर्घवत् त्र्यणुकद्व्यणुकोत्पत्तिवत् अन्यच्च तदभ्युपगतं सर्वम् असमञ्जसम् ।। १० ।।

द्व्यणुकादिक्रमेण आरम्भकत्वं कारणानवस्थितेः असमञ्जसम् । [6]किमत्र अन्यत्[6] असमञ्जसम्? इत्यत्राह -

१८५. उभयथाऽपि न कर्माऽतस्तदभावः । (२-२-११)

'परमाणूनाम् आद्यं कर्म अदृष्टकारितम्' इत्यभ्युपगम्यते । तददृष्टं किम् अणुगतम्? उत क्षेत्रज्ञगतम्? ।

उभयथाऽपि अदृष्टस्य अकादाचित्कत्वेन सदोत्पादकत्वप्रसङ्गात्, कादाचित्कं कर्म न सम्भवति । अतः कर्मणा परमाणुसंयोगाभावः । विपाकापेक्षत्वेऽपि नानाविधानन्तादृष्टानाम् एकदैव एकरूपविपाकश्च न सम्भवति । आनुमानिके ईश्वरासिद्धेः ईश्वरेच्छया अपि नियमो न सम्भवति ।। ११ ।।

१८६. समवायाभ्युपगमाच्च साम्यादनवस्थितेः । (२-२-१२)

समवायाभ्युपगमाच्च असमञ्जसम् । समवायो हि जातिगुणादीनां [7]द्रव्यविशेषा-पृथक्सिद्धिहेतुतया[7] अभ्युपगम्यते । समवायस्यापि [8]तथाभावे[8] हेत्वपेक्षासाम्यात् अनवस्थितेः । समवायस्य तथाभावः स्वाभाविकः इति चेत्, जातिगुणादीनामेव एष स्वभावः - इति युक्तम् ।। १२ ।।

इतश्च -

---

१. ते च कार्यानुगुण्येन-क,ख,घ २. आरभन्ते-क,ख,ग,घ ३. परमाणूनामपि-क,ख,ग,घ ४. अभ्युपैत्यम्-क,ख,ग,घ ५. सूत्रार्थः-क,ख,ग,घ ६. किमन्यत्-घ ७. द्रव्यविशेषान् प्रति अपृथक्सिद्ध-क,ख,ग,घ ८. तथाभाव-ख,घ

१८७. नित्यमेव च भावात् । (२-२-१३)

समवायसम्बन्धस्य नित्यत्वाभ्युपगमात्, सम्बन्धिनित्यत्वमन्तरेण तदनुपपत्तेः, अवयवावयविनोः उभयोरपि नित्यमेव भावात् कार्यकारणभाव एव न सिद्ध्यति ।। १३ ।।

१८८. रूपादिमत्त्वाच्च विपर्ययो दर्शनात् । (२-२-१४)

परमाणूनां नित्यत्वनिरवयवत्वादिविपर्ययश्च स्यात् । रूपादिमत्त्वात्तेषां घटादिषु रूपादिमत्सु तथा दर्शनात् । दर्शनादेव हि भवदभिमतं परिकल्प्यते ।। १४ ।।

१८९. उभयथा च दोषात् । (२-२-१५)

अनित्यत्वादिभयात् परमाणूनां रूपादिशून्यत्वे, कार्यगुणस्य कारणगुणपूर्वकत्वासिद्धिः । तत्सिद्धये रूपादिमत्वे च अनित्यत्वादि[१]दोषप्रसक्तिः[१] उभयथा च दोषात् असमञ्जसमेव ।। १५ ।।

१९०. अपरिग्रहाच्चात्यन्तमनपेक्षा । (२-२-१६)

कापिलपक्षे हि श्रुतिन्यायविरुद्धेऽपि, सत्कार्यवादादि किञ्चित् वैदिकैः परिगृह्यते । काणादे तु, कस्यचिदप्यंशस्य वैदिकैः परिग्रहाभावात् अनुपपन्नत्वाच्च निःश्रेयसार्थिभिः अत्यन्तमनपेक्षा कार्या ।। १६ ।।

।। इति महद्दीर्घाधिकरणम् ।। २ ।।

४८. समुदायाधिकरणम् । (२-२-३) (सू.१७.२६)

[अधिकरणार्थः-बौद्धवैभाषिक-सौत्रान्तिकपक्षयोः निरसनम्]

१९१. समुदाय उभयहेतुकेऽपि तदप्राप्तिः (२-२-१७)

सौगताः चतुर्विधाः । प्रत्यक्षसिद्धस्थूलद्रव्यवादिनः केचित् वैभाषिकाः । अन्ये पृथिव्यादिविज्ञानानुमेयस्थूलद्रव्यवादिनः । ते च सौत्रान्तिकाः अपरे निरालम्बनविज्ञानमात्रसद्भावं वदन्ति, योगाचाराः । त्रयोऽप्येते स्वाभ्युपगतवस्तुनः क्षणिकत्वं वदन्ति । अन्ये तु सर्वशून्यवादिनो माध्यमिकाः ।

तत्र आद्ययोः बाह्यसद्भावम् अभ्युपगच्छतः जगदुत्पत्तिप्रकारः लोकव्यवहारश्च सूपपादः? उत दुरुपपादः? इति संशयः ।

---

१. प्रसक्तिः-ख -प्रसक्तिरिति-क,ग,घ

सूपपादः इति पूर्वः [१]पक्षः[१] । तथा हि-पार्थिवाप्यतैजसवायवीया गन्धादियुक्ताः परमाणवः हि पृथिव्यादिरूपेण संहता भवन्ति । भूतेभ्यश्च शरीरेन्द्रियविषयलक्षणसङ्घाताः । तत्र आन्तरविज्ञानसन्तानो ग्राहकाभिमानारूढः आत्मत्वेन अवतिष्ठते । एषु क्षणिकेष्वपि स्थिरत्वादिगोचरबुद्ध्याख्याविद्यया सर्वम् उपपद्यत इति जगदुत्पत्तिः लोकव्यवहारश्च युज्यते ।

राद्धान्तस्तु - क्षणध्वंसिनः परमाणवः कदा संहतौ व्याप्रियन्ते ? कदा संहन्यन्ते ? संहतौ व्यावृताः तस्मिन्नेव क्षणे विनष्टाश्चेत्, के पुनः संहन्यन्ते? कश्च विज्ञानात्मा, कदा, कं विषयं स्पृशति ? कश्च कदा कं जानाति ? कदा कमर्थमुपादत्ते ? स्प्रष्टा नष्टः, स्पृष्टं च नष्टं, वेदिता च नष्टः वेद्यं च नष्टम् । कथमन्येन स्प्रष्टम् अन्यो विजानाति ? कथं वा अन्येन विदितम् अन्य उपादत्ते ? सन्तानैकत्वे सिद्धेऽपि, सन्तानिभ्यः सन्तानस्य परमार्थतो वस्त्वन्तरत्वानभ्युपगमात् [२]सन्तानैक्यम्[२] पारमार्थिकम् अकिञ्चित्करम् । स्थिरत्वाद्यविद्ययाऽपि सङ्घातोत्पत्तिः न सम्भवति । न हि शुक्तिकादिषु रजताद्यविद्यया [३]शुक्तिका[३]द्युत्पत्तिसम्भवः । विदुषश्च पूर्वस्य नष्टत्वेन उत्तरेण अविदुषा पूर्वविनष्टेन विदुषा अनुसंहितार्थोपादानं न सम्भवति । संस्काराश्रयत्वेन च एकोऽर्थः स्थिरः नाभ्युपगम्यते । अतो जगदुत्पत्तिः लोकव्यवहारश्च दुरुपपाद एव ।

सूत्रार्थस्तु - समुदाय उभयहेतुकेऽपि तदप्राप्तिः - उभयहेतुकेऽपि समुदाये समुदा[४]यित्वाप्राप्तिः[४] । परमाणुहेतुकः पृथिव्यादिसमुदायः, पृथिव्यादिहेतुकः शरीरेन्द्रियसमुदायः इत्युभयहेतुकोऽपि समुदायः क्षणिकत्वाभ्युपगमात् उक्तेन न्यायेन न सिध्यति इत्यर्थः ।। १७ ।।

१९२. इतरेतरप्रत्ययत्वादुपपन्नमिति चेन्न, संघातभावानिमित्तत्वात् । (२-२-१८)

यद्यपि - क्षणिकाः सर्वे भावाः, तथापि अविद्यादीनाम् इतरेतरहेतुकत्वात् उपपन्नं लोकव्यवहारादिकम् । अस्थिरेषु स्थिरत्वबुद्धि[५]रूपया विद्यया[५] तत्र तत्र रागद्वेषादयो जायन्ते, इत्येवमादिपरम्परया पुनरपि अविद्या इति चक्रवत् परिवर्तते - इति चेत् -

१. पूर्वः पक्षः । कुतः ?-घ २. सन्तानैकत्वम्-ख,घ ३. शुक्त्या-ख ४. समुदाया प्राप्तिः-क,ख,ग,घ
५. रूपाविद्यया-क,ख,ग,घ

नैतदुपपद्यते । सङ्घातभावानिमित्तत्वात्, अविद्यायाः । यद्यपि अविद्याख्या विपरीतबुद्धिः क्षणिकं स्थिरत्वेन विषयीकरोति, तथापि तन्न वस्तुतः स्थिरं भवतीति वस्तुतः स्थिरकार्यं न करोति । अतः सङ्घातभावो न सिध्यतीत्यर्थः । अस्थिरे [1]स्थिर[1] बुद्धियुक्तस्य विज्ञानात्मनः तदैव नष्टत्वात् कस्य रागद्वेषादयो जायन्त इति रागद्वेषादिपरम्परा च न सिध्यति इत्यभिप्रायः ।। १८ ।।

इतश्च -

१९३. उत्तरोत्पादे च पूर्वनिरोधात् । (२-२-१९)

उत्तर[2]घटो[2]त्पत्तिवेलायां पूर्वस्य विनष्टत्वात् अभावस्यैव हेतुत्वेन अविशेषात् सर्वेषां [3]सदा[3] उत्पत्तिः प्रसज्यते । पूर्वक्षणवर्तिनो हेतुत्वोपगमेऽपि देशादेः विशेषकस्य स्थिरस्य एकस्य अनभ्युपगमात् । अविशेषेण उत्तरक्षणवर्तिनः [4]सर्वस्य[4] हेतुः स्यात् ।। १९ ।।

१९४. असति प्रतिज्ञोपरोधो यौगपद्यमन्यथा । (२-२-२०)

असत उत्पत्तौ प्रतिज्ञाविरोधश्च भवताम् । अधिपतिसहकार्यादीनां विज्ञानोत्पत्तिहेतुत्वप्रतिज्ञानात् । अथ एतत् परिजिहीर्षया पूर्वो घटक्षणः तिष्ठतीति उच्येत तदा युगपत् घटक्षणद्वयोपलब्धिप्रसङ्गः । [5]न चोपलभ्यते[5] । उपरोधोविरोधः ।

[6]सतो निरन्वयविनाशोऽपि न सम्भवतीत्याह -

१९५. प्रतिसंख्याप्रतिसंख्यानिरोधाप्राप्तिरविच्छेदात् । (२-२-२१)

प्रतिसंख्याप्रतिसंख्या[7]निरोधाप्राप्तिः[7] - स्थूलसूक्ष्मविनाशयोः अप्राप्तिः इत्यर्थः । [8]स्थूलविनाशः[8] मुद्गराभिघाताद्यनन्तरभाव्युपलब्धियोग्यः । सूक्ष्मस्तु प्रतिक्षण-भाव्युपलब्ध्यनर्हः । तौ निरन्वयौ न भवतः; उत्पत्तिविनाशधर्मभागिनो द्रव्यस्य अविच्छेदात् तदनन्यत्वमिति सत्कार्यवादस्य उपपादितत्वात् इत्यभिप्रायः । घटादौ कपालादिरूपावस्थया निरन्वयविनाशादर्शनात् प्रदीपनिर्वाणेऽपि सूक्ष्मावस्थाप्राप्तिरिति अविरोधः ।। २१ ।।

---

१. रूपविद्यया-क,ख,ग,घ २. स्थिरत्व-ग ३. घटक्षणो-क,ख,ग ४. सर्वदा-क,ख,ग,घ ५. त्रैलोक्यस्य सर्वस्य-क,ख,ग,घ ६. चोपलब्धिः-ग -चोपलभ्यते-ख ७. अस्ति तौ सम्प्रयोगादेर्ज्ञानस्य यौगपद्यं प्रसज्येत इत्यधिकः पाठः-ख

१९६. उभयथा च दोषात् । (२-२-२२)

उत्पन्नस्य [१]तुच्छत्वापत्तौ[१], तुच्छादुत्पत्तौ च इत्युभयप्रकारे च दोषापत्तेः ते न सम्भवतः । उत्पन्नस्य तुच्छताऽऽपत्तौ हि पश्चात् तुच्छादुत्पद्यमानं जगत्तुच्छात्मकमेव स्यात् । मृत्सुवर्णादेः उत्पद्यमानमृत्सुवर्णाद्या[२]त्मकघटमुकुटादिवत् । अतः तुच्छादुत्पत्तिः, तुच्छतापत्तिः च न सम्भवतः[२] ।। २२ ।।

१९७. आकाशे चाविशेषात् । (२-२-२३)

आकाशे तुच्छस्वरूपता न सम्भवति । अबाधितप्रतीतिसिद्धपृथिव्यादिवत् आकाशेऽपि अबाधितप्रतीतेः अविशेषात् । प्रतीयते हि आकाशः 'अत्र श्येनः पतति, अत्र गृध्रः' इति श्येनादेः पतनदेशत्वेन ।। २३ ।।

१९८. अनुस्मृतेश्च । (२-२-२४)

[३]प्रत्यभिज्ञानाच्च, न घटादेः क्षणिकत्वम् । 'तदेवेदम्' इति हि प्रत्यभिज्ञायते । प्रत्यभिज्ञानं हि नाम-अतीतवर्तमानकालवर्त्येकवस्तुविषयम् एकं प्रत्यक्षज्ञानम् । तस्य कालद्वयसम्बन्ध[४]विशिष्टमेव[४] वस्तुविषयः ।

न च - तत् इत्यंशः स्मरणम्, इदम् इत्यंशश्च ग्रहणम् अतीतकालसम्बन्धिनि इन्द्रियसंप्रयोगाभावात् - इति वाच्यम् । 'तदिदम्' इति सामानाधिकरण्येन [५]ग्रहणस्य[५] एकत्वस्फुरणात् । [६]पूर्व[६]कालानुभवजनितसंस्कार[७]सहकृते[७]न्द्रियसम्प्रयोगयुक्तस्य पुरुषस्य तथा ग्रहणम् उपपद्यत एव । अन्वयव्यतिरेकाधीनं हि सर्वत्र सामग्रीपरिकल्पनम्[३] ।

न च - ज्वालादिवत् सादृश्यनिबन्धनप्रत्यभिज्ञेति त्वया [८]वक्तुं शक्यम्[८], कालद्वयवर्तिनोः द्वयोः सादृश्यानुसन्धातुः ज्ञातुः एकस्य अनभ्युपगमात् ।। २४ ।।

पृथिव्यादिवि[९]ज्ञानार्थानुमेयावादिनं[९] प्रत्याह - स हि ज्ञाने नीलपीतादिविचित्राकारं दृष्ट्वा ज्ञानात् पूर्वक्षणवर्तिनं ज्ञाने स्वाकारं समर्प्य विनष्टमर्थम् अनुमिनोति । तत्रोत्तरम् -

---

१. तुच्छता-ख,ग,घ २. मकुटादिवत्-क,ग ३. प्रत्यभिज्ञानं हि इत्यारभ्य सामग्रीपरिकल्पनम् पर्यन्तं 'ग' पुस्तके नास्ति ४. विशिष्टमेकमेव-ख,घ ५. ग्रहणस्यैव-ख,घ ६. पूर्वा-ख,ग,घ ७. सचिवे-क,ख,घ ८. शक्यते वक्तुम्-ख -वक्तुं शक्यते-ग -न शक्यं वक्तुम्-घ ९. अनुमेयार्थवादि तु ज्ञाने-घ

१९९. नाऽसतोऽदृष्टत्वात् । (२-२-२५)

असतो धर्मिणो धर्मस्य [१]अन्यत्र संक्रमणं[१] न सम्भवति । कुतः ? अदृष्टत्वात् । न हि धर्मिणि विनष्टे तद्धर्मस्य अन्यत्र संक्रमणं क्वचित् दृष्टम् ।। २५ ।।

२००. उदासीनानामपि चैवं सिद्धिः । (२-२-२६)

वैभाषिकसौत्रान्तिकयोर्द्वयोरपि साधारणम् इदं दूषणम् । एवं सर्वभावानां क्षणिकत्वाभ्युपगमे सति, उदासीनानां निष्प्रयत्नानामपि ऐहिकामुष्मिकसर्वार्थसिद्धिः स्यात् । प्रयत्नाद्यनुतिष्ठतः तदानीमेव विनष्टत्वात् । [२]तत्संस्कारा[२]देरपि कस्यचित् स्थिरस्य अनुवर्तमानस्य [३]अनभ्युपगमाच्च[३] । पश्चात् आगता सिद्धिः अहेतुकीति, निष्प्रयत्नानामपि ऐहिकामुष्मिक[४]सर्वार्थसिद्धिः[४] स्यात् ।। २६ ।।

।। इति समुदायाधिकरणम् ।। ३ ।।

४९. उपलब्ध्यधिकरणम् । (२-२-४) (सू.२७-२९)

[अधिकरणार्थः-विज्ञानमात्रास्तित्ववादियोगाचारपक्षप्रतिक्षेपः]

२०१. नाभाव उपलब्धेः । (२-२-२७)

योगाचाराभिमतः ज्ञानमात्रसद्भाववादः किं समीचीनयुक्तिमूलः ? उत न ? इति संशयः ।

समीचीनयुक्तिमूलः - इति पूर्वः [५]पक्षः[५] । बाह्यार्थसद्भाववादिनाऽपि तत्तदर्थाकारज्ञानस्य प्रकाशमानत्वम् [६]अवश्याश्रयणीयम्[६] । सर्वस्य वस्तुनः प्रकाशमानस्य स्वासाधारणेन आकारेण प्रकाशः इष्यते । तत्र घटपटादिज्ञानस्य घटपटाद्याकार एव आकारः । अन्यथा घटाद्यसाधारण्यं च तत्तज्ज्ञानस्य न सम्भवति । एकश्च अयम् आकार उपलभ्यते । स तु ज्ञानस्यैवेति तद्व्यतिरिक्तार्थ[७]सद्भाववादो[७] अनुपपन्नः । तावतैव 'घटोऽयं [८]ज्ञातः[८] इति व्यवहारश्च उपपद्यते । तस्य [९]बहिर्वदवभासः[९], निर्मूलत्वात् विभ्रमकृतः ।

---

१. अभ्युपगमात्-ख,ग,घ २. तत्संस्कार-ख,ग,घ ३. अभ्युपगमात्-ख,ग,घ ४. निष्प्रयत्नामपि-क,ग,घ ५. सर्वार्थसिद्धिः-क,ग ६. पक्षः । कुतः ?-घ ७. अवश्यमाश्रयणीयम्-ख ८. ज्ञायते-क,ख,घ ९. बहिरिवाभासः-क,ख,ग -बहिरवभासः-घ

राद्धान्तस्तु - 'घटमहं जानामि' इति सकर्मकस्य सकर्तृकस्य 'ज्ञा'धात्वर्थस्य छेदनादिवत् सर्वलोकसाक्षिकम् उपलभ्यमानस्य [1]कर्तृकर्म[1]व्यतिरेकेण केवलस्यैव सद्भावम् अनुन्मत्तः को ब्रवीति? स्वासाधारणाकारश्च छेदनादिवत् तत्तदर्थव्यवहार-योग्यताऽऽपादनाकारेण उपलभ्यते । एवं छेदनादेरपि आकारो द्विधाभावनादिहेतुतयैव [2]कर्तृगतस्य[2] उपलभ्यते । न हि अमूर्तानां क्रियादीनां कर्तृकर्मनिरूपणीयस्वाकाराणां कर्माकारत्वम् आश्रीयते ।

सूत्रार्थस्तु - नाभाव उपलब्धेः - ज्ञानव्यतिरिक्तार्थाभावो न शक्यते वक्तुम् उपलब्धेः - 'घटमहं जानामि' इति जानातेः कर्मतया कर्तृतया च उपलब्धेः ।। २७ ।।

२०२. वैधर्म्याच्च न स्वप्नादिवत् । (२-२-२८)

स्वप्नज्ञानादिवच्च जागरितज्ञानानां न मिथ्यार्थत्वम् । तद्वैधर्म्यात् निद्रादिकारण-दोषबाधकप्रत्ययरहितत्वात् इत्यर्थः । चकारात् तान्यपि यथार्थानि इत्यभिप्रायः ।। २८ ।।

२०३. न भावोऽनुपलब्धेः । (२-२-२९)

न केवलस्य अर्थशून्यस्य ज्ञानस्य भावः सम्भवति । क्वचिदपि अनुपलब्धेः । अबाधितप्रतीतिसिद्धस्य असद्भावे सति ज्ञानमात्रस्यापि असद्भावो न [3]शक्यते[3] वारयितुम् इत्यभिप्रायः ।। २९ ।।

।। इति उपलब्ध्यधिकरणम् ।। ४ ।।

५०. सर्वथाऽनुपपत्त्यधिकरणम् । (२-२-५) (सू.३०)

[अधिकरणार्थः-माध्यमिकाभिमतसर्वशून्यवादप्रतिक्षेपः]

२०४. सर्वथाऽनुपपत्तेश्च । (२-२-३०)

माध्यमिकोक्तसर्वशून्यवादः सम्भवति? न? - इति संशयः । सम्भवति - इति पूर्वः [4]पक्षः[4] । विज्ञानं घटपटादयश्च सर्वे भावा न सन्ति । कुतः?

उत्पत्त्यनिरूपणात् घटादिभावानाम् भावात् तावदुत्पत्तिर्न सम्भवति । न हि घटादिः उत्पद्यमानो [5]असम्मृदितेन मृत्पिण्डादिना[5] उत्पद्यते । [6]नाप्यभावात् पश्चात्[6] अभावात्-उत्पद्यमानो घटादिः अभावात्मक एव स्यात् इति-सर्वशून्यत्वमेव युक्तिमत् ।

---

१. कर्मकर्तृ-ग २. कर्तृगतचाकार चोपलभ्यते-ग ३. शक्यः-क,ख,ग,घ ४. पूर्वः पक्षः । कुतः?-घ

५. पिण्डादिके अनुपमृदितेन उत्पद्यते-क,ख,ग,घ ६. पश्चात्-क,ख,ग,घ

राद्धान्तस्तु - लोके भावाभावशब्दयोः तद्बुद्ध्योश्च प्रमाणेन उपलभ्यमानस्यैव वस्तुनः अवस्थाविशेष एव भावरूपो विषयः । वर्तमानतया [१]उपलभ्यमान[१] अवस्थाविशेषो भावबुद्धिविषयः । [२]तद्विरोध्यवस्थाविशेषो[२] [३]अभावबुद्धिविषयः[३] अतो न कुतश्चित् त्वदभिप्रेतं तुच्छत्वं सिध्यति ।

सूत्रार्थस्तु - सर्वथानुपपत्तेश्च - सर्वशून्यवादी सर्वं सत् इति प्रतिज्ञाय स्वाभिप्रेतं साधयति? उत असत् इति प्रतिज्ञाय अथ प्रकारान्तरेण [४]प्रतिज्ञाय? सर्वथाऽपि[४] सर्वशून्यत्वानुपपत्तेः स्वाभिमतासिद्धिः सदसद्भावयोः विद्यमानवस्तुधर्मत्वोपपादनात् ।। ३० ।।

।। इति सर्वथानुपपत्त्यधिकरणम् ।। ५ ।।

५१. एकस्मिन्नसम्भवाधिकरणम् । (२-२-६) (सू.३१-३४)

[अधिकरणार्थः-आर्हताभ्युपगतानेकान्तवादनिरासः]

२०५. नैकस्मिन्नसम्भवात् । (२-२-३१)

जैनमतं युक्तिमत्? उत न? - इति संशयः ।

युक्तिमत् - इति पूर्वः [५]पक्षः[५] । जीवाजीवशब्दाभिलपनीय भोक्तृ-[६]भोग्यात्मकस्य जगतः[६], सत्त्वासत्त्वनित्यत्वानित्यत्वभिन्नत्वाभिन्नत्वैः [७]अनैकान्त्यम्[७]-षड्द्रव्य-तत्पर्यायात्मना अवस्थितत्वात् । कृत्स्नस्य जगतः द्रव्यात्मना सत्त्वैकत्वनित्यत्वानि उपपन्नानि । पर्यायात्मना च विपरीतानि । पर्यायाश्च घटत्वपटत्वाद्यवस्थाविशेषाः । द्रव्यस्वरूपस्य एकत्वात् स्थिरत्वात् सद्बुद्धिबोद्धयत्वात् तेन रूपेणैकत्वादियुक्तम् । पर्यायशब्दाभिधेयावस्थाविशेषाणाम् अनेकत्वात् अस्थिरत्वात् असद्बुद्धिबोध्यत्वात् तेन रूपेण असत्त्वानित्यत्वनानात्वानि युक्तानि । प्रतीतिव्यवस्थाप्यत्वात् सर्वस्य वस्तुनः उभयाकारप्रतीतेः उभयम् उपपन्नम् ।

राद्धान्तस्तु [८]एकस्य[८] अस्तित्वनास्तित्वादिभिः अनैकान्तिकत्वम् अयुक्तम् । एकस्मिन् वस्तुनि अस्तित्वनास्तित्वादेः विरुद्धस्य छायातपवत् युगपत् असम्भवात् । तथा हि । द्रव्यस्य तद्विशेषणभूत[९]पर्यायस्य इत्थं शब्दाभिधेया[९]वस्थाविशेषस्य च 'इदमित्थम्' इति प्रतीतेः प्रकारप्रकारितया पृथक्पदार्थत्वात् न एकस्मिन् विरुद्धप्रकारभूतसत्त्वासत्त्व

१. उपलभ्यमानपृथुबुध्नोदरा-ख,घ २. तद्विरोधिपिण्डाकारकपालाकारा-क,ख,ग,घ ३. प्रागभाव प्रध्वंसाभाव-ख,घ ४. सर्वथाऽपि-क,ख,ग,घ ५. पक्षः । कुतः?-घ ६. भोग्यात्मकं जगत्-तच्च-क,ख,ग,घ ७. अनैकान्तिकं-ख,ग,घ ८. एकस्य द्रव्यस्य-ख,ग,घ ९. पर्यायशब्दाभिधेया-क,ख,ग,घ

[1]रूप[1]धर्मसमावेशः युगपत् सम्भवति । उत्पत्तिविनाशाख्यपरिणामविशेषास्पदत्वं च द्रव्यस्य अनित्यत्वम् । तद्विपरीतं च नित्यत्वम् । [2]तत् एकस्मिन्[2] कथं समवैति? विरोधिधर्माश्रयत्वं च भिन्नत्वं, तद्विपरीतं चाभिन्नत्वं, कथं वा तस्मिन्समवैति? यथाऽश्वत्वमहिषत्वयोः युगपत् एकस्मिन् असम्भवः । [3]एकस्य पृथिवीद्रव्यस्य घटत्वं शरावत्वं च प्रदेशभेदेन । न तु एकेन प्रदेशेन उभयाश्रयत्वम् । यथा एकस्य देवदत्तस्य उत्पत्तिविनाशयोगित्वं कालभेदेन । न हि एतावता वस्तुनो द्व्यात्मकत्वम् । अपि तु परिणामशक्तियोगमात्रम्[3] । अतः न युक्तिमत् जैनमतम् ।

सूत्रार्थस्तु - नैकस्मिन्नसम्भवात् । न जैनमतं युक्तम् । कुतः? एकस्मिन् वस्तुनि उक्तरीत्या युगपत् विरुद्धधर्मसमावेशासम्भवात् । अतः [4]सूत्रविरुद्धं वेदान्तवादिभिरपि[4] भेदाभेदसमाश्रयणम् ।। ३२ ।।

२०६. एवं चाऽत्माकात्स्न्र्यम् । (२-२-३२)

[5]एवं आत्माकात्स्न्र्यं च अनुपपन्नम् । शरीरपरिमाणत्वे हि आत्मनो बृहतः शरीरात् अल्पीयसि शरीरे प्रविशतः अकात्स्न्र्यं अपरिपूर्णत्वं प्रसज्यते । तदानीम् अल्पपरिमाणत्वात्[5] ।। ३२ ।।

२०७. न च पर्यायादप्यविरोधो विकारादिभ्यः । (२-२-३३)

तथाविधाल्पत्वावस्थायोगेनापि अविरोधो न सम्भवति । घटपटादेरिव विकारतत्प्रयुक्तदोषास्पदत्वप्रसङ्गात् ।। ३३ ।।

२०८. अन्त्यावस्थितेश्चोभयनित्यत्वादविशेषः । (२-२-३४)

जीवस्य यदन्त्यं परिमाणं मोक्षावस्थं, तस्य पश्चात् एकरूपेण अवस्थितेः तदेव स्वाभाविकं परिमाणमिति, आत्मनश्च तत्परिमाणस्य च उभयोः नित्यत्वात्, पूर्वमपि न शरीरपरिमाणत्वसिद्धिरिति, पूर्वावस्थायां न विशेषः। अतः असङ्गतमेव इदं जैनमतम् ।। ३४ ।।

।। इति एकस्मिन्नसम्भवाधिकरणम् ।। ६ ।।

---

१. रूप-क,ख,ग २. तस्मिन्-क,ख,ग,घ ३. एकस्य इत्यरभ्य योगमात्रम् पर्यन्तं ग पुस्तके नास्ति ४. सूत्रविरुद्धं-ख -इदंवाक्यं-क,ग पुस्तके नास्ति । ५. एवं इत्यारभ्य अल्पपरिमाणत्वम् पर्यन्तं ग पुस्तके नास्ति ।

५२. पशुपत्त्यधिकरणम् । (२-२-७) (सू.३५-३८)

[अधिकरणार्थः-वेदविरुद्धाभिप्रायकपाशुपतमतनिरासः]

२०९. पत्युरसामञ्जस्यात् । (२-२-३५)

पशुपतिमतं निःश्रेयसार्थिभिः आदरणीयम् ? उत न ? - इति संशयः । आदरणीयम् इति पूर्वः [१]पक्षः[१]; [२]परम[२]पुरुषार्थसाधनावबोधित्वेन निखिलवस्तुसाक्षात्कारसमर्थपशुपति-प्रणीतत्वात् ।

राद्धान्तस्तु - अनादिनिधनाविच्छिन्नपाठसम्प्रदायनिरस्तप्रमादादिनिखिलदोषगन्धवेदसिद्ध-परावरतत्त्वव्यत्ययप्रतिपादनात् निमित्तोपादानभेदाभिधानात् सुराकुम्भस्थापनतत्स्थ[३]देवतार्चन[३] [४]मुद्रिकाषट्कविज्ञानतद्धारणादि[४] वेदविरुद्धाचारप्रतिपाद[५]नपरत्वाच्च[५] असामञ्जस्यात् अनादरणीयम् इति ।

सूत्रार्थस्तु - [६]पत्युरसामञ्जस्यात् । नैकस्मिन्न[६]सम्भवात् इत्यतो न इति अनुवर्तते । पत्युः - पशुपतेः मतं न आदरणीयम् । कुतः ? वेदविरुद्धतत्त्वाचारावबोधित्वेन असामञ्जस्यात् ।। ३५ ।।

२१०. अधिष्ठानानुपपत्तेश्च । (२-२-३६)

अनुमेयेश्वराभ्युपगमेन हि प्रधानस्य अधिष्ठानम् ईश्वरस्य उच्यते । सशरीरस्यैव कुलालादेः [७]अधिष्ठानदर्शनात्[७], अशरीरस्य ईश्वरस्य [८]प्रधानाधि[८]ष्ठानानुपपत्तेश्च असामञ्जस्यम् । सशरीरत्वाभ्युपगमेऽपि तच्छरीरस्य सावयवस्य नित्यत्वे अनित्यत्वे च दोषः पूर्वोक्तः इत्यभिप्रायः ।। ३६ ।।

२११. करणवच्चेन्न भोगादिभ्यः । (२-२-३७)

क्षेत्रज्ञस्य स्वकरणकलेबराद्यधिष्ठानवत् उपपद्यत - इति चेत् न । पुण्या-[९]पुण्यरूप[९]कर्मनिमित्तत्वात् क्षेत्रज्ञाधिष्ठानस्य ईश्वरस्यापि तद्वत्तया तत्फलभोगादि-निखिलतत्स्वभावप्रसक्तेः ।। ३७ ।।

---

१. पक्षः । कुतः ?-घ २. सकल-क,ख,ग,घ ३. पूजा-क,ख,ग,घ ४. तद्धारणादि-क,ख,ग,घ
५. प्रतिपादनाच्च-ख,घ -प्रतिपादनात्-क,ग ६. नैकस्मिन्न-ख,ग ७.उपादानाद्यभिज्ञस्य अधिष्ठानसामर्थ्यदर्शनात्-ख,घ ८. प्रधानाद्यधि-क,ख,घ ९. पुण्य-ग

२१२. अन्तवत्त्वमसर्वज्ञता वा । (२-२-३८)

'वा' शब्दश्चार्थे । तथा पुण्यापुण्यवत्वे तु अन्तवत्त्वं - सृष्टिसंहारास्पदत्वम्, असर्वज्ञता च प्रसज्यत इति असमञ्जसमेव इदम् ।। ३८ ।।

।। इति पशुपत्यधिकरणम् ।। ७ ।।

५३. उत्पत्त्यसम्भवाधिकरणम् । (२-२-८) (सू.३९-४२)

[अधिकरणार्थः-जीवोत्पत्तिवादतात्पर्यवर्णनेन पाञ्चरात्राप्रामाण्यनिरसनम्]

२१३. उत्पत्त्यसम्भवात् । (२-२-३९)

[१]सांख्यादितन्त्रवत्[१] पाञ्चरात्रतन्त्रमपि अप्रमाणम्? उत न? - इति संशयः । अप्रमाणम् - इति पूर्वः [२]पक्षः[२]; 'वासुदेवात्सङ्कर्षणो नाम जीवो जायते' (पञ्चरात्रे) इति श्रुतिविरुद्धजीवोत्पत्त्यादिप्रतिपादनात् 'चतुर्षु वेदेषु पुरुषार्थमलभमानः' (पाञ्चरात्रे) इति [३]वेदगणानादरवचनाच्च[३] ।

राद्धान्तस्तु - सङ्कर्षणप्रद्युम्नानिरुद्धानां परब्रह्मभावानाम् 'अजायमानो बहुधा विजायते' (तै.आर.३-१३-३) [४]इति[४] श्रुतिप्रसिद्धस्वेच्छावतारप्रतिपादनात् न क्वचित् श्रुतिविरोधः । जीवाहङ्कारमनश्शब्दश्च तत्तच्छरीरकाणां सङ्कर्षणादीनामेव अभिधायकाः; 'तत्तेज ऐक्षत' (छां.उ.६-२-३) इति तेजःप्रभृतिशब्दवत् । 'चतुर्षु वेदेषु पुरुषार्थमलभमानः' (पाञ्चरात्रे) इति च अनुदितहोम[५]निन्दावत् । यथा[५] 'ऋग्वेदं भगवोऽध्येमि' (छां.उ.७-१-२) इत्यारभ्य 'इतिहासपुराणं पञ्चमम्' (छां.उ.७-१-२) इत्यादिना सर्वेषु विद्यास्थानेषु च [६]आत्मनो वेदना[६]भाववचनं वक्ष्यमाणप्रशंसार्थम् । तन्त्रेऽस्मिन् वेदान्तोदितब्रह्मोपासनविधानात्, वेदाविरुद्धतदर्चनादिविधानाच्च अवगम्यत इति प्रमाणमेव ।

सूत्रार्थस्तु - उत्पत्त्यसम्भवात् 'न जायते म्रियते वा' । (कठ.उ.१-२-१८) इत्यादि श्रुतेः जीवस्य उत्पत्त्यसम्भवात् जीवोत्पत्तिवचनाच्च न प्रमाणम् ।। ३९ ।।

२१४ न च कर्तुः करणम् । (२-२-४०)

'सङ्कर्षणात्प्रद्युम्नसंज्ञं मन उत्पद्यते' (पाञ्चरात्रे) इति मनसः करणस्य, कर्तुर्जीवात् उत्पत्तिश्च श्रुतिविरुद्धत्वात् न सम्भवति।

१. सांख्यादिवत्-क,ख,ग,घ २. पक्षः । कुतः?-घ ३. वेदानादरवचनाच्च-क,ख,ग,घ ४. इत्यादि-क,ख,घ ५. निन्दावत्-क,ख,ग ६. आत्मवेदना-क,ख,ग,घ

'एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च' (मुं.उ.२-१-३) इति मनसः, ब्रह्मण उत्पत्तिः श्रूयते ।। ४० ।।

२१५ विज्ञानादिभावे वा तदप्रतिषेधः । (२-२-४१)

'वा' शब्दात् पक्षो विपरिवर्तते । विज्ञानं च आदि च विज्ञानादि, ब्रह्म । सङ्कर्षणादीनां ब्रह्मभावे सति, 'अजायमानो बहुधा विजायते' (पु.सू.) इति श्रुतिप्रसिद्धस्वेच्छावतारस्यैव अत्राभिधानात् तदप्रतिषेधः-प्रामाण्याप्रतिषेधः । सङ्कर्षणादीनां जीवादि [1]समानाधिकरणतया[1] निर्देशः तेषाम् अधिष्ठातृतया उपपद्यते ।। ४१ ।।

२१६. विप्रतिषेधाच्च । (२-२-४२)

अस्मिन्नपि तन्त्रे जीवोत्पत्तिविप्रतिषेधाच्च अविरुद्धमिदं तन्त्रम् । 'व्याप्तिरूपेण सम्बन्धस्तस्याश्च पुरुषस्य च । स ह्यनादिरनन्तश्च परमार्थेन निश्चितः ।। (पाञ्चरात्रे) इति हि पुरुषस्योत्पत्तिः प्रतिषिध्यते ।। ४२ ।।

।। इति उत्पत्त्यसम्भवाधिकरणम् ।। ८ ।।

।। इति श्रीभगवद्रामानुजविरचिते वेदान्तदीपे द्वितीयाध्यायस्य द्वितीयः पादः ।।

तृतीयः पादः - वियत्पादः (अधि.७, सू.५२)

५४ वियदधिकरणम् । (२-३-१) (सू.१-९)

[अधिकरणार्थः-आकाशस्य ब्रह्मकार्यत्वचिन्ता]

२१७. न वियदश्रुतेः । (२-३-१)

वियत् उत्पद्यते न ? - इति संशयः । न उत्पद्यते - इति पूर्वः [2]पक्षः[2] । निरवयवस्य सर्वगतस्य आत्मन इव उत्पत्त्यसम्भवात् । असम्भावनीयस्य श्रवणं च न सम्भवति । अतः उत्पत्तिश्रुतिः गौणी - इति ।

राद्धान्तस्तु - वियत् उत्पद्यत एव; उत्पत्तिश्रुतेः । अतीन्द्रियार्थविषयया श्रुत्या अभिहिते अर्थे निरवयवत्वादिहेतुकं नाऽनुत्पत्त्यनुमानम् उदेतुमलम् । आत्मनोऽपि अनुत्पत्तिश्रुतेरेव नित्यत्वम्; न निरवयवत्वादिना ।

---

१. सामानाधिकरण्य-ग -समानाधिकरण-क,ख,घ २. पक्षः । कुतः ?-घ

सूत्रार्थस्तु - न वियदश्रुतेः वियत् न उत्पद्यते । कुतः ? अश्रुतेः [1]अश्रवणात्[1] । असम्भावनीयस्य श्रवणासम्भवात् ।। १ ।।

२१८ अस्ति तु । (२-३-२)

अस्ति तु [2]वियतः उत्पत्तिः[2] । 'आत्मन आकाशः सम्भूतः' (तै.उ.आन.१-२) इति श्रुतेः । अतीन्द्रियार्थविषयया श्रुत्या प्रमाणान्तराप्रतिपन्नवियदुत्पत्तिप्रतिपादनं सम्भवत्येव । न 'अग्निना सिञ्चेत्' इतिवत् अयोग्यम् इत्यर्थः ।। २ ।।

२१९ गौण्यसम्भवाच्छब्दाच्च । (२-३-३)

'तत्तेजोऽसृजत' (छां.उ.६-२-३) इति प्रतिपन्नतेजःप्राथम्यविरोधात् मध्ये वियदुत्पत्तिः न सम्भवतीति उत्पत्तिश्रुतिः गौणी ।

'वायुश्चान्तरिक्षं चैतदमृतम्' (बृ.उ.४.३.३) इति अमृतत्वश्रवणाच्च ।। ३ ।।

२२० स्याच्चैकस्य ब्रह्मशब्दवत् । (२-३-४)

'आकाशः सम्भूतः आकाशाद्वायुः, वायोरग्निः' (तै.आन.२-१-२) इत्यादिषु सर्वत्रानुषक्तस्य एकस्य 'सम्भूत' शब्दस्य आकाशे गौणत्वं, वाय्वादिषु मुख्यत्वं च सम्भवति । ब्रह्मशब्दवत्-यथा एकस्य ब्रह्मशब्दस्य एकप्रकरणे श्रूयमाणस्य 'तस्मादेतद्ब्रह्म नामरूपमन्नं च जायते' (मुं.उ.१-१-१०) इति प्रधाने गौणत्वं, 'तपसा चीयते ब्रह्म' (मुं.उ.१-१-९) इति ब्रह्मणि मुख्यत्वं च । श्रवणावृत्ताविव अनुषङ्गेऽपि अभिधानावृत्तेः अनुषङ्गोऽपि तत्तुल्य इत्यभिप्रायः ।। ४ ।।

परिहरति -

२२१. प्रतिज्ञाऽहानिरव्यतिरेकात् । (२-३-५)

'येनाश्रुतं श्रुतम्' (छां.उ.६-१-३) इति ब्रह्मविज्ञानेन आकाशादिसर्वविज्ञानप्रतिज्ञाया अहानिः, आकाशस्यापि ब्रह्मण उत्पत्त्या, तदव्यतिरेकादेव भवति ।। ५ ।।

---

१. श्रुतिः-श्रवणम्-क,ख,ग,घ २. वियदुत्पत्तिः-क,ग

२२२. शब्देभ्यः । (२-३-६)

इतश्च - 'सदेव सोम्येदमग्र आसीत्' (छां.उ.६-२-१) 'ऐतदात्म्यमिदम् सर्वम्' (छां.उ.६-८-७) इत्यादिभ्यो ब्रह्मणः प्राक् सृष्टेः एकत्वावधारणसर्वात्मकत्ववादिभ्यः शब्देभ्यश्च वियदुत्पत्तिः प्रतीयते । 'तत्तेजोऽसृजत' (छां.उ.६-२-३) इत्येतस्मिन् वाक्ये आकाशोत्पत्त्यवचनात् प्रतीयमानं तेजःप्राथम्यं समानप्रकरणस्थैः प्रकरणान्तरस्थैश्च शब्दैः प्रतीयमानं [1]वियद्[1]उत्पत्तिं न निवारयति इत्यभिप्रायः ।। ६ ।।

२२३ यावद्विकारं तु विभागो लोकवत् । (२-३-७)

यद्यपि - छान्दोग्ये, 'तत्तेजोऽसृजत' (छां.उ.६-२-३) इतिवत्, आकाशोत्पत्तिः स्वरूपेण न अभिधीयते; तथापि तस्मिन्नेव 'ऐतदात्म्यमिदं सर्वं' (छां.उ.६-८-७) इत्यादिना आकाशादेः सर्वस्य वस्तुनो ब्रह्मविकारत्ववचनात्, यावद्विकारं विभागः उत्पत्तिः उक्तैवेति गम्यते । लोकवत्, यथा लोके 'सर्व एते देवदत्तपुत्रा' इत्यभिधाय, [2]तेषां[2] केषांचिद्देवदत्तात् उत्पत्तिवचनं, सर्वेषां तत [3]उत्पत्तिप्रतिपादनार्थम्[3] इति गम्यते । आकाशस्य अमृतत्ववचनं, सुरादिवत् चिरकालस्थायित्वविषयम् इत्यभिप्रायः ।। ७ ।।

२२४.एतेन मातरिश्वा व्याख्यातः । (२-३-८)

अनेनैव न्यायेन मातरिश्वनोऽपि उत्पत्तिः उक्ता । न अयं न्यायातिदेशः अधिकाशङ्काभावात् । 'तेजोऽतस्तथा ह्याह' (ब्र.सू.२-३-१०) इति वायोः तेजस उत्पत्तिं वक्तुं पृथगुपादानम् ।। ८ ।।

२२५. असम्भवस्तु सतोऽनुपपत्तेः । (२-३-९)

'तु' शब्द अवधारणार्थः । सतः परमकारणस्य परस्यैव ब्रह्मण असम्भवः उत्पत्त्यसम्भवः । तद्व्यतिरिक्तस्य कृत्स्नस्यैव एकविज्ञानेन सर्वविज्ञानप्रतिज्ञाद्यनुपपत्तेः, सम्भव उक्तः इत्यभिप्रायः ।। ९ ।।

।। इति वियदधिकरणम् ।। १ ।।

---

१. आकाशो-क,ख,ग,घ   २. तेषु-क,ख,ग,घ   ३. उत्पत्तिप्रदर्शनार्थम्-क,ख,ग,घ

५५. तेजोऽधिकरणम् । (२-३-२) (सू.१०-१७)

[अधिकरणार्थः-तेज आदिशरीरकात् ब्रह्म एव अबादिसृष्टिः; न केवलात् तेज आदेः]

२२६. तेजोऽतस्तथा ह्याह । (२-३-१०)

'आकाशाद्वायुः' इत्यादिव्यवहितकार्याणि, किं स्वानन्तरात् आकाशादेः केवलात् उत्पद्यन्ते उत तच्छरीरात् परस्मात् ब्रह्मणः इति संशयः ।

स्वानन्तरादेव - इति पूर्वः [१]पक्षः[१] । 'आकाशाद्वायुः, वायोरग्निः' (तै.आन.१-२) इति तस्मात् केवलादेव उत्पत्तिश्रवणात्, 'एतस्माज्जायते प्राणः' (मुं.उ.२-१-३) इति परस्माद्ब्रह्मणः सर्वस्य उत्पत्तिवादः परम्परयाऽपि उपपद्यते ।

राद्धान्तस्तु - 'तत्तेज ऐक्षत बहु स्यां प्रजायेयेति, ता आप ऐक्षन्त' (छां.उ.६-२-३,४) इति बहुभवनसङ्कल्पपूर्वकसृष्ट्युपदेशात् केवलस्य 'तु एतादृशसङ्कल्पानुपपत्तेः 'यस्तेजसि तिष्ठन्, यस्य तेजः शरीरम्, यस्याकाशः शरीरम्' (बृ.उ.५-७-१४) इति सर्वेषां परब्रह्म-शरीरत्वश्रवणाच्च तत्तच्छब्दवाच्यात् परस्मात् ब्रह्मण एव साक्षात् तेजःप्रभृतीनामपि सृष्टिः ।

सूत्रार्थस्तु-तेजोऽतस्तथा ह्याह, अतः वायोरेव केवलात् उत्पद्यते, तेजः - तथाहि आह-श्रुतिः 'वायोरग्निः' (तै.आन.१-२) इति ।। २० ।।

२२७ आपः । (२-३-११)

'अतः तथा हि आह' इति अनुवर्तते । अतः तेजस एव केवलात् आपः उत्पद्यन्ते । 'अग्नेरापः' (तै.आन.१-२१) 'तदपोऽसृजत' (छां.उ.६-२-३) इति हि आह ।। १ ।।

२२८. पृथिवी । (२-३-१२)

एवं पृथिवी अद्भ्यः उत्पद्यते । 'अद्भ्यः पृथिवी' (तै.उ.आन.१-२) 'ता अन्नमसृजन्त' (छां.उ.६-२-४) [२]इति हि आह[२] ।। १२ ।।

अन्नशब्देन कथं पृथिवी अभिधीयत [३]इत्यत्राह[३] -

२२९. अधिकाररूपशब्दान्तरेभ्यः । (२-३-१३)

अन्नशब्देन पृथिवी उच्यते । महाभूतसृष्ट्यधिकारात् पश्चादपि महाभूतरूपसंकीर्तने 'यत्कृष्णं तदन्नस्य' (छां.उ.६-४-१) इति रूपकीर्तनात् । समानप्रकरणे 'अद्भ्यः पृथिवी' (तै.आन.१-२) इति पृथिवीशब्दस्य श्रवणाच्च ।। १३ ।।

---

१. पक्षः । कुतः ?-घ   २. अतस्तथा ह्याहेति वर्तते-ख,घ   ३. इत्याह-क,ख,ग,घ

२३०. तदभिध्यानादेव तु तल्लिङ्गात्सः । (२-३-१४)

'तु' शब्दः पक्षव्यावृत्त्यर्थः । न तेजःप्रभृतयः केवलाः [१]स्वानन्तराणां[१] कारणानि । अपि तु तत्तच्छरीरः सः [२]परमात्मैव[२] तेषां कारणम्; कुतः? परमात्मसृष्टिलिङ्गात् तथाविधाभिध्यानात् । यथैव हि - 'तदैक्षत बहु स्यां प्रजायेयेति तत्तेजोऽसृजत' (छां.उ.६-२-३) इति, तथैव 'तत्तेज ऐक्षत बहु स्यां प्रजायेय' (छां.उ.६-२-३) इति बहुभवनसङ्कल्परूपाभिध्यानं दृश्यते । ईदृशमभिध्यानं परमात्मन एव हि सम्भवति ।। १४ ।।

२३१. विपर्ययेण तु क्रमोऽत उपपद्यते च । (२-३-१५)

'आकाशाद्वायुः, वायोरग्निः' (तै.आन.१-२) इति पारम्पर्यक्रमात् विपर्ययेण 'एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च; खं वायुर्ज्योतिरापः पृथिवी' (मुं.उ.२-१-३) इति सर्वेषां ब्रह्मानन्तर्यरूपो यः क्रमः, स च अत एव तत्तच्छरीरात् ब्रह्मणः सृष्टेः उपपद्यते ।। १५ ।।

२३२. अन्तरा विज्ञानमनसी क्रमेण तल्लिङ्गादिति चेन्नाऽविशेषात् । (२-३-१६)

[३]विज्ञानसाधनत्वात्[३] इन्द्रियाणि प्राणश्च विज्ञानम् इत्युच्यन्ते । 'एतस्माज्जायते प्राणः' (मुं.उ.२-१-३) इत्येतद्वाक्यम् । आकाशतन्मात्रपञ्चकयोः अन्तराले [४]विज्ञानमनसी[४] क्रमेण उत्पद्येते इत्येतत्परम् । विज्ञानमनसी इति प्राणस्यापि प्रदर्शनार्थम् । 'पृथिव्यप्सु प्रलीयते' (सुबा.उ.२) इत्यारभ्य, 'वायुराकाशे प्रलीयते, आकाशम् इन्द्रियेषु, इन्द्रियाणि तन्मात्रेषु, तन्मात्राणि भूतादौ' (सुबा.उ.२) इति प्रलयक्रमप्रत्यभिज्ञानात् तल्लिङ्गात् अतो न श्रुत्यन्तरा[५]विरुद्धत्वात्[५] साक्षात् ब्रह्मणः सर्वेषां सृष्टिपरमिदं वाक्यम् । अपि तु [६]श्रुत्यन्तरसिद्ध[६]पारम्पर्यक्रमपरम् इतिचेत् परिहरति, [७]नाविशेषात्[७] - भूततन्मात्रान्तराले विज्ञान-मनसोः उत्पत्तावपि तत्तच्छरीरकब्रह्माभिधायित्वात् भूतेन्द्रियमनःप्राणशब्दानां सर्वेषां साक्षादुत्पत्त्यविशेषात् तत् परमेवेदं वाक्यम् ।। १६ ।।

लोके तत्तद्वस्तुवाचितया प्रसिद्धस्य शब्दजातस्य ब्रह्मणि वृत्तिः अमुख्य इत्याशङ्क्याह -

---

१. स्वानन्तराणां-क,ख,ग,घ २. परमात्मैव कुतः?-घ ३. विज्ञानसाधनत्वेन-क,ख,ग,घ ४. इन्द्रियप्राणमनांसि क्रमेणोत्पद्यते इत्येतत् परं इत्यधिकः पाठः-ख,घ ५. विरुद्धं-क,ख,ग,घ ६. श्रुत्यन्तराविरुद्धं-क,ग ७. तन्न अविशेषात्-ख,घ

२३३. चराचरव्यपाश्रयस्तु स्यात् तद्व्यपदेशोऽभाक्तः तद्भावभावित्वात् (२-३-१७)

[१]तुशब्दः शङ्कानिवृत्त्यर्थः । स्थावरजङ्गमवस्तुव्यपाश्रयः तद्व्यपदेशः तद्वाचिशब्दः ब्रह्मणि अभाक्तः मुख्य एव । कुतः[१]? । तद्भावभावित्वात्-तेजः प्रभृतिषु आत्मतया ब्रह्मभावभावित्वेन सर्वस्य वस्तुनः तच्छरीरतया तत्प्रकारत्वात् [२]तत्तद्वाचिनां[२] शब्दानां तत्रैव पर्यवसानात् । प्रकारवाचिनां हि शब्दानां प्रकारि पर्यवसायित्वेन अभाक्तत्वं गवादिशब्देषु सिद्धम् ।। १७ ।।

।। इति तेजोऽधिकरणम् ।। २ ।।

५६. आत्माधिकरणम् । (२-३-३)

[अधिकरणार्थः-जीवानाम् उत्पत्तिविनाशराहित्येन नित्यता]

२३४. नाऽऽत्मा श्रुतेर्नित्यत्वाच्च ताभ्यः । (२-३-१८)

किम् आत्मा उत्पद्यते ? न वा ? इति - संशयः । उत्पद्यते - इति पूर्वः; [३]पक्षः[३] एकविज्ञानेन सर्वविज्ञानप्रतिज्ञादेः । 'तोयेन जीवान्व्यससर्ज भूम्याम्' । (महा.ना.१-१) 'प्रजापतिः प्रजा असृजत' (तै.सं.२-२-१) इत्यादिसृष्टिवचनाच्च [४]नित्यत्वादिश्रुतिः[४] आकाशाद्यमृतत्ववचनवत् नेया ।

राद्धान्तस्तु - नात्मा उत्पद्यते; अनुत्पत्तिश्रुतेः 'न जायते म्रियते वा विपश्चित्' (कठ.उ.२-१८) इति जीवोत्पत्तिः निषिध्यते । 'अजो नित्यः' (क.उ.२-१८) 'नित्यो नित्यानाम्' (श्वे.उ.६-१३) इत्यादिश्रुतिभ्यो नित्यत्वावगमात् । जीवोत्पत्ति-पक्षेऽकृताभ्यागमकृतविप्रणाशादिप्रसङ्गात् वैषम्यनैर्घृण्यप्रसङ्गाच्च । जीवस्य सृष्टिवचनं भोक्तृत्वानुगुणज्ञानविकासाभिप्रायम् । प्राक् सृष्टेः एकत्वावधारणात् [५]अविभागवचनं[५] नामरूपविभागाभावाभिप्रायम् । उपपद्यत एव । सूत्रमपि व्याख्यातम् ।। १८ ।।

।। इति आत्माधिकरणम् ।। ३ ।।

---

१. इति ब्रह्मात्मकस्यैव तेजः प्रभृतेः रूपवत्त्वं नाम भाक्त्वं च इत्यधिकः पाठः-क,ख -अतः सर्वे वाचकाः शब्दाः ब्रह्मपर्यन्तस्यैव वाचकाः इति ब्रह्मणि मुख्या एव इत्यधिकः पाठः-ख २. तद्वाचिनां-क,ग ३. पक्षः । कुतः ?-घ ४. नित्यताश्रुतिः-ख ५. अविभाग-क,ख,घ

५७. ज्ञाधिकरणम् । (२-३-४) (सू.१९-३२)

[अधिकरणार्थः-ज्ञानाश्रयत्वस्य जीवस्वरूपतानिरूपणम्]

२३५ ज्ञोऽत एव । (२-३-१९)

किं जीवः चैतन्यमात्रवपुः ? उत जडस्वरूप एव आगन्तुकचैतन्यगुणः ? अथ ज्ञातृत्वैकस्वरूपः ? - इति संशयः । चैतन्यमात्रवपुः- इति प्रथमः [1]पक्षः[1]; 'विज्ञानं यज्ञं तनुते' (तै.आन.५-१) 'यो विज्ञाने तिष्ठन्' (बृ.उ.५-७-२२) 'ज्ञानस्वरूपमत्यन्तनिर्मलम्' (वि.पु.१-२-३) इत्यादिश्रुतिस्मृतिभ्यः ।

द्वितीयस्तु - सुषुप्तिमूर्छादिषु सतोऽपि आत्मनः चैतन्यानुपलब्धेः जाग्रतोऽपि इन्द्रियव्यापारान्वयव्यतिरेकानुविधायित्वात्, चैतन्यस्य 'न प्रेत्य संज्ञाऽस्ति' (बृ.उ.४-४-१२) इति मुक्तस्य चैतन्यप्रतिषेधाच्च ।

पाषाणकल्प एव आगन्तुकचैतन्यगुणः । सर्वत्र कार्योपलब्धेः, सर्वत्र सन्निधानात् शरीरगमनेनैव कार्यसम्भवे गतिकल्पनायोगात् सर्वगतश्च इति ।

राद्धान्तस्तु - 'अथ यो वेदेदं जिघ्राणीति स आत्मा, मनसैतान्कामान्पश्यन् रमते' (छां.उ.८-१२-४) 'न पश्यो मृत्युं पश्यति' (छां.उ.७-२६-२) 'सर्वं ह पश्यः पश्यति' (छां.उ.७-२६-२) 'द्रष्टा श्रोता घ्राता रसयिता' (प्रश्न.उ.४-९) इत्यादिश्रुतिभ्यो बद्धमुक्तोभयावस्थः ज्ञातैव आत्मा । ज्ञानमात्रव्यपदेशस्तु ज्ञानस्य प्रधानगुणत्वात्, स्वरूपानुबन्धित्वेन स्वरूपनिरूपकगुणत्वात् [2]आत्मस्वरूपस्य ज्ञानवत्[2] स्वप्रकाशत्वाद्वा उपपद्यते । सुषुप्तिमूर्छादौ सदेव ज्ञानं कर्मणा सङ्कुचितम् अनभिव्यक्तमपि [3]जागरादौ[3] विकसितम् अभिव्यज्यत इति न विरोधः । 'न प्रेत्य संज्ञाऽस्ति' (बृ.उ.४-४-१२) इति सांसारिक[4]देहा[4]द्यस्मरणविषयम् । 'नोपजनं स्मरन्निदं शरीरम्' (छां.उ.८-१२-३) इत्यादिनैकार्थ्यात् । सर्वगतत्वम् तु अणुत्वगत्यादि श्रुतिविरुद्धम् ।

सूत्रार्थस्तु - ज्ञोऽत एव । अतः श्रुतेः ज्ञातैव ।। १९ ।।

२३६. उत्क्रान्तिगत्यागतीनाम् । (२-३-२०)

श्रुतेः इति वर्तते । 'तेन प्रद्योतेनैष आत्मा निष्क्रामति' । (बृ.उ.६-४-२) 'ये वै के चास्माल्लोकात्प्रयन्ति; चन्द्रमसमेव ते सर्वे गच्छन्ति' (कौषी.उ.१-९)

१. पक्षः । कुतः?-घ २. ज्ञानवत्-क,ख,घ ३. जागर्यादौ-क,ख,घ ४. भेदा-क -हेया-ग

'तस्माल्लोकात्पुनरेत्यस्मै लोकाय कर्मणे' (बृ.उ.६-४-६) इत्याद्युत्क्रान्तिगत्यागतीनां [1]श्रवणात्[1] अणुर्जीवः ।। २० ।।

२३७. स्वात्मना चोत्तरयोः । (२-३-२१)

चशब्दः अवधारणार्थः । यद्यपि उत्क्रान्तौ स्थितस्य शरीरविश्लेषणं कथंचित् सम्पाद्यत्वमस्ति । उत्तरयोः गमनागमनयोस्तु स्वात्मनैव सम्पाद्यत्वम् अवश्याभ्युपेयम् ।। २१ ।।

२३८. नाणुरतच्छ्रुतेरिति चेन्नेतराधिकारात् । (२-३-२२)

'योऽयं विज्ञानमयः' (बृ.उ.६-३-७) इति जीवं प्रस्तुत्य, 'स वा एष महानज आत्मा' (बृ.उ.६-४-२५) इति महत्वश्रुतेः, न अणुः जीव इति चेत् - न । इतराधिकारात् - जीवेतरपरमात्माधिकारात् । 'यस्यानुवित्तः प्रतिबुद्धः आत्मा' (बृ.उ.६-४-१३) इति हि मध्ये परमात्मा प्रस्तुतः ।। २२ ।।

२३९. स्वशब्दोन्मानाभ्यां च । (२-३-२३)

'एषोऽणुरात्मा चेतसा वेदितव्यः यस्मिन्प्राणः पञ्चधा संविवेश' (मुं.उ.३-१-९) इति साक्षात् अणुशब्दात् अणुरेवायम् उन्मानाच्च अणुरेव । उन्मानम् 'उद्धृत्य' मानम् । 'आराग्रमात्रो ह्यवरोऽपि दृष्टः' (श्वे.उ.५-८) इति आराग्रम् उद्धृत्य तन्मानत्वं हि जीवस्य श्रूयते ।

आत्मनः अणुपरिमाणत्वे सकलदेहव्यापि[2]वेदनाद्यनुभवः[2] कथम् ? इत्यत्र मतान्तरेण परिहारमाह -

२४०. अविरोधश्चन्दनवत् । (२-३-२४)

यथा [3]हरिचन्दनबिन्दुः[3] देहैकदेशवर्त्यपि सकलदेहवर्तिनम् आह्लादं जनयति, तद्वत् अविरोधः ।। २४ ।।

---

१. श्रुतेः-क,ख,ग,घ २. वेदनानुभवः-क,ग ३. चन्दनबिन्दोः देहदेशविशेषः स्थित्यपेक्षया यथा- इत्यधिकः पाठः-ग

२४१. अवस्थितिवैशेष्यादिति चेन्नाऽभ्युपगमाद्धृदि हि । (२-३-२५)

चन्दनबिन्दोः देहदेशविशेषस्थित्यपेक्षः तथाभावः, आत्मनः तु न तथा इति चेत् - [१]न[१]; आत्मनोऽपि तथाभावाभ्युपगमात् । हृदि हि अयमात्मा स्थित इति श्रूयते। 'योऽयं विज्ञानमयः प्राणेषु हृद्यन्तर्ज्योतिः' (मुं.उ.३-१-९) इत्यादौ ।। २५ ।।

२४२. गुणाद्वाऽऽलोकवत् (२-३-२६)

स्वमतेनाह - 'वा'शब्दो मतान्तरव्यावृत्त्यर्थः । आत्मा स्वगुणेन ज्ञानेन सकलदेहं व्याप्य अवस्थितः । यथा [२]द्युमणि-मणि[२]प्रभृतीनाम् एकदेशवर्तिनाम् आलोकः तद्गुणः अनेकदेशव्यापी दृश्यते ।। २६ ।।

'विज्ञानं यज्ञं तनुते' (तै.आन.५-१) इत्यादौ ज्ञानमेवात्मा इति व्यपदिश्यते- [३]इति चेत्, तत्परिहर्तव्यं[३], तत्राह -

२४३. व्यतिरेको गन्धवत्तया न दर्शयति (२-३-२७)

'जानामि' इत्यात्मगुणत्वेन प्रतीतेः व्यतिरेकः अभ्युपगमनीयः । यथा 'गन्धवती पृथिवी' इत्युपलब्धौ गन्धः तद्गुणः तद्व्यतिरिक्तः । दर्शयति च श्रुतिः - 'जानात्येवायं पुरुषः' इति ।। २७ ।।

२४४. पृथगुपदेशात् । (२-३-२८)

न केवलं 'जानामि' इति पृथगुपलब्धिमात्रम् । आत्मनः पृथक्त्वेनोपदिश्यते च ज्ञानम्; 'न हि विज्ञातुर्विज्ञातेर्विपरिलोपो विद्यते' (बृ.उ.६-३-३०) इति ।। २८ ।।

विज्ञानम् आत्मा इति व्यपदेशः कथमुपपद्यते इत्यत्राह -

२४५. तद्गुणसारत्वात्तु तद्व्यपदेशः प्राज्ञवत् । (२-३-२९)

ज्ञानगुणसारत्वात् आत्मनो ज्ञानम् इति व्यपदेशः । यथा प्राज्ञः 'ब्रह्मणा विपश्चिता' (तै.उ.आन.१-२) 'यः सर्वज्ञः सर्ववित्' (मुं.उ.१-१-१०) इति सर्वज्ञ एव ज्ञानगुणसारत्वात् 'सत्यं ज्ञानम्' (तै.आन.१-१) इति व्यपदिश्यते ।। २९ ।।

---

१. तन्न-घ २. मणिद्युमणि-क,ख,घ ३. तत्परिहर्तव्यम्-क,ख,ग,घ

२४६. यावदात्मभावित्वाच्च न दोषस्तद्दर्शनात् । (२-३-३०)

ज्ञानस्य यावदात्मस्वरूपभावित्वाच्च तेन [1]तद्व्यपदेशः[1] न दोषः; खण्डादिषु तथा दर्शनात् । खण्डादिषु हि यावत्स्वरूपभाविधर्मत्वेऽपि हि गोत्वस्य, गौः इति व्यपदेशो दृश्यते । [2]चकारात् आत्मनः[2] स्वप्रकाशत्वेन ज्ञानम् इति व्यपदेशः न दोष इत्युच्यते ।। ३० ।।

सुषुप्त्यादिषु ज्ञानस्य अनुपलब्धेः न यावदात्मभावित्वम् इत्याशङ्क्याह -

२४७. पुंस्त्वादिवत्त्वस्य सतोऽभिव्यक्तियोगात् । (२-३-३१)

तुशब्दः शङ्कानिवृत्यर्थः । सुषुप्त्यादिष्वपि सतो ज्ञानस्य अनभिव्यक्तस्य जागर्यादिषु अभिव्यक्तिसम्भवात् यावदात्मभाव्येव ज्ञानम् । पुंस्त्वादिवत् । पुंस्त्वम् इति [3]पुरुषासाधारण[3] धातुरुच्यते । यथा सप्तधातुमयत्वेन शरीरस्य [4]पुंस्त्वस्य बाल्येऽपि[4] सतः अनभिव्यक्तस्य सप्तमधातोः युवत्वे अभिव्यक्तिः ।। ३१ ।।

एवमात्मनो ज्ञातृत्वमणुत्वं चोक्त्वा पक्षान्तरे दोषमाह -

२४८. नित्योपलब्ध्यनुपलब्धिप्रसङ्गोऽन्यतरनियमो वाऽन्यथा । (२-३-३२)

अन्यथा [5]ज्ञानात्मवादे[5] सर्वगतात्मवादे च उपलब्ध्यनुपलब्धी नित्यवत्, प्रसज्येयाताम्; उपलब्ध्यनुपलब्ध्योः अन्यतरनियमो वा । ज्ञानात्मपक्षे तावत् ज्ञानस्य प्रकाशस्वभावत्वात् प्रकाशपर्यायोपलब्धेः नित्यवत्प्रसक्तिः अनिवार्या । ज्ञाने विद्यमाने सति हेत्वन्तरेण अनुपलब्धिजननायोगान् ज्ञानमेव अनुपलब्धेरपि हेतुः इत्यास्थेयम् । ज्ञानस्य सर्वदा वर्तमानत्वात् सर्वदा उभयप्रसक्तिः ।

अथ युगपत् विरुद्धकार्यजननायोगात् ज्ञानम् उपलब्ध्यनुपलब्ध्योः अन्यतरहेतुः आस्थीयते; तदाऽन्यतरनियमः स्यात् । सर्वगतत्वपक्षे, यथा ज्ञानात्मवादिनां तथैव हेतुजन्यज्ञानवादिनोऽपि सर्वेषामात्मनां [6]सर्वगतत्वे[6], सर्वस्य आत्ममनस्संयोगादेः हेतोः सर्वेषाम्, साधारणत्वात् उक्तरीत्या तथैव प्रसक्तिः । अदृष्टोत्पत्तिहेतोरपि [7]सर्वस्य[7] साधारणत्वात्, अदृष्टेनापि न व्यवस्था ।। ३२ ।।

।। इति ज्ञाधिकरणम् ।। ४ ।।

---

१. तद्व्यपदेशे-क,घ २. ज्ञानवत्-ख,घ ३. पुंस्त्वासाधारण-क,ख,ग,घ ४. बाल्येऽपि-क,ख,ग,घ
५. ज्ञानमात्रात्मत्ववादे-क ६. सर्वगतत्वेन-क ७. सर्व-ख,घ

५८. कर्त्रधिकरणम् (२-३-५) (सू.३३-३९)

[अधिकरणार्थः-आत्मन एव कर्तृत्वम् न गणानां इति समर्थनम्]

२४९. कर्ता शास्त्रार्थवत्त्वात् । (२-३-३३)

आत्मनः ज्ञातृत्ववत् कर्तृत्वमप्यस्ति ? न ? - इति संशयः । प्रधानस्यैव कर्तृत्वात् आत्मनः न कर्तृत्वमस्ति - इति पूर्वः [१]पक्षः[१] ।

'अहङ्कारविमूढात्मा कर्ताऽहमिति मन्यते' (भ.गी.१४-९) 'नान्यं गुणेभ्यः कर्तारम्' (भ.गी.१६-२०) इत्यादिषु गुणानामेव कर्तृत्ववचनात् ।

राद्धान्तस्तु - स्वर्गापवर्गसाधनानुष्ठानविधानशास्त्राणाम् - अर्थवत्त्वाय कर्तैव आत्मा, बोद्धुरेव हि शासनम्; न अचेतनस्य प्रधानस्य । 'यजेत, उपासीत' इति, कर्तरि लकारः । अतः कर्तारमेव बोधयति शास्त्रम् । सूत्रमपि व्याख्यातम् ।। ३३ ।।

२५०. उपादानाद्विहारोपदेशाच्च । (२-३-३४)

उपादानात् उपदिश्यमानात् विहारोपदेशाच्च । उपदिश्यते हि उपादानं विहारश्च 'एवमेवैष एतान्प्राणान् गृहीत्वा स्वे शरीरे यथाकामं परिवर्तते' (बृ.उ.४-१-१८) इति उपादानविहारयोः कर्तृत्वोपदेशाच्च कर्ता ।। ३४ ।।

२५१. व्यपदेशाच्च क्रियायां न चेन्निर्देशविपर्ययः । (२-३-३५)

'विज्ञानं यज्ञं तनुते, कर्माणि तनुतेऽपि च,' (तै.आन.५-१) इति यज्ञादिकर्मसु आत्मनः कर्तृत्वत्वोपदेशाच्च कर्ता । 'विज्ञान' शब्देन न आत्मनो व्यपदेशः, अपि तु अन्तःकरणरूपबुद्धेरेव इति चेत् - तथा सति 'विज्ञानेन' इति करणविभक्तिनिर्देशः स्यात् ।। ३५ ।।

२५२. उपलब्धिवदनियमः । (२-३-३६)

प्रधानस्य कर्तृत्वेन आत्मनो भोक्तृत्वमेव इति पक्षे पूर्वोक्तोपलब्ध्यनियमवत्, प्रधानस्य सर्वसाधारणत्वात् भोक्तृत्वानियमः । अन्तःकरणभेदेऽपि सर्वेषां आत्मनां सर्वगतत्वेन साधारण्यम् अनिवार्यम् ।। ३६ ।।

---

१. पक्षः । कुतः ?-घ

२५३. शक्तिविपर्ययात् । (२-३-३७)

बुद्धेः कर्तृत्वे कर्तुरन्यस्य भोक्तृत्वायोगात् भोक्तृत्वशक्तिरपि बुद्धेरेवेति आत्मनो भोक्तृत्वशक्तिविपर्ययो - हानिः इत्यर्थः ।। ३७ ।।

२५४. समाध्यभावाच्च । (२-३-३८)

प्रकृतेः कर्तृत्वे मोक्षसाधनभूतसमाध्यभावश्च स्यात् । 'प्रकृतेरन्योऽस्मि' इति समाधाने प्रकृतेः कर्तृत्वायोगात् ।। ३८ ।।

२५५. यथा च तक्षोभयथा । (२-३-३९)

आत्मनः कर्तृत्वेऽपि भोगवाञ्छायां करोति, अन्यथा न करोति इति उभयप्रकारव्यवस्था उपपद्यते । यथा तक्षा स्वकार्ये इच्छया व्यवस्थितः । बुद्धेः कर्तृत्वे, अचेतनत्वेन तस्या [1]स्वेच्छाया अभावात्[1] व्यवस्था न सिध्यति इत्यभिप्रायः ।। ३९ ।।

।। इति कर्त्रधिकरणम् ।। ५ ।।

५९. परायत्ताधिकरणम् (२-३-६) (सू.४०-४१)

[अधिकरणार्थः-जीवात्मगतं विहित-निषिद्धक्रियाकर्तृत्वं परमात्माधीनम्]

२५६. परात्तु तच्छ्रुतेः । (२-३-४०)

२५७. कृतप्रयत्नापक्षेस्तु विहितप्रतिषेधावैयर्थ्यादिभ्यः । (२-३-४१)

इदानीं जीवस्य [2]कर्तृत्वं किं[2] परमात्मायत्तम् ? उत स्वायत्तम् इति संशयः।

स्वायत्तम् इति पूर्वः [3]पक्षः[3]; विधिनिषेध[4]शास्त्राऽनर्थक्यापत्तेः[4] । यः स्वबुद्ध्यैव प्रवृत्तिनिवृत्तिशक्तः, स एव हि नियोज्यः, निग्रहानुग्रहास्पदं च भवति इति ।

राद्धान्तस्तु - 'अन्तः प्रविष्टः शास्ता जनानां सर्वात्मा' (तै.आर.३,११-२०) 'य आत्मानमन्तरो यमयति' (बृ.उ.५-७-२२) इत्यादिश्रुतेः परमात्मायत्तमेव कर्तृत्वम् । तच्च जीवेन स्वबुद्ध्या कृतं प्रयत्नमपेक्ष्य तदनुमतिदानेनेति, विधिनिषेधावैयर्थ्यम् । अत एव निग्रहानुग्रहास्पदं च सूत्रद्वयमपि व्याख्यातम् ।। ४१ ।।

।। इति परायत्ताधिकरणम् ।। ६ ।।

---

१. इच्छाया अभावात्-क,ग २. कर्तृत्वम्-ख,घ ३. पक्षः । कुतः? - ग ४. शास्त्राऽनवकाशप्रसक्तेः-ख,घ

६०. अंशाधिकरणम् (२-३-७) (सू.४२-५२)

[अधिकरणार्थः-जीवात्मनः परमात्मनः अंशभूताः इति साधनम्]

२५८. अंशो नानाव्यपदेशादन्यथा चाऽपि दाशकितवादित्वमधीयत एके । (२-३-४२)

किं जीवः परमात्मनः अत्यन्तभिन्नः? उत परमात्मैव अज्ञः ? अथ परमात्मैव उपाधिसम्बद्धः? परमात्मांशो वा? इति संशयः । अत्यन्तभिन्नः इति प्रथमः [१]पक्षः[१] । 'पृथगात्मानं प्रेरितारं च मत्वा' (श्वे.उ.१-६) 'तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभिचाकशीति' (श्वे.उ.४-६) 'अनीशश्चात्मा बध्यते भोक्तृभावात्' (श्वे.उ.१-८) 'सर्वस्य वशी सर्वस्येशानः' (बृ.उ.६-४-२२) इत्यादिभेदश्रुतेः जीवपरमात्मनोः कर्मपरतन्त्रता तद्विपरीतत्वश्रुतेश्च । अभेदश्रुतयः 'नरपतिरेव सर्वलोकः' इतिवत् औपचारिक्यः इति । भेदश्रुतीनाम् अविद्वद्विषयतया वा उपाधिसम्बन्धविषयतया वा अमुख्यवृत्तिसम्भवात् अभेदश्रुतिमुख्यत्वाय अज्ञः परमात्मा, उपाधिसम्बद्धो वा जीवः - इति युक्तम् ।

राद्धान्तास्तु - [२]नानात्वैकत्वव्यपदेशात् परमात्मनः[२] सत्यसङ्कल्पत्व सर्वज्ञत्वनिरवद्यत्वश्रुतेः अज्ञत्वोपाधिसम्बन्धाद्यनुपपत्तेः जीवशब्दस्य जीवशरीरक - परमात्मवाचित्वेन. 'तत्त्वमसि' (छां.उ.६-१०-३) 'अयमात्मा ब्रह्म' (बृ.उ.६-४-५) इति सामानाधिकरण्यस्य मुख्यत्वात्, शरीरशरीरिणोः विशेषणविशेष्यभूतयोः स्वरूपस्वभावभेदेन च भेदश्रुतेश्च मुख्यत्वात्, विशिष्टवस्त्वेकदेशतया च विशेषणस्य, परमात्मांशो जीवः । जीवशरीरत्वं च परमात्मनः 'यस्यात्मा शरीरम्' (बृ.उ.मा.पा.५-७-२७) इत्यादिषु सिद्धम् ।

सूत्रार्थस्तु - अंशः - परमात्मांशो जीवः । नानाव्यपदेशात् - भेदव्यपदेशात् । अन्यथा च - अभेदव्यपदेशाच्च । उक्तनीत्या उभयमुख्यत्वायेत्यभिप्रायः 'ब्रह्मदाशा ब्रह्मदासाः' (अथ.सं.उ.) इत्यादिना दाशकितवादित्वमपि अधीयत एके शाखिनः । सर्वजीवव्यापित्वात् अभेदोपदेशस्य तत्र अत्यादरः प्रतीयत इत्यर्थः ।। ४२ ।।

२५९. मन्त्रवर्णात् । (२-३-४३)

मन्त्रवर्णाच्च अंश एव जीवः 'पादोऽस्य विश्वा भूतानि' (पु.सू.३) इति पादशब्दः अंशवाची ।

१. पक्षः । कुतः?-ख,घ २. परमात्मनः-क,ग

२६०. अपि स्मर्यते । (२-३-४४)

'ममैवांशो जीवलोके जीवभूतः सनातनः' (भ.गी.१५-७) इति जीवस्य परमात्मांशत्वं स्मर्यते च ।। ४ ।।

एकद्रव्यैकदेशत्वं हि अंशत्वं, अतो जीवस्य ब्रह्मैकदेशत्वेन जीवदोषा ब्रह्मणो दोषा एव इत्याशङ्क्याह -

२६१. प्रकाशादिवत्तु नैवं परः । (२-३-४५)

तुशब्दः शङ्कानिवृत्त्यर्थः । प्रकाशवतां मणिद्युमणिप्रभृतीनां प्रकाश-विशिष्टानां प्रकाशः विशेषणभूतः प्रकाशो यथांशः, तद्वत् जीवशरीरतया जीवविशिष्टस्य ब्रह्मणः अंशो जीवः, विशिष्टवस्त्वैकदेशतया विशेषणस्य विशेषणं विशिष्टस्यांशः । आदिशब्दात् द्रव्यविशेषणत्वैकस्वभावजातिगुणशरीराणि गृह्यन्ते । विशेषणविशेष्ययोः स्वरूपस्वभावभेदात् विशेषणभूतो जीवो यत्स्वरूपो यत्स्वभावश्च, नैवं परः-सर्वज्ञः सत्यसङ्कल्पो नित्यनिरवद्यश्च इत्यर्थः ।। ४५ ।।

२६२. स्मरन्ति च । (२-३-४३)

प्रकाशादिवत् जीवस्यांशत्वं पराशरादयः स्मरन्ति च - 'एकदेशस्थितस्याग्नेर्ज्योत्स्ना विस्तारिणी यथा । परस्य ब्रह्मणः शक्तिस्तथेदमखिलं जगत्' (वि.पु.१-२२-५६) तथा परं प्रति शरीरत्वं च - 'यत्किञ्चित्सृज्यते येन सत्त्वजातेन वै द्विज । तस्य सृज्यस्य सम्भूतौ तत्सर्वं वै हरेस्तनुः'। (वि.पु.१-२२-३८) इति ।। ४३ ।।

[१]ब्रह्मांशत्वेन च[१] सर्वेषामात्मनां समत्वात् वेदाध्ययनादौ केषाञ्चित् अनुज्ञा केषाञ्चित् परिहारश्च कथमुपपद्यते ? इत्यत्राह -

२६३. अनुज्ञापरिहारौ देहसम्बन्धाज्ज्योतिरादिवत् । (२-३-४७)

ब्राह्मणादिशुच्यशुचिदेहसम्बन्धात् अनुज्ञापरिहारौ उपपद्येते । ज्योतिरादिवत् [२]ज्योतिः-अग्निः यथा श्रोत्रियागारादग्निराह्रियते, श्मशानादेस्तु परिह्रियते, यथा च अन्नादिः श्रोत्रियादेः अनुज्ञायते, अभिशस्तादेश्च परिह्रियते तद्वत्[२] ।। ४७ ।।

---

१. ज्ञत्वेन च-ख,घ २. यथा ज्योतिषोऽग्नेः अन्यस्य चाशुचि अशुचिदेहसम्बन्धात् अनुज्ञा परिहारौ तद्वत् इत्यधिकः पाठः-ख,घ

२६४. असन्ततेश्चाऽव्यतिकरः (२-३-४८)

जीवानां प्रतिशरीरं भिन्नत्वात् अणुत्वेन तत्र तत्र अविच्छिन्नत्वाच्च न भोगव्यतिकरश्च । अज्ञब्रह्मजीववादे [1]च उपहितब्रह्मजीववादे च[1] अज्ञानसम्बन्धि च उपाधिसम्बन्धि च ब्रह्मैवेति भोगव्यवस्था न सिद्ध्यति इत्यभिप्रायः ।। ४८ ।।

२६५. आभा(सा) स एव च । (२-३-४९)

अज्ञब्रह्मजीववादे सर्वज्ञस्य ब्रह्मणः अज्ञानकल्पनास्वरूपतिरोधानकल्पनाहेतव आभासा एव । चकारात् निरवद्यत्वादिश्रुतिविरोधश्च ।। ४९ ।।

पारमार्थिकोपाधिसम्बन्धिब्रह्मजीववादे अनाद्यदृष्टप्रवाहेण उपाधिप्रवाहानादित्वात् तत्सम्बन्धिनि ये दोषाः न ते ब्रह्मणि प्रसज्यन्ते इत्यत्र आह -

२६६. अदृष्टानियमात् । (२-३-५०)

अदृष्टैः तत्कृतोपाधिभिश्च ब्रह्मणः छेदासम्भवात् तत्कृता दोषाः ब्रह्मण्येव संभवेयुः ।। ५०।।

२६७. अभिसन्ध्यादिष्वपि चैवम् । (२-३-५१)

अदृष्टहेतुभूताभिसन्ध्यादिष्वपि उपाधिब्रह्मव्यतिरिक्तवस्त्वन्तराभावात् पूर्व - पूर्वोपाधियुक्तं ब्रह्मैवेति, न कश्चिद्विशेषः ।। ५१ ।।

२६८. प्रदेशभेदादिति चेन्नान्तर्भावात् । (२-३-५२)

उपाधिसम्बन्धिब्रह्मप्रदेशात् अनुपहितब्रह्मप्रदेशो भिद्यते; अतः अव्यवस्था इति चेत्- न । उपाधिषु गच्छत्सु पूर्वम् अनुपहितब्रह्मप्रदेशस्यापि अन्तर्भावात् ।। ५२ ।।

।। इति अंशाधिकरणम् ।। ७ ।।

।। इति श्रीभगवद्रामानुजविरचिते वेदान्तदीपे द्वितीयाध्यायस्य तृतीयः पादः।।

१. वा-ख २. वा उपाधिब्रह्मजीववादे वा-ग

चतुर्थः पादः - प्राणपादः (अधि.८, सू.१९)

६१. प्राणोत्पत्त्यधिकरणम् (२-४-१) (सू. १-३)

[अधिकरणार्थः-'प्राण' शब्दवाच्यानामिन्द्रियाब्रह्मकार्यता]

२६९. तथा प्राणाः (२-४-१)

किं जीववत् इन्द्रियाण्यपि न उत्पद्यन्ते? उत वियदादिवत् उत्पद्यन्ते? इति संशयः ।

नोत्पद्यन्ते- इति पूर्वः [१]पक्षः[१]; प्रलयकाले अवस्थानश्रुतेः । उत्पत्तिवादाः जीवोत्पत्तिवादवत् नेयाः । 'असद्वा इदमग्र आसीत् ऋषयो वाव तेऽग्रे सदासीत्; [२]के ते ऋषय इति प्राणा[२] वाव ऋषयः' (शतपथ.६-१-६) इति हि इन्द्रियाणां तदानीं स्थितिः श्रूयते । राद्धान्तस्तु - प्राक्सृष्टेः एकत्वावधारणात् इन्द्रियाणाम् 'एतस्माज्जायते' (मुं.उ.२-१-३) इति उत्पत्तिवादात् उत्पत्तिनिषेधनित्यत्ववचनाभावाच्च वियदादिवत् उत्पद्यन्ते । 'प्राणा वाव ऋषयः' (शतपथ.६-१-६) इति प्राणशब्दनिर्दिष्टः [३]परमात्मा अभिधीयते[३] ।

[४]सूत्रार्थस्तु[४] - तथा प्राणाः । यथा जीवाः न उत्पद्यन्ते तथैव प्राणा अपि ।। १ ।।

बहुत्वासंभवाद्बहुवचनश्रुतिर्गौणीत्याह -

२७०. गौण्यसम्भवात्प्राक्छ्रुतेश्च । (२-४-२)

'प्राणा वा' इति बहुवचनश्रुतिर्गौणी, तदानीं बहुत्वासंभवात्, तस्य परमात्मन एव प्रागवस्थानश्रुतेश्च ।। २ ।।

[अत्र पाठान्तरम्]

चस्त्वर्थः । तु शब्दात् पक्षो व्यावृत्तः । इन्द्रियाणि उत्पद्यन्त एव । कुतः तत्प्राक्श्रुतेः । तस्य परमात्मन एव, प्रागवस्थानश्रुतेः 'सदेव सोम्येदमग्र आसीत्' (छां.उ.६-२-१) 'आत्मा वा इदमेक एवाग्र आसीत्' (ऐ.उ.१-१) 'एको ह वै नारायणः आसीत्' (महा.उ.१-१) इति । प्राणशब्दस्य 'प्राणमभिसंविशन्ति' (छां.उ.१-११-५) इति परमात्मन्यपि प्रसिद्धेः । 'प्राणा वा ऋषयः' इति तस्यैव द्रष्टृत्वसंभवात् ।

---

१. पक्षः । कुतः?-घ २. प्राणा-ख,घ ३. परमात्मा-ग ४. सूत्रार्थः-ख,घ

२७१. तत्पूर्वकत्वाद्वाचः । (२-४-३)

इतश्च; वाचः परमात्मव्यतिरिक्तनामधेयस्य, तत्पूर्वकत्वात् - [१]वियदादिसृष्टि[१] पूर्वकत्वात् इत्यर्थः । 'तद्धेदं तर्ह्यव्याकृतमासीत्तन्नामरूपाभ्याम् व्याक्रियत' (बृ.उ.३-४-७) इत्यादिश्रुतेः । अतः परमात्मैव प्राणशब्दनिर्दिष्टः ।। ३ ।।

।। इति प्राणोत्पत्त्यधिकरणम् ।। १ ।।

६२. सप्तगत्यधिकरणम् । (२-४-२) (सू.४-५)

[अधिकरणार्थः-इन्द्रियाणाम् एकादशसङ्ख्यतासमर्थनम्]

२७२. सप्त गतेर्विशेषितत्वाच्च । (२-४-४)

किमिन्द्रियाणि सप्तैव? उत एकादश? इति संशयः । सप्तैव - इति पूर्वः [२]पक्षः[२]। 'सप्त प्राणाः प्रभवन्ति' (मुं.उ.२-१-८) इत्यादिषु सप्तानामेव जीवेन सह सञ्चारश्रवणात्, 'यदा पञ्चावतिष्ठन्ते ज्ञानानि मनसा सह । बुद्धिश्च' (कठ.उ.६-१०) इति सप्तानामेव योगकाले 'ज्ञानानि' इति विशेषितत्वाच्च श्रोत्रादीनि ज्ञानेन्द्रियाणि, मनः बुद्धिश्च इति सप्तैव ।

राद्धान्तस्तु - श्रोत्रादीनि, ज्ञानेन्द्रियाणि, वागादीनि च कर्मेन्द्रियाणि, मन इति एकादश कथम् वागादीनामपि श्रोत्रादिवत् कार्यभेदेन जीवोपकरणत्वाविशेषात् । 'दशेमे पुरुषे प्राणा आत्मैकादशः' । (बृ.उ.५-९-४) 'इन्द्रियाणि दशैकं च' (भ.गी.१३-५) इत्यादिश्रुतिस्मृतिभ्यः । वागादीनां जीवेन सह गमनाभावात्, सप्तानामेव प्रयाणकाले गतिश्रवणम् । योगकाले विशेषितत्वं च, ज्ञानेन्द्रियाणां मनसः तद्वृत्तिरूपबुद्धेश्च प्राधान्यात् ।

सूत्रार्थस्तु-सप्तगतेर्विशेषित्वाच्च-सप्तानामेव गतिश्रवणात्, ज्ञानानि पञ्च, 'मनः बुद्धिश्च' इति विशेषितत्वाच्च, तानि सप्तैव ।। ४ ।।

२७३. हस्तादयस्तु स्थितेऽतो नैवम् । (२-४-५)

नैवम् - न सप्तैव इन्द्रियाणि इत्यर्थः । श्रोत्रादीनि ज्ञानेन्द्रियाणि पञ्च, वाक् हस्तादीनि च कर्मेन्द्रियाणि पञ्च, मनश्च इति एकादश । तत्र श्रोत्रादीनि, जीवेन सह शरीरान्तरगमनेऽपि गच्छन्ति । वाग्घस्तादीनि कर्मेन्द्रियाणि तु, स्थिते शरीरे, तेनैव सह

१. तत्सृष्टिः-क,ग -तद्वस्तु सृष्टिपूर्वकत्वात्-ख,घ २. पक्षः । कुतः?-घ

उत्पत्तिविनाशयोगीन्युपकारकाणि । अतः नैवम् - इत्यन्वयः । एषां [१]जीवो[१]पकारकत्वाविशेषात् 'दशेमे पुरुषे प्राणा [२]आत्मैकादशः' (बृ.उ.५-९-४) इत्यादिवचनाच्च, इत्यभिप्रायः[२] ।। ५ ।।

।। इति सप्तगत्यधिकरणम् ।। २ ।।

६३. प्राणाणुत्वाधिकरणम् (२-४-३) (सू.६,७)

[अधिकरणार्थः-इन्द्रियाणाम् अणुपरिमाणतास्थापनम्]

२७४. अणवश्च । (२-४-६)

इन्द्रियाणि किं सर्वगतानि? उताणुपरिमाणानि? इति संशयः । सर्वगतानि - इति पूर्वः [३]पक्षः[३] ।

'ते एते सर्व एव समाः सर्वेऽनन्ताः' (बृ.उ.३-५-१३) इति प्राणानाम् आनन्त्यश्रवणात् ।

राद्धान्तस्तु - 'प्राणमनूत्क्रामन्तं सर्वे प्राणा अनूत्क्रामन्ति' (बृ.उ.६-४-२) इति [४]श्रवणात्[४], परिमितत्वे सति अप्रत्यक्षत्वात्, अणवः आनन्त्यश्रुतिस्तु-'अथ यो हैताननन्तानुपास्ते' (बृ.उ.३-५-१३) इति [५]उपासन[५]विधानात् उपासनफलबाहुल्यविषया ।। ६ ।।

२७५. श्रेष्ठश्च । (२-४-७)

श्रेष्ठः प्राणश्च उत्पद्यते । नात्र न्यायातिदेशः । अधिकाशङ्काऽभावात् । पृथग्योगकरणम् उत्तरत्र चिन्तार्थम् । श्रेष्ठः पञ्चवृत्तिः प्राणः । प्राणश्रैष्ठ्यं तु - प्राणसंवादे तस्य श्रैष्ठ्याभिधानात् ।। ७ ।।

।। इति प्राणाणुत्वाधिकरणम् ।। ३ ।।

६४. वायुक्रियाधिकरणम् (२-४-४) (सू.८-११)

[अधिकरणार्थः-श्रेष्ठः प्राणो न वायुसामान्यम्, तत्क्रिया वा; किन्तु विशिष्टो वायुः]

२७६. न वायुक्रिये पृथगुपदेशात् । (२-४-८)

---

१. जीवे देहान्तिस्थिते-ख,घ २. आत्मैकादश इत्यात्मशब्दो मनो वाचित्वाचि इतोऽधिकव्यपदेशो मनोवृत्ति भेदाभिप्रायः इत्यधिकः पाठः-ख,घ ३. पक्षः । कुतः ?-घ ४. प्राणानामुत्क्रान्तिश्रवणात्-ग ५. उपासनफल-ख,घ

किमयं श्रेष्ठ प्राणः वायुमात्रम्? उत तत्क्रिया? अथ वायुरेव कश्चन विशेषमापन्नः? इति संशयः । 'वायुमात्रम्' इति प्रथमः [1]पक्षः[1] । 'यः प्राणः स वायुः' (बृ.उ.५-१-५) इति व्यपदेशात् ।

वायुमात्रे प्राणप्रसिद्ध्यभावात् उच्छ्वासनिःश्वासरूपवायुक्रियायां प्राणप्रसिद्धेः 'वायोः क्रियाविशेष एव प्राणः' इति द्वितीयः पक्षः ।

राद्धान्तस्तु - न वायुमात्रं तत्क्रिया वा प्राणः; अपि तु देहधारणयोग्यतादि-रूपविशेषमापन्नो वायुः । 'एतस्माज्जायते प्राणः ..... मनः सर्वेन्द्रियाणि च, खं वायुः' । (मुं.उ.२-१-३) इति वायुप्राणयोः पृथगुत्पत्त्युपदेशात् । क्रियायाश्च पृथगुपदेशो न सम्भवति; तेजःप्रभृतिषु अदर्शनात् । चक्षुरादिकरणैः सह जीवोपकरणतया उपदेशात् देहेन्द्रियधारणरूपोपकाराधिक्यात्, चक्षुरादिभ्यः प्राधान्यवचनाच्च न क्रियामात्रम् ।

सूत्रार्थस्तु-न वायुक्रिये पृथगुपदेशात्- वायुमात्रं तत्क्रिया वा न प्राणः, पृथगुपदेशात् । 'प्राणो जायते, खं वायुः' इति हि पृथगुत्पत्तिरुपदिश्यते ।। ८ ।।

वायोः पृथगुपदिष्टतया, तस्मादन्यः अयं प्राणः किम् अग्न्यादिवत् भूतान्तरम्? इत्याशङ्क्याह -

२७७. चक्षुरादिवत्तु तत्सहशिष्ट्यादिभ्यः । (२-४-९)

तुशब्दः शङ्कानिवृत्त्यर्थः । प्राणो न आकाशादिवत् भूतान्तरम्; अपि तु वायुरेव अवस्थान्तरमापन्नः, चक्षुरादिवत् जीवोपकरणम् । तच्च उपकरणत्वम् उपकरणभूतैः इन्द्रियैः सह शिष्ट्यादिभ्यः अवगम्यते । शिष्टिः- शासनम्; उपदेशः । उपदिश्यते हि अयं प्राणः चक्षुरादिभिः सह प्राणसंवादादिषु । तत्सजातीयत्वे हि तत् उपपद्यते । प्राणशब्दगृहीतेषु करणेषु अस्य 'अथ योऽयं मुख्यप्राणः' (छां.उ.१-२-७) इति विशिष्याभिधानम् आदिशब्देनोक्तम् । तदपि तत्सजातीयत्वे हि संभवति ।। ९ ।।

२७८. अकरणत्वाच्च न दोषस्तथा हि दर्शयति । (२-४-१०)

अकरणत्वात् करणम् - क्रिया । अकरणत्वम् - क्रियारहितत्वम् । अक्रियत्वात् जीवोपकरणभूतस्य प्राणस्य जीवोपकारकक्रिया[2]रहितत्वेऽपि[2], न दोष उत्पादयितुं शक्यः

१. पक्षः । कुतः?-घ २. रहितत्वेनापि-क,ख,ग,घ

इति श्रुतिरेव तथाहि दर्शयति - उपकारप्रकारं दर्शयति । अक्रियत्वादस्य - प्राणस्य जीवं प्रत्युपकारविशेषणरूपक्रियारहितत्वाच्च यो दोष उद्भाव्यते, स नास्ति । यतः उपकारविशेषरूपां शरीरेन्द्रियधारणात्मकक्रियां दर्शयति श्रुतिरेव, [1]तथा[1] दर्शयति - उपकारप्रकारं दर्शयति श्रुतिः ।

'यस्मिन्नुत्क्रान्त इदं शरीरं पापिष्ठतरं इव दृश्यते । स वः श्रेष्ठः' (छां.उ.५-१-१) इति वागादिमुख्यप्राण[2]पर्यन्तानि[2] करणानि प्रत्येकम् अभिधाय प्राणोत्क्रमणे शरीरेन्द्रियशैथिल्याभिधानात् ।। १० ।।

२७९. पञ्चवृत्तिर्मनोवद्व्यपदिश्यते । (२-४-११)

प्राणापानादिनामविभागे एक एव प्राणः इत्याह -

प्राणापानादिवृत्तिभेदात् प्राण एव पञ्चधा व्यपदिश्यते, मनोवत् - यथा एकमेव मनः कामादिवृत्तिभेदेन तैः शब्दैः अभिधीयते, इति श्रुतिराह -

'कामः सङ्कल्पः' (बृ.उ.३-५-३) इत्यारभ्य, 'ह्रीर्धीर्भीरित्येतत्सर्वं मन एव' (बृ.उ.३-५-३) इति । अपानादि समानपर्यन्तं व्यपदिश्य, 'एतत्सर्वं प्राण एव' (बृ.उ.३-५-३) इति व्यपदेशात्, प्राण एव पञ्चवृत्तिः इति अवगम्यते ।। ११ ।।

।। इति वायुक्रियाधिकरणम् ।। ४ ।।

६५. श्रेष्ठाणुत्वाधिकरणम् । (२-४-५)

[अधिकरणार्थः-मुख्यप्राणस्यापि अणुत्वमेव न विभुत्वम्]

२८०. अणुश्च (२-४-१२)

किमयं प्राणः सर्वगतः उताणुः ? - इति संशयः । सर्वगतः - इति पूर्वः [3]पक्षः[3] । 'सम एभिस्त्रिभिर्लोकैः समः' (बृ.उ.३-३-२२) इत्यादिना प्राणस्य आनन्त्यव्यपदेशात् ।

राद्धान्तस्तु - 'तमुत्क्रामन्तं प्राणोऽनूत्क्रामति' (बृ.उ.६-४-२) इति उत्क्रान्तिवचनात्, इन्द्रियवत् प्राणश्च अणुः । एवम् अणुत्वे निश्चिते सति, सर्वस्य प्राणायत्तस्थितित्वेन वैभववादः । सूत्रमपि व्याख्यातम् ।। १२ ।।

।। इति श्रेष्ठाणुत्वाधिकरणम् ।। ५ ।।

---

१. तथा हि-घ २. पर्यन्त-ख,घ ३. पक्षः । कुतः ?-घ

६६. ज्योतिराद्यधिष्ठानाधिकरणम् । (२-४-६) (सू.१३-१४)

[अधिकरणार्थः-प्राणेन्द्रियादिप्रवर्तकत्वं परमात्मसङ्कल्पायत्तम्]

२८१. ज्योतिराद्यधिष्ठानं तु तदामननात् प्राणवता शब्दात् । (२-४-१३)

अग्न्यादीनां जीवस्य च इन्द्रियाधिष्ठानं परमात्मायत्तमिति, 'परात्तु तच्छ्रुतेः' (ब्र.सू.२-३-४०) इत्युक्तमेव स्मारयति विषयव्याप्तिज्ञापनाय । प्राणवता - जीवेन सह, ज्योतिरादेः - अग्न्यादेः वागाद्यधिष्ठानं, तदामननात् - परमात्मामननाद्भवति । आमननम्- आभिमुख्येन मननम् । तत्सङ्कल्पादेव भवतीत्यर्थः ।

'योऽग्नौ तिष्ठन् ......अग्निमन्तरो यमयति' (बृ.उ.५-७-९) इत्यादिशब्दात् ।। १३ ।।

२८२. तस्य च नित्यत्वात् । (२-४-१४)

सर्वेषाम् आत्मतया अनुप्रविश्य सर्वनियमनस्य, नित्यत्वात् - परमात्मनः अवर्जनीयत्वादित्यर्थः । 'तत्सृष्ट्वा तदेवानुप्राविशत्' (तै.आन.६-२) इति श्रुतेः ।। १४ ।।

।। इति ज्योतिराद्यधिष्ठानाधिकरणम् ।। ६ ।।

६७. इन्द्रियाधिकरणम् (२-४-७) (सू.१५,१६)

[अधिकरणार्थः-श्रेष्ठं प्राणं विहायैव प्राणानां इन्द्रियरूपता]

२८३. त इन्द्रियाणि तद्व्यपदेशादन्यत्र श्रेष्ठात् (२-४-१५)

किं प्राणशब्दनिर्दिष्टाः सर्वे एव इन्द्रियाणि? उत श्रेष्ठव्यतिरिक्ताः प्राणाः ? इति संशयः ।

सर्वे एव - इति पूर्वः [१]पक्षः[१] । सर्वेषाम् अविशेषेण प्राणशब्दनिर्देशात् कारणत्वाच्च ।

राद्धान्तस्तु - श्रेष्ठव्यतिरिक्ताः प्राणाः इन्द्रियाणि । तेष्वेव इन्द्रियशब्दनिर्देशात् - 'इन्द्रियाणि दशैकं च' (भ.गी.१३-५) 'एकादशं मनश्चात्र' इति एषामपि प्राणशब्दनिर्देशः, प्राणाधीनवृत्तित्वेन । तथा च श्रुतिः - 'त एतस्यैव सर्वे रूपमभवन् तस्मादेत एतेन आख्यायन्ते' इति । (बृ.उ.३-५-२१) रूपमभवन् शरीरमभवन्, तदधीनवृत्तयो अभवन् - इत्यर्थः ।

---

१. पक्षः । कुतः ?-घ

सूत्रार्थस्तु - श्रेष्ठादन्यत्र ये प्राणाः, ते इन्द्रियाणि, तेष्वेव तद्व्यपदेशात् इन्द्रियव्यपदेशात् ।। १५ ।।

२८४. भेदश्रुतेर्वैलक्षण्याच्च । (२-४-१६)

'एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च' (मुं.उ.२-१-३) इति समनस्को इन्द्रियेभ्यो भेदेन प्राणस्य उत्पत्तिश्रुतेः । इन्द्रियेषु उपरतेष्वपि प्राणवृत्तेः वृत्तिवैलक्षण्याच्च ।। १६ ।।

।। इति इन्द्रियाधिकरणम् ।। ७ ।।

६८. संज्ञामूर्तिक्लृप्त्यधिकरणम् (२-४-८) (सू.१७-१९)

[अधिकरणार्थः-नामरूपव्याकरणात्मकप्रपञ्चव्यष्टिसृष्टेः त्रिवृत्कर्तृसमानकर्तृकता]

२८५. संज्ञामूर्तिक्लृप्तिस्तु त्रिवृत्कुर्वत उपदेशात् । (२-४-१७)

किं प्रपञ्चव्यष्टिसृष्टिः जीवभूतात् चतुर्मुखात्? उत तच्छरीरकात् परमात्मन एव? इति संशयः ।

केवलात् चतुर्मुखात् - इति पूर्वः पक्षः[१] । 'अनेन जीवेनात्मनाऽनुप्रविश्य नामरूपे व्याकरवाणि' (छां.उ.६-३-२) इति व्यतिरेकश्रुतेः । जीवस्य परमात्मांशत्वेन 'व्याकरवाणि' इति उत्तमपुरुषनिर्देशोऽपि कथंचित् उपपद्यते ।

राद्धान्तस्तु - 'नामरूपे व्याकरवाणि, तासां त्रिवृतं त्रिवृतमेकैकां करवाणि' (छां.उ.६-३-२) इति त्रिवृत्करणं कुर्वत एव नामरूपव्याक्रियोपदेशात्, परमात्मन एव नामरूपव्याकरण[२]व्यष्टिसृष्टिः[२] । त्रिवृत्करणं तु न चतुर्मुखेन कर्तुं शक्यम्; अण्डसृष्ट्युत्तरकालभावित्वात् चतुर्मुखोत्पत्तेः । त्रिवृत्कृतैरेव तेजोऽबन्नैः अण्डसृष्टिसम्भवाच्च । 'तदण्डमभवद्धैमं सहस्रांशुसमप्रभम् तस्मिन् जज्ञे स्वयं ब्रह्मा सर्वलोकपितामहः' (म.स्मृ.१-९) इति हि स्मर्यते । 'नानावीर्याः पृथग्भूतास्ततस्ते संहतिं विना । नाशक्नुवन् प्रजाः स्रष्टुमसमागम्य कृत्स्नशः ।। समेत्यान्योन्यसंयोगं परस्परसमाश्रयाः । महदादि विशेषान्ता ह्यण्डमुत्पादयन्ति ते' ।। (वि.पु.१-२-५३,५४) इति च ।

---

१. पक्षः । कुतः?-घ २. व्याकरणरूप-ख,घ

अतः चतुर्मुखशरीरकात् परमात्मन एव व्यष्टिसृष्टिः । एवं सति 'व्याकरवाणि' इति उत्तमपुरुषनिर्देशः समञ्जसः । 'अनेन जीवेन' इति व्यतिरेकनिर्देशोऽपि जीवशरीरकेण आत्मना इत्यन्वयात् समञ्जसः । जीवशब्दः तेजःप्रभृतिशब्दवत् जीवशरीरकब्रह्मवाची इति हि उक्तम् । 'अनेन जीवेनात्मना' इति सामानाधिकरण्यं च मुख्यम् । 'अनुप्रविश्य नामरूपे व्याकरवाणि' (छां.उ.६-३-२) इति समानकर्तृकत्वनिर्देशश्च ।

सूत्रार्थस्तु - संज्ञामूर्तिक्लृप्तिस्तु तुशब्दः शङ्काव्यावृत्त्यर्थः । नामरूपक्लृप्तिः परमात्मन एव; कुतः? त्रिवृत्कुर्वत उपदेशात् त्रिवृत्करणं कुर्वत एव नामरूपव्याकरणोपदेशात् । त्रिवृत्करणं तु परमात्मन एव कर्म इत्युक्तम् ।। १७ ।।

'अन्नमशितं त्रेधा विधीयते' (छां.उ.६-५-१) इत्यादिना चतुर्मुखसृष्टवस्तुषु त्रिवृत्करणप्रकारो हि उपदिश्यते । अतः चतुर्मुखेन केवलेन तच्छक्यम् इत्याशङ्क्याह -

२८६. मांसादि भौमं यथाशब्दमितरयोश्च । (२-४-१८)

'तासां त्रिवृतं त्रिवृतमेकैकां करवाणि' (छां.उ.६-३-३) इति निर्दिष्टं त्रिवृत्करणम्, 'अन्नमशितं त्रेधा विधीयते' (छां.उ.६-५-१) इत्यादिना न उपदिश्यते । 'तस्य यः स्थविष्ठो [१]धातुस्तत्पुरीषं यो मध्यमस्तन्मांसं योऽणिष्ठस्तन्मनः' (छां.उ.६-५-१) इति मांसाद्यपि हि भौममेव उपदिश्यते । 'अन्नमशितं त्रेधा' (छां.उ.६-५-१) इति प्रक्रमात् । 'अन्नमयं हि सोम्य मनः' (छां.उ.६-५-१) इति वाक्यशेषाच्च । तेजोऽबन्नानां त्रिवृत्करणप्रकारे हि उपदिश्यमाने मांसमनसोः पुरीषात् भौमात् अणीयस्त्वेन आप्यत्वं तैजसत्वं च प्रसज्यते । तथा इतरयोरपि अप्तेजःपर्याययोः 'आपः पीताः' (छां.उ.६-५-२) 'तेजोऽशितम्' (छां.उ.६-५-३) इति त्रयाणां त्रयाणां भागानां यथाशब्दम् आप्यत्वं तैजसत्वमेव उपदिश्यते । तत्रापि हि 'आपः पीताः' (छां.उ.६-५-२) 'तेजोऽशितम्' इति (छां.उ.६-५-३) वाक्यशेषश्च 'आपोमयः प्राणः तेजोमयी वाक्' (छां.उ.६-५-४) इति । प्रागुक्तत्रिवृत्करणप्रकारे हि, मूत्र-प्राणयोः स्थविष्ठत्वाणीयस्त्वाभ्यां भौमत्वतैजसत्वप्रसक्तिः । 'तेजोऽशितम्' इत्यत्रापि पूर्वयोः भौमत्वाप्यत्वप्रसक्तिः । अतः अत्र प्रागेव त्रिवृत्कृतस्य अन्नादेः स्वस्यैव त्रेधा परिणामः उपदिश्यते ।

१.भागः-क,ख,ग,घ

प्रागेव त्रिवृत्कृतं चेत् कथं केवलान्नादिशब्दैः उच्यत इत्यत्राह -

२८७. वैशेष्यात्तु तद्वादस्तद्वादः । (२-४-१९)

वैशेष्यं विशेषभावः । त्रिवृत्कृतेऽपि एकैकस्मिन् तत्र तत्र अन्नाद्याधिक्यरूपविशेषभावात् अन्नादिवादः । द्विरुक्तिः अध्यायपरिसमाप्तिद्योतनार्था ।। १९ ।।

।। इति संज्ञामूर्तिक्लृप्त्यधिकरणम् ।। ७ ।।

।। इति श्रीभगवद्रामानुजविरचिते श्रीवेदान्तदीपे द्वितीयाध्यायस्य चतुर्थः पादः ।।

।। समाप्तश्च द्वितीयोऽध्यायः ।।

* * *

तृतीयोऽध्यायः - साधनाध्यायः (अधि.५५, सू.२८२)

प्रथमः पादः - वैराग्यपादः (अधि.६, सू.२७)

६९. तदन्तरप्रतिपत्त्यधिकरणम् (३-१-१) (सू.१-७)

[अधिकरणार्थः-देहात् देहान्तरं गच्छतां जीवानां गतागती देहारम्भहेतुभिर्भूतसूक्ष्मैः सहैव]

२८८. तदन्तरप्रतिपत्तौ रंहति सम्परिष्वक्तः प्रश्ननिरूपणाभ्याम् । (३-१-१)

देही देहान्तरगमने देहकारणभूतैः भूतसूक्ष्मैः संयुक्तो गच्छति ? न इति संशयः । न संयुक्तो गच्छति - इति पूर्वः [1]पक्षः[1]; [2]देहारम्भाय[2] तत्र तत्र भूतसूक्ष्माणां सुलभत्वात् ।

राद्धान्तस्तु - पञ्चाग्निविद्यायाम् - 'वेत्थ - यथा पञ्चम्यामाहुतावापः पुरुषवचसो [3]भवन्ति' (छां.उ.५-३-३) 'इति तु पञ्चम्यामाहुतावापः पुरुषवचसो भवन्ति[3]' (छां.उ.५-९-१) इति प्रश्नप्रतिवचने आम्नायेते । देहारम्भिका आपः त्रिवृत्करणेन भूतान्तरसंसृष्टाः; [4]द्युलोकपर्जन्य[4]पृथिवीपुरुषाग्निषु जीवेन सह प्रविष्टाः पञ्चम्यामाहुतौ योषिदग्निप्रवेशवेलायां पुरुषशब्दाभिलपनीया भवन्ति इति प्रतीयते-पुरुषाकारतां भजन्त इत्यर्थः । अतः भूतसूक्ष्मैः सम्परिष्वक्त एव गच्छति इति ।

सूत्रार्थस्तु - 'तदन्तरप्रतिपत्तौ', 'संज्ञामूर्तिक्लृप्तिः' इत्यत्र मूर्तिशब्देन देहः प्रस्तुतः तच्छब्देन देहः परामृश्यते देहान्तरप्रतिपत्तौ । रंहति सम्परिष्वक्तः जीवो [5]भूतसूक्ष्मैः सम्परिष्वक्तो[5] गच्छति । कुतः ? प्रश्ननिरूपणाभ्यां - [6]पञ्चाग्निविद्यान्तर्गतप्रश्नप्रतिवचनाभ्यां तथाऽवगम्यत इत्यर्थः[6] ।

कथम् अविशेषेण अप्छब्देन सर्वेषामभिधानम् इत्याशङ्क्याह -

२८९. त्र्यात्मकत्वात्तु भूयस्त्वात् । (३-१-२)

तुशब्दः शङ्कानिवृत्त्यर्थः । अपां त्रिवृत्करणेन त्र्यात्मकत्वात् आप इति भूतान्तरसंसृष्टा आपोऽभिधीयन्ते । अपां भूयस्त्वात् - आधिक्यात् अप्छब्देनाभिधानम् ।। २ ।।

---

१. पक्षः । कुतः ?-घ २. देहान्तरारम्भाय-ग ३. भवन्ति इति प्रश्नप्रतिवचनाभ्यां अद्भिर्भूतान्तरसंसृष्टाभिस्सह जीवस्य गमनं प्रतीयते इति भूतसूक्ष्मैस्सहैव गच्छति-क,ख,ग ४. द्युपर्जन्य-घ ५. भूतसूक्ष्मैसम्परिष्वक्तो जीवः रंहति-घ ६. वेत्थ यथा पञ्चम्याहुतावापः पुरुषवचसो भवन्ति । इति तु पञ्चम्यामाहुतावापः पुरुष - वचसो भवन्ति इति प्रश्नप्रतिवचने देहान्तरारम्भक आपः त्रिवृत्करणेन भूतान्तरसंसृष्टाः द्युपर्जन्यपृथिवी पुरुषयोषित् इन्द्रोपाग्निषु जीवेन सह प्रविष्टाः पञ्चम्याहुतौ योषिदग्निप्रवेशवेलायां पुरुषं शब्दाभिलपनीया भवन्ति पुरुषाकारतां भजन्ते इत्यर्थः । अतो जीवेन सह गमनं प्रतीयते-क,ग

२९०. प्राणगतेश्च । (३-१-३)

इतश्च भूतसूक्ष्मैः संयुक्तो याति । 'तमुत्क्रामन्तं प्राणोऽनूत्क्रामति प्राणमनूत्क्रामन्तं सर्वे प्राणा अनूत्क्रामन्ति' (बृ.उ.६-४-२) इति प्राणानाम् - इन्द्रियाणां जीवेन सह गमनश्रुतेः, इन्द्रियाणां देहाश्रयत्वेन देहोऽपि [1]भूतसूक्ष्मरूपेण[1] गच्छतीति गम्यते । स्मर्यते च - 'मनः षष्ठानीन्द्रियाणि प्रकृतिस्थानि कर्षति' (भ.गी.१५-७) इत्यादिना ।। ३ ।।

२९१. अग्न्यादिगतिश्रुतेरिति चेन्न, भाक्तत्वात् । (३-१-४)

'यत्रास्य पुरुषस्य मृतस्याग्निं वागप्येति वातं प्राणश्चक्षुरादित्यम्' (बृ.उ.५-२-१३) इति मरणवेलायां वागादीनाम् अग्न्यादिषु अप्ययश्रुतेः, जीवेन सह गमनश्रुतिः अन्यथा नेया इति चेत्, - तन्न । भाक्तत्वात् तत्र वागादिशब्दानाम् । वागाद्यभिमानिदेवतासु हि, तत्र वागादयः शब्दाः, 'ओषधीर्लोमानि वनस्पतीन्केशाः' । (बृ.उ.५-२-१३) इति अनपियद्भिर्लोमादिभिः सह पाठात् ।। ४ ।।

२९२. प्रथमेऽश्रवणादिति चेन्न, ता एव ह्युपपत्तेः । (३-१-५)

प्रथमे - द्युलोकाग्निहोमे, अपाम् अश्रवणात् 'आपो भूतान्तरसंसृष्टा गच्छन्ति' इति वक्तुं न शक्यते; [2]तत्र हि[2] 'तस्मिन्नेतस्मिन्नग्नौ देवाः श्रद्धां जुह्वति' (छां.उ.५-४-२) इति श्रद्धैव होम्यत्वेन श्रूयते इति चेत् - न । ताः- आप एव हि श्रद्धाशब्देनोच्यन्ते । प्रतिवचनस्य प्रश्नानुगुण्योपपत्तेः । 'वेत्थ यथा पञ्चम्यामाहुतावापः पुरुषवचसो भवन्ति' (छां.उ.५-३-३) इति अपां पुरुषवचस्त्वप्रकारे पृष्टे, स एव हि प्रतिवक्तव्यः । अतः श्रद्धाशब्देन ताः आप एव उच्यन्ते । 'श्रद्धा वा आपः' (तै.ब्रा.२-४-३३) इति श्रूयते ।। ५ ।।

२९३. अश्रुतत्वादिति चेन्न; इष्टादिकारिणां प्रतीतेः (३-१-६)

'आपः पुरुषवचसो भवन्ति' (छां.उ.५-३-५) 'श्रद्धां जुह्वति' (छां.उ.५-४-२) इति द्युलोकादिषु आप एव गच्छन्तीति श्रूयते; न तत्परिष्वक्तो जीवः; अतः, प्रश्नप्रतिवचनयोः जीवस्य अश्रुतत्वात् तत्संयुक्तो जीवो गच्छतीति न शक्यते वक्तुम् इति चेत् -

तन्न । इष्टादिकारिणां प्रतीतेः । उत्तरत्र 'अथ य इमे ग्रामे इष्टापूर्ते दत्तमित्युपासते ते धूममभिसम्भवन्ति' (छां.उ.५-१०-३) इत्यादौ इष्टादिकारिणां जीवानां द्युलोकादिगमन-

---

१. सूक्ष्मरूपेण-ख,घ २. तत्र-घ

पुनरावृत्तिप्रकारवचने द्युलोकाग्निसम्बन्धस्याप्छब्दवाच्यस्य [1]सोममापन्नस्य[1] प्रत्यभिज्ञानात् अत्र आप इति तत्संयुक्तो जीव एवोच्यते ।। ६ ।।

'आकाशाच्चन्द्रमसमेष सोमो राजा तद्देवानामन्नं तं देवा भक्षयन्ति' (छां.उ.५-१०-४) इति धूमादिना गतस्य देवैः भक्ष्यमाणत्वश्रवणात्, जीवस्य अनदनीयत्वाच्च, न जीवस्तत्रोक्त इत्याशङ्क्याह -

२९४. भाक्तं वाऽनात्मवित्त्वात्तथा हि दर्शयति । (३-१-७)

वाशब्दः शङ्काव्यावृत्त्यर्थः । 'तं देवा भक्षयन्ति' (छां.उ.५-१०-४) इति भक्ष्यत्ववचनं, भाक्तं - केवलेष्टादिकारिणाम् [2]अनात्मवित्वात्[2] देवोपकरण[3]त्वाभिप्रायम्[3] अनात्मविदः केवलेन्द्रादिदेवयाजिनो हि देवान् प्राप्य तदुपकरणं भवन्ति । तथा हि दर्शयति श्रुतिः - 'यथा पशुरेवं स देवानाम्' (बृ.उ.३-४-१०) इति । अतो भूतसूक्ष्मैः सम्परिष्वक्तो जीवो रंहति ।। ७ ।।

।। इति तदन्तरप्रतिपत्त्यधिकरणम् ।। १ ।।

७०. कृतात्ययाधिकरणम् । (३-१-२) (सू.८-११)

[अधिकरणार्थः-सुकृतफलमनुभूय अमुष्माल्लोकात् निवर्तमानस्य भुक्तशेषेण कर्मणा सहैव जीवस्य प्रत्यवरोहः]

२९५. कृतात्ययेऽनुशयवान् दृष्ट-स्मृतिभ्यां यथेतमनेवं च । (३-१-८)

धूमादिना गतो, निवर्तमानो जीवः, सानुशयो निवर्तते? उत न इति संशयः। न- इति पूर्वः [4]पक्षः[4] । अनुशयो हि भुक्तशिष्टं कर्म । 'यावत्सम्पातमुषित्वा' । (छां.उ.५-१०-५) 'प्राप्यान्तं कर्मणः' (बृ.उ.६-४-६) इत्यादिश्रुतिभ्यः कृत्स्नस्य कर्मणः अनुभूतताप्रतीतेः, न अनुशयवान् निवर्तते ।

राद्धान्तस्तु - 'तद्य इह रमणीयचरणा अभ्याशो ह यत्ते रमणीयां योनिमापद्येरन् ब्राह्मणयोनिं वा क्षत्रिययोनिं वा वैश्ययोनिं वा अथ य इह कपूयचरणा अभ्याशो ह यत्ते कपूयां योनिमापद्येरन् श्वयोनिं वा सूकरयोनिं वा चण्डालयोनिं वा' (छां.उ.५-१०-७) इति रमणीयचरणा ब्राह्मणादियोनिं, कपूयचरणाः-कुत्सितकर्मणा श्वसूकरादियोनिं प्रतिपद्यन्त इति श्रुतेः, 'प्राप्यान्तं कर्मणः' (बृ.उ.६-४-६) इत्यादिश्रुतिः फलप्रदानप्रवृत्तकर्मविषयेति सानुशयो निवर्तते ।

---

१. जीवमापन्नस्य-क २. अनात्मवित्त्वेन-ख ३. त्वान्तदभिप्रायम्-ख ४. पक्षः । कुतः?-घ

सूत्रार्थस्तु - कृतात्यये कृतस्य पूर्वकर्मणः अत्ययेऽनुशयवान्-भुक्तशिष्टकर्मवान् निवर्तते ।

कुतः ? दृष्टस्मृतिभ्यां-श्रुतिस्मृतिभ्यामवगम्यते । 'तद्य इह [१]रमणीयचरणाः[१]' (छां.उ.५-१०-७) इत्यादिश्रुतिः । 'ततः परिवृत्तौ कर्मफलशेषेण जातिं रूपम्' (आप.गृ.२-१) इत्यादिका स्मृतिः । यथेतमनेवं च-आरोहणप्रकारेण प्रकारान्तरेण च निवर्तन्ते । चन्द्रमसः स्थानात् आकाशम् इत्यारोहणक्रमेण अवरोहन्ति । वायुधूमाभ्रादिना प्रकारान्तरेण च ।। ८ ।।

२९६. चरणादिति चेन्न, तदुपलक्षणार्थेति कार्ष्णाज़िनिः । (३-१-९)

'रमणीयचरणाः' (छां.उ.५-१०-७) इति रमणीयाचारस्य स्मृतिविहितस्य ब्राह्मण्यादि प्राप्तिसाधनत्वश्रवणात् न स कर्मा प्रत्यवरोहति इति चेत् - तन्न। चरणश्रुतिः कर्मोपलक्षणार्थेति - कार्ष्णाजिनिः आचार्यो मन्यते; पुण्यस्यैव कर्मणः सुखप्राप्तिसाधनत्वात् ।। ९ ।।

२९७. आनर्थक्यमिति चेन्न तदपेक्षत्वात् । (३-१-१०)

स्मृतिविहितस्य आचारस्याकिञ्चित्करत्वेन आनर्थक्यं प्रसज्यत इति चेत् - न । तदपेक्षत्वात् - आचारापेक्षत्वात् सुखसाधनभूतपुण्यकर्मणः । 'सन्ध्याहीनोऽशुचिर्नित्यमनर्हः सर्वकर्मसु' (द.स्मृ.२-२७) इति सर्वं हि पुण्यकर्म आचारापेक्षमेवेति कार्ष्णाजिनेः मतम् ।। १० ।।

२९८. सुकृत-दुष्कृत एवेति तु बादरिः । (३-१-११)

तुशब्दः पूर्वमतव्यावृत्त्यर्थः । 'रमणीयचरणाः ...... कपूयचरणाः' (छां.उ.५-१०-७) इति चरणशब्देन सुकृतदुष्कृते एव कर्मणी प्रतिपाद्येते । 'पुण्यं कर्माचरति' इति चरतेः कर्मणि प्रसिद्धेः, न लक्षणा न्याय्या - इति बादरिर्मन्यते । इदमेव सूत्रकाराभिप्रेतम् । तुशब्देन पूर्वमताद्व्यावृत्तेः । 'सुकृतदुष्कृते एव' (ब्र.सू.३-१-११) इति व्यावर्तनात् । 'आनर्थक्यमिति चेन्न तदपेक्षत्वात्' (ब्र.सू.३-१-१०) इति तु स्वीकृतम् ।। ११ ।।

।। इति कृतात्ययाधिकरणम् ।। २ ।।

---

१. अभ्याशो ह यत्ते रमणीयां योनिमापद्येरन्निति श्रुतिः इत्यधिकः पाठः-ख,घ

७१. अनिष्टादिकार्यधिकरणम् (३-१-१०) (सू.१२-२१)

[अधिकरणार्थः-केवलपापकारिणां चन्द्रारोहावरोहौ विनैव गतागती]

२९९. अनिष्टादिकारिणामपि च श्रुतम् । (३-१-१२)

विहिताकरणप्रतिषिद्धसेवारताः पापकर्माणोऽपि धूमादिना चन्द्रमसं गत्वा निवर्तन्ते ? उत न ? इति संशयः ।

गत्वैव निवर्तन्ते - इति पूर्वः [१]पक्षः[१] । 'ये वै के चास्माल्लोकात्प्रयन्ति चन्द्रमसमेव ते सर्वे गच्छन्ति' (कौषी.१-९) इति सर्वेषाम् अविशेषेण चन्द्रगमनश्रुतेः ।

राद्धान्तस्तु - 'अथ य इमे ग्रामे इष्टापूर्ते दत्तमित्युपासते ते धूममभिसम्भवन्ति' (छां.उ.५-१०-३) इति धूमादिना चन्द्रगमनस्य पुण्यकर्मफलत्वश्रवणात्, तद्रहिताः पापकर्मणो न [२]गच्छन्तीति[२], 'ये वै के च' (कौषी.उ.१-९) इति वचनं सर्वेषां पुण्यकर्मणां चन्द्रगमनविषयम् ।

सूत्रार्थस्तु - अनिष्टादिकारिणामपि च श्रुतम् । अनिष्टादिकारिणामपि इष्टापूर्ताद्यकुर्वतां पापिनामपि चन्द्रगमन[३]मस्ति[३], 'ये वैके च' । इति यतोऽविशेषेण श्रुतम् ।। १२ ।।

३००. संयमने त्वनुभूयेतरेषामारोहावरोहौ तद्गतिदर्शनात् । (३-१-१३)

इयांस्तु विशेषः । संयमने - यमशासने, पापफलमनुभूय इतरेषां - पापिनां, चन्द्रारोहावरोहौ । [४]कुतः ? तद्गति[४]दर्शनात् - पापिनां यमसदनगतिदर्शनात् । 'वैवस्वतं सङ्गमनं [५]जनानाम्[५]' (आरण्यक.२-१) इत्यादौ ।। १३ ।।

३०१. स्मरन्ति च । (३-१-१४)

'सर्वे चैते वशं यान्ति यमस्य भगवन् किल' (वि.पु.३-७-५) इति पराशरादयः स्मरन्ति च ।। १४ ।।

३०२. अपि सप्त । (३-१-१५)

सप्तापि-रौरवादयो लोकाः, पापिनां गन्तव्यत्वेन स्मर्यन्ते ।। १५ ।।

ननु सप्तसु लोकेषु गच्छतां कथं यमसदनप्राप्तिः ? इत्यत्र आह -

---

१. पक्षः । कुतः ?घ २. गच्छन्ति-ख,घ ३. मस्ति यतः-घ ४. तद्गति-ख ५. जनानाम् सम्भवतः-घ

३०३. तत्रापि तद्व्यापारादविरोधः । (३-१-१६)

सप्तस्वापि रौरवादिलोकेषु तद्व्यापारादेव गमनात् यमवश्यतायाः अविरोधः । अतः [1]पापिनामपि[1] यमयातनाश्च अनुभूय चन्द्रारोहावरोहौ अवर्जनीयौ ।। १६ ।।

इति प्राप्ते उच्यते -

३०४. विद्याकर्मणोरिति तु प्रकृतत्वात् । (३-१-१७)

तुशब्दः पक्षव्यावृत्त्यर्थः । न च पापकर्मणाम् अर्चिरादिना ब्रह्मगमनं, धूमादिना चन्द्रगमनं च सम्भवति । तयोः विद्याकर्मणोः फलत्वात् । कथमवगम्यते तत्फलत्वम्? इति प्रकृतत्वात् - इत्थम् प्रकृतत्वात् । विद्याकर्मणी हि प्रकृत्य तत्फलत्वेन गतिद्वयं प्रतिपाद्यते ।

'तद्य इत्थं विदुर्ये चेमेऽरण्ये श्रद्धा तप इत्युपासते तेऽर्चिषमभिसम्भवन्ति' (छां.उ.५-१०-१) इति, 'अथ य इमे ग्राम इष्टापूर्ते दत्तमित्युपासते ते धूममभि सम्भवन्ति' (छां.उ.५-१०-३) इति च । पापिनां विद्यारहितत्वेन ब्रह्मगमनाभाववत्, पुण्यकर्मरहितत्वेन चन्द्रगमनमपि न सम्भवतीत्यर्थः ।। २७ ।।

'पञ्चम्यामाहुतावापः पुरुषवचसो भवन्ति' (छां.उ.३-३-५) इति पञ्चमाहुत्या देहारम्भश्रवणात् तस्याः चन्द्रगमनपूर्वकत्वेन पापिनामपि देहारम्भाय चन्द्रगमनम् [2]अवश्यं[2] भवति इत्याशङ्क्याह -

३०५. न तृतीये तथोपलब्धेः । (३-१-१८)

केवलपापकर्माणः, तृतीयस्थानम् । न तृतीये स्थाने देहारम्भाय पञ्चमाहुत्यपेक्षाऽस्ति । तथोपलब्धेः, 'वेत्थ यथा केनासौ लोको न सम्पूर्यते' (छां.उ.५-३-३) इति द्युलोकस्य अप्राप्ता कः? इति प्रश्नस्य प्रतिवचने अथैतयोः पथोर्न कतरेण च तानीमानि क्षुद्राण्यसकृदावर्तीनि भूतानि भवन्ति, 'जायस्व म्रियस्वेत्येतत् तृतीयं स्थानं तेनासौ लोको न सम्पूर्यते' (छां.उ.५-१०-८) इति तृतीयस्थानस्य द्युलोकाप्राप्तिश्रवणात्, तस्य देहारम्भे पञ्चमाहुत्यनपेक्षत्वं हि उपलभ्यते ।। १८ ।।

---

१. पापिनाम्-घ २. अवश्यम् भावि-क,ख,घ

३०६. स्मर्यतेऽपि च लोके । (३-१-१९)

पुण्यकर्मणामपि केषांचित् द्रौपद्यादीनां देहारम्भे पञ्चमाहुत्यनपेक्षत्वं [1]शिष्टलोकेऽ[1]पि च [2]स्मर्यते[2] ।। १९ ।।

३०७. दर्शनाच्च । (३-१-२०)

श्रुतावपि दृश्यते, केषांचित् देहारम्भे पञ्चमाहुत्यनपेक्षत्वम् । 'तेषां खल्वेषां भूतानां त्रीण्येव बीजानि भवन्त्याण्डजं जीवजमुद्भिज्जञ्च' (छां.उ.६-३-१) इति । स्वेदजोद्भिज्जयोः देहारम्भे पञ्चमाहुत्यनपेक्षत्वम् ।

'आण्डजं जीवजमुद्भिज्जम्' (छां.उ.६-३-१) इत्यत्र स्वेदजस्य ग्रहणं न दृश्यते इत्याशङ्क्याह -

३०८. तृतीयशब्दावरोधः संशोकजस्य । (३-१-२१)

'आण्डजं जीवजमुद्भिज्जम्' (छां.उ.६-३-१) इत्यत्र तृतीयेन उद्भिज्जशब्देन संशोकजस्य - स्वेदजस्य अवरोधः संग्रह इत्यर्थः । अतः केवलपापकर्मणां चन्द्रारोहावरोहौ न सम्भवतः ।। २१ ।।

।। इति अनिष्टादिकार्यधिकरणम् ।। ३ ।।

७२. तत्स्वाभाव्यापत्त्यधिकरणम् । (३-१-४)

[अधिकरणार्थः-अवरोहतो जीवस्य 'यथेतमाकाशम्' इत्याद्युक्तम्
आकाशादिभावः, आकाशादिसादृश्यरूपः]

३०९. तत्स्वाभाव्यापत्तिरुपपत्तेः । (३-१-२२)

धूमादिना चन्द्रमसं प्राप्तस्य प्रत्यवरोहप्रकारः आम्नायते 'यथेतमाकाशम् आकाशाद्वायुः, वायुर्भूत्वा धूमो भवति, धूमो भूत्वा अभ्रं भवति, अभ्रं भूत्वा मेघो भवति, मेघो भूत्वा प्रवर्षति' (छां.उ.५-१०-५,६) इति ।

अत्र आकाशादिभावः, किं देवमनुष्यादिभाववत् आकाशादिशरीरत्वम्? उत तत्सादृश्यापत्तिः? इति संशयः ।

---

१. विशिष्टलोके च-घ २. उपलभ्यते-ख

आकाशादि शरीरत्वम् - इति पूर्वः [1]पक्षः[1] । [2]श्रद्धायाः[2] सोमराजभाववत्, तत्र हि तत्तच्छरीरत्वमेवोच्यते ।

राद्धान्तस्तु - आकाशादिप्राप्तौ सुखदुःखानुभवाभावात्, तत्सादृश्यापत्तिरेव । सुखदुःखानुभवाय हि सोमादिशरीरत्वम् ।

सूत्रार्थस्तु - तत्स्वाभाव्यापत्तिः-आकाशादिसादृश्यापत्तिः, उपपत्तेः सुखदुःखानुभवा-भावोपपत्तेः ।। २२ ।।

।। इति तत्स्वाभाव्यापत्त्यधिकरणम् ।। ४ ।।

७३. नातिचिराधिकरणम् । (३-१-५)

[अधिकरणार्थः-अवरोहतां जीवात्मनाम् आकाशादिषु स्थानेषु शीघ्रागतिः]

३१०. नाऽतिचिरेण विशेषात् । (३-१-१३)

आकाशवायुधूमाभ्रमेघवर्षप्राप्तौ, किं तत्र तत्र नातिचिरं तिष्ठति उत अनियमः ? इति संशयः ।

अनियमः - इति पूर्व[3]पक्षः[3], [4]नातिचिरेणेति विशेष[4]वचनाभावात् ।

राद्धान्तस्तु - उत्तरत्र व्रीह्यादिभावे 'अतो वै खलु दुर्निष्प्रपतरम्' (छां.उ.५-१०-६) इति विशिष्य चिरेण [5]गमनवचनं[5], ततः प्राचीनेषु अचिरगमनं द्योतयतीति आकाशादि यावद्व्रीह्यादिभावप्राप्ति नातिचिरं [6]तिष्ठति इति[6] । सूत्रमपि व्याख्यातम् ।

।। इति नातिचिराधिकरणम् ।। ५ ।।

७४. अन्याधिष्ठिताधिकरणम् । (३-१-६) (सू.२४-२७)

[अधिकरणार्थः-अवरोहतां जीवानाम्, 'त इह व्रीहियवा .... जायन्ते' इत्याद्युक्तः व्रीह्यादिभावः, तत्तत्संश्लेषमात्रम्, न व्रीह्यादिशरीरकं जन्म]

३११. अन्याधिष्ठिते पूर्ववदभिलापात् । (३-१-२४)

'अवरोहन्तो जीवा व्रीह्यादिभावेन जायन्ते' - इति श्रूयते - 'मेघो भूत्वा प्रवर्षति त इह व्रीहियवा ओषधिवनस्पतयः तिलमाषा इति जायन्ते' (छां.उ.५-१०-६) इति ।

---

१. पक्षः । कुतः ?-घ २. श्रद्धावस्थस्य-क,ग ३. पक्षः । कुतः ?-घ ४. विशेष-ख,घ ५. गमनं-घ
६. तिष्ठति-ख,घ

ते किं व्रीह्यादिशरीरा जायन्ते, उत अन्यैः क्षेत्रज्ञैः व्रीह्यादिशरीरैः अधिष्ठितान् व्रीह्यादीन् आश्लिष्यन्ति - इति संशयः । 'जायन्ते' इति वचनात् व्रीह्यादिशरीरभोक्तारो जायन्त एव इति पूर्वः पक्षः ।

राद्धान्तस्तु - व्रीह्यादिजन्महेतुभूतकर्मविशेषाश्रवणात् व्रीह्यादिसंश्लेषमात्रमेव । 'जायन्त' - इति जन्मवचनं, औपचारिकम् । ब्राह्मणादिशरीरभावे हि । 'रमणीयचरणाः......कपूयचरणाः' इति जन्महेतुभूतं, पुण्यपापरूपं कर्म श्रूयते ।

सूत्रार्थस्तु - अन्याधिष्ठिते - अन्यक्षेत्रज्ञाधिष्ठिते व्रीह्यादौ संश्लेषमात्रम् । कुतः ? पूर्ववदभिलापात्-आकाशादिभाववत् केवलव्रीह्यादिभावाभिलापात् । जन्महेतुभूत-कर्मानभि[१]लापात्[१] इत्यर्थः ।। २४ ।।

३१२. अशुद्धमिति चेन्न शब्दात् । (३-१-२५)

यद्यपि - व्रीह्यादिभावेन जायन्त इत्यत्र, [२]जन्महेतुभूतं कर्म[२] न श्रुतम्, तथापि पूर्वश्रुतम् इष्टादिकर्म, अग्नीषोमीयादिहिंसागर्भत्वेन अशुद्धं, हिंसात्वेनाशुचिव्रीह्यादिजन्मनोऽपि हेतुर्भवति इति चेत् -

न अहिंसात्वशब्दात् । पशोः हि संज्ञपनस्य स्वर्गावाप्ति[३]साधनभाव[३]वादिशब्दः श्रूयते - 'हिरण्यशरीर ऊर्ध्वः स्वर्ग लोकमेति' ।

'न वा उ वेतन्म्रियसे न रिष्यसि' (तै.सं.२-६-९,४९) इत्यादिः ।। २५ ।।

३१३. रेतस्सिग्योगोऽथ । (३-१-२६)

अथ - तदन्तरभावी, रेतस्सिग्योगः - अवरोहतां जीवानाम् अन्नेन संसृष्टानां रेतस्सिग्भिः देहिभिः सह उक्तः सम्बन्धः, यथा केवलं योगमात्रं, तथा व्रीह्यादियोगोऽपि सम्बन्धमात्रमेव ।

इतश्च, व्रीह्यादिसंश्लेषमात्रम् । व्रीह्यादिभावानन्तरं रेतः सिग्योगः श्रूयते -

'यो यो ह्यन्नमत्ति यो रेतः, सिञ्चति तद्भूय एव भवति' (छां.उ.५-१०-६) इति । अत्र हि [१]पुरुषसंश्लेषमात्रमेव श्रुतम्[१] । एवमेव व्रीह्यादिभावेऽपि इत्यर्थः ।। २६ ।।

१. कर्मानभिधानात्-ख,घ २. हेतुकमाश्रितम्-ख,घ ३. साधनभावादि-ख

३१४. योनेः शरीरम् । (३-१-२७)

योनिप्राप्तेः पश्चादेव अवरोहतो जीवस्य शरीरप्राप्तिः, तत्रैव सुखदुःखोपभोगात् । ततः प्राक् आकाशादिषु तत्तत्संश्लेषमात्रम् एव इत्यभिप्रायः ।। २७ ।।

।। इति अन्याधिष्ठिताधिकरणम् ।। ६ ।।

।। इति श्रीभगवद्रामानुजविरचिते वेदान्तदीपे तृतीयस्याध्यायस्य प्रथमः पादः ।।

द्वितीयः पादः - उभयलिङ्गपादः (अधि.८, सू.४०)

७७. सन्ध्याधिकरणम् । (३-२-१) (सू.१-६)

[अधिकरणार्थः-स्वाप्नानां जीवानुभाव्यानामर्थानाम् परमात्मसृष्टत्वम्]

३१५. सन्ध्ये सृष्टिराह हि । (३-२-१)

स्वप्नमधिकृत्य श्रूयते - 'न तत्र रथा न रथयोगा न पन्थानो भवन्ति' । 'अथ रथान् रथयोगान्पथः सृजते' (बृ.उ.६-३-१०) इत्यारभ्य 'अथ वेशान्तान् पुष्करिण्यः स्रवन्त्यः सृजते, स हि कर्ता' (बृ.उ.६-३-१०) इति ।

किं स्वाप्नानामर्थानां स्रष्टा जीव एव? उत परमात्मा? इति संशयः । स्वप्नदशो जीवस्य सन्निधानात् 'स हि कर्ता' इति स एव परामृश्यते, जीवस्यापि सत्यसङ्कल्पत्वं प्रजापतिवाक्योदितमिति, स एव स्रष्टा - इति पूर्वः पक्षः ।

राद्धान्तस्तु - जीवस्य सत्यसङ्कल्पत्वम् स्वाभाविकमपि, संसारदशायां परमपुरुष-सङ्कल्पात् तिरोहितमिति, न जीवस्य सत्यसङ्कल्पमात्रेण स्रष्टृत्वमुपपद्यते । अतः परमपुरुष एव सकलेतरपुरुषानुभवाविषयान् तत्तत्पुरुषमात्रानुभाव्यान् तत्तत्कालावसानान् स्वाप्नार्थान् सृजति ।

सूत्रार्थस्तु - सन्ध्ये - स्वप्ने श्रूयमाणा रथादि सृष्टिः, स्वप्नदशाजीवेन कृताः । कुतः ? आह हि - 'स हि कर्ता' इति प्रकृतस्य [2]तस्यैव परामर्शात्[2] इत्यर्थः ।। १ ।।

३१६. निर्मातारं चैके पुत्रादयश्च । (३-२-२)

---

१. संश्लेषमात्रमेव-ख २. तस्यैव-क,ग

एनमेव जीवं निर्मातारं स्वाप्नानामर्थानाम् एके शाखिनः अधीयते - 'य एषु सुप्तेषु जागर्ति कामं कामं पुरुषो निर्मिमाणः' (कठ.उ.५-८) इति । अत्र कामशब्दनिर्दिष्टः, काम्यमानतया पुत्रादय एव । चशब्दोऽवधारणे । अत्र हि, 'सर्वान् कामान्' (कठ.उ.१-२५) इति कामशब्देन प्रस्तुतान् 'शतायुषः पुत्रपौत्रान्वृणीष्व' (कठ.उ.१-२३) इति विविनक्ति ।। २ ।।

३१७. मायामात्रं तु कार्त्स्न्येनानभिव्यक्तस्वरूपत्वात् । (३-२-३)

तुशब्दात् पक्षो विपरिवर्तते । न जीवेन सृष्टं स्वाप्नमर्थजातम्, अपि तु पारमेश्वरमायामात्रम् । सकलेतरपुरुषानुभवाविषयं तदेकानुभाव्यं तत्कालावसानम् आश्चर्यरूपम् अर्थजातम् ईश्वरः सृजति इत्यर्थः । जीवस्य स्वतः सत्यसङ्कल्पत्वादेः कृत्स्नस्य संसारदशायाम् अनभिव्यक्तस्वरूपत्वात्, तस्य हि सङ्कल्पमात्रेण स्रष्टृत्वं नोपपद्यते । 'कामं कामं पुरुषो निर्मिमाणः' (कठ.उ.५-८) इति च परमपुरुषमेव निर्मातारमाह - 'य एषु सुप्तेषु जागर्ति । तस्मिन् लोकाश्रिताः सर्वे तदु नात्येति कश्चन' (कठ.उ.५-८) इति उपक्रमोपसंहारयोः परमपुरुषासाधारणधर्मप्रतीतेः । 'स हि' कर्ता इति च तेनैकार्थ्यात् परमपुरुषमेवाह ।। ३ ।।

स्वाभाविकं चेत् जीवस्य सत्यसङ्कल्पत्वादिकं, कथं न अभिव्यज्यते इत्याशङ्क्याह -

३१८. पराभिध्यानात्तु तिरोहितं ततो ह्यस्य बन्धविपर्ययौ । (३-२-४)

तुशब्दः शङ्कानिवृत्त्यर्थः । परमपुरुषाभिध्यानात् अस्य स्वाभाविकं रूपम् अनादिकर्मप्रवाहेण कृतापराधतया तिरोहितम् । ततो हि, अस्य बन्धविपर्ययौ - ततः परमपुरुषसङ्कल्पादेव हि, अस्य-जीवस्य बन्धविपर्ययौ संसारमोक्षौ श्रूयते - 'को ह्येवान्यात्कः प्राण्यात् यदेष आकाश आनन्दो न स्यात्, एष ह्येवानन्दयाति । परंज्योतिरुपसम्पद्य स्वेन रूपेणाभिनिष्पद्यते' (छां.उ.८-३-४) इत्यादौ ।। ४ ।।

तिरोधानप्रकारमाह -

३१९. देहयोगाद्वा सोऽपि । (३-२-५)

सोऽपि - [१]तिरोधानभावोऽपि[१], देहयोगाद्वा भवति । 'वा' शब्दो विकल्पार्थः व्यवस्थितश्च विकल्पः । देवमनुष्यादिदेहाकारपरिणताचिद्योगात् सृष्टिवेलायां, नामरूपविभागानर्हसूक्ष्मदशापन्नाचिद्योगेन प्रलयकाले ।। ५ ।।

३२०. सूचकश्च हि श्रुतिराचक्षते च तद्विदः । (३-२-६)

इतश्च स्वाप्नाः रथादयो न जीवसङ्कल्पकृताः । यतः स्वप्नः शुभाशुभयोः सूचकः इति श्रुतेरवगम्यते । 'यदा कर्मसु काम्येषु स्त्रियं स्वप्नेषु पश्यति । समृद्धिं तत्र जानीयात्तस्मिन्स्वप्ननिदर्शने'।। (छां.उ.५-२-९) अथ स्वप्ने पुरुषं कृष्णं कृष्णदन्तं (ऐ.आ.३-२-४) इत्यादिषु । स्वप्नाध्यायविदश्च आचक्षते, जीवसङ्कल्पकृतत्वे हि सूचकत्वं न सम्भवति । सत्यसङ्कल्पकृतत्वे हि शुभानामेव सूचकान् अर्थान् सृष्ट्वा तानेव पश्यति । अतः स्वाप्नानां अर्थानां परमपुरुष एव स्रष्टा ।। ६ ।।

।। इति सन्ध्याधिकरणम् ।। १ ।।

७६. तदभावाधिकरणम् (३-२-२) (सू.७,८)

[अधिकरणार्थः-जीवात्मनां सुषुप्तौ स्थानानि हिताख्य-नाडी-पुरीतत्-परमात्मानस्त्रयोऽपि]

३२१. तदभावो नाडीषु तच्छ्रुतेरात्मनि च (३-२-७)

नाड्यः पुरीतत् ब्रह्म च सुषुप्तिस्थानत्वेन श्रूयन्ते । किमेषां विकल्पः ? उत समुच्चयः ? इति संशयः ।

विकल्प इति पूर्वः [२]पक्षः[२] ।

'आसु तदा नाडीषु सुप्तो भवति' (छां.उ.८-६-३) 'ताभिः प्रत्यवसृप्य पुरीतति शेते' । (बृ.उ.४-१-१९) 'सता सोम्य तदा सम्पन्नो भवति' (छां.उ.६-८-१) इति त्रयाणां नैरपेक्ष्यप्रतीतेः ।

१. तिरोधानभावः-क,ग   २. पक्षः । कुतः?-घ

राद्धान्तस्तु - प्रासादखट्वापर्यङ्कवत् कार्यभेदेन समुच्चये सम्भवति, पाक्षिकबाध-गर्भविकल्पो न युक्त इति, समुच्चयो न्याय्यः । तत्र पर्यङ्कस्थानीयं ब्रह्म, यतः पर्यङ्कवत् ब्रह्म साक्षात् ब्रह्म सुषुप्तिस्थानम् ।

सूत्रार्थस्तु - तदभावः - स्वप्नाभावः, सुषुप्तिरित्यर्थः । सुषुप्तिः नाडीषु आत्मनि च, चकारात् पुरीतति च । तच्छ्रुतेः त्रयाणां सुषुप्तिस्थानत्वश्रुतेः ।

'उक्तेन न्यायेन समुच्चयो न्याय्यः' इत्यभिप्रायः ।। ७ ।।

३२२. अतः प्रबोधोऽस्मात् । (३-२-८)

अस्मात् - ब्रह्मणः प्रबोधश्रुतिः अत एवोपपद्यते 'स त आगम्य न विदुः स त आगच्छामहे' (छां.उ.६-१०-२) इति श्रूयते ।। ८ ।।

।। इति तदभावाधिकरणम् ।। २ ।।

७७. कर्मानुस्मृतिशब्दविध्यधिकरणम् (३-२-३)

[अधिकरणार्थः-जाग्रदवस्थातः सुषुप्तिदशां प्राप्त एव जीवः प्रबध्यते; नान्यः]

३२३. स एव तु कर्मानुस्मृतिशब्दविधिभ्यः । (३-२-९)

किं सुषुप्त एव प्रबोधकाले उत्तिष्ठति? स एव वा उत अन्यः वा इत्यनियमः? इति संशयः ।

सुषुप्तस्य सर्वोपाधिविनिर्मुक्तस्य ब्रह्मणि सम्पन्नस्य मुक्तात् [1]विलक्षणत्वेन[1] प्राचीन शरीरसम्बन्धाभावात् स एवेति नियमः न सम्भवति; इति पूर्वः पक्षः ।

सुषुप्तस्य (प्रारब्धकर्मासमापनात्) ब्रह्मज्ञानाभावेन पूर्वकृतस्य कर्मणः, तेनैव उपभोक्तव्यत्वात् सोऽहम् इति प्रत्यभिज्ञानात् -

'त इह व्याघ्रो वा सिंहो वा' (छां.उ.६-९-३) इत्यारभ्य, 'यद्यद्भवन्ति तदा भवन्ति' (छां.उ.६-१०-२) इति शब्दात्, मोक्षसाधनविध्यानर्थक्याच्च स एवोत्तिष्ठति - इति [2]राद्धान्तः[2] । न च असौ शरीरेन्द्रियसम्बन्धविनिर्मुक्तः अपि तु करणकलेबरप्रवर्तनायासात् आश्वासाय ब्रह्मण्यपीतः पुनराश्वस्तः प्रवर्तनाय उत्तिष्ठति । सूत्रमपि व्याख्यातम् ।।

।। इति कर्मानुस्मृतिशब्दविध्यधिकरणम् ।। ३ ।।

---

१. अविलक्षणत्वेन-क,ख,ग,घ २. सिद्धान्तः-घ

७८. मुग्धाधिकरणम् (३-२-४)

[अधिकरणार्थः-देहिनो मूर्च्छावस्था स्वरूपनिर्णयः]

३२४. मुग्धेऽर्धसम्पत्तिः परिशेषात् । (३-२-१०)

किं मूर्च्छा, मरणात् अर्थान्तरम्, [१]उत मरणमेव[१]? इति संशयः । सर्वेन्द्रिय प्राणव्यापारोपरतेः मरणमेव इति पूर्वः पक्षः ।

आकारवैरूप्येण सूक्ष्मप्राणास्तित्वावगतेः मरणाय अर्धसम्पत्तिः इति सिद्धान्तः ।

सूत्रार्थस्तु - मुग्धे-मूर्च्छिते पुरुषे या अवस्था सा मरणाय अर्द्धसम्पत्तिः ।

कुतः ? परिशेषात् प्राणादिसर्वव्यापारोपरतेः न जागराद्यवस्था न च गतप्राणाः, प्राकारवैलक्षण्येन सूक्ष्मप्राणास्तित्वावगतेः, मूर्च्छितस्यैव कस्यचित् पुनर्जीवनदर्शनाच्च न मरणमिति परिशेषात् न मरणायार्धसम्पत्तिः इत्यवगम्यते ।। १० ।।

।। इति मुग्धाधिकरणम् ।। ४ ।।

७९. उभयलिङ्गाधिकरणम् (३-२-५) (सू.११-२५)

[अधिकरणार्थः-सर्वत्रव्याप्तिमत्यपि ब्रह्मणि निखिलहेयप्रत्यनीकता समस्तकल्याणगुणाकरता च]

३२५. न स्थानतोऽपि परस्योभयलिङ्गं सर्वत्र हि (३-२-११)

किं जीवस्येव, तदन्तर्यामिणः परस्य ब्रह्मणोऽपि, जागरादिस्थानप्रयुक्तदोषाः सम्भवन्ति ? उत न ? इति संशयः । 'यः पृथिव्यां तिष्ठन्' (बृ.उ.५-७-३) 'य आत्मनि तिष्ठन्' (बृ.उ.५-७-२२) 'यश्चक्षुषि तिष्ठन्' (बृ.उ.५-७-१८) 'यो रेतसि तिष्ठन्' (बृ.उ.५-७-२३) इत्यादिना जीवस्येव सर्वावस्थास्ववस्थितिवचनात्, छन्दतोऽपि पूयशोणितादिमज्जनम् अपुरुषार्थ एवेति, सर्वे दोषाः सम्भवन्ति - इति पूर्वः पक्षः ।

राद्धान्तस्तु - 'अपहतपाप्मा विजरः' (छां.उ.८-१-५) 'निरवद्यं निरञ्जनम्' (श्वे.उ.६-११) 'सत्यकामः सत्यसङ्कल्पः' (छां.उ.८-१-५) 'यः सर्वज्ञः सर्ववित्' (मुं.उ.१-१-९) 'यो मामजमनादिं च वेत्ति लोकमहेश्वरम्' (भ.गी.१०-३) 'परः पराणां सकला न यत्र क्लेशादयः सन्ति परावरेशे' (वि.पु.६-५-८५) इत्यादिश्रुतिस्मृतिभ्यो

---

१. उत न-घ

निरस्तनिखिलदोषगन्धतासार्वज्ञ्यसत्यसङ्कल्पत्वाद्युभयलक्षणस्वरूपावगतेः, परस्य ब्रह्मणः सर्वत्रान्तर्यामितया अवस्थितस्यापि न दोषागन्धः सम्भवति । अपि तु सर्वनियमनरूपलीलारस एव ।

सूत्रार्थस्तु - न स्थानतोऽपि परस्य - पृथिव्यात्मादिषु अन्तर्यामितया[१]ऽवस्थितस्यापि[१] परस्य ब्रह्मणः [२]जीवस्य[२] तत्र तत्र अवस्थितस्य ये दोषा उक्ताः, ते न सम्भवन्ति कुतः ? उभयलिङ्गं सर्वत्र हि । [३]हि[३] हेतौ । यतः सर्वत्र श्रुतिस्मृतिषु निरस्तनिखिल[४]दोषत्व[४]-समस्तकल्याण[५]गुणात्मकत्व[५]रूपोभयलिङ्गम् - उभयलक्षणं परं ब्रह्म अवगतम् ।।

३२६. भेदादिति चेन्न ; प्रत्येकमतद्वचनात् । (३-२-१२)

यथा जीवस्य स्वतः अपहतपाप्मत्वादि[६]गुणकस्यापि[६], देवादिशरीरसम्बन्धितया अवस्थाभेदात् उक्तदोषसम्बन्धित्वम्, एवं परस्यापि 'यस्य पृथिवी शरीरम्' (बृ.उ.१-७-३) इत्यादि शरीरसम्बन्धित्वावस्थाभेदात् ते दोषा स्युः, इति चेत् - न । प्रत्येकं प्रतिपर्यायं, अतद्वचनात् - दोषासम्बन्धित्ववचनात्, 'यस्य पृथिवी शरीरम्' (बृ.उ.१-७-२२) इत्यादिषु, 'एष त आत्माऽन्तर्याम्यमृतः' (बृ.उ.५-७-७) (१-७-१८) इति अन्तर्यामिणो हि निर्दोषत्वमुच्यते । जीवस्य तु पराभिध्यानात् तत्स्वरूपं तिरोहितम् इत्युक्तम् । [७]अतः[७] शरीरसम्बन्धित्वेऽपि परस्य एते न दोषाः ।। १२ ।।

३२७. अपि चैवमेके । (३-२-१३)

अपि च-यदिदं जीवपरयोः एकस्मिन् शरीरे शरीरित्वेन अवस्थितयोः दोषसम्बन्धित्वं, तद्विपरीतत्वं च उक्तम्, एवम् एके शाखिनः स्वशब्देन [८]अभिधीयते[८]-

'द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते ।

तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्योऽभिचाकशीति' ।। (मुं.उ.३-१-१) इति ।। २३।।

---

१. अवस्थानतोऽपि-ख,घ २. अवस्थानतोऽपि जीवस्य-घ ३. हीति-ख,घ ४. दोषता-ख,घ ५. गुणात्मकता-ख,घ ६. गणाकरस्यापि-घ -गुणस्यापि-ख ७. अतश्शरीरसम्बन्धात् स एकधा भवति इत्यादिना मुग्धस्यानेकशरीरसम्बन्धविधानात् इत्यधिकः पाठः-ख ८. अधीयते-ख,घ

मनुष्यादिशरीरेषु शरीरित्वमेव, जीवस्य नामरूपभाक्त्वेन कर्मवश्यताहेतुः तत् परस्याऽपि अविशिष्टं चेत्, कथं परस्य ब्रह्मणः अकर्मवश्यत्वेन कर्मफलानशनमुच्यते इत्यत आह -

३२८. अरूपवदेव हि तत्प्रधानत्वात् । (३-२-१४)

मनुष्यादिशरीरेषु शरीरित्वेऽप्यरूपवदेव हि तत् परं ब्रह्म; कुतः ? प्रधानत्वात् - निर्वाहकत्वात् । जीवस्य नामरूपभाक्त्वेन कर्मफलाशनं निर्वोढुं, परस्य तत्तच्छरीरे शरीरित्वेन अवस्थानम् । यथाह - 'यस्य पृथिवी शरीरम्' (बृ.उ.५-७-७) 'यस्यात्मा शरीरम्' - 'य आत्मानमन्तरो यमयति' । (बृ.उ.मा.पा.५-७-२६) 'अन्तः प्रविष्टः शास्ता जनानां सर्वात्मा (तै.आर.३-११-३) आकाशो ह वै नामरूपयोर्निर्वहिता ते यदन्तरा तद्ब्रह्म' (छां.उ.८-१४-१) इति । अत उभयलिङ्गमेव हि परंब्रह्म ।। १४ ।।

'सत्यं ज्ञानमनन्तं ब्रह्म' (तै.आन.१-१) इति प्रकाशैकस्वरूपता ब्रह्मण उच्यते, कथम् उभयलिङ्गत्वम् इत्यत आह -

३२९. प्रकाशवच्चावैयर्थ्यात् । (३-२-१५)

यथा - 'सत्यं ज्ञानम् इति वाक्यावैयर्थ्यात् प्रकाशः', ब्रह्मणः स्वरूपम् इत्यवगम्यते तथा - 'यः सर्वज्ञः सर्ववित्' (मुं.उ.१-१-१०) 'पराऽस्य शक्तिर्विविधैव श्रूयते' (श्वे.उ.६-८) इत्यादिवाक्यावैयर्थ्यात्, कल्याणगुणाकरत्वं च ब्रह्मणः स्वरूपम् इत्यवगम्यते इति उभयलिङ्गमेव ।

३३०. आह च तन्मात्रम् । (३-२-१६)

'सत्यं ज्ञानम्' इति वाक्यं, 'ब्रह्मणो ज्ञानं स्वरूपम्' इत्येतावन्मात्रमाहुः, न पुनः कल्याणगुणाकरत्वं निषेधति ।। १६ ।।

३३१. दर्शयति चाथो अपि स्मर्यते । (३-२-१७)

---

१. दोषतां-ख,घ

दर्शयति च वेदान्तवाक्यगणः निरस्तनिखिल[१]दोषत्वं[१], कल्याणगुणाकरत्वं च - 'निष्कलं निष्क्रियं शान्तं निरवद्यं निरञ्जनम्' (श्वेउ.६-१९) 'तमीश्वराणां परमं महेश्वरं तं दैवतानां परमं च दैवतम्' (श्वे.उ.६-१) [१]इत्यादिकः[१] । स्मर्यते च - 'यो मामजमनादिं च वेत्ति लोकमहेश्वरम्' (भ.गी.१०-३) 'अहं कृत्स्नस्य जगतः प्रभवः प्रलयस्तथा । मत्तः परतरं नान्यत्' (भ.गी.७-६) इत्यादिषु ।। १७ ।।

३३२. अत एव चोपमा सूर्यकादिवत् । (३-२-१८)

यतः ब्रह्मणः निरस्तनिखिलदोषत्वकल्याणगुणाकरत्वेन उभयलिङ्गत्वात्, पृथिव्यादिस्थानतोऽपि, न तत्तत्प्रयुक्तदोष[२]गन्धसम्भवः[२] ।

अत एव शास्त्रेषु च 'जल[३]सूर्यकाद्यु[३]पमा' क्रियते । 'आकाशमेकं हि यथा घटादिषु पृथग्भवेत् । तथात्मैको ह्यनेकस्थो जलाधारेष्विवांशुमान्' । (या.स्मृ.१४९) इत्यादिषु ।। १८ ।।

३३३. अम्बुवदग्रहणात्तु न तथात्वम् । (३-२-१९)

तुशब्दः चोद्यं द्योतयति । अम्बुनीव अग्रहणात् । यथा - अम्बुनि सूर्यः तत्र अनवस्थित एव, भ्रान्त्या तत्र स्थित इव गृह्यते; न तथा परमात्मा, पृथिव्यादौ गृह्यते ।

'यः पृथिव्यां तिष्ठन् पृथिव्या अन्तरः' (बृ.उ.५-७-५) इति परमार्थतः स्थितो गृह्यते । अतः न तथात्वं - न सूर्यस्येव तत्प्रयुक्तदोषगन्धाभावः परमात्मनः । परमार्थतः स्थितत्वात् ।। १९ ।।

३३४. वृद्धिह्रासभाक्त्वमन्तर्भावादुभयसामञ्जस्यादेवं दर्शनाच्च । (३-२-२०)

पृथिव्यादिषु विषमेषु स्थानेषु स्थितस्यापि परमात्मनः तदन्तर्भावात् तत्रावस्थानतः तत्प्रयुक्तवृद्धिह्रासभाक्त्वम् ।

जलाधारेष्विवांशुमान् (या.स्मृ.प्रा.अ.१४४) इति दृष्टान्तेन निवर्त्यते ।

---

१. इत्यादिकाः-क,ख,ग २. गन्धभावः-ख ३. सूर्यकादिवत्-घ

कुतोऽवगम्यत एतावन्मात्रम्? इति । उभयसामञ्जस्यादेवम् - उभयदृष्टान्तोपादान-सामञ्जस्यादेवम् अवगम्यते ।

'आकाशमेकं हि यथा घटादिषु पृथग्भवेत्' (या.स्मृ.प्रा.अ.१४४) इति घटकरकादिषु विषमेषु अवस्थितम् आकाशम् 'जलाधारेष्विवांशुमान्' (या.स्मृ.प्रा.अ.१४४) इति च अंशुमन्तं परमार्थतः स्थितम् अनवस्थितं च उभयं दृष्टान्ततया उपादाय, 'तथात्मैकोऽप्यनेकस्थः' (या.स्मृ. प्र.अ.१४४) इति निगमनात् तत्तत्स्थानप्रयुक्तवृद्धिह्रासभाक्त्वनिवर्तनमात्रं विवक्षितम् इत्यवगम्यते । अन्यत्रापि दृष्टान्त-दार्ष्टान्तिकयोः सर्वसाम्याभावेऽपि 'सिंह इव माणवकः' इत्यादिषु दृष्टान्तोपादानदर्शनाच्च एवमवगम्यते ।। २० ।।

'अथात आदेशो नेति नेति' (बृ.उ.४-३-६) इत्यादिना पूर्वप्रकृतस्य मूर्तामूर्तप्रपञ्चस्य ब्रह्मणो रूपत्वप्रतिषेधात्, निष्प्रपञ्चं सन्मात्रमेव ब्रह्म; न पुनः उक्तस्वरूपम् उभयलिङ्गम् इत्याशङ्क्याह -

३३५. प्रकृतैतावत्त्वं हि प्रतिषेधति, ततो ब्रवीति च भूयः । (३-२-२१)

[1]हिः हेतौ[1] । 'द्वे वाव ब्रह्मणो रूपे मूर्तं चामूर्तमेव च' (बृ.उ.४-३-१) इत्यादिना स्थूलस्य सूक्ष्मस्य च प्रपञ्चस्य, ब्रह्मणो रूपतया प्रमाणान्तराप्रज्ञातस्य अत्रैव रूपतया उपदिष्टस्य, निषेधासम्भवात्, प्रकृतैतावत्त्वं हि ब्रह्मणः प्रतिषेधति पूर्वप्रकृतैतावन्मात्रं न भवति ब्रह्म इति हि 'अथात आदेशो नेति नेति' (बृ.उ.४-३-६) इत्यत्र प्रतिपाद्यते इत्यर्थः । ततो ब्रवीति च भूयः - ततः पूर्वोक्तात् भूयस्त्वं ब्रवीति च वाक्यशेषः, 'न ह्येतस्मादिति नेत्यन्यत्परमस्ति अथ नामधेयं सत्यस्य सत्यमिति प्राणा वै सत्यं तेषामेष सत्यम् इति' । (बृ.उ.४-३-६) इति न इति निर्दिष्टात् एतस्मात् ब्रह्मणोऽन्यत् न ह्यस्ति परब्रह्मणोऽन्यत् स्वरूपतो [2]गुणश्च[2] उत्कृष्टं न ह्यस्ति इत्यर्थः । 'सत्यस्य सत्यम्' (बृ.उ.४-३-६) इति ब्रह्मणो नामधेयम्; तस्य निर्वचनम् - 'प्राणा वै सत्यं तेषामेष सत्यम्' (बृ.उ.४-३-६) इति । प्राणसाहचर्यात्, जीवात्मनः - प्राणाः । ते हि वियदादिवत् अनुत्पाद्यत्वेन सत्यम् ।

---

१. हीति-ख,घ २. गुणैश्च-ख,ग,घ

तेभ्योऽपि एष सत्यम् । ते हि कर्मानुगुणदेहयोगेन जन्मवन्तः । तदपि अस्य नास्तीति तेषामेष सत्यं; ज्ञानसङ्कोचविकासरूपविकारस्यापि [1]असम्भवात्[1] । अतः प्रमाणान्तराप्रज्ञातस्वरूपस्य ब्रह्मणः मूर्तामूर्तप्रपञ्चप्रकारतया [2]उपदेशात्[2], पुनरपि प्रकारविशेषोपदेशाच्च 'अथात आदेशो नेति नेति' (बृ.उ.४-३-६) [3]इति पूर्वप्रकृतेयत्ता[3] ब्रह्मणः प्रतिषिध्यते इत्यर्थः ।। २१ ।।

ननु च वस्तुतः प्रत्यक्षेण निर्विशेषसन्मात्रमेव गृह्यते; तदतिरिक्तं भ्रान्त्या प्रतीयमानं सविशेषरूपमनूद्य, 'नेति नेति' इति निषिध्यते इत्यत्राह -

३३६. तदव्यक्तमाह हि । (३-२-२२)

ब्रह्मणः प्रमाणान्तराप्रज्ञाततां द्रढयति । तत् - ब्रह्म, न केनापि प्रमाणेन व्यक्तम् । तथा आह हि श्रुतिः - 'न सन्दृशे तिष्ठति रूपमस्य' (तै.ना.उ.१०) इत्यादिका ।। २२ ।।

३३७. अपि संराधने प्रत्यक्षानुमानाभ्याम् । (३-२-२३)

अपि च संराधने एव उपलभ्यते । संराधनं सम्यक् प्रीतियुक्तं भजनम् । उपासनमिति यावत् । उपासनरूपतत्प्रीणनेन विना, केनापि नोपलभ्यते इति, श्रुतिस्मृतिभ्याम् अवगम्यते ।

'नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन' (कठ.उ.२-२३) 'यमेवैष वृणुते तेन लभ्यः' (मुं.उ.३-२-३) 'नाहं वेदैर्न तपसा न दानेन न चेज्यया' (भ.गी.११-५३) 'भक्त्या त्वनन्यया शक्यः' (भ.गी.११-५४) इति हि श्रुतिस्मृती । अतः केनापि प्रमाणेन अनभिव्यक्तरूपत्वात् ब्रह्मणो 'द्वे वाव ब्रह्मणो रूपे' (बृ.उ.४-३-१६) इत्यादिना ब्रह्मणः प्रकारतया उपदिष्टं जगदैश्वर्यं, 'नेति नेति' इति न निषिध्यते, किन्तु प्रकृतेयत्तामात्रं तु निषिध्यते ।। २३ ।।

३३८. प्रकाशादिवच्चाऽवैशेष्यं प्रकाशश्च कर्मण्यभ्यासात् । (३-२-२४)

इतश्च ज्ञानानन्दवत् जगदैश्वर्यमपि ब्रह्मणो रूपम् । येषां वामदेवादीनां संराधनरूपकर्मणि अभ्यासात् प्रकाशश्च सञ्जातः । [4]दर्शनं[4] सञ्जातं; तेषां दर्शने प्रकाशादिवत् - ज्ञानादेरिव, जगदैश्वर्यस्यापि अवैशेष्यं प्रतीयते ।

---

१. अभावात्-ख,घ २. उभयलिङ्गमेव-ख,घ ३. प्रकृतेयताप्रमाणम्-घ ४. दर्शनञ्च-ख,घ

'तद्धैतत्पश्यन्नृषिर्वामदेवः । प्रतिपेदे अहं मनुरभवं सूर्यश्च' (बृ.उ.३-४-१०) इत्यादौ ।। २४ ।।

३३९. अतोऽनन्तेन तथा हि लिङ्गम् । (३-२-२५)

अतः अनन्तेन - कल्याणगुणेन योगो ब्रह्मणः सिद्धः । तथा सति उभयलिङ्गमेव ब्रह्म ।। २५ ।।

।। इति उभयलिङ्गाधिकरणम् ।। ५ ।।

८०. अहिकुण्डलाधिकरणम् (३-२-६) (सू.२६-२९)

[अधिकरणार्थः-अचिद्ब्रह्मणोरपि, चिद्ब्रह्मणोरिव अंशांशिभावः]

३४०. उभयव्यपदेशात्त्वहिकुण्डलवत् । (३-२-२६)

'द्वे वाव ब्रह्मणो रूपे' (बृ.उ.४-३-१) इत्यादिना उपदिष्टम् अचिद्वस्तुनो ब्रह्मस्वरूपत्वं, किं ब्रह्मस्वरूपस्यैव अचिद्रूपेण परिणामाद्भवति? उत परस्मिन् ब्रह्मणि अचिद्वस्तुनि च एकजातियोगात्? अथ जीववत् ब्रह्मशरीरतया ब्रह्मविशेषणत्वेन? इति संशयः ।

भिन्नाभिन्नत्वरूपोभयव्यपदेशोपपत्तये ब्रह्मैव अचिद्रूपेण परिणमते इति प्रथमः पक्षः ।

तथा [१]तु सति[१], ब्रह्मणो [२]निर्दोषत्वादिकं[२] बाध्येतेति एकजातियोगेन - इति द्वितीयः पक्षः।

एवं सति, 'आत्मैवेदं सर्वम्' । (छां.उ.७-२५-२) 'ब्रह्मैवेदं सर्वम्' (बृ.उ.४-५-१) इति ब्रह्मस्वरूपस्यैव सर्वशब्दवाच्यत्वव्यपदेशबाधः स्यात्, न ह्येकैव गोव्यक्तिः, 'खण्डो गौः, मुण्डो [३]गौः पूर्णशृङ्गो गौः[३]' इत्यादिसर्वगोव्यक्तिवाचकशब्दैः अभिधीयते, अतः [४]जीवस्येव[४] ब्रह्मशरीरतया ब्रह्मविशेषणत्वेन अचिद्वस्तुनोऽपि ब्रह्मांशत्वम् - इति राद्धान्तः ।

सूत्रार्थस्तु-तुशब्दः अवधारणे । अहेः कुण्डलभावादिवत् ब्रह्मस्वरूपस्यैव अचिद्रूपेणावस्थानम् । कुतः? नानात्वैकत्वरूपोभयव्यपदेशात् ।। २६ ।।

---

१. सति-ख,घ २. निर्दोषता-ख,घ ३. गौः-ख,घ ४. जीवस्यैव-ख

३४१. प्रकाशाश्रयवद्वा तेजस्त्वात् । (३-२-२७)

'वा'शब्दः अनन्तरोक्तव्यावृत्त्यर्थः । यथा - प्रकाशतदाश्रययोः तेजस्त्वेन एकजातियोगात् अभिन्नत्वं भिन्नत्वं च, एवम् अचिद्ब्रह्मणोरपि ।। २७ ।।

३४२. पूर्ववद्वा । (३-२-२८)

'वा'शब्दः पक्षद्वयव्यावृत्त्यर्थः । पूर्ववत् - यथा पूर्वत्र 'अंशो नानाव्यपदेशात्' (ब्र.सू.२-३-४२) 'प्रकाशादिवत्तु नैवं परः' (ब्र.सू.२-३-४५) इति उभयव्यपदेशोपपत्तये, ब्रह्मणो निर्दोषत्वसिद्धये च, प्रकाशजातिगुणशरीरवत्, पृथक्सिद्ध्यनर्हविशेषणतया, जीवस्य ब्रह्मांशत्वमुक्तम्; एवं अचिद्वस्तुनोऽपि । अचिद्वाचिशब्देनापि अचिद्वस्तुविशिष्टं ब्रह्मैवाभिधेयमिति, 'आत्मैवेदं सर्वम्' (छां.उ.७-२५-२) 'ब्रह्मैवेदं सर्वम्' (बृ.उ.४-५-१) इति अभेदव्यपदेशोपपत्तिः । विशेषणविशेष्ययोः स्वरूपस्वभावभेदज्ञापनाय, विशेषणविशेष्यौ निष्कृष्य भेदेन व्यपदेशश्च उपपद्यते ।

'क्षरं त्वविद्या ह्यमृतं तु विद्या विद्याविद्ये ईशते यस्तु सोऽन्यः' (श्वे.उ.५-१) इति ब्रह्मणो निर्दोषत्वं च ।। २८ ।।

३४३. प्रतिषेधाच्च । (३-२-२९)

'स वा एष महानज आत्माऽजरोऽमरः' । (बृ.उ.६-४-२५) 'नास्य जरयैतज्जीर्यति... विजरो विमृत्युः' (छां.उ.८-१-५) इत्यादिभिः ब्रह्मणः अचिद्धर्मप्रतिषेधाच्च विशेषणविशेष्यभावेनैव अंशांशिभावः इत्यर्थः ।। २९ ।।

।। इति अहिकुण्डलाधिकरणम् ।। ६ ।।

८१. पराधिकरणम् (३-२-७) (सू.३०-३६)

[अधिकरणार्थः-सर्वस्मात्परं परं ब्रह्मैव; न तु ततोऽपि परं किञ्चिदस्ति इति निर्णयः]

३४४. परमतस्सेतून्मानसम्बन्धभेदव्यपदेशेभ्यः । (३-२-३०)

'यतो वा इमानि' (तै.उ.भृ.१) इत्यादिना जगज्जन्मादिकारणतया निर्दिष्टात् परस्माद्ब्रह्मणोऽपि परं तत्त्वं, किञ्चिदस्ति न ? - इति संशयः । इतोऽपि परमस्ति इति पूर्वः [1]पक्षः[1] । 'अथ य आत्मा स सेतुः' (छां.उ.८-४-१) इति अस्य सेतुत्वव्यपदेशात्, 'एतं सेतुं

१. पक्षः । कुतः ?-घ

तीर्त्वा' (छां.उ.८-४-२) इति अस्य तरितव्यत्वोपदेशाच्च, इतोऽपि अन्यदप्यस्तीति गम्यते । 'चतुष्पाद्ब्रह्म' (छां.उ.३-२८-२) 'षोडशकलम्' (प्र.उ.६-१) इति परमितत्वव्यपदेशाच्च, अपरिमितम् अन्यदस्तीति प्रतीयते । 'अमृतस्यैष सेतुः' (मुं.उ.२-२-५) इति प्रापकत्वश्रुतेश्च अनेन प्राप्यम् अन्यदस्तीति प्राप्यप्रापकरूपसम्बन्धात् प्रतीयते । तथा, 'तेनेदं पूर्णं पुरुषेण सर्वं ततो यदुत्तरतरम्' (श्वे.उ.३-९,१०) इति पुरुषशब्दनिर्दिष्टात् ब्रह्मणः उत्तरतरत्वेन भेदव्यपदेशाच्च अन्यत् परमस्ति ।

राद्धान्तस्तु - 'न ह्येतस्मादिति नेत्यन्यत्परमस्ति' (बृ.उ.४-३-६) इति नेति निर्दिष्टात् मूर्तामूर्तरूपात् ब्रह्मणः अन्यत् परं नास्तीति परतत्वनिषेधात्, कारणाद्ब्रह्मणः अन्यत् परं नास्ति । सेतुत्वव्यपदेशस्तु 'एषां लोकानामसम्भेदाय (छां.उ.८-४-१) इति सर्वलोकासङ्करकरत्वकृतः 'एतं सेतुं तीर्त्वा' (छां.उ.८-४-२) इति तरतिरपि वेदान्तं तरति इतिवत् प्राप्तिवचनः ।

'चतुष्पाद्ब्रह्म' (छां.उ.३-१८-२) 'षोडशकलम्' (प्र.उ.६-१) इति उन्मानव्यपदेशोऽपि । 'वाक्पादः प्राणः पादश्चक्षुः पादः' । (छां.उ.३-१८-२) इतिवत् उपासनार्थः । सम्भवति च अपरिमितस्यापि तत्तद्देशसम्बन्धितया उन्मितत्वानुसन्धानम् । 'अमृतस्यैष सेतुः' (मुं.उ.२-२-५) इति स्वस्यैवामृतस्य स्वयमेव प्रापकमुच्यते 'यमेवैष वृणुते तेन लभ्यः' (मुं.उ.३-२-३) इत्यादिश्रुतेः ।

'ततो यदुत्तरतरम्' (श्वे.उ.३-२०) इत्यपि 'तेनेदं पूर्णम्' (श्वे.उ.३-९) इति निर्दिष्टात् पुरुषात् अन्यस्य न परत्वमाह अपि तु 'तमेवं विदित्वाऽति मृत्युमेति नान्यः [1]पन्था विद्यतेऽयनाय[1]' (श्वे.उ.३-८) इति पूर्वप्रतिज्ञातं पुरुषवेदनस्य अमृतत्वहेतुत्वम्, अन्यस्य च अपथत्वं सहेतुकमुपसंहरति । 'यस्मात्परं नापरमस्ति किञ्चित्' (श्वे.उ.३-९) इत्यारभ्य 'तेनेदं पर्णं पुरुषेण सर्वम्' (श्वे.उ.३-९) इति पुरुषस्य सर्वस्मात्परत्वम् ज्यायस्त्वं अन्यस्य च परत्वाभावं च प्रतिपाद्य, ततो हेतोः यदुत्तरतरं पुरुषतत्त्वं, तदेव अरूपम् अनामयम्, 'य एतद्विदुरमृतास्ते भवन्ति अथेतरे दुःखमेवापियन्ति' (श्वे.उ.३-१०) इति पूर्वप्रतिज्ञातमेव उपसंहतम् ।

---

१. ज्ञातमेवोपसंहतं इतरथा प्रतिज्ञा च अन्यथा उपसंहारश्च अन्यत्वेचि व्याकीर्णत च स्यात् । तत एव तथो यदन्तरतरं इति निर्दिष्टं पुरुषतत्त्वमेवेति उपसंहतं महान् प्रभव्यैः पुरुषः सत्त्वस्य एष प्रवृतः-ख,घ

सूत्रार्थस्तु - परमतः, 'जन्माद्यस्य यतः' इत्यारभ्य, 'अतोऽनन्तेन तथा हि लिङ्गम्' इत्यन्तेन प्रतिपादितात् निखिलजगदेककारणात् सर्वान्तरात्मनो निरस्तनिखिल-दोषगन्धानवधिकातिशयानन्तकल्याणगुणाकरात् परस्माद्ब्रह्मणः परमपि, किञ्चिदस्तीति कश्चित् मन्यते । कुतः ? सेतून्मानसम्बन्धभेदव्यपदेशेभ्यः व्याख्याताश्चैते ।। ३० ।।

३४५ सामान्यात्तु । (३-२-३१)

तुशब्दः पक्षं व्यावर्तयति । सेतुत्वव्यपदेशस्तावत् - तस्मात्परं नावगमयति । सेतुसामान्यात् - सादृश्यात् जगद्विधृतिरूपात् ब्रह्मणस्तथा व्यपदेश इति, श्रुतिरेव सेतुशब्दं व्याचष्टे - 'अथ य आत्मा स सेतुर्विधृतिरेषां लोकानामसम्भेदाय' (छां.उ.८-४-१) इति । यद्यत्स्वभावा लोकाः सृष्टाः तत्तत्स्वभावासङ्कराय, सर्वान् लोकान् अयमेव सेतुवत् बिभर्तीति सेतुः इत्यर्थः ।। ३१ ।।

३४६. बुद्ध्यर्थः पादवत् । (३-२-३२)

'चतुष्पाद्ब्रह्म' । (छां.उ.३-१८-२) 'पादोऽस्य विश्वाभूतानि' (पु.सू.३) इति उन्मानव्यपदेशः तथा अनुसन्धानार्थः । वाक्पादः - चक्षुःपादः (छां.उ.३-१८-२) इतिवत् ।

अपरिमितस्वरूपस्य अनुसन्धानार्थतयाऽपि कथं परिमितत्वम् इत्यत आह-

३४७. स्थानविशेषात् प्रकाशादिवत् । (३-२-३३)

प्रतिपन्नवागादिस्थानविशेषसम्बन्धात् तत्तत्स्थानसम्बन्धित्वेन अवच्छिद्यानुसन्धानं युज्यते यथा [1]प्रकाशाकाशादेः[1] विततस्यापि वातायनघटादौ ।। ३३ ।।

३४८. उपपत्तेश्च । (३-२-३४)

'अमृतस्यैष सेतुः' (मुं.उ.२-२-५) इति अमृतस्य स्वस्य स्वयमेव प्रापक इति, सेतुव्यपदेशोपपत्तेश्च अन्यत् परम् अस्ति इति कल्पनं, न युज्यते; 'नायमात्मा प्रवचनेन

---

१. प्रकाशादेः-ग,घ -वाक्याद इत्यादिना ब्रह्मणो वागादिव्यपदेशाद्वा बन्धः एवं अयमपि स्वयमनुमितस्य कथमुपासनस्थम् । अथापि उन्मानसम्भवः तत्राह प्रकाशादेः इत्यधिकः पाठः-ग

लभ्यः न मेधया न बहुना श्रुतेन यमेवैष वृणुते तेन लभ्यः । तस्यैष आत्मा विवृणुते तनूं स्वाम्' (मुं.उ.३-२-३) इति [१]श्रुतेः[१] ।। ३४ ।।

३४९. तथाऽन्यप्रतिषेधात् । (३-२-३५)

'तेनेदं पूर्णं पुरुषेण सर्वं' 'ततो यदुत्तरतरम्' (श्वे.उ.३-१०) इति पुरुषादन्यस्य न परत्वमाह -

'न तस्येशे कश्चन' (तै.ना.उ.१-९) 'न ह्येतस्मादिति नेत्यन्यत्परमस्ति' (बृ.उ.४-३-६) 'यस्मात्परं नापरमस्ति किञ्चित् यस्मान्नाणीयो न ज्यायोऽस्ति कश्चित्' (श्वे.उ.३-९) (यस्मादपरं परं नास्ति किञ्चित् इत्यर्थः।) एवमादिषु पुरुषादन्यस्य परत्वप्रतिषेधात् ।

'ततो यदुत्तरतरम्' (श्वे.उ.३-१०) इति तु यतः पुरुषतत्त्वमेवोत्तरतरं, ततो हेतोः यदुत्तरतरं पुरुषतत्त्वम् तदेव, 'अरूपमनामयम्' (श्वे.उ.३-१०) इत्यादिना व्याख्यातम् । 'य एतद्विदुरमृतास्ते भवन्ति' (श्वे.उ.३-१०) इति, 'तमेव विदित्वाऽतिमृत्युमेति, नान्यः पन्था विद्यतेऽयनाय' (श्वे.उ.३-८) इति प्रतिज्ञातमेव उपसंहृतम् । 'न तस्येशे कश्चन तस्य नाम महद्यशः' । (तै.ना.उ.१-९) इति च पुरुषतत्त्वमेव वदति । अनन्तरम् 'अद्भ्यः सम्भूतो हिरण्यगर्भ इत्यष्टौ' (तै.ना.उ.१-११) इति पुरुषतत्त्ववाचिना एकवाक्यत्वावगमात्, 'अम्भस्य पारे' (तै.ना.उ.१-१) 'यमन्तः समुद्रे कवयोवयन्ति' (तै.ना.उ.१-३) इति च प्रक्रमात् ।। ३५ ।।

३५०. अनेन सर्वगतत्त्वमायामशब्दादिभ्यः । (३-२-३६)

अनेन ब्रह्मणा, सर्वस्य व्याप्तत्वं 'तेनेदं पूर्णं पुरुषेण सर्वम्' (श्वे.उ.३-९) 'अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः' (तै.ना.११-२५) 'नित्यं विभुं सर्वगतं सुसूक्ष्मं तदव्ययं यद्भूतयोनिं परिपश्यन्ति धीराः' (मुं.उ.१-१-६) इति आयामशब्देभ्यः - सर्वव्याप्तिवाचिशब्देभ्यः अवगम्यते । एवं अवगम्यमानं, एतस्मात्परं वारयतीत्यर्थः । आदिशब्दात्, 'आत्मैवेदं सर्वम्' (छां.उ.७-२५-१) 'ब्रह्मैवेदं सर्वम्' इत्यादयो गृह्यन्ते । अतः 'यतो वा इमानि' (तै.भृ.१) इत्यादिना अवगतान्निमित्तोपादानजगत्कारणात् ब्रह्मणः अन्यत् परं न विद्यते ।। ३६ ।।

।। इति पराधिकरणम् ।। ७ ।।

---

१. श्रूयते-ग,घ -हि श्रूयते-ख

८२. फलाधिकरणम् (३-२-८) (सू.३७-४०)

[अधिकरणार्थः-ईश्वरस्यैव यागोपासनादिप्रीतस्य भोगापवर्गात्मक समस्तफलप्रदत्वम्; न केवलस्योपासनस्य]

३५१. फलमत उपपत्तेः । (३-२-३७)

किं वेदोदितं यागदानहोमादिकम् उपासनाख्यं च, 'यजेत', 'उपासीत' इति कामिनः, मुमुक्षोश्च, कर्तव्यतया श्रूयमाणं कर्मैव अपूर्वद्वारेण भोगापवर्गरूपफलदम्? उत तत्तदाराधनैः प्रीतः परमपुरुष एव फलदः? इति संशयः ।

कर्मैव - इति पूर्वः [१]पक्षः[१]; लोके मर्दनादेः कृष्यादेश्च कर्मण एव साक्षात्परम्परया वा फलप्रदत्वदर्शनात् । वेदे च, 'यजेत स्वर्गकामः' (तै.सं.२-५-५) 'आत्मानमेव लोकमुपासीत' (बृ.उ.३-४-१५) इति कामिनः मुमुक्षोश्च कर्तव्यतया श्रूयमाणं कर्म, तत्तत्फलसाधनतया अवगतं क्षणिकमपि अपूर्वद्वारेण भोगापवर्गरूपसर्वफलदम् ।

राद्धान्तस्तु-कर्तव्यतया अवगतस्य यागादेः उपासनस्य च 'यज देवपूजायाम्' (पा.धा.१००२) इत्यादिना अवगतधात्वर्थस्वाभाव्यात्, 'वायुमेव स्वेन भागधेयेनोपधावति स एवैनं भूतिं गमयति' (तै.सं.२-१-१) इति वाक्यशेषाच्च, 'इष्टापूर्तं बहुधा जातं जायमानं विश्वं बिभर्ति भुवनस्य नाभिः तदेवाग्निस्तद्वायुस्तत्सूर्यस्तदु चन्द्रमाः' । (तै.ना.उ.१-६) 'स तया श्रद्धया युक्तस्तस्याराधनमीहते । लभते च ततः कामान्मयैव विहितान् हि तान्' । (भ.गी.७-२२) । 'अहं हि सर्वयज्ञानां भोक्ता च प्रभुरेव च' (भ.गी.९-२४) । 'स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दति मानवः' । (भ.गी.१८-४६) 'तत्प्रसादात्परां शान्तिं स्थानं प्राप्स्यसि शाश्वतम्' (भ.गी.१८-६२) इत्यादिश्रुतिस्मृतिभ्यश्च परमपुरुष एव कर्मभिः उपासनेन च आराधितः भोगापवर्गरूपफलप्रदः । लोके च - कृष्यादिकर्मभिः सस्यादिकम् उत्पाद्य, तेन भृत्यद्वारेण, साक्षाद्वा राजानम् अभ्यर्च्य, ततः एवापेक्षितानि लभन्ते । अतः परमपुरुष एव फलप्रदः ।

सूत्रार्थस्तु - फलमत उपपत्तेः । अतः परस्मात् ब्रह्मण एव, कर्मभिः उपासनेन च आराधितात् भोगापवर्गरूपफलम् । कुतः? उपपत्तेः । कर्मभिर्हि क्षणध्वंसिभिः न

---

१. पक्षः । कुतः?-घ

कालान्तरभाविफलायालम् । स हि सर्वज्ञः सर्वशक्तिः, परमकारुणिकः महोदारः, अनादिः, अनन्तश्च सर्वेश्वरः, स्वाराधनरूपेण कर्मणा आराधितः फलप्रदः इत्युपपद्यते ।। ३७ ।।

३५२. श्रुतत्वाच्च । (३-२-३८)

'स वा एष महानज आत्माऽन्नादो वसुदानः' (बृ.उ.६-४-२४) 'एष ह्येवानन्दयाति' (तै.उ.आन.७-१) इति भोगापवर्गरूपं फलम् अयमेव ददाति इति हि श्रूयते ।। ३८ ।।

३५३. धर्मं जैमिनिरत एव । (३-२-३९)

यागादिकम् उपासनात्मकं च धर्ममेव फलप्रदं, - जैमिनिराचार्यो मन्यते ।

अत एव 'उपपत्तेः श्रुतत्वाच्च' इत्यर्थः । लोके कृष्यादेः मर्दनादेश्च कर्मण एव, साक्षात् परम्परया वा फलप्रदायित्वदर्शनात्, वेदेऽपि तथैव युक्तम् इत्युपपत्तिः । उपपद्यते च अपूर्वद्वारेण साधनत्वम् ।

'यजेत स्वर्गकामः' (तै.सं.२-५-५) 'ब्रह्मविदाप्नोति परम्' (तै.उ.आन.१-१) इति कामिनः कर्तव्यतया कर्मविधानान्यथाऽनुपपत्त्या, कर्मैव अपूर्वद्वारेण फलसाधनम् - इति अवगम्यते ।। ३९ ।।

३५४. पूर्वं तु बादरायणो हेतुव्यपदेशात् । (३-२-४०)

तुशब्दः, पक्षव्यावृत्त्यर्थः । पूर्वोक्तं परमपुरुषस्यैव फलप्रदत्वं, भगवान् बादरायणो मन्यते । कुतः ? हेतुव्यपदेशात् । 'वायुमेव स्वेन भागधेयेनोपधावति स एवैनं भूतिं गमयति' (तै.सं.२-१-१) इति वाय्वाद्यात्मना अवस्थितस्य परमपुरुषस्यैव, फलप्रदत्वव्यपदेशात् 'यो वायौ तिष्ठन्' (बृ.उ.५-७-११) इति च वाय्वाद्यात्मना स एव व्यवस्थितः इति श्रूयते । तदेवाग्निस्तद्वायुस्तत्सूर्यस्तदु चन्द्रमाः इति च । तत्परित्यागेन अपूर्वस्य फलसाधनत्वकल्पने, श्रुतहानम् अश्रुतकल्पनं च । विध्यपेक्षितफलसाधनत्वप्रकारे वाक्यशेषेण अवगते सति, न फलसाधनत्वप्रकारकल्पनं न्याय्यम् । यथैव हि रात्रिसत्रादिषु अधिकारी न कल्प्यते - इत्यर्थः ।। ४० ।।

।। इति फलाधिकरणम् ।। ८ ।।

।। इति श्रीभगवद्रामानुजविरचिते वेदान्तदीपे तृतीयाध्यायस्य द्वितीयः पादः ।।

तृतीयः पादः - गुणपसंहारपादः । (अधि.२६, सू.६४)

८३. सर्ववेदान्तप्रत्ययाधिकरणम् (३-३-१) (सू.१-५)

[अधिकरणार्थः-विद्याविधिस्वरूपाणामविशिष्टत्वे, वैश्वानरविद्यादयः सर्ववेदान्तगता अपि, न भिद्यन्ते]

३५५. सर्ववेदान्तप्रत्ययं चोदनाद्यविशेषात् । (३-३-१)

किं सर्वेषु वेदान्तेषु श्रूयमाणा दहरादिविद्या एका एव? उत विद्यान्तरम्? इति संशयः । अविशेषपुनःश्रवणस्य, प्रकरणान्तरस्य च विद्याभेदहेतुत्वात् विद्यान्तरम् - इति पूर्वः पक्षः । चोदनाफलसंयोगरूपाख्यानाम् अविशेषात्, प्रतिपत्तृभेदेन पुनः श्रवणोपपत्तेः, तत एव प्रकरणान्तरत्वाभावाच्च, विद्यैक्यम् - इति राद्धान्तः । विद्यासु गुणोपसंहारादिचिन्तार्थं शाखान्तराधिकरणोक्तन्यायः तत्फलं च स्थिरीकृतम् ।

सूत्रार्थस्तु - सर्ववेदान्तप्रत्ययं एकं दहराद्युपासनम् । कुतः? चोदनाद्य - विशेषात् ।। १ ।।

३५६. भेदान्नेति चेदेकस्यामपि । (३-३-२)

अविशेषपुनश्श्रुत्या विद्याभेदावगमान्न विद्यैक्यमिति चेत्; एकस्यामपि विद्यायां शाखान्तरे, प्रतिपत्तृभेदात् पुनश्श्रवणम् अर्थवदिति, न विद्याभेदः ।। २ ।।

'तेषामेवैतां ब्रह्मविद्यां वदेत शिरोव्रतं विधिवद्यैस्तु चीर्णम्' (मुं.उ.३-२-१०) इति आथर्वणिकानां शिरोव्रतस्य, विद्योपदेशाङ्गत्वनियमदर्शनं, विद्याभेदं द्योतयति । विद्यैक्ये हि आथर्वणिकानामेवेति नियमो न उपपद्यते इत्याशङ्क्याह -

३५७. स्वाध्यायस्य तथात्वे हि समाचारेऽधिकाराच्च सववच्च तन्नियमः (३-३-३)

शिरोव्रतं न विद्याङ्गम् अपि तु स्वाध्यायस्य । तथात्वे हि स्वाध्यायस्य तज्जन्य-संस्कारभाक्त्वे हि तन्नियमः 'नैतदचीर्णव्रतोऽधीयीत' (मुं.उ.३-२-११) इत्यध्ययनसम्बन्धात् । समाचाराख्ये ग्रन्थे, इदमपि वेदव्रतत्वेन व्याख्यातमिति, वेदव्रतत्वावगमाच्च ।

'ब्रह्मविद्यां वदेत' (मुं.उ.३-२-१०) वेदविद्यामित्यर्थः । सववच्च तन्नियमः । यथा हि-सवहोमाः सप्तसूर्यादयः शतौदनपर्यन्ता आथर्वणिकैकाग्निसम्बन्धिनः तत्रैव भवन्ति तथा इदमपि अथर्वणवेदसम्बन्धित्वेन तत्रैव भवति ।। ३ ।।

३५८. दर्शयति च । (३-३-४)

दर्शयति च श्रुतिः उपासनस्य सर्ववेदान्तप्रत्ययत्वम् । छान्दोग्ये दहरविद्यायाम् -

'तस्मिन् यदन्तः' (छां.उ.८-१-१) इति विहितम् अपहतपाप्मत्वादिगुणाष्टकं, तैत्तिरीयके केवलं 'तस्मिन् यदन्तस्तदुपासितव्यम्' (तै.ना.१२) इत्येवोक्तम् । तत् उभयत्र विद्यैकत्वे सम्भवति ।। ४ ।।

३७९. उपसंहारोऽर्थाभेदाद्विधिशेषवत्समाने च । (३-३-५)

तदेवं सर्ववेदान्तेषु दहराद्युपासने समाने-एकस्मिन् सति, तत्तदुपासने वेदान्तान्तरविहितस्य गुणस्य, वेदान्तान्तरे च उपसंहारः कर्तव्यः ।

कुतः ? अर्थाभेदात् - तद्विद्याङ्गत्वेन तदुपकाराभेदात् । विधिशेषवत् - यथा एकस्मिन् वेदान्ते वैश्वानरविद्यादिविधिशेषतया विहितस्य गुणस्य, तदुपकाराय उपसंहारः तथा वेदान्तान्तरेऽपि तद्विद्याङ्गत्वाविशेषात् उपसंहारो न्याय्यः ।।

।। इति सर्ववेदान्तप्रत्ययाधिकरणम् ।। १ ।।

८४. अन्यथात्वाधिकरणम् (३-३-२) (सू.६-९)

[अधिकरणार्थः-छान्दोग्य-वाजसनेयकगतयोः उद्गीथविद्ययोः नानात्वमेव]

३६०. अन्यथात्वं शब्दादिति चेन्नाऽविशेषात् । (३-३-६)

अस्ति हि उद्गीथविद्या, वाजिनां छन्दोगानां च ।

वाजिनां तावत् - 'हन्तासुरान् यज्ञ उद्गीथेनात्ययाम' (बृ.उ.३-३-१) इत्यारभ्य, उद्गीथे प्राणदृष्ट्या उपासनं शत्रुपरिभवफलं विहितम् । छन्दोगानामपि 'तद्ध देवा उद्गीथमाजह्रुरनेनैनानभिहनिष्यामः' (छां.उ.१-२-१) इत्यारभ्य, उद्गीथे प्राणदृष्ट्या उपासनमेव शत्रुपरिभवफलम् उक्तम् । किम् उभयत्र विद्यैक्यम्? उत विद्याभेदः? इति संशयः । चोदनाद्यविशेषात् विद्यैक्यम् - इति पूर्वः पक्षः ।

राद्धान्तस्तु - यद्यपि उभयत्र उद्गीथे प्राणदृष्ट्या उपासनम् अविशिष्टम् उक्तम्; तथापि - छन्दोगानाम् 'ओमित्येतदक्षरमुद्गीथमुपासीत' (छां.उ.१-१-१) इति प्रकृत्य, 'उद्गीथमाजह्रुरनेनैनानभिहनिष्यामः' (छां.उ.१-२-१) इति उद्गीथावयवे प्रणवे प्राणदृष्ट्या उपासनमुक्तम् । वाजिनां तु, 'हन्तासुरान् यज्ञ उद्गीथेनात्ययाम' (बृ.उ.३-३-१) इत्युपक्रमात्, अविशेषेण कृत्स्नोद्गीथे प्राणदृष्ट्या उपासनमुक्तम् ।

'अथ ह य एवायं मुख्यः प्राणः तमुद्गीथमुपासाञ्चक्रिरे' (छां.उ.१-२-७) इति छन्दोगानाम् उद्गानकर्मणि उद्गीथावयवे प्रणवे, प्राणदृष्टिविधानात् । वाजिनां तु, 'अथ हेममासन्यं प्राणमूचुः त्वम् उद्गायेति तथेति तेभ्य एष प्राण उद्गायत्' (बृ.उ.३-३-७) इति कृत्स्नोद्गीथस्य कर्तरि, प्राणदृष्टिविधानाच्च उभयत्र रूपभेदात् विद्याभेदः इति ।

सूत्रार्थस्तु - अन्यथात्वम् शब्दादिति चेत् इति, राद्धान्तच्छायया परिचोद्य 'न अविशेषात्' इति पूर्वपक्षी परिहरति ।

'अथ ह य एवायं मुख्यः प्राणस्तमुद्गीथमुपासाञ्चक्रिरे' (छां.उ.१-२-७) 'अथ हेममासन्यं प्राणमूचुस्त्वं न उद्गायेति तथेति तेभ्य एष प्राण उदगायत्' (बृ.उ.३-३-७) इति एकत्र उद्गीथे प्राणदृष्टिशब्दात् इतरत्र उद्गातरि प्राणदृष्टिशब्दाच्च, रूपान्यथात्वम् इति चेत्, न रूपभेदः । कुतः ? अविशेषात् - उपक्रमे हि अविशेषेण 'उद्गीथेनात्ययाम' (बृ.उ.३-१-१) 'उद्गीथमाजह्रुरनेनैनानाऽभिहनिष्यामः' (छां.उ.१-२-१) इति उद्गीथस्यैव उपास्यत्वप्रतीतेः 'त्वं न उद्गायेति तथेति तेभ्य एष प्राण उदगायत्' (बृ.उ.३-३-७) इति कर्मण्येव उद्गीथे कर्तृत्वम् उपचर्यते इति युक्तम् । अन्यथा उपक्रमविरोधः स्यात् ।। ६ ।।

३६१. न वा प्रकरणभेदात् परोवरीयस्त्वादिवत् । (३-३-७)

न चैतदस्ति । यत् रूपैक्यात् विद्यैक्यम् इति । कुतः ? प्रकरणभेदात् । छान्दोग्ये हि, 'ओमित्येतदक्षरमुद्गीथमुपासीत' (छां.उ.१-१-१) इति उद्गीथावयवभूतं प्रणवम् उपास्यं प्रकृत्य, 'उद्गीथमाजह्रुः' (छां.उ.१-२-१) इति वचनात् उद्गीथावयवभूतः प्रणव एव उद्गीथशब्देनोच्यत इति गम्यते । वाजसनेयके तु अविशेषेण 'उद्गीथेनात्ययाम' (बृ.उ.३-३-१) इत्युपक्रमात्, कृत्स्नोद्गीथः उपास्यः प्रकृतः । अत उद्गीथे प्राणदृष्ट्य-विशेषेऽपि, रूपभेदात् विद्याभेदः । परोवरीयस्त्वादिवत् - यथा एकस्यामपि शाखायाम् उद्गीथावयवभूते प्रणवे परमात्मदृष्टिविधानसाम्येऽपि हिरण्मयपुरुषदृष्टिविधानात्, परोवरीयस्त्वादिगुणविशिष्टदृष्टिविधानम् अर्थान्तरमिति रूपभेदः, तद्वत् अत्रापि । एवं प्रकरणभेदेन उपक्रम एव एकत्र उद्गीथावयवविषयत्वेन, अन्यत्र कृत्स्नोद्गीथविषयत्वेन च उपासनभेदे सिद्धे सति, उपसंहारस्थं कर्मविषयं कर्तृविषयं च प्राणदृष्टिविधानं, यथाश्रुतम् अवतिष्ठत इत्यभिप्रायः ।। ७ ।।

३६२. संज्ञातश्चेत्तदुक्तमस्ति तु तदपि । (३-३-८)

'उद्गीथविद्या' इति संज्ञैक्यात्, तद्विधेयैक्यम् उक्तं चेत् - तत् - संज्ञैक्यं विधेयभेदेऽपि अस्ति तु - अस्त्येवेत्यर्थः । यथा नित्याग्निहोत्रे, कुण्डपायिनामयनाग्निहोत्रे च । यथा च छान्दोग्ये, प्रथमप्रपाठकोदितासु बह्वीषु विद्यासु 'उद्गीथविद्या' इति संज्ञैक्यम् ।। ८ ।।

३६३. व्याप्तेश्च समञ्जसम् । (३-३-९)

प्रथमप्रपाठके उपक्रमवत्, उत्तरास्वपि उद्गीथविद्यासु उद्गीथावयवस्य प्रणवस्यैव उपास्यत्वव्याप्तेः, मध्यगतस्य 'तद्ध देवा उद्गीथमाजह्रुः'। (छां.उ.१-२-१) इति उद्गीथशब्दस्यापि प्रणवविषयत्वं एव समञ्जसम् ।। ९ ।।

।। इति अन्यथात्वाधिकरणम् ।। २ ।।

८५. सर्वाभेदाधिकरणम् (३-३-३)

[अधिकरणार्थः-छान्दोग्य-वाजसनेयगतप्राणविद्ययोः कौषीतकीप्राणविद्यायाः न नानात्वम्, प्रकाराभेदात्]

३६४. सर्वाभेदादन्यत्रेमे । (३-३-१०)

'यो ह वै ज्येष्ठं च श्रेष्ठं च वेद ज्येष्ठश्च ह वै श्रेष्ठश्च भवति प्राणो वाव ज्येष्ठश्च श्रेष्ठश्च' (छां.उ.५-१-१) इति छन्दोगानां, वाजिनां, कौषीतकीनां च प्राणविद्या आम्नाता । तत्र छान्दोग्यवाजसनेयकयोः सर्वस्य ऐकरूप्यात्, प्राणविद्या एकैव । कौषीतकीप्राणविद्यायाः तस्याश्च भेदोऽस्ति? उत न? इति संशयः ।

अस्ति भेदः इति पूर्वः [१]पक्षः[१] । यद्यपि - सर्वत्र ज्यैष्ठ्यश्रैष्ठ्यगुणकः [२]प्राण[२] एव उपास्यः, तथापि [३]छन्दोगवाजिनां[३] ज्यैष्ठ्यश्रैष्ठ्यगुणकस्य, प्राणस्य वागादिगतवसिष्ठत्वादि गुणसम्बन्धित्वमपि, शब्दादेव प्रतीयते । कौषीतकीनां तु, न तथा - इति रूपभेदात् विद्याभेदः ।

राद्धान्तस्तु - यद्यपि कौषीतकीप्राणविद्यायां वागादिगतवसिष्ठत्वादिसम्बन्धित्वं प्राणस्य न शब्दाभिहितं, तथापि-तत्रापि प्राणस्य ज्यैष्ठ्यश्रैष्ठ्योपपादनं, वागादीनां स्थितेः

१. पक्षः । कुतः?-घ २. एक-ख,घ ३. वाजसनेयिनां-ख,घ

तत्तत्कार्यस्य च प्राणाधीनत्वेन इत्येतत् अविशिष्टमिति, वागादिगतवसिष्ठत्वादेरपि, प्राणहेतुकत्वानुसन्धानेन विना, प्राणस्य ज्यैष्ठ्यश्रैष्ठ्यानुसन्धानम् अनुपपन्नमिति, कौषीतकी-प्राणविद्यायामपि वागादिगतवसिष्ठत्वादिसम्बन्ध्येव प्राणः उपास्यः इति, रूपाभेदात् विद्यैक्यम्।

सूत्रार्थस्तु - अन्यत्र कौषीतकीप्राणविद्यायाम् इमे वसिष्ठत्वादयः सन्त्येव । कुतः? सर्वाभेदात् - प्राणज्यैष्ठ्यश्रैष्ठ्योपपादनप्रकारस्य, तत्राप्यभेदात् । वागादीनां स्थितेः, कार्यस्य च प्राणहेतुत्वेन हि! प्राणस्य ज्यैष्ठ्यं श्रैष्ठ्यं च अत्रापि उपपादितम् । अतः वागादिगतकार्यसामर्थ्यापादनरूपवसिष्ठत्वादिसम्बन्धित्वं प्राणस्य अत्रापि उक्तमेवेत्यर्थः ।। १० ।।

।। इति सर्वाभेदाधिकरणम् ।। ३ ।।

८६. आनन्दाद्यधिकरणम् । (३-३-४) (सू.११-१७)

[अधिकरणार्थः-आनन्दादि ब्रह्मगुणानां सर्वासु परविद्यासु उपसंहारः]

३६५. आनन्दादयः प्रधानस्य । (३-३-११)

सत्यज्ञानानन्दामलत्वानन्तत्वरूपाः ब्रह्मस्वरूपनिरूपकगुणाः सर्वासु परविद्यासु उपसंहर्तव्याः? उत न? इति संशयः ।

नोपसंहर्तव्याः - इति पूर्वः [१]पक्षः[१] । अप्रकरणाधीतानाम् उपसंहारे प्रमाणाभावात्, ब्रह्मगुणानां असंख्येयत्वेन उपसंहाराशक्तेश्च ।

राद्धान्तस्तु - ज्ञानानन्दादीनां ब्रह्मस्वरूपनिरूपकगुणत्वेन, तैर्विना ब्रह्मस्वरूपानु-सन्धानानुपपत्तेः, सर्वासु उपसंहर्तव्या इति ।

सूत्रार्थस्तु - 'सर्वाभेदात्' - इत्यतः अभेदात् इति वर्तते । आनन्दादयो गुणाः सर्वासु [२]उपसंहर्तव्याः[२]; प्रधानस्य गुणिनो ब्रह्मणः, सर्वासु विद्यासु अभेदात् । सर्वासु परविद्यासु ब्रह्म एकमेवामनुसन्धेयं चेत्, यैः गुणैः विना ब्रह्मस्वरूपानुसन्धानम् अशक्यं, ते च ज्ञानानन्दादयो अनुसन्धेयाः इत्यर्थः ।। ११ ।।

---

१. पक्षः । कुतः?-घ २. उपसंहर्तव्याः कुतः?-घ

३६६. प्रियशिरस्त्वाद्यप्राप्तिरुपचयापचयौ हि भेदे । (३-३-१२)

आनन्दादीनां प्राप्तावपि, 'तस्य प्रियमेव शिरः', 'मोदो दक्षिणः पक्षः' (तै.आन.५-२) इति प्रियशिरस्त्वादीनाम् अप्राप्तिः, ब्रह्मस्वरूपगुणत्वाभावात् तेषाम् । ब्रह्मणः शिरः पक्षादिभेदे स्वरूपे सति, ब्रह्मण उपचयापचयौ प्रसज्येयाताम् । ततश्च - 'सत्यं ज्ञानमनन्तम् ब्रह्म' (तै.आन.१-१) 'आनन्दोऽजरः' (कौषी.उ.३-९) इत्यादिर्विरुद्ध्यते ।। १२ ।।

प्रियशिरस्त्वादिभ्य आनन्दादीनां विशेषमाह -

३६७. इतरे त्वर्थसामान्यात् । (३-३-१३)

इतरे - आनन्दादयः, अर्थसामान्यात् - ब्रह्मस्वरूपसामान्यात्, [1]सर्वासु[1] अनुवर्तन्ते । ब्रह्मस्वरूपनिरूपणधर्मत्वेन ब्रह्मस्वरूपसमाना हि ते ।। १३ ।।

प्रियशिरस्त्वादयः ब्रह्मस्वरूपकधर्माः न भवन्ति चेत् - तदभिधानं किमर्थम् इत्यत आह -

३६८. आध्यानाय प्रयोजनाभावात् । (३-३-१४)

अनुचिन्तनार्थं; तदभिधानम् प्रयोजनान्तराभावात् । 'ब्रह्मविदाप्नोति परम्' (तै.आन.१-१) इति वेदितव्यतयोपदिष्टं ब्रह्म आनन्दमयं, प्रियमोदादिरूपेण विभज्य, शिरःपक्षादित्वेन रूपयित्वा, बुद्धौ आरोप्यत इत्यर्थः ।। १४ ।।

३६९. आत्मशब्दाच्च । (३-३-१७)

'अन्योन्तर आत्माऽऽनन्दमयः' (तै.आन.५-२) इति आत्मशब्दाच्च प्रियशिरस्त्वादयः न ब्रह्मस्वरूपधर्माः शिरःपक्षादयो हि; न [2]आत्मधर्माः[2] ।। १५ ।।

३७०. आत्मगृहीतिरितरवदुत्तरात् (३-३-१६)

'अन्योन्तर आत्मा' (तै.आन.५-२) इति आत्मशब्देन परमात्मन एव गृहीतिः ग्रहणम् । इतरवत् - 'आत्मा वा इदमेक एवाग्र आसीत्' इत्यात्मशब्देन यथा परमात्मनो ग्रहणं तद्वत् । कथमिदमवगम्यते ? तदेकार्थात्, उत्तरात्, 'सोऽकामयत बहु स्यां प्रजायेय' (तै.आन.६-२) इत्यादिवाक्यात् ।। १६ ।।

---

१. ब्रह्मवत्-ख,घ   २. स्वरूप-ख   ३. योगात्-ग

३७१. अन्वयादिति चेत् स्यादवधारणात् । (३-३-१७)

पूर्वेषु 'अन्योन्तर आत्मा प्राणमयः' (तै.आन.२-२) इत्यादिवाक्येषु अनात्मसु अपि आत्म[३]शब्दान्वयात् योगात्[३], कथम् उत्तरवाक्यात् निर्णयः - इति चेत् ।

'तस्माद्वा एतस्मादात्मन आकाशः सम्भूतः' (तै.आन.१-२) इति प्रकृतस्य आत्मन एव, प्राणमयादिषु आनन्दमयपर्यन्तेषु आत्मशब्देनावधारणात् स्यादेव निर्णयः । अतः प्रियशिरस्त्वादीनाम् अनात्मधर्मत्वात्, ज्ञानानन्दादीनां आत्मस्वरूपनिरूपणधर्मत्वाच्च, तेषामेव सर्वत्रोपसंहारः ।। १७ ।।

।। इति आनन्दाद्यधिकरणम् ।। ४ ।।

८७. कार्याख्यानाधिकरणम् । (३-३-५)

[अधिकरणार्थः-आचमनीयानां अपां प्राणं प्रति वासस्त्वानुसन्धानस्य अप्राप्तस्य विधिः, न तु आचमनस्य]

३७२. कार्याख्यानादपूर्वम् (३-३-१८)

छान्दोग्यवाजसनेयकयोः ज्येष्ठं च श्रेष्ठं च प्राणम् उपास्यं विधाय, 'स होवाच किं मे वासो भविष्यति इति आप इति होचुः' (छां.उ.५-२-२) इति अपां प्राणस्य वासस्त्वम् उक्त्वा, 'तस्माद्वा एतदशिष्यन्तः पुरस्ताच्चोपरिष्टाच्चाद्भिः परिदधति, लम्भुको ह वासो भवत्यनग्नो भवति' (छां.उ.५-२-२) इति छान्दोग्ये, वाजसनेयके च अपां प्राणवासस्त्वमुक्त्वा, 'तस्मादेवं विदशिष्यन्नाचामेत् अशित्वा चाचामेत् एतमेव तदनमनग्नं कुरुते' (बृ.उ.८-२-१४) इति (आचमनेन प्राणमनग्नं कुरुत इत्यर्थः) ।

अत्राशनात्पुरस्तात् उपरिष्टाच्च आचमनं, किं प्राणविद्याङ्गं विधीयते ? उत आचमनीयानामपां प्राणवासस्त्वानुसन्धानं विधीयते ? इति संशयः ।

'आचामेत्' इति आचमने विधिप्रत्ययश्रवणात्, स्मृत्याचारप्राप्तात् आचमनात् [१]आचमनान्तरं[१] प्राणविद्याङ्गं विधीयते इति पूर्वःपक्षः ।

राद्धान्तस्तु - 'अशित्वा चाचामेत्' (बृ.उ.८-१-१४) इति आचमनं च अत्र प्रतीयते । आचमनीयानां अपां प्राणवासस्त्वानुसन्धानं च 'आपो वासः' (बृ.उ.८-१-४) 'एतमेव तदन्नमनग्नं कुरुत' (८-१-१४) 'अद्भिः परिदधति' (छां.उ.५-२-२) इति प्रतीयते ।

१.आचमनानन्तरम्-ख,घ

तत्र आचमनं तावत् स्मृत्याचारप्राप्तम् । अपां प्राणवासस्त्वानुसन्धानम्, अप्राप्तम् 'अनग्नं कुर्वतो मन्यते । अनग्नं कुरुते' (बृ.उ.८-१-१४) इति अनुवादसरूपं प्रतीयते । तत्र आचमनान्तरकल्पनात् आचमनमनूद्य, आचमनीयानामपां, प्राणवासस्त्वानुसन्धानं, अप्राप्तं विधीयते इति युक्तम् 'तदनमनग्नं कुरुत' (बृ.उ.८-१-१४) इति 'वचनानि त्वपूर्वत्वात्', 'विधिर्वास्यादपूर्वत्वात्' इति न्यायेन विधिवचनमेव (पू.मी.३-५-२१) भवति ।

सूत्रार्थस्तु - अपूर्वम् - अप्राप्तम् अपां प्राणवासस्त्वानुसन्धानं विधेयं; न पुनः प्राप्तमाचमनम् कुतः? कार्याख्यानात् कार्यस्य अप्राप्तार्थस्य आख्यानस्वभावत्वात् शास्त्रस्येत्यर्थः ।। १८ ।।

।। इति कार्याख्यानाधिकरणम् ।। ५ ।।

८८. समानाधिकरणम् (३-३-६)

[अधिकरणार्थः-वाजसनेयकसम्बन्ध्यग्निरहस्य-बृहदारण्यकोक्तशाण्डिल्यविद्ययोः रूपभेदाभावात् ऐक्यमेव]

३७३. समान एवं चाऽभेदात् । (३-३-१९)

वाजसनेयके, अग्निरहस्ये, बृहदारण्यके च, शाण्डिल्यविद्या आम्नाता । अग्निरहस्ये तावत् - 'स आत्मानमुपासीत मनोमयं प्राणशरीरं भारूपं सत्यसङ्कल्पमाकाशात्मानम्' (अग्नि.१०-६) इति ।

बृहदारण्यके च - 'मनोमयोऽयं पुरुषो भाः सत्यं तस्मिन्नन्तर्हृदये यथा व्रीहिर्वा यवो वा स एव सर्वस्य वशी सर्वस्येशानः सर्वस्याधिपतिः सर्वमिदं प्रशास्ति' (बृ.उ.७-६-१) इति । किमत्र विद्याभेदः? उत न? इति संशयः । एकत्र सत्यसङ्कल्पत्वम् अधिकं श्रुतं, इतरत्र वशित्वादयोऽधिकाः इति रूपभेदात् विद्याभेदः - इति पूर्वः पक्षः ।

राद्धान्तस्तु - उभयत्र मनोमयत्वादिके समाने सति, वशित्वादेः सत्यसङ्कल्पत्व-विततिरूपतया तेनाभेदात्, न रूपभेदः इति विद्यैक्यम् ।

सूत्रार्थः - मनोमयत्वादिके समाने सति, विद्यैक्यम् । एवं च अभेदात् वशित्वादिगुणेनापि अभेदात् । वशित्वादिर्हि सत्यसङ्कल्पत्वविततिः ।। १९ ।।

।। इति समानाधिकरणम् ।। ६ ।।

८१. सम्बन्धाधिकरणम् ।। (३-३-७) (सू.२०-२२)

[अधिकरणार्थः-उपासनाधिष्ठानभेदात् विद्याभेदनिरूपणम्]

३७४. सम्बन्धादेवमन्यत्राऽपि । (३-३-२०)

बृहदारण्यके - 'य एष एतस्मिन्मण्डले पुरुषो यश्चायं दक्षिणेऽक्षिन्' (बृ.उ.७-५-१) इत्युपक्रम्य, आदित्यमण्डलेऽक्षिणि च सत्यस्य ब्रह्मणो व्याहृतिशरीरत्वेन उपास्यत्वमुक्त्वा, 'तस्योपनिषदहरित्यधिदैवतम्' । (बृ.उ.७-५-२) 'तस्योपनिषदहमित्यध्यात्मम्' (बृ.उ.७-५-३) इति, द्वे रहस्यनामनी उपासनशेषतयाऽऽम्नायेते । ते किं यथाश्रुते स्थाननियते? उत उभयत्र उभे - इति संशयः ।

उभयोः स्थानयोः एकरूपस्यैव उपास्यत्वात् विद्यैक्यमिति, अनियते नामनी - इति पूर्वः पक्षः ।

अक्ष्यादित्यस्थानसम्बन्धित्वरूपाकारभेदाद्रूपभेद इति, विद्याभेदात् द्वे नामनी नियते - इति राद्धान्तः ।

सूत्रार्थस्तु - यथा मनोमयत्वादिगुणविशिष्टस्यैकस्यैवोपास्यत्वेन, उभयत्र विद्यैक्यम्, एवम् अन्यत्र अक्ष्यादित्याधारस्यापि एकस्यैव सत्यस्य ब्रह्मणः, स्थानद्वयसम्बन्धात् न रूपभेद इति, विद्यैक्यात्, द्वे नामनी अनियते ।। २० ।।

३७५. न वा विशेषात् । (३-३-२१)

न चैतदस्ति, यत् विद्यैक्यात् उभयत्र उभे नामनी अनियते, इति । कुतः? विशेषात् उभयत्र हि ! रूपं विशिष्यते । एकत्र आदित्यस्थानसम्बन्धि इतरत्र अक्षिस्थानसम्बन्धि ब्रह्म इति रूपभेदात् विद्याभेदः इति, नियते नामनी ।। २१ ।।

३७६. दर्शयति च । (३-३-२२)

दर्शयति च श्रुतिः विद्याभेदेन गुणानुपसंहारं, 'तस्यैतस्य तदेव रूपं यदमुष्य रूपम्' (छां.उ.१-७-५) इत्यादिना रूपाद्यतिदेशेन । स्वतो हि अप्राप्तौ अतिदेशेन प्राप्त्यपेक्षा ।। २२ ।।

।। इति सम्बन्धाधिकरणम् ।। ७ ।।

८. सम्भृत्यधिकरणम् (३-३-८)

[अधिकरणार्थः-शास्त्राविशेषश्रुतानां सम्भृत्यादीनां ब्रह्मगुणानां सर्वविद्यास्वनुपसंहारः]

३७७. सम्भृति-द्युव्याप्त्यपि चाऽतः । (३-३-२३)

तैत्तिरीयके, [१]राणायनीयानां[१], खिलेषु च - 'ब्रह्म ज्येष्ठा वीर्या सम्भृतानि । ब्रह्माग्रे ज्येष्ठं दिवमाततान । ऋतस्य ब्रह्म प्रथमोत जज्ञे । तेनार्हति ब्रह्मणा स्पर्धितुं कः' (तै.ब्रा.२-४-७-७२) इति ब्रह्मणि ज्येष्ठानां गुणानां सम्भृतिः, द्युव्याप्तिश्च इत्यादि गुणजातम् आम्नातम् ।

किमेषां सर्वासु विद्यासूपसंहारः? उत स्थानविशेषोपासनेषु नियमः? इति संशयः ।

अनारभ्याधीतत्वात्, एषां सर्वासु उपसंहारः - इति पूर्वः पक्षः ।

राद्धान्तस्तु - यद्यपि न स्थानविशेषसम्बन्ध्युपासनमारभ्य अधीताः एते, तथापि द्युव्याप्तिसामर्थ्यात्, तस्य हृदयाद्यल्पस्थानेषूपसंहारायोगात्, तत्साहचर्याच्च [२]इतरेषां[२] अल्पस्थानविहितासु विद्यासु नोपसंहारः इति ।

सूत्रार्थस्तु - सम्भृतिद्युव्याप्तीति । समाहारद्वन्द्वत्वेन एकवद्भावः । सम्भृति प्रभृतिगुणजातमपि अत एव स्थानविशेषसम्बन्धनियमान्नियतं, न सर्वत्रोपसंहार्यम् । द्युव्याप्तिर्हि, स्वसामर्थ्यात् अल्पस्थानानर्हतया तदितरस्थाननियता । सम्भृत्याद्यपि, तत्साहचर्यात् तथैव ।। २३।।

।। इति सम्भृत्यधिकरणम् ।। ८ ।।

९१. पुरुषविद्याधिकरणम् । (३-३-९)

[अधिकरणार्थः-छान्दोग्य-तैत्तिरीयकश्रुत्युक्तयोः पुरुषविद्ययोः रूपादिकृतो भेदाभेदः]

३७८. पुरुषविद्यायामपि चेतरेषामनाम्नानात् । (३-३-२४)

तैत्तिरीयके पुरुषविद्याऽऽम्नाता - 'तस्यैवं विदुषो यज्ञस्यात्मा यजमानः श्रद्धा पत्नी शरीरम्' (तै.ना.५२) इत्यादिका ।

---

१. नारायणीयानां-ख,घ २. इतरेषां ते च-ख,घ

छान्दोग्येपि, 'पुरुषो वाव यज्ञस्तस्य यानि चतुर्विंशतिवर्षाणि' (छां.उ.३-१६-१) इत्यादिका । किमत्र विद्याभेदः उत न - इति संशयः । पुरुषविद्येति संज्ञैक्यात्, तैत्तिरीयके फलसम्बन्धानाम्नानात्, [१]छान्दोग्ये[१] 'शतञ्जीवति' (छां.उ.३-१६-७) इत्यनेन एकफलत्वाच्च विद्यैक्यम् - इति पूर्वः पक्षः ।।

राद्धान्तस्तु - पुरुषविद्येति संज्ञैक्येऽपि, सवनत्रयकल्पनप्रकारभेदात्, यजमान-पत्न्यादिकल्पनप्रकारभेदाच्च रूपभेदात्, तैत्तिरीयके पूर्वानुवाकगतस्य 'ब्रह्मणो महिमानमाप्नोति' (तै.ना.५२) इति ब्रह्मविद्याफलस्यैव सन्निधानात्, अफलस्यास्य तदङ्गतया तत्फलत्वात् फलभेदाच्च विद्याभेदः ।

सूत्रार्थस्तु - पुरुषविद्यायामपि उभयत्र रूपभेदात् विद्याभेदः कुतः? इतरेषु अनाम्नानात् । इतरशाखोदितानाम् तदितरशाखायाम् अनाम्नानात् । छान्दोग्ये तैत्तिरीयकाम्नातानां यजमानपत्न्यादीनां सवनानाम् च अनाम्नानात्, तैत्तिरीयके - छान्दोग्याम्नातानां यज्ञावयवानाम् अनाम्नानात् इत्यर्थः ।

तैत्तिरीयके हि, 'आत्मा यजमानः श्रद्धा पत्नी' (तै.ना.५२) इति यजमानादिकल्पनं 'यत्सायं प्रातर्मध्यन्दिनं च तानि सवनानि' (तै.ना.५२) इति च सवनत्रयकल्पनम् ।

छान्दोग्ये चाशिशिषादीनां दीक्षादित्वकल्पनं, पुरुषायुषः त्रेधा विभज्य, सवनत्रयकल्पनं चेति, यज्ञावयवकल्पनप्रकारभेदात् रूपभेदः स्पष्टः । फलमपि तथैवेति इतरेषाम् इति फलस्यापि ग्रहणम् ।। २४ ।।

।। इति पुरुषविद्याधिकरणम् ।। ९ ।।

९२. वेधाद्यधिकरणम् (३-३-१०)

[अधिकरणार्थः-'शुक्रं प्रविध्य' इत्येवमादीनां आथर्वणिकादिभिः अधीयमानानां मन्त्राणामध्ययनाङ्गत्वमेव, न विद्याङ्गता]

३७९. वेधाद्यर्थभेदात् । (३-३-२५)

आथर्वणिकाः तैत्तिरीयकाः ऐतरेयिणश्च इत्येवमादयः उपनिषदारम्भेषु, 'शुक्रं प्रविध्य हृदयं प्रविध्य' । 'शं नो मित्रः शं वरुणः' (तै.शि.१-१) 'सह नाववतु' (तै.आन.१-१) इत्यादिमन्त्रान् महाव्रतादीनि च कर्माणि, अधीयते । किम् एषां विद्याङ्गत्वम्? उत न? इति संशयः । सन्निधिसमाम्नानात् विद्याङ्गत्वम् इति पूर्वः पक्षः ।

---

१. छान्दोग्यगतेन-ग

राद्धान्तस्तु - 'शुक्रं प्रविध्य' 'हृदयं प्रविध्य' इत्यादिमन्त्रसामर्थ्यात् महाव्रतादीनां च कर्मणां, श्रुत्यादिभिश्च अभिचारद्वादशाहादिषु विनियोगवत्, 'शन्नो मित्रः शं वरुणः' 'सह नाववतु' इत्यादिमन्त्रस्य 'ऋतं वदिष्यामि सत्यं वदिष्यामि' 'तेजस्वि नावधीतमस्तु मा विद्विषावहै' इति मन्त्रसामर्थ्यात्, अध्ययने विनियोग इति, न विद्याङ्गत्वम् ।

सूत्रार्थस्तु - वेधाद्यर्थभेदात् इत्यस्य वेधाद्यर्थभेदवत्, 'सत्यं वदिष्यामि' 'तेजस्वि नावधीतम् अस्तु' इति शन्नो मित्रादेः मन्त्रस्यापि अध्ययनसम्बन्धरूपार्थभेदात् न विद्याङ्गत्वम् इत्यभिप्रायः । अतः शन्नो मित्रादिमन्त्र एव अधिकरणविषयः ।। २५ ।।

।। इति वेधाद्यधिकरणम् ।। १० ।।

९३. हान्यधिकरणम् (३-३-११)

[अधिकरणार्थः-विविधश्रुतिप्रतिपन्नयोरपि पुण्यपापहानादीनां समन्वयेन सर्वविद्यास्वपि विदुषः चिन्तनम्]

३८०. हानौ तूपायनशब्दशेषत्वात् कुशाच्छन्दस्स्तुत्युपगानवत्तदुक्तम् । (३-३-२६)

विदुषः ब्रह्म प्राप्नुवतः, पुण्यपापयोर्विमोचनं द्वयोः शास्त्रयोः श्रुतम् । विमुक्तयोः पुण्यपापयोः अन्यत्र प्रवेशः एकस्यां शाखायाम् श्रुतः । विमोचनं प्रवेशश्च उभयम् एकस्याम् ।

'तदा विद्वान् पुण्यपापे विधूय निरञ्जनः परमं साम्यमुपैति' । (मुं.उ.३-१-३) 'अश्व इव रोमाणि विधूय पापं चन्द्र इव राहोर्मुखात्प्रमुच्य धूत्वा शरीरमकृतं कृतात्मा ब्रह्मलोकमभिसम्भवानि' (छां.उ.८-१३-१) इति च केवलविमोचनम् ।

'तस्य पुत्रा दायमुपयन्ति सुहृदः साधुकृत्यां द्विषन्तः पापकृतम्' इति केवलप्रवेशः । 'तत्सुकृतदुष्कृते धूनुते तस्य प्रिया ज्ञातयः सुकृतमुपयन्ति[१] अप्रिया दुष्कृतम्' (कौ.उ.१-३७) इत्युभयम् । किं केवलहानिचिन्तनं केवलोपायनचिन्तनं उभयचिन्तनं, सर्वासु विद्यासु विकल्पेनानुष्ठेयम् ? उत समुच्चयेन ? - इति संशयः । तथाऽऽम्नातस्यार्थवत्वाच्च विकल्पः - इति पूर्वः पक्षः ।

---

१. यान्ति-ग

राद्धान्तस्तु - पुण्यपापप्रवेशस्य विमोचनापेक्षत्वेन, शाखान्तरस्थस्यापि प्रवेशवाक्यस्य शाखान्तरस्थविमोचनवाक्यशेषत्वात्, वाक्यद्वयेनैकार्थविधानात् समुच्चयः।

एकस्यां शाखायामुभयविधानं, प्रतिपत्तृभेदेन परिह्रियते ।

सूत्रार्थस्तु - हानौ तु इति । तुशब्दः पक्षव्यावृत्त्यर्थः । हानौ इति प्रदर्शनार्थः केवलविमोचने, केवले च उपायने श्रूयमाणे, तयोः इतरेतरसमुच्चयः अवश्यंभावी ।

कुतः ? उपायनशब्दशेषत्वात् - उपायनशब्दस्य हानिवाक्यशेषत्वात् इत्यर्थः । त्यक्तयोः पुण्यपापयोः प्रवेशस्थानवाचित्वात्, उपायनवाक्यस्य हानिवाक्यशेषत्वं अवगम्यते। प्रदेशान्तराम्नातवाक्यस्य प्रदेशान्तराम्नातवाक्यशेषत्वे दृष्टान्तानाह-कुशाच्छन्दः स्तुत्युपगानवदिति । यथा 'वानस्पत्याः कुशाः' । इति प्रदेशान्तराम्नातस्य वाक्यस्य 'औदुम्बर्याः कुशाः' इति तद्विशेषवाचि-प्रदेशान्तरस्थं, यथा च 'देवासुराणां छन्दोभिः' इति सामान्यतः प्रदेशान्तरस्थस्य तत्क्रमविशेषवाचि 'देवच्छन्दांसि पूर्वम्' इति प्रदेशान्तरस्थं, यथा च 'हिरण्येन षोडशिनः स्तोत्रमुपाकरोति' (यजु.अच्छिद्रे ९२पैङ्गि श्रुतिः) इति प्रदेशान्तरस्थस्य, तत्कालविशेषवाचि 'समयाविषिते सूर्ये षोडशिनः स्तोत्रमुपाकरोति' (तै.सं.६-६-११) इति प्रदेशान्तरस्थम्, यथा च 'ऋत्विज उपगायन्ति' (तै.सं.६-६) इति प्रदेशान्तरस्थस्य 'नाध्वर्युरुपगायेत्' (तै.सं.६-३-१) इति तत्पर्युदासरूपं प्रदेशान्तरस्थम्, एवम् उपायनवाक्यस्य हानिवाक्यशेषतया सम्भवन्त्यां गतौ विकल्पः अयुक्तः । तदुक्तं पूर्वस्मिन्काण्डे - 'अपि तु वाक्यशेषः स्यादन्याय्यत्वाद्विकल्पस्य' (पू.मी.सू.१०-८-४) इत्यादिना ।। २६ ।।

।। इति हान्यधिकरणम् ।। ११ ।।

९४. साम्परायाधिकरणम् (३-३-१२) (सू.२७-३१)

[अधिकरणार्थः-निष्पन्नोपासनस्य विदुषो जीवस्य, देहादुत्क्रमणकाले एव पुण्यपापयोः निरवशेषहानचिन्तनम्]

३८१. साम्पराये तर्तव्याभावात्तथा ह्यन्ये । (३-३-२७)

किम् इदं सुकृतदुष्कृतयोः हानिचिन्तनं, देहवियोगकाले एकदेशः क्षीयते, अध्वनि शिष्टम् इति उभयत्र कर्तव्यम् उत देहवियोगकाल एव सर्वं क्षीयते ? - इति संशयः ।

उभयत्र श्रुतेः देवयानेन यथा गमनान्यथाऽनुपपत्त्या च उभयत्र इति पूर्व[१]पक्षः[१]।

'अश्व इव रोमाणि विधूय पापं चन्द्र इव राहोर्मुखात्प्रमुच्य, धूत्वा शरीरमकृतम्' (छां.उ.८-१३-१) इति देहवियोगकाले 'स आगच्छति विरजां नदीं तत्सुकृतदुष्कृते धूनुते' (कौषी.उ.१-३-४) इति हि अध्वन्यपि हानिश्रुतेः । देहवियोगकाले सर्वकर्मक्षये हि । देवयानेन गमनसाधनं कर्म न सम्भवति ।

राद्धान्तस्तु - 'तस्य तावदेव चिरं यावन्न विमोक्ष्ये अथ [२]सम्पत्स्ये[२]' (छां.उ.६-१४-२) इति देहवियोगादूर्ध्वं ब्रह्मप्राप्तिव्यतिरेकेण अनुभाव्यपुण्यपापफलाभावात् 'अश्व इव रोमाणि विधूय पापम्' (छां.उ.८-१३-१) इत्यादिना ऐकार्थ्यात्, अध्वनि आम्नातमपि 'तत्सुकृतदुष्कृते धूनुते' (कौषी.उ.१-४) इति वाक्यं देहवियोगकाले सङ्गमयितव्यमिति, देहवियोगकाल एव हानिचिन्तनम् । सर्वकर्मक्षयेऽपि हि । विद्यासामर्थ्यादेव [३]देवयानेन पथा[३] गमनं च उपपद्यते । विद्या हि! स्वयं सूक्ष्मशरीरस्य अनारम्भिकाऽपि, प्रकृतसुखदुःखोपभोगसाधनस्थूलशरीरस्य, सर्वकर्मणां च निरवशेषक्षयेऽपि, स्वफलभूतब्रह्मप्राप्तिप्रतिपादनाय, देवयानेन पथा एनं गमयितुं सूक्ष्मशरीरं स्थापयति ।

सूत्रार्थस्तु - साम्पराये - देहवियोगकाले एव [४]चिन्तनीयम्[४] ।

कुतः? तर्तव्याभावात् - देहवियोगादूर्ध्वं ब्रह्मप्राप्तिव्यतिरेकेण तरितव्यभोगाभावात् ।

तथा हि अन्ये अधीयते - 'तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ सम्पत्स्ये' (छां.उ.६-१४-२) इति, 'अशरीरं वाव सन्तं न प्रियाप्रिये स्पृशतः' (छां.उ.८-१२-१) इति च ।। २७ ।।

३८२. छन्दत उभयाविरोधात् । (३-३-२८)

एवं अर्थस्वाभाव्यात् देहवियोगकाले एव निरवशेषकर्मक्षयेऽवधृते सति, 'तत्सुकृतदुष्कृते धूनुते' (कौषी.उ.१-४) इति वाक्यखण्डः उभयाविरोधात् - उभयश्रुत्यविरोधात् छन्दतो नेयः 'अश्व इव रोमाणि विधूय पापम्....धूत्वा शरीरम्

---

१. पक्षः । कुतः?-घ २. सम्पत्स्यते-ग ३. देवयान-ग ४. हानि चिन्तनम्-गे

अकृतम्' (छां.उ.८-१-३) 'तस्य तावदेव चिरम्' (छां.उ.६-१४-२) इति उभयश्रुत्यविरोधाच्च, चरमश्रुतेऽपि 'तत्सुकृतदुष्कृते धूनुते' (कौषी.उ.१-४) इति वाक्यखण्डः, 'एतं देवयानं पन्थानमापद्यते' (कौषी.उ.१-२) इति प्रथमश्रुतखण्डात् प्राक् अनुगमयितव्य इत्यर्थः ।। २८ ।।

अत्र चोदयति -

३८३. गतेरर्थवत्त्वमुभयथाऽन्यथा हि विरोधः । (३-३-२९)

देवयानेन गतिश्रुतेः अर्थवत्त्वं, देहवियोगकाले अध्वनि चेति - उभयथा कर्मक्षये सत्येव । अन्यथा देहवियोगकाले सर्वकर्मक्षये सति, सूक्ष्मशरीरस्यापि आरम्भकनाशेन स्थित्यनुपपत्तेः, देवयानगतिश्रुतिः विरुध्यते ।। २९ ।।

परिहरति -

३८४. उपपन्नस्तल्लक्षणार्थोपलब्धेर्लोकवत् । (३-३-३०)

भगवन्तम् उपासीनानां देहवियोगकाले सर्वकर्मक्षयेऽपि उपपन्नो देवयानः पन्थाः ।

कुतः ? तल्लक्षणार्थोपलब्धेः । तल्लक्षणार्थः - तज्जातीयार्थः । अकर्मलभ्यार्थोपलब्धेः इत्यर्थः । उपलभ्यते हि अकर्मलभ्यार्थः - ब्रह्मोपासीनानां, 'स स्वराड् भवति तस्य सर्वेषु लोकेषु कामचारो भवति' (छां.उ.७-२६-२) इत्यादिषु । लोकवत् - यथा लोके राजानम् उपासीनानां प्राकृतपुरुषासाधारणातिरमणीयानेकार्थसिद्धिः, तद्वत् सर्वज्ञं सत्यसङ्कल्पं महोदारं परंब्रह्म उपासीनानां सर्व उपपन्नम् इत्यर्थः ।। ३० ।।

परं ब्रह्मोपासीनानां देहपातसमये सर्वकर्मक्षयात् देहपातादूर्ध्वं कर्मफलानुभवो न विद्यत इत्येतत् न संभवति । वसिष्ठादीनां ज्ञानिनामपि कर्मफलरूपदेहान्तरसंयोगः, पुत्रजन्मविपत्त्यादिषु सुखदुःखानुभवोऽपि दृश्यते - इत्याशङ्क्याह -

३८५. यावदधिकारमवस्थितिराधिकारिकाणाम् । (३-३-३१)

येषां ज्ञानिनां देहपातादनन्तरं अर्चिरादिका गतिः [१]प्राप्ता, तेषां[१] देहपातादूर्ध्वं तरितव्यकर्मफलभोगाभावात्, देहपातसमये एव कर्मक्षयः उक्तः । वसिष्ठादीनां तु

१. प्राप्ति येषाम्-ग

आधिकारिकाणां, यावदधिकारसमाप्ति न अर्चिरादिका गतिरस्ति । अपि तु अधिकारे अवस्थितिरेव । अधिकारहेतुभूतकर्मणः फलदानाय आरब्धत्वात् । ज्ञानिनोऽपि आरब्धं हि कर्म फलानुभवेनैव क्षीयते ।। ३१ ।।

।। इति साम्परायाधिकरणम् ।। १२ ।।

९५. अनियमाधिकरणम् (३-३-१३)

[अधिकरणार्थः-अर्चिरादिगतेः वेदान्तावगतसर्वविद्यासाधारणत्वम् न तु विशेषनियतत्वम्]

३८६. अनियमः सर्वेषामविरोधः शब्दानुमानाभ्याम् । (३-३-३२)

येषु उपासनेषूपकोसलादिषु अर्चिरादिका गतिः आम्नाता, किं तन्निष्ठानामेव तया ब्रह्मप्राप्तिः ? उत सर्वेषां ब्रह्मोपासननिष्ठानाम् - इति संशयः ।

तन्निष्ठानामेव - इति पूर्वः [1]पक्षः[1]; इतरेषां तया [2]ब्रह्मप्राप्तौ[2] प्रमाणाभावात् । यत्तु - पञ्चाग्निविद्यायाम् साधारणवचनम् तदपि उपकोसलादिविषयम् इति निश्चीयते । अन्यथा उपकोसलादिषु [3]आम्नानानर्थक्यम्[3] स्यात् ।

राद्धान्तस्तु - पञ्चाग्निविद्यायां - 'य एवमेतद्विदुर्ये चेमेऽरण्ये श्रद्धां सत्यमुपासते तेऽर्चिषमभिसम्भवन्ति' (बृ.उ.८-२-१५) इति सामान्येन सर्वविषयगतिश्रवणं उपकोसलादिषु आम्नानं न बाधितुं क्षमम् । सङ्कोचकं च न सम्भवति । विद्यास्तुत्यर्थतया अनुवादेनाप्युपपत्तेः । अतः सर्वेषां तयैव प्राप्तिः ।

सूत्रार्थः - अनियमः सर्वेषां - सर्वेषाम् अविशेषेण तयैव ब्रह्मप्राप्तिः । कुतः? अविरोधः शब्दानुमानाभ्यां - तथा सत्येव - श्रुतिस्मृतिभ्याम् अविरोधः । श्रुतिः च 'ये येचेमेऽरण्ये' (बृ.उ.८-२-१५) इत्यादिका पञ्चाग्निविद्यायां निदर्शिता । स्मृतिः - 'अग्निर्ज्योतिरहः शुक्लः' इत्यादिका ।। ३२ ।।

।। इति अनियमाधिकरणम् ।। १३ ।।

---

१. पक्षः । कुतः?-घ २. ब्रह्मप्राप्तेः-ख,ग,घ ३. आम्नानमनर्थकम्-ख -आम्नातमनर्थकम्-घ

९६. अक्षरध्यधिकरणम् । (३-३-२४)

[अधिकरणार्थः-अक्षरपरब्रह्मविद्योक्तानां अस्थूलत्वादीनां ब्रह्मगुणानां, सर्वासु परविद्यासु उपसंहारः]

३८७. अक्षरधियां त्ववरोधः सामान्य - तद्भावाभ्यामौपसदवत्तदुक्तम् । (३-३-३३)

बृहदारण्यके - 'एतद्वै तदक्षरँ गार्गि ब्राह्मणा अभिवदन्ति अस्थूलमनण्वह्रस्वम्' (बृ.उ.५-८-८) इत्यादि श्रूयते । तथाऽऽथर्वणे च, 'अथ परा यया तदक्षरमधिगम्यते यत्तदद्रेश्यमग्राह्यम्' (मुं.उ.१-१-५) इत्यादि । किमेषाम् अस्थूलत्वादीनां सर्वासु ब्रह्मविद्यासु उपसंहारः? उत यत्र श्रुताः तत्रैव इति संशयः ।

विद्याविशेषरूपतया श्रुतानां सर्वविद्यासाधारणत्वाभावात्, यत्र श्रुताः तत्रैव नियताः इति पूर्वः पक्षः ।

राद्धान्तस्तु - अस्थूलत्वादीनामपि आनन्दादिवत्, ब्रह्मस्वरूपानुसन्धानान्तर्भावात् - सर्वत्रैवोपसंहारः । न केवलम् आनन्दादिभिः ब्रह्मस्वरूपं प्रत्यगात्मनो व्यावृत्तम् । तस्यापि हि तदेव स्वरूपम् । अस्थूलत्वादिविशेषितमानन्दादि ब्रह्मणः प्रत्यगात्मनो व्यावृत्त्याकारः । यद्यपि प्रत्यगात्मा स्वभावतः [१]स्थूल[१]त्वाद्यचेतनधर्मासम्बन्धी; तथापि तत्सम्बन्धार्हताऽस्त्येव । तदर्हतयापि हि पूर्वं तत्संबन्धस्सञ्जातः । अतः ब्रह्मणः तदनर्हस्वरूपानुसन्धानार्थतया अस्थूलत्वादयः सर्वत्र अनुसन्धेयाः ।

सूत्रार्थस्तु - अक्षरधियां अक्षरसम्बन्धिनीनाम् अस्थूलत्वादिधियां, सर्वविद्यासु अवरोधः-सङ्ग्रहणम् ।

कुतः ?

सामान्यतद्भावाभ्यां - ब्रह्मणः सर्वत्र समानत्वात्, ब्रह्मानुसन्धानान्तर्भावाच्च, तासाम् । गुणानां हि प्रधानानुवर्तित्वम् स्वभावः । औपसदवत् - यथा जामदग्न्यचतूरात्र-पुरोडश्युपसद्गुणभूतः - 'अग्नेर्होत्रं वत्तु' इति मन्त्रः, सामवेदपठितत्वेन सामवेदस्वरनियतोऽपि, प्रधानभूतोपसदनुवर्तित्वात् याजुर्वैदिकत्वाच्च उपसदो याजुर्वैदिकोपांशुत्वसम्बन्धी, तद्वत्

---
१. अस्थूल-ख

अक्षरविद्यासम्बन्धितया अधीतत्वेन तद्विद्यानियता अपि, प्रधानानुवर्तित्व स्वाभाव्यात्, सर्वविद्यासम्बन्धिनः । तदुक्तं प्रथमे काण्डे - 'गुणमुख्यव्यतिक्रमे तदर्थत्वात्' (पू.मी.३-३-५) इत्यादिना ।। ३३ ।।

एवं तर्हि 'सर्वकर्मा सर्वगन्धः' (छां.उ.३-१४-४) इत्यादीनामपि सर्वेषां ब्रह्मगुणत्वात्, न क्वचित् व्यवस्था इत्यत्राहः -

३८८. इयदामननात् । (३-३-३४)

इयत् - अस्थूलत्वादिविशेषितम् आनन्दाद्येव सर्वत्रानुसन्धेयम् ।

कुतः ?

आमननात् हेतोः । आमननम् - आभिमुख्येन मननम्, ब्रह्मानुसन्धानम् । ब्रह्मस्वरूपानुसन्धानं येन विना नोपपद्यते, [१]तैरेव[२] सर्वत्रानुसन्धेयम् । अन्यत्तु तत्र तत्र व्यवस्थितम् इत्यर्थः ।। ३४ ।।

।। इति अक्षरध्यधिकरणम् ।। १४ ।।

९७. अन्तरत्वाधिकरणम् (३-३-१५) (३५-३७)

[अधिकरणार्थः-उषस्तकहोलयोः प्रश्नप्रतिवचनाभ्याम् अवगताविद्या एकैव; न भिन्न]

३८९. अन्तरा भूतग्रामवत् स्वात्मनोऽन्यथा भेदानुपपत्तिरिति चेन्नोपदेशवत् । (३-३-३५)

बृहदारण्यके उषस्तप्रश्नप्रतिवचनं 'यः प्राणेन प्राणिति स त आत्मा सर्वान्तरः,' 'योऽपानेनापानिति स त आत्मा' (बृ.उ.५-४-१) इत्यादि, 'अतोऽन्यदार्तम्' (बृ.उ.५-४-२) इत्यन्तम् आम्नातम् । तथा तदनन्तरं कहोलप्रश्नप्रतिवचनं 'योऽशनायापिपासे शोकं मोहं जरां मृत्युमत्येति एतं हैतमात्मानं विदित्वा' (बृ.उ.५-५-१) इत्यादि, 'अतोऽन्यदार्तम्' (बृ.उ.५-५-२) इत्यन्तम् ।

किं उभयत्र विद्यैक्यम्? उत विद्याभेदः? इति संशयः । पूर्वत्र प्राणनादिहेतुः प्रत्यगात्मा, उत्तरत्राशनायाद्यतीतः परमात्मा इति उपास्यभेदात् विद्याभेदः - इति पूर्वः पक्षः ।

---

१. ब्रह्मगुणत्वेन-ख,ग,घ २. तदेव-ख,ग,घ

राद्धान्तस्तु - 'यत्साक्षादपरोक्षाद्ब्रह्म य आत्मा सर्वान्तरः तन्मे व्याचक्ष्व' (बृ.उ.५-४-१) इति उभयत्र प्रश्नस्य परमात्मविषयत्वात् एकरूपत्वाच्च सर्वप्राणि [1]प्राणनापाननादि[1]हेतुत्वस्य अशनायाद्यतीतत्वस्य च प्रतिवचनद्वयावगतस्य परमात्मनि एकस्मिन्नेव उपास्ये सम्भवाच्च, न विद्याभेदः ।

सूत्रार्थस्तु - अन्तरा 'य आत्मा सर्वान्तरः' (बृ.उ.५-४-१) इत्युषस्तिप्रश्नः, भूतग्रामवत्स्वात्मनः - प्रत्यगात्मनः इत्यभ्युपगन्तव्यः; अन्यथा प्रतिवचनभेदानुपपत्तिः इतिचेत्, न अत्र प्रत्यगात्मपरमात्मविषयं प्रश्नद्वयं प्रतिवचनद्वयं च । परमात्मनि एकस्मिन्नेव उपास्ये सम्भवति इत्यर्थः ।

उपदेशवत् - 'स्तब्धोऽस्युततमादेशमप्राक्ष्यः' (छां.उ.६-१-३) इति प्रक्रान्तायाम् एकस्यामेव सद्विद्यायां - 'भगवांस्त्वमेव मे तत् ब्रवीतु । भूय एव मा भगवान् विज्ञापयतु' (छां.उ.६-१-७) इत्यादिका प्रश्नावृत्तिः, प्रचिवचनभेदश्च उपास्य[2]माहात्म्य[2] प्रतिपादनपरत्वेन दृश्यते, तद्वत् ।। ३५ ।।

प्रष्टृभेदपूर्वकप्रतिवचनप्रकारभेदाद्विद्याभेदोऽवर्जनीय एवेत्याशङ्क्याह-

३९०. व्यतिहारो विशिंषन्ति हीतरवत् । (३-३-३६)

'यदेव साक्षादपरोक्षाद्ब्रह्म य आत्मा सर्वान्तरः' (बृ.उ.५-५-१) इति द्वयोः प्रष्ट्रोः प्रश्नस्य एकरूपत्वेन, एकविषयत्वे निश्चिते सति उषस्तिकहोलयोः प्रतिवचनगत-बुद्धिव्यतिहारः कार्यः । प्राणानादिहेतुत्वबुद्धिः सर्वान्तरात्मविषया, कहोलेनापि कार्या । तथा अशनायाद्यतीतत्वबुद्धिः उषस्तिनापि कार्या । विशिंषन्ति हि उभयत्रापि याज्ञवल्क्यप्रतिवचनानि एकं सर्वान्तरमेव उपास्यम् । इतरवत्-यथा इतरत्र सद्विद्यायां सर्वाणि प्रतिवचनानि परमकारणं परंब्रह्म एकमेव प्रतिपादयन्ति ।। ३६ ।।

सद्विद्यायामपि उपास्यैक्यं प्रश्नप्रतिवचनावृत्तौ सत्यां कथमवगम्यते ? इत्यत्राह -

३९१. सैव हि सत्यादयः । (३-३-३७)

'सेयं देवतैक्षत' (छां.उ.६-३-२) इत्यादिषु सर्वत्र सैव परा देवतैकाऽनुवर्तते । 'ऐतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत्वमसि' (छां.उ.६-८-७) इति त एव सत्यादयः, सर्वेषु प्रचिवचनेषु उपसंह्रियन्ते ।। ३७ ।।

।। इति अन्तरत्वाधिकरणम् ।। १५ ।।

---

१. प्राणानादि-ख,ग,घ २. माहात्म्यविशेष-ग

९८. कामाद्यधिकरणम् । (३-३-१६) (सू.३८-४०)

[अधिकरणार्थः-छान्दोग्य-वाजसनेयोक्तयोः दहरविद्ययोः रूपाभेदात्, अभेद एव; न भिन्नता]

३९२. कामादीतरत्र तत्र चाऽऽयतनादिभ्यः (३-३-३८)

छान्दोग्ये श्रूयते -

'अथ यदिदमस्मिन् ब्रह्मपुरे दहरं पुण्डरीकं वेश्म दहरोऽस्मिन्नन्तराकाशः तस्मिन्यदन्तस्तदन्वेष्टव्यम्' (छां.उ.८-१-१) इत्यादि प्रक्रम्य, 'तद्य इहात्मानं अनुविद्य व्रजन्त्येतांश्च सत्यान्कामान्,' 'तेषां सर्वेषु लोकेषु कामचारो भवति' (छां.उ.८-१-६) इति । वाजसनेयके च 'य एषोऽन्तर्हृदय आकाशस्तस्मिंच्छेते सर्वस्य वशी सर्वस्येशानः' (बृ.उ.६-४-२२) इत्यादि ।

किम् उभयत्र विद्यैकम्? उत विद्याभेदः? इति संशयः । रूपभेदात् विद्याभेदः - इति पूर्वः [१]पक्षः[१] ।

यद्यपि - उभयत्र परमात्मैव उपास्यः - तथापि एकत्र आकाशशब्दाभिधेयः परमात्मा उपास्यः, इतरत्र आकाशे शयानः परमात्मेति इति हि रूपं भिद्यते ।

राद्धान्तस्तु - हृदयायतनत्वसत्यसङ्कल्पत्वसत्यकामत्वादेः अभेदात् उभयत्र तद्विशिष्टः परमात्मैव उपास्य इति रूपाभेदात् विद्यैक्यम् । छान्दोग्ये हि 'दहरोऽस्मिन्नन्तर आकाशः तस्मिन् यदन्तस्तदन्वेष्टव्यम्' (छां.उ.८-१-१) इत्यारभ्य 'किं तदत्र विद्यते' (छां.उ.८-१-२) इत्यादिना परिचोद्य, 'तस्मिन्कामाः समाहिता एष आत्माऽपहतपाप्मा विजरो विमृत्युः' (छां.उ.८-१-५) इत्यारभ्य, 'सत्यकामः सत्यसङ्कल्पः' (छां.उ.८-१-५) इत्युक्त्वा, 'तद्य इहात्मानमनुविद्य व्रजत्येतांश्च सत्यान् कामान्' (छां.उ.८-१-६) इति आकाशशब्दनिर्दिष्टः परमात्मा, तदन्तर्गताश्च सत्यकामत्वसत्यसङ्कल्पत्वापहतपाप्मत्वादयो गुणाः । अतः परमात्मा हृदयायतनं सत्यकामत्वादिविशिष्टः उपास्य इति, वाक्येनैव निर्णीतम् ।

वाजसेनयके च - 'य एषोऽन्तर्हृदय आकाशस्तस्मिन्शेते सर्वस्य वशी' (बृ.उ.६-४-२२) इत्युक्ते सति, वशित्वादेः सत्यसङ्कल्पत्वविशेषरूपतया, स

---

१. पक्षः । कुतः?-घ

एव परमात्मा हृदयायतनः सत्यसङ्कल्पत्वविशिष्टः उपास्यः इति प्रतीयते । अतो दहरविद्याप्रत्यभिज्ञानात् स एव परमात्मा सत्यसंकल्पत्वादिगुणाष्टकविशिष्टः उपास्यः इति निश्चीयते । एवं निश्चिते सति, 'आकाशे शयानः' इति आकाशशब्दोऽपि, हृदयपुण्डरीकवर्त्याकाशवाचि रूपाभेदात् इति विद्यैक्यमेव ।

सूत्रार्थस्तु - कामादीतरत्र तत्र च-वाजसनेयके, छान्दोग्ये च सत्यकामत्वाद्येव रूपम् ।

कुतः ?

आयतनादिभ्यः-हृदयायतनत्व-सत्यसङ्कल्पत्वविशेषरूपवशित्वादिभ्यः, तत्सहचारिणः सत्यकामत्वादेः प्रत्यभिज्ञानात् ।

'परं ज्योतिरुपसम्पद्य स्वेन रूपेणाभिनिष्पद्यते' (छां.उ.८-३-४) 'अभयं वै ब्रह्म भवति' (बृ.उ.६-४-२५) इति ब्रह्मप्राप्तिरूपं फलं च एकमिति, विद्यैक्यम् ।। ३८ ।।

'मनसैवानुद्रष्टव्यं नेह नानास्ति किञ्चन' (बृ.उ.६-४-१९) इत्यादेः प्रकृतत्वात्[१], 'स एष नेति नेत्यात्मा' (बृ.उ.६-४-२२) इति च वक्ष्यमाणत्वात् 'सर्वस्य वशी सर्वस्येशानः' (बृ.उ.६-४-१९) इत्यादिविशेषाणां ब्रह्मस्वरूपत्वाभावात्, कथं सत्यकामत्वादेः मोक्षसाधनोपासनरूपत्वम् इत्यत आह -

३९३. आदरादलोपः । (३-३-३९)

वशित्वादेः प्रमाणान्तरा[२]विदितस्य[२] श्रुत्यैकसमधिगम्यस्य आदरेण प्रतिपादनात्, अलोपः-अप्रतिषेधः, तस्यापि ब्रह्मगुणत्वमवश्याश्रयणीयम् । अविशेषनिषेधास्तु - सकलेतरप्राकृतविशेषविषयाः । नानात्वनिषेधस्तु, सर्वस्य ब्रह्मकार्यतया, अब्रह्मात्मकत्वाभिप्रायः ।। ३९ ।।

सगुणोपासनस्य 'स यदि पितृलोककामो भवति' (छां.उ.८-२-१) इति, सांसारिकफलत्वेन न मोक्षफलत्वम् इत्याशंक्याऽऽह -

३९४. उपस्थितेऽतस्तद्वचनात् । (३-३-४०)

उपस्थितिः - उपस्थानम्, ब्रह्मोपसम्पत्तिः । उपस्थिते - ब्रह्मोपसम्पन्ने, अतः - ब्रह्मोपसम्पत्तेरेव हेतोः, तद्वचनात्-पितृलोकादि प्राप्तिवचनात्, न तत् सांसारिकं फलम्;

---

१. पूर्वप्रकृतत्वात्-ख,ग,घ २. विहितरूपस्य-ख,घ

अपि तु साक्षान्मुक्तस्यैव, 'अस्माच्छरीरात्समुत्थाय परंज्योतिरूपसम्पद्य स्वेन रूपेणाभिनिष्पद्यते स उत्तमः पुरुषः', 'स तत्र पर्येति जक्षत्क्रीडन्नममाणः स्त्रीभिर्वा यानैर्वा ज्ञातिभिर्वा नोपजनं स्मरन्निदं शरीरम्' (छां.उ.८-१२-३) इति । 'स स्वराड्भवति तस्य सर्वेषु लोकेषु कामचारो भवति' (छां.उ.७-२५-२) इति च निवृत्ताविद्यस्य हि स्वेनरूपेणाभिनिष्पन्नस्यैव इत्युच्यते । अतो ब्रह्मोपसम्पत्तिहेतुकत्वं क्रीडनादेः अवगम्यते ।। ४० ।।

।। इति कामाद्यधिकरणम् ।। १६ ।।

९९. तन्निर्धारणानियमाधिकरणम् । (३-३-१७)

[अधिकरणार्थः-कर्माङ्गाश्रितो उद्गीथोपासनादेः, क्रतुषु उपादेयतानियमाभावः]

३९५. तन्निर्धारणानियमस्तद्दृष्टेः पृथग्घ्यप्रतिबन्धःफलम् । (३-३-४१)

छान्दोग्ये - 'ओमित्येतदक्षरमुद्गीथमुपासीत' (छां.उ.१-१-१) इति कर्माङ्गाश्रयम् उद्गीथाद्युपासनं श्रूयते ।

तत् किं तस्मिन् कर्मणि पर्णतादिवत्, नियमेनोपादेयम्? उत गोदोहनादिवत् अनियमेन? इति संशयः । कर्माङ्गाश्रयत्वेन पर्णतादिवत्, तद्वारेण निरूढकार्यतया, 'यदेव विद्यया करोति श्रद्धयोपनिषदा तदेव वीर्यवत्तरम् भवति' (छां.उ.१-१-१०) इति वर्तमाननिर्देशस्य पृथक्फलप्रतिपादनायोगात्, क्रत्वर्थतया नियमेन उपादेयम् - इति पूर्वः पक्षः ।

राद्धान्तस्तु - 'तेनोभौ कुरुतो यश्चैतदेवं वेद यश्च न वेद,' (छां.उ.१-१-१०) इति उद्गीथोपासनरहितस्यापि क्रत्वनुष्ठानदर्शनात्, क्रतुफलात् स्वर्गादेः पृथग्भूतवीर्यवत्तरत्वफलम् इदम् उपासनम् इति, गोदोहनादिवत् अनियमः । वर्तमाननिर्देशे सति, अपि अधिकारान्तरनिश्चये सति, रात्रिसत्रवत् क्रतोः वीर्यवत्तरत्वम् अस्य उपासनस्य फलमिति कल्पनीयम् ।

सूत्रार्थस्तु - तन्निर्द्धारणानियमः । निर्द्धारणं - निश्चयेन चेतसा अवधारणम्, उपासनमित्यर्थः । तस्य उद्गीथोपासनस्य अनियमः ।

कुतः?

तद्दृष्टेः - 'तेनोभौ कुरुतः' इत्यनियमदृष्टेः । पृथग्भूतं हि अस्य फलम् । तच्च अप्रतिबन्धरूपम् । वीर्यवत्तरत्वं नाम - प्रबलकर्मान्तरफलेन एतस्य कर्मणः फलस्याप्रतिबन्धः । अविलम्बितत्वम् इत्यर्थः ।। ४१ ।।

।। इति तन्निर्धारणानियमाधिकरणम् ।। १७ ।।

१००. प्रदानाधिकरणम् । (३-३-१८)

[अधिकरणार्थः-हविस्त्यागपार्थक्ये इन्द्रादीनामिव, प्रतिगुणचिन्तनं परमात्मचिन्तनावृत्तिः]

३९६. प्रदानवदेव तदुक्तम् । (३-३-४२)

दहरविद्यायां - 'तद्य इहात्मानमनुविद्य व्रजन्त्येतांश्च सत्यान्कामान्' (छां.उ.८-१-६) इति अपहतपाप्मत्वादिगुणानामपि परमात्मस्वरूपचिन्तनवत् पृथक्चिन्तनं विहितम् ।

किं गुणचिन्तने तत्तद्गुणविशिष्टतया परमात्मानुचिन्तनमावर्तनीयं ? उत न ? - इति संशयः । परमात्मनः एकस्यैव सर्वेषां गुणानां गुणित्वेन, सकृदेव तच्चिन्तनोपपत्तेः न आवर्तनीयम् - इति पूर्वः पक्षः ।

राद्धान्तस्तु - गुणिनः स्वरूपैक्येऽपि, तत्तद्गुणविशिष्टाकारभेदात् आवर्तनीयम् - इति ।

सूत्रार्थस्तु - प्रदानवत् आवर्तनीयमेव । यथा - 'इन्द्राय राज्ञे पुरोडाशमेकादश-कपालमिन्द्रायाधिराजायेन्द्राय स्वराज्ञे' (तै.सं.२-३-६२) इति इन्द्रस्य एकत्वेऽपि राजत्वादिविशिष्टाकारभेदात् देवताभेद इति, प्रदानवृत्तिः, तद्वदेव तदुक्तं सङ्कर्षे - 'नाना वा देवता पृथक्त्वात्' इति ।। ४२ ।।

।। इति प्रदानाधिकरणम् ।। १८ ।।

१०१. लिङ्गभूयस्त्वाधिकरणम् । (३-३-१९)

[अधिकरणार्थः-तैत्तिरीयकोक्तस्य 'सहस्रशीर्षम्....स्वराट्' इत्यनुवाकस्य सर्ववेदान्तोदित परविद्योपास्यविशेषनिर्धारणत्वम्; न तु दहरविद्यामात्रशेषत्वम्]

३९७. लिङ्गभूयस्त्वात्तद्धि बलीयस्तदपि । (३-३-४३)

तैत्तिरीया अधीयते - 'सहस्रशीर्षं देवं विश्वाक्षं विश्वशम्भुवम्, विश्वं नारायणम्' (तै.ना.उ.११) इत्यारभ्य, 'सोऽक्षरः परमः स्वराट्' (तै.ना.उ.११) इत्यन्तम् । अस्मिन्ननुवाके

न [१]उपासनं[१] विधायते । किम् अयं पूर्वानुवाकोदितदहरविद्योपास्यविशेषनिर्धारणार्थः ? उत सर्ववेदान्तोदितसर्वपरविद्योपास्यविशेषनिर्धारणार्थः ? इति संशयः ।

दहरविद्याया आनन्तर्यात् तदुपास्यविशेषनिर्द्धारणार्थः इति पूर्वः [२]पक्षः[२] । 'सहस्रशीर्षम् देवं' इति द्वितीयानिर्देशस्य अनन्तरोदितोपासिना सम्बन्धस्यैव युक्तत्वाच्च।

राद्धान्तस्तु - परब्रह्मापरतत्त्वपरंज्योतिः-परमात्माक्षरशिवशम्भुशब्दैः सर्वपर-विद्योपास्यान् अनूद्य, वाक्येनैव तेषां नारायणत्वविधानात् तस्य च प्रकरणात् बलीयस्त्वेन, सर्वं [३]परविद्योपास्यनिर्धारणम्[३] इति निश्चीयते । न च 'सहस्रशीर्षम्' इति द्वितीयानिर्देशः पूर्वेण उपासिना सम्बध्यते ।

'तस्मिन् यदन्तस्तदुपासितव्यम्' (तै.ना.उ.११) इति कृत्प्रत्ययेन कर्म अभिहितमिति तत्र द्वितीयानिर्देशायोगात् 'नारायण परं ब्रह्म', 'व्याप्य नारायणः स्थितः', 'परमात्मा व्यवस्थितः' (तै.ना.उ.११) इत्यादिभिः ऐकार्थ्यात् प्रथमार्थे द्वितीया ।

सूत्रार्थस्तु - सर्वपरविद्योपास्यनिर्धारणे लिङ्गभूयस्त्वात् तत् चिह्नभूतवाक्यभूयस्त्वात् इत्यर्थः । तद्धि वाक्यं प्रकरणात् बलीयः । तदपि पूर्वस्मिन्काण्डे 'श्रुतिलिङ्गवाक्यप्रकरण-स्थानसमाख्यानां समवाये पारदौर्बल्यम् अर्थविप्रकर्षात्' (पू.मी.३-३-१४) इत्यादिना उक्तम् । एवं सर्वोपास्यनिर्धारणे निश्चिते सति, दहरविद्यायामपि अयमेव उपास्य इति, 'पद्मकोशप्रतीकाशम्' इत्यादिना हृदयाद्यभिधानं च युज्यते इत्यभिप्रायः ।। ४३ ।।

।। इति लिङ्गभूयस्त्वाधिकरणम् ।। १९ ।।

१०२. पूर्वविकल्पाधिकरणम् । (३-३-२०) (सू.४४-५०)

[अधिकरणार्थः-मनश्चिदादीनामग्नीनां 'मनश्चितो .... ग्निचितः' इत्युक्तानां विद्यामयक्रत्वनुप्रविष्टता]

३९८. पूर्वविकल्पः प्रकरणात् स्यात् क्रिया मानसवत् । (३-३-४४)

वाजसनेयके अग्निरहस्ये, 'मनश्चितो वाक्चितः प्राणचितश्चक्षुश्चितः' (अग्नि.१०-५-३) इत्यादिना मनश्चितादयः अग्नयो विद्यारूपाः श्रूयन्ते ।

किमेते क्रियामयक्रत्वङ्गभूताः ? उत विद्यामयक्रत्वङ्गभूताः ? - इति संशयः अस्मिन्प्रकरणे विद्यामयक्रत्वनुबन्धिग्रहस्तोत्रादिदर्शनेऽपि, क्रतोर्विधानाभावात्, फलान्तराप्रतीतेश्च पूर्वत्र 'असद्वा

१. उपसंहारं-ख २. पक्षः । कुतः ?-घ ३. सर्वविद्यपास्यनिर्धारणार्थ-ख,ग

इदमग्र आसीत्' (अग्नि.१०-५-३) इत्यादिना इष्टकचितस्याग्नेः प्रकृतत्वात्, मनश्चिदादिषु च 'तेषामेकैक एव तावान् यावानसौ पूर्वः' (अग्नि.१०-५-३) इति तत्कार्यातिदेशात् इष्टकचितेनैषां विकल्पप्रतीतेश्च इष्टकचिताग्निशेषभूतक्रियामयक्रत्वनुप्रवेशेन तदङ्गभूताः - इति पूर्वः पक्षः ।

राद्धान्तस्तु - 'ते हैते विद्याचित एव विद्यया हैवैत एवं विदिश्चिता भवन्ति' (अग्नि.५-३-१२) इति मनश्चिदादीनां सम्पादिकाग्नित्वेन विद्यारूपत्वे सिद्धेऽपि, 'ते हैते विद्याचित एव' इति श्रुतिर्विद्यामयक्रत्वङ्गत्वेन एषां विद्यारूपताम् अवगत्यर्थेति निश्चयात्, सन्निहितैः मानसैः ग्रहस्तोत्रादिभिः क्रत्वनुबन्धैः' अनुवादवाक्यसरूपवाक्यप्रतिपादितैः क्रतुदर्शने सति, 'वचनानि त्वपूर्वत्वात्' (पू.मी.३-५-२१) इति न्यायेन मनश्चिदादीनां शेषिभूतविद्यामयक्रतोः विधिः परिकल्प्यते ।

'तेषामेकैक एव तावान् यावानसौ पूर्वः' (अग्नि.१०-५-३) इति अतिदेशेन इष्टकचिताग्नेः स्वशेषिभूतक्रतुद्वारेण यत्फलं, तदैव एषां स्वशेषिभूतविद्यामयक्रतुद्वारेण फलम् इति निश्चीयत इति, विद्यामयक्रत्वङ्गभूता एव, मनश्चितादयः ।

सूत्रार्थस्तु मनश्चितादिः क्रिया स्यात् - क्रियामयक्रत्वङ्गभूत इत्यर्थः ।

कुतः ?

प्रकरणात् । पूर्वप्रकृतेनेष्टकचितेन अव्यभिचरितक्रतुसम्बन्धिना उपस्थित-क्रतुगृहीतत्वेन तदङ्गभूतानामेषाञ्च अग्नित्वात् तेन इष्टकचितेन विकल्पः विद्यारूपाणामपि एषां क्रियामयक्रत्वङ्गभावः न विरुध्यते; द्वादशाहाङ्गभूतमानसग्रहवत् ।। ४४ ।।

३९९. अतिदेशाच्च । (३-३-४५)

'तेषामेकैक एव तावान् यावानसौ पूर्वः' इति तेषु पूर्वेष्टकचितकार्यातिदेशाच्च तेन एषां विकल्पः प्रतीयते । तेन विकल्पो हि तच्छेषिभूतक्रत्वङ्गत्वेन विना एषां नोपपद्यते । अतश्च तदङ्गभूताः ।। ४५ ।।

४००. विद्यैव तु निर्धारणाद्दर्शनाच्च । (३-३-४६)

'तु'शब्दः पक्षं व्यावर्तयति । मनश्चिदादिः विद्यैव-विद्यामयक्रत्वङ्गभूत एव इत्यर्थः ।

कुतः ?

निर्धारणात्-तेषां विद्यारूपत्वे सिद्धेऽपि, 'ते हैते विद्याचित एव' (अग्नि.५-३-१२) इति निर्धारणं, विद्यामयक्रत्वङ्गतयैषां विद्यामयत्वख्यापनार्थम् । अत्रैव विद्यामयक्रतुदर्शनाच्च तदङ्गत्वमेव एषाम् । दृश्यते च विद्यामयक्रतुः, 'मानसेषु ग्रहा गृह्यन्ते मनसा स्तुवन्ति मनसा शंसन्ति' (अग्नि.५-३-३) इत्यादौ ।। ४६ ।।

अत्र विद्यामयक्रतौ विधिपदाश्रवणात्, तत्फलसम्बन्धाप्रतीतेश्च प्रकरणेन इष्टकचिताग्न्युपस्थापितक्रत्वङ्गताप्रतीतेश्च विद्यामयक्रत्वन्वयो बाध्यते इत्याशङ्क्याह -

४०१. श्रुत्यादिबलीयस्त्वाच्च न बाधः । (३-३-४७)

श्रुत्यादेः प्रकरणात् बलीयस्त्वेन, श्रुत्याद्यवगतस्य विद्यामयक्रत्वन्वयस्य प्रकरणेन न बाधः । श्रुतिस्तावत् - 'ते हैते विद्याचित एव' (अग्नि.५-३-१२) इति । तां विवृणोति - 'विद्यया हैवैत एवंविदश्चिता भवन्ति' (अग्नि.५-३-१२) इति । लिङ्गवाक्ये च भाष्ये दर्शिते । एवंविदः मनश्चक्षुरादिव्यापारेषु अग्नित्वं सम्पादयितुः, एते - मनश्चिदादयः विद्यया '[1]प्रधानभूतया[1]' चिता भवन्ति इत्यर्थः ।। ४७ ।।

'मानसेषु ग्रहा अगृह्यन्ते' इत्यादौ विधिपदाश्रवणात् विद्यामयक्रतुविधिः न सम्भवति, तदसम्भवादेव तदन्वयोऽपि न सम्भवति इत्याशङ्क्याह -

४०२. अनुबन्धादिभ्यः प्रज्ञान्तरपृथक्त्ववद्दृष्टश्च तदुक्तम् । (३-३-४८)

ग्रहस्तोत्रशस्त्रेभ्यो यज्ञानुबन्धेभ्य इष्टकचितान्वयिनः क्रतोः अत्र विधीयमानविद्यामय-क्रतुपृथक्त्वम् अवगम्यत; प्रज्ञान्तरपृथक्त्ववत्-यथा प्रज्ञान्तराणां दहरविद्यादीनां, पृथक्त्वहेतुभ्यः पृथक्त्वम् । आदिशब्दात् पूर्वोक्तश्रुत्यादिः गृह्यते । श्रुत्यादिना अनुबन्धैश्च विद्यामयक्रतुविधिः परिकल्प्यते इत्यर्थः । दृष्टश्च अनुवादसरूपेऽपि कल्प्यमानो विधिः - 'यदेव विद्यया करोति' (छां.उ.१-१-१०) इत्यादौ तदुक्तम् -

---

१. प्रधानभूता-ग

'वचनानि त्वपूर्वत्वात्' (पू.मी.३-५-२१) इति ।। ४८ ।।

यत्तूक्तम् - अतिदेशाच्च इष्टकचितशेषिभूतक्रत्वन्वयो गम्यते इति, तत्राह -

४०३. न सामान्यादप्युपलब्धेर्मृत्युवन्न हि लोकापत्तिः । (३-३-४९)

न अवश्यम् अतिदेशेन इष्टकचिताग्नितुल्यदेशत्वमपि आश्रयणीयम्, येन केनचित्सामान्येन अतिदेशोपलब्धेः ।

'स एष एव मृत्युर्य एष एतस्मिन् मण्डले पुरुषः' (अग्नि.१०-५-२) इतिवत् फलसामान्येन भविष्यति अतिदेशः । न हि तत्र मण्डलपुरुषे मृत्युलोकापत्तिरपि अतिदिश्यते । अपि तु मृत्युवत् सर्व संहर्तृत्वमेव ।। ४९ ।।

४०४. परेण च शब्दस्य ताद्विध्यं भूयस्त्वात्त्वनुबन्धः । (३-३-५०)

परेण च ब्राह्मणेन, अस्य मनश्चिदाद्यभिधायिनः शब्दस्य, ताद्विध्यं तद्विधत्वं, विद्यामयप्रतिपादकत्वम् अवगम्यते । परेण हि ब्राह्मणेन 'अयं वाव लोक एषोऽग्निचितस्तस्याप एव' (अग्नि.१०-५-४) इत्यादिना पृथक्फला विद्यैव विधीयते । न अग्निरहस्ये, क्रियामया एव विधीयन्ते' इति नास्ति नियम इत्यर्थः । क्रियाप्रकरणे तु एषां मनश्चिदादीनाम् अनुबन्धः, सम्पादनीयानाम् अग्न्यङ्गानां भूयस्त्वात् क्रियते । अतः विद्यामयक्रत्वङ्गभूता एव मनश्चिदादयः अग्नयः ।। ५० ।।

।। इति पूर्वविकल्पाधिकरणम् ।। २० ।।

१०३. शरीरे भावाधिकरणम् । (३-३-२१) (सू.५१-५२)

[अधिकरणार्थः-उपासककर्तृकं प्रत्यगात्मभूतस्य स्वात्मनोऽनुसन्धानं आविर्भूयमानगुणाष्टकवत्त्वेन]

४०५. एक आत्मनः शरीरे भावात् । (३-३-५१)

प्रत्यगात्मनः आत्मतया हि, परमात्मा उपास्यः उपासकस्यापि स्वरूपम् उपास्योपासनस्वरूपवत् ज्ञातव्यम् इति हि उक्तम् - 'त्रयाणाम्' (ब्र.सू.१-४-६) इत्यादिना । [2]वक्ष्यते च[2] - 'आत्मेति तूपगच्छन्ति' (ब्र.सू.४-१-३) इति । तत्र किं प्रत्यगात्मनः,

१. त्रयाणामपि-ग २. परमात्मोपास्य इति वक्ष्यते-ग

शरीरे वर्तमानस्य, कर्तृत्वभोक्तृत्वादिविशिष्टं रूपम् अनुसन्धेयम्? उत-प्रजापति-वाक्योदितापहतपाप्मत्वादिगुणकं यथावस्थितरूपम्? इति संशयः ।

शरीरे वर्तमानस्य यादृशं रूपं, तदेव अनुसन्धेयम् इति पूर्वपक्षः[1] । कर्मविधिष्विव, उपासनविधिष्वपि तावतैव साधनानुष्ठानफलानुभवयोः सम्भवात् ।

'यथाक्रतुरस्मिंल्लोके पुरुषः' (छां.उ.३-१४-१) इति तु । 'तं यथा यथोपासते' (मुद्ग.उ.३) इत्यनेनैकार्थ्यात् परमात्मविषयम् ।

राद्धान्तस्तु - 'तत्त्वमसि' (छां.उ.३-८-७) स त आत्माऽन्तर्याम्यमृतः' (बृ.उ.५-७-२२) इति प्रत्यगात्मन आत्मतयैव परमात्मा उपास्य इति, प्रत्यगात्मनः स्वरूपमपि उपासनान्तर्गतम् ।

'परंज्योतिरुपसम्पद्य स्वेन रूपेणाभिनिष्पद्यते' (छां.उ.८-३-४) इति यथावस्थितात्मस्वरूपस्यैव ब्रह्मानुभवः फलम् इत्यतः 'यथा क्रतुरस्मिंल्लोके पुरुषः '(छां.उ.३-१४-१) इति न परमात्ममात्रविषयम्, अपि तु [2]प्रत्यगात्मा[2]त्मभूतोपास्यविषयमिति प्रजापतिवाक्योदितं यथावस्थितं स्वरूपमेव अनुसन्धेयम् । अन्यथा प्राप्योपास्ययोः प्रकारभेदात् यथाक्रतुः इति विरुध्यते ।

'यजेत स्वर्गकामः' (तै.सं.२-५-६) इत्यादिकर्मविधौ तु, कर्तृस्वरूपानुसन्धानं न साधनान्तर्गतमिति विशेषः ।

सूत्रार्थस्तु - कर्तृत्वादिविशिष्टमेव आत्मनः स्वरूपम् अनुसन्धेयम् - इत्येके मन्यन्ते ।

कुतः ?

शरीरे वर्तमानस्य उपासितुः आत्मनः तथाभावात् ।। ५१ ।।

४०६. व्यतिरेकस्तद्भावभावित्वान्न तूपलब्धिवत् । (३-३-५२)

न कर्तृत्वादिविशिष्टमनुसन्धेयम्; अपि तु सांसारिकस्वरूपात् मुक्तस्वरूपस्य यो व्यतिरेकः सः अनुसन्धेयः ।

---

१. पक्षः । कुतः?-घ   २. प्रत्यगात्म-ख

कुतः ?

तथोपासनभावभावित्वात् तद्व्यतिरिक्तस्वरूपप्राप्तेः । 'यथा क्रतुरस्मिंल्लोके' (छां.उ.३-१४-१) इति हि आह । उपलब्धिवत् - यथा ब्रह्मस्वरूपोपलब्धिः यथावस्थितब्रह्मानुसन्धानयुक्तस्यैव, तथा आत्मोपलब्धिरपि ।। ७२ ।।

।। इति शरीरेभावाधिकरणम् ।। २१ ।।

१०४. अङ्गावबद्धाधिकरणम् (३-३-२२) (सू.५३-५४)

[अधिकरणार्थः-उद्गीथाद्यङ्गावबद्धानामुपासनानां उद्गीथादिवत्सर्वशाखास्थक्रतुष्वपि अन्वयः]

४०७. अङ्गावबद्धास्तु न शाखासु हि प्रतिवेदम् । (३-३-५३)

'ओमित्येतदक्षरमुद्गीथमुपासीत' (छां.उ.१-१-१) इति उद्गीथादिक्रत्वङ्गाश्रयाः उपासनाः श्रूयन्ते ।

'ताः किं यासु शाखासु श्रूयन्ते, तास्वेव व्यवस्थिताः? उत सर्वासु शाखासु सम्बद्धाः? - इति संशयः । शाखासु स्वर[1]भेदेन[1], प्रतिशाखम् उद्गीथ[2]भेदात्[2], यत्र श्रूयन्ते तत्रस्थोद्गीथादेः सन्निधानात् तेनैवान्विताः - व्यवस्थिताः इति पूर्वः पक्षः।

राद्धान्तस्तु - यद्यपि-उद्गीथव्यक्तिभेदो विद्यते, - तथापि तत्र तत्र च उद्गीथजातीयत्वेन सम्बन्धात्, सर्वेषां च उद्गीथजातीयत्वाविशेषात्, 'उद्गीथमुपासीत' (छां.उ.१-१-१) इति श्रुत्यैव सर्वसम्बन्ध इति, सर्वशाखासु सम्बध्यन्ते ।

सूत्रार्थस्तु - न तु अङ्गावबद्धा उपासनाः तासु शाखासु व्यवस्थिताः; अपि तु प्रतिवेदं - सर्वशाखासु सम्बध्यन्ते इत्यर्थः । 'हिः हेतौ' । यस्मात् उद्गीथजातीयत्वाविशेषेण सर्वसम्बन्धः तस्मात् इत्यर्थः ।। ५३ ।।

४०८. मन्त्रादिवद्वाऽविरोधः । (३-३-५४)

वा शब्दः चार्थे । यथा मन्त्रादीनां क्रत्वङ्गभूतानाम् एकैकशाखाभिहितानां, सर्वशाखासु क्रतोः एकत्वेन सर्वत्र सम्बन्धः न विरुध्यते; तद्वच्च अविरोधः ।

।। इति अङ्गावबद्धाधिकरणम् ।। २२ ।।

---

१. भेदात्-ग २. भेदेन-ग

१०५. भूमज्यायस्त्वाधिकरणम् (३-३-२३)

[अधिकरणार्थः-वैश्वानरविद्यायां त्रैलोक्यशरीरस्य वैश्वानरात्मनः उपासनं समस्तस्यैव]

४०९. भूम्नः क्रतुवज्ज्यायस्त्वं तथा हि दर्शयति । (३-३-५५)

वैश्वानरविद्यायां, स्वर्लोकादित्यवाय्वाकाशपृथिव्यवयवो वैश्वानरात्मा उपास्य श्रुतः ।

तत्र किं व्यस्तस्यैव उपासनं कार्यम्? उत व्यस्तस्य समस्तस्य च? अथ समस्तस्यैव? इति संशयः ।

'औपमन्यव कं त्वमात्मानमुपास्स इति, दिवमेव भगवो राजन्' (छां.उ.५-१२-१) इत्यादिना स्वर्लोकादिपृथिव्यन्तानां वैश्वानरात्मनो मूर्धादिपादान्तावयवत्वम् अभिधाय, तत्र तत्र व्यस्तस्यैव उपासनं फलं च विहितमिति, पश्चात् 'यस्त्वेतमेवं प्रादेशमात्रमभिविमानमात्मानं वैश्वानरमुपास्ते' (छां.उ.५-१८-१) इति पूर्वोक्तस्य समासेन उपसंहारः इति युक्तम् । अतो व्यस्तस्यैव उपासनं कार्यम् - इति प्रथमः पक्षः ।

समस्तोपासनस्य 'सर्वेषु लोकेषु सर्वेषु भूतेषु सर्वेष्वात्मसु चान्नमत्ति' (छां.उ.५-१८-१) इति व्यस्तोपासनफलेभ्यः फलान्तरविधानात् व्यस्तस्य समस्तस्य च उपासनं कार्यम् - इति द्वितीयः पक्षः ।

राद्धान्तस्तु - 'आत्मानं वैश्वानरं सम्प्रत्यध्येषि तमेव नो ब्रूहि' (छां.उ.५-११-६) इत्यारभ्य, वैश्वानरात्मनः स्वर्लोकादिपृथिव्यन्तानां मूर्धादिपादान्तावयवत्वम् अभिधाय, 'यस्त्वेतमेवं प्रादेशमात्रमभिविमानमात्मानं वैश्वानरमुपास्ते, स सर्वेषु लोकेषु' (छां.उ.५-१८-१) इति उपसंहारात् एकस्यैव वैश्वानरात्मनः त्रैलोक्यशरीरस्य परस्य ब्रह्मणः उपासनं विधाय, फलं च, 'सर्वेष्वात्मस्वन्नमत्ति (छां.उ.५-१८-१) इति, 'तद्यथेषीकतूलमग्नौ प्रोतं प्रदूयेतैवं हास्य सर्वे पाप्मानः प्रदूयन्ते' (छां.उ.५-२४-३) इति च सर्वेषाम् आत्मनाम् अविशेषेण भोग्यभूतं परंब्रह्म अनुभवति; तद्विरोधिनश्च [1]सर्वपाप्मनः[1] तरति इत्युक्तमिति गम्यते । अतः एकवाक्यत्वात् समस्तस्यैव उपासनं कार्यम् । व्यस्तवादस्तु स्वर्लोकादीनां मूर्धाद्यवयवत्व[2]ज्ञापनार्थः[2] । तत्र तत्र फलवादः ।

---

१. सर्वं पाप्मानं-ग २. ज्ञापनार्थम्-ग

'वैश्वानरं द्वादशकपालं निर्वपेत्पुत्रे जाते यदष्टाकपालो भवति' (तै.सं.२-२-५) इत्यादिवत् द्रष्टव्यः ।

सूत्रार्थस्तु - भूम्नो ज्यायस्त्वं-समस्तोपासनस्य श्रैष्ठ्यम्; प्रामाणिकत्वमित्यर्थः । एकवाक्यत्वावगतेः व्यस्तवादः क्रतुवद्द्रष्टव्यः । 'वैश्वानरं द्वादशकपालं निर्वपेत्....यदष्टाकपालः' इत्यादिः क्रताविवेत्यर्थः । तथा हि दर्शयति-समस्तोपासनस्य ज्यायस्त्वमेव दर्शयति श्रुतिः - 'मूर्धा ते व्यपतिष्यद्यन्मां नागमिष्यः' (छां.उ.५-१२-२) इत्यादिना व्यस्तोपासने अनर्थं [१]ब्रुवती[१] ।। ५५ ।।

।। इति भूमज्यायस्त्वाधिकरणम् ।। २३ ।।

१०६. शब्दादिभेदाधिकरणम् । (३-३-२४)

[अधिकरणार्थः-ब्रह्मप्राप्त्येकफलानामपि ब्रह्मोपासनरूपाणां वेदान्तोदितानां विद्यानां शब्दादिभेदतः स्वरूपभेदः]

४१०. नाना शब्दादिभेदात् । (३-३-५६)

सद्विद्यादहरविद्याशाण्डिल्यविद्याभूमविद्यादिकाः ब्रह्मोपासनरूपाः ब्रह्मप्राप्तिफलाः किम् एकविद्या? उत नाना? - इति संशयः ।

उपास्यस्य ब्रह्मणः फलस्य च एकत्वात् वेद, उपासीत इति च पर्यायत्वात् एकविद्या - इति पूर्वपक्षः ।

ब्रह्मण एकत्वेऽपि जगदेककारणत्वापहतपाप्मत्वाद्यनुबन्धभेदहेतुभिः पूर्वकाण्डोदितानुबन्धभेदहेतुभिः शब्दान्तरादिभिरेव अनुबन्धभेदमापन्ना नानाभूता विद्या - इति राद्धान्तः । शब्दान्तरादिभिः तत्र तत्र उदितैरेव विद्याभेदसिद्धावपि इह पुनर्वचनं, ब्रह्मप्राप्तिहेतुभूतं वेदान्तोदितं ज्ञानम् अविधेयम्, इति कुदृष्टिनिरासार्थम् ।

सूत्रार्थस्तु - सद्विद्याभूमविद्यादिका नानाभूताः, ब्रह्मण एकत्वेपि सत्, भूमा, अपहतपाप्मत्वादि शब्दभेदात् । आदिशब्दात् अभ्यास-संख्या-गुण-प्रक्रिया-नामधेयानि गृह्यन्ते ।। ५६ ।।

।। इति शब्दादिभेदाधिकरणम् ।। २४ ।।

---

१. ब्रुवन्ति-ग

१०७. विकल्पाधिकरणम् (३-३-२५) (सू.५७-५८)

[अधिकरणार्थः-ब्रह्मप्राप्त्येकफलानामपि विद्यानां, ब्रह्मप्राप्तिकामे पुरुषे विकल्प एव; न समुच्चयेन सर्वानुष्ठानम्]

४११. विकल्पोऽविशिष्टफलत्वात् । (३-३-५७)

सद्विद्या-भूमविद्यादिकानां ब्रह्मप्राप्तिफलानाम् एकस्मिन् पुरुषे समुच्चयोऽपि सम्भवति? न? इति संशयः ।

अग्निहोत्र-दर्शपूर्णमास-ज्योतिष्टोमादीनां स्वर्गैकफलानां, तत्र भूयस्त्वापेक्षया यथा एकस्मिन्पुरुषे समुच्चयो दृश्यते, तथा अत्रापि ब्रह्मानुभवभूयस्त्वापेक्षया एकस्मिन्पुरुषे समुच्चयः सम्भवतीति पूर्वः पक्षः ।

देशतः कालतः स्वरूपतश्च अनवच्छिन्नानन्दस्वरूपब्रह्मानुभवः, सर्वासां परविद्यानां फलम् । तच्च एकया विद्यया अवाप्तमिति, एकस्मिन्पुरुषे विद्यान्तरसमुच्चयः प्रयोजनाभावाच्च न सम्भवतीति, सर्वासां विकल्पः इति राद्धान्तः।

सूत्रमपि व्याख्यातम् ।। ५७।।

४१२. काम्यास्तु यथाकामं समुच्चीयेरन् न वा पूर्वहेत्वभावात् । (३-३-५८)

ब्रह्मप्राप्तिव्यतिरिक्तफला विद्याः काम्याः । तास्तु यथेष्टं समुच्चीयेरन्, विकल्प्येरन् वा। पूर्वहेत्वभावात् - तत् फलस्या परिमितत्वाभावात् भूयस्त्वापेक्षया समुच्चयः सम्भवति इत्यर्थः ।

।। इति विकल्पाधिकरणम् ।। २५ ।।

१०८. यथाऽश्रयभावाधिकरणम् । (३-३-२६) (सू.५९-६४)

[अधिकरणार्थः-उद्गीथाद्यङ्गाश्रितानाम् उपासनानां पृथक्फलताया, उद्गीथानङ्गतायाश्च दर्शनात् क्रतुषु उपादानानियमो दृढ एव]

४१३. अङ्गेषु यथाऽश्रयभावः (३-३-५९)

कर्माङ्गाश्रयाणाम् उद्गीथाद्युपासनानां गोदोहनादिवत् अधिकारान्तरत्वेन उपादानानियमः पूर्वोक्तः, सम्भवति? न? इति संशयः ।

न सम्भवति - इति पूर्वः [१]पक्षः[१] । 'उद्गीथमुपासीत' (छां.उ.१-१-१) इति उपासनविधौ फलान्तराश्रवणात् उद्गीथसम्बन्धावगतक्रत्वङ्गभावाविरोधात् । एवं विधिवाक्येनैव क्रत्वङ्गभावेऽवगते सति, 'यदेव विद्यया करोति श्रद्धयोपनिषदा तदेव वीर्यवत्तरम् भवति.....तेनोभौ कुरुतः' (छां.उ.१-१-१०) इति च वर्तमाननिर्देशः 'न स पापं श्लोकं शृणोति' (तै.सं.३-५-१) इतिवत् अर्थवादमात्रं स्यात् ।

राद्धान्तस्तु - 'यदेव विद्यया करोति....तदेव वीर्यवत्तरम्' (छां.उ.१-१-१०) इति विद्यायाः क्रतुवीर्यवत्तरत्वं प्रति साक्षात्साधनभावः अवगम्यते । एवं फलसाधनतयाऽवगता विद्या, किमाश्रित्य फलं करोति? इत्यपेक्षायाम् 'ओमित्येतदक्षरमुद्गीथमुपासीत' (छां.उ.१-१-१) इति उद्गीथमाश्रित्य कुर्यात् इति क्रत्वङ्गभूतोद्गीथाऽश्रयत्वमात्रं प्रतीयते; अतः फलान्तरसाधनतया अवगतस्य क्रत्वङ्गभावो नोपपद्यत इति, गोदोहनादितुल्यतया उपादानानियमः सिद्ध्यत्येव ।

'यस्य पर्णमयी जुहूर्भवति न स पापं श्लोकं शृणोति' (तै.सं.३-५-७) इत्यत्र तु [२]पर्णतायाः[२] जुहूसम्बन्धात्प्राक् अपापश्लोकश्रवणं प्रति साक्षात्साधनभावो न श्रूयते । पर्णतासम्बन्धिपुरुषसम्बन्धमात्रं श्रुतम् । ततु 'पर्णमयी जुहुः' (तै.सं.३-५-७) इति श्रुत्यैव प्रथमावगतक्रत्वङ्गभावं, न निरुणद्धि इत्यर्थवादमात्रम् इति विशेषः ।

सूत्रार्थस्तु - अङ्गेषु-उद्गीथादिषु आश्रितानाम् उपासनानां यथाऽश्रयभावः - उद्गीथादिवत् अङ्गभावः । गोदोहनादिवत् तस्मिन्वाक्ये फलसम्बन्धाऽश्रवणात् अङ्गभावः न विरुध्यते इत्यर्थः ।। ५९ ।।

४१४. शिष्टेश्च । (३-३-६०)

शिष्टिः - शासनं, विधानम् । 'उद्गीथमुपासीत' (छां.उ.१-१-१) इति [३]विधानाच्च[३] वर्तमाननिर्देशावगतफलसम्बन्धात्प्रागेव उद्गीथसम्बन्धः अवगत इति, तदङ्गभावः न विरुध्यते । अत उपादाननियमः ।। ६०।।

---

१. पक्षः । कुतः?-घ २. पर्णतया-ग ३. वचनाच्च-ग

४१५. समाहारात् । (३-३-६१)

इतश्च 'होतृषदनाद्धैवाऽपि दुरुद्गीथमनुसमाहरति' (छां.उ.१-५-५) इत्युद्गीथ वेदनहानौ अन्येन समाधानं ब्रुवती श्रुतिः वेदनस्य उपादाननियमं दर्शयति । दुरुद्गीथ - वेदनहीनमुद्गीथम् ।। ६१।।

४१६. गुणसाधारण्यश्रुतेश्च । (३-३-६२)

इतश्च उपादाननियमः अवगम्यते । प्रणवगुणत्वेन अवगतस्य उपासनस्य साधारण्यं श्रूयते, 'तेनेयं त्रयी विद्या वर्तते ओमित्याश्रावयेत्योमिति शंसत्योमित्युद्गाायति' (छां.उ.१-१-९) इति । 'तेन' इति प्रकृतपरामर्शात् सोपासन एव प्रणवः सर्वत्र सञ्चरति अतः प्रणवसहभावनियमदर्शनात् उपादाननियमो निश्चीयते ।। ६२।।

४१७. न वा तत्सहभावाश्रुतेः । (३-३-६३)

न वा उपादाननियमः; तत्सहभावाश्रुतेः - उद्गीथाद्यङ्गभावा क्रत्वङ्गभावाश्रुतेः इत्यर्थः । क्रत्वङ्गभावो हि सहभावः ।

'यदेव विद्यया करोति ...... तदेव वीर्यवत्तरम्' (छां.उ.१-१-१०) इति वीर्यवत्तरत्वसाधनतया अवगताया विद्यायाः, क्रत्वङ्गतया विनियोगासम्भवात्, तदङ्गभावो हि न श्रूयते । यत्र साक्षात् फलसाधनत्वं प्रतिपाद्यते, तत्र फलसाधनत्वं प्रथमं प्रतीयत इति, तस्य क्रत्वङ्गतया विनियोगः न सम्भवति इत्यभिप्रायः ।। ६३।।

४१८. दर्शनाच्च । (३-३-६४)

'एवं विद्ध वै ब्रह्मा यज्ञं यजमानं सर्वाश्चर्त्विजोऽभिरक्षति' (छां.उ.४-१७-१०) इति ब्रह्मणो वेदनेन यज्ञस्य यजमानस्य ऋत्विजां च रक्षणं ब्रुवन्ती अन्येषां वेदनाभावं दर्शयति । तच्च उद्गीथोपासनस्य अनङ्गत्वे सत्येव उपपद्यते । अतश्च उपादानानियमः ।। ६४।।

।। इति यथाश्रयभावाधिकरणम् ।। २६ ।।

।। इति श्री भगवद्रामानुजविरचिते वेदान्तदीपे तृतीयस्याध्यायस्य तृतीयः पादः ।।

चतुर्थः पादः - अङ्गपादः (अधि.१५, सू.५१)

१०९. पुरुषार्थाधिकरणम् । (३-४-१) (सू.२०)

[अधिकरणार्थः-कर्माङ्गकात् उपासनादेव परमपुरुषार्थप्राप्तिः; न तु विद्याङ्गकात् कर्मणः]

४१९. पुरुषार्थोऽतः शब्दादिति बादरायणः । (३-४-१)

किं विद्यातः पुरुषार्थः? उत कर्मणः? इति संशयः । कर्मणः इति पूर्वः [१]पक्षः[१] । कर्माङ्गत्वात् विद्यायाः, कर्मसु कर्तृभूतप्रत्यगात्मनो याथात्म्यप्रतिपादनपराणि वेदान्तवाक्यानि । विद्यायाः कर्माङ्गत्वं च 'यदेव विद्यया करोति .... तदेव वीर्यवत्तरम्' (छां.उ.१-१-१०) इति श्रुत्यैव अवगम्यते । न च प्रकृतोद्गीथोपासनविषयत्वमस्य वक्तुं शक्यते । 'यदेव विद्यया करोति' (छां.उ.१-१-१०) इति श्रुत्यैव, सर्वकर्मसु विद्याया विनियुक्तत्वात् । श्रुतिश्च प्रकरणात् बलीयसी । विद्यायाः कर्माङ्गत्वं कथम्? इत्यपेक्षायाम्, 'तत्त्वमसि' (छां.उ.६-८-७) 'अयमात्मा ब्रह्म' (बृ.उ.६-४-५) इति सामानाधिकरण्येन कर्माङ्गभूतकर्तृयाथात्म्यानुसन्धानद्वारेण विद्यायाः कर्माङ्गत्वम् इत्यवगम्यते । अतः कर्तृ[२]संस्कारत्वात्[२] ब्रह्मविद्यायाः कर्मण एव पुरुषार्थः । तत्र तत्र फलश्रुतिः अर्थवादः स्यात् । विद्यायाः कर्माङ्गत्वे भूयांसि लिङ्गानि च दृश्यन्ते सर्ववेदान्तेषु ।

राद्धान्तस्तु - कर्मसु कर्तुः प्रत्यगात्मनः अर्थान्तरभूतस्य स्वसङ्कल्पकृतजगदुदय-विभवलयलीलस्य निखलहेयप्रत्यनीककल्याणैकतानानन्दैकस्वरूपस्य सर्वेश्वरस्य सत्यसङ्कल्पस्यकरणाधिपरूपप्रत्यगात्माधिपस्य वेद्यस्य, वेदनरूपाया विद्याया; 'ब्रह्मविदाप्नोति परम्' (तै.आन.१-१) इत्यादिषु ब्रह्मप्राप्तिरूपफलोपदेशात्, विद्यात एव फलम् । 'यदेव विद्यया करोति' (छां.उ.१-१-१०) इति श्रुतिः प्रसिद्धवन्निर्देशात् । प्रसिद्धिश्च, प्रकृतोद्गीथोपासनस्यैवेति प्रस्तुतोद्गीथोपासनविशेषनिष्ठा । 'तत्त्वमसि' (छां.उ.६-८-७) इति सामानाधि[३]करण्यं[३] च तच्छब्दनिर्दिष्टस्वसङ्कल्पकृतजगज्जन्मस्थितिध्वंसादिकस्य परस्य ब्रह्मणो, न जीवस्वरूपत्वपरम् । अपि तु जगत्कारणस्य ब्रह्मणो जीवशरीरकतया जीवस्य आत्मत्वपरम् इति 'अधिकं तु भेदनिर्देशात्' (ब्र.सू.२-१-२२) इत्यादिषु उक्तम् । 'य आत्मनि तिष्ठन् .... यस्यात्मा शरीरम्' (बृ.उ.मा.पा.५-७-२६) इति च प्रत्यगात्मन आत्मत्वं, परस्य ब्रह्मणः श्रुत्यन्तरे व्यक्तम् ।

---

१. पक्षः । कुतः?-घ २. संस्कारत्वाभावात्-ग ३. करण्यनिर्देशं-ग

सूत्रार्थस्तु - पुरुषार्थः अतः-विद्यातः । कुतः ? 'ब्रह्मविदाप्नोति परम्' (तै.उ.भृ.१) इत्यादि शब्दात् ।। १।।

४२०. शेषत्वात्पुरुषार्थवादो यथाऽन्येष्विति जैमिनिः । (३-४-२)

'तत्त्वमसि' (छां.उ.६-८-७) इत्यादि सामानाधिकरण्येन ब्रह्मणः कर्मसु कर्तृस्वरूपत्वावगमात्, विद्यायाः कर्तृसंस्कारद्वारेण कर्मशेषत्वात् तत्र पुरुषार्थवादः अर्थवादमात्रम्; यथा अन्येषु द्रव्यसंस्कारादिषु इति, जैमिनिराचार्यो मन्यते ।। २।।

४२१. आचारदर्शनात् (३-४-३)

इतश्च विद्या कर्माङ्गम् । ब्रह्मविदाम् आचारो हि कर्मप्रधानो दृश्यते । यथाऽश्वपतिः केकयः ब्रह्मविदग्रेसरः । 'यक्ष्यमाणो ह वै भगवन्तोऽहमस्मि' (छां.उ.५-११-५) इत्याह ।

'कर्मणैव हि संसिद्धिमास्थिता जनकादयः' (भ.गी.३-२०) इति च स्मर्यते ।। ३।।

लिङ्गमिदम्; प्राप्तिरुच्यताम् इत्यत्राह -

४२२. तच्छ्रुतेः । (३-४-४)

'यदेव विद्यया करोति' (छां.उ.१-१-१०) इत्यादिकायाः श्रुतेः, विद्यायाः कर्माङ्गत्वम् अवगम्यते । न च दुर्बलेन प्रकरणेन, श्रुतिः विद्यासामान्यविषयः उद्गीथोपासनविशेषे व्यवस्थाप्यते ।। ४।।

४२३. समन्वारम्भणात् । (३-४-५)

'तं विद्याकर्मणी समन्वारभेते' (बृ.उ.६-४-२) इति विद्याकर्मणोः एकस्मिन् पुरुषे साहित्यं च, विद्यायाः कर्माङ्गत्वे सत्येव भवति ।। ५।।

४२४. तद्वतो विधानात् । (३-४-६)

विद्यावतः कर्मविधानाच्च, विद्या कर्माङ्गम् । 'आचार्यकुलाद्वेदमधीत्याभिसमावृत्य यथाविधानं गुरोः कर्मातिशेषेणाभिसमावृत्य कुटुम्बे' (छां.उ.८-१५-१) इत्यादिना अध्ययनवतः कर्माणि विदधत् अर्थावबोधपर्यन्तत्वात् अध्ययनस्य विद्यावत एव कर्माणि विदधाति इत्यवगम्यते ।। ६।।

४२५. नियमात् । (३-४-७)

'कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः' (ईशा.उ.२) इति आत्मविदाम् आयुषः कर्मसु नियमदर्शनाच्च, कर्मण एव पुरुषार्थः, न विद्यात इत्यवगम्यते । अतश्च विद्या कर्माङ्गम् ।। ७।।

४२६. अधिकोपदेशात्तु बादरायणस्यैवं तद्दर्शनात् । (३-४-८)

तुशब्दात्पक्षो व्यावृत्तः । बादरायणस्यैवं विद्यातः फलम् - इति मतम् । कुतः? अधिकोपदेशात् कर्मकर्तुः प्रत्यगात्मनोऽधिकस्य अर्थान्तरभूतस्य वेद्यस्य, वेदनभूतविद्यायाः फलसाधनत्वोपदेशात् । तद्दर्शनात् - दृश्यते हि वेदान्तवाक्येऽधिकविषयत्वं विद्यायाः । एवमेव हि 'तदैक्षत बहु स्यां प्रजायेयेति' (छां.उ.६-२-३) 'सोऽकामयत बहु स्यां प्रजायेय' (तै.आन.६-२) इत्यादिषु बहुभवनसङ्कल्पपूर्वकसृष्ट्यादेः कर्तुः सर्वेश्वरस्य करणाधिपाधिपस्य अनवधिकातिशयज्ञानानन्दैकस्वरूपस्य, निखिलहेयप्रत्यनीकस्य वेद्यस्य विद्या ब्रह्मप्राप्तिफलाय विधीयते ।। ८।।

४२७. तुल्यं तु दर्शनम् । (३-४-९)

विद्यायाः प्रधानत्वेऽपि, ब्रह्मविदाम् आचारदर्शनं तुल्यम् । कर्मणामनाचार-दर्शनमप्यस्ति इत्यर्थः ।

'ऋषयः कावषेयाः किमर्था वयमध्येष्यामहे किमर्था वयं यक्ष्यामहे' (ऐ.३-२-४) इत्यादौ । कर्मानुष्ठानदर्शनं तु फलाभिसन्धिरहितस्य कर्मणो विद्याङ्गत्वात् । त्यागस्तु फलाभिसन्धियुक्तस्य विद्याविरोधित्वात् इत्यभिप्रायः ।। ९ ।।

४२८. असार्वत्रिकी (३-४-१०)

'यदेव विद्यया करोति' (छां.उ.१-१-१) इति श्रुतिः सर्वविद्यायाः कर्माङ्गत्वं विदधाति इत्येतत् असङ्गतम् । अत्र 'विद्याशब्दाभिहिता तु न सार्वत्रिकी; अपि तु उद्गीथविद्या । 'यत्करोति तद्विद्यया' इति नैव पदान्वयः; अपि तु 'यदेव विद्यया करोति तदेव वीर्यवत्तरम्' (छां.उ.१-१-१०) इति । विद्यया क्रियमाणस्य अन्यतोऽवगतस्य वीर्यवत्तरत्वं प्रतिसाधनभावोऽवगम्यते । यदेव इति प्रसिद्धवन्निर्देशात् । अन्यतोऽवगतिर्हि -

'उद्गीथमुपासीत' (छां.उ.१-१-१) इति सन्निहितोद्गीथविद्यायाः ।। १० ।।

४२९. विभागश्शतवत् । (३-४-११)

'तं विद्याकर्मणी समन्वारभेते' (बृ.उ.६-४-२) इत्यत्र विद्या च स्वस्मै फलाय, कर्म च स्वस्मै फलयान्वारभते इति विभागो द्रष्टव्यः; यतो विद्याकर्मणोः अभिन्नफलत्वमुक्तम् । शतवत् यथा 'क्षेत्ररत्नविक्रयिणं शतद्वयमन्वेति' इत्युक्ते, 'क्षेत्रार्थं शतं रत्नार्थं शतम्' इति विभागो अवगम्यते, तद्वत् ।। ११ ।।

४३०. अध्ययनमात्रवतः । (३-४-१२)

'वेदमधीत्य' (छां.उ.८-१५-१) इति अध्ययनमात्रवत एव कर्मविधानात्, अनेन विद्यायाः न कर्माङ्गत्वम् अवगतम् । अध्ययनविधिर्हि आधानवत् नियमवत् अक्षरराशिग्रहणमात्रे पर्यवस्यति । गृहीतस्य स्वाध्यायस्य फलवदर्थावबोधित्वदर्शनात् तन्निर्णयफलमीमांसाश्रवणे अधीतवेदः पुरुषः स्वयमेव प्रवर्तते । अर्थावबोधपर्यन्तत्वेऽपि, अर्थज्ञानात् अर्थान्तरभूता स्मृतिप्रत्ययावृत्तिरूपा 'विद्यात् - उपासीत' इति शास्त्रविहिता विद्या, न कर्माङ्गम् ।। १२ ।।

४३१. नाऽविशेषात् । (३-४-१३)

'कुर्वन्नेवेह कर्माणि' (ईश.उ.२) इति 'ब्रह्मविदामायुषः कर्मणि नियमो दृश्यते' इत्येतत् न सम्भवति । अविशेषात् - विदुष एव इति विशेषाभावात्, किमिति अविदुषो न स्यात् । विदुषस्तु आप्रयाणात् उपासनानुवृत्तिदर्शनात् अर्थस्वभावात् विदुष एवेति अभिप्रायः ।। १३ ।।

४३२. स्तुतयेऽनुमतिर्वा । (३-४-१४)

वाशब्दो अवधारणे । 'ईशावास्यमिदं सर्वम्' (ईशा.उ.१) इति विद्याप्रकरणात्, विद्यास्तुतये कर्मानुमतिरेव । 'विद्यामाहात्म्यात् सर्वदा कर्माणि कुर्वन्नपि तैः न लिप्यते' इति हि स्तुता भवति विद्या । वाक्यशेषे च - 'न कर्म लिप्यते नरे' (ईशा.उ.२) इति श्रूयते ।। १४ ।।

४३३. कामकारेण चैके । (३-४-१५)

एके - शाखिनः, कामकारेण च विद्यानिष्ठस्य गार्हस्थ्यत्यागम् अधीयते । 'किं प्रजया करिष्यामो येषां नोऽयमात्माऽयं लोकः' (बृ.उ.६-४-२२) इति गार्हस्थ्यकर्मत्यागं ब्रुवद्वाक्यं, 'विद्या प्रधानम्' इति दर्शयति ।। १५ ।।

४३४. उपमर्दं च (३-४-१६)

विद्यया सर्वकर्मोपमर्दं च विधीयते 'क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे' (मुं.उ.२-२-८) इति । तत् विद्यायाः कर्माङ्गत्वे न सङ्गच्छते ।। १६ ।।

४३५. ऊर्ध्वरेतस्सु च शब्दे हि । (३-४-१७)

ऊर्ध्वरेतस्सु आश्रमेषु ब्रह्मविद्यादर्शनात्, तेषु च अग्निहोत्रादिकर्माभावात् न विद्याकर्माङ्गम् । ते च अत्र आश्रमाः सन्त्येव । यतो वैदिके शब्दे, तेऽपि दृश्यन्ते -

'त्रयो धर्मस्कन्धाः । यज्ञोऽध्ययनं दानम्' (छां.उ.२-२३-१) इति 'ये चेमेऽरण्ये श्रद्धा तप इत्युपासते'। (छां.उ.५-१०-१) 'एतमेव प्रव्राजिनो लोकमिच्छन्तः प्रव्रजन्ति (बृ.उ.६-४-२२) इत्यादौ । 'यावज्जीवमग्निहोत्रम्' इत्यादिका तु श्रुतिः अविरक्तविषया ।। १६ ।।

४३६. परामर्शं जैमिनिरचोदनाच्चापवदति हि । (३-४-१८)

'त्रयो धर्मस्कन्धाः' (छां.उ.२-२३-१) इत्यादिषु तेषाम् आश्रमाणाम् अचोदनात् - अविधानात् उपासनास्तुत्यर्थं परामर्शम् - अनुवादम् जैमिनिः आचार्यो मन्यते । अपि च अपवदति हि श्रुतिः आश्रमान्तरं -

'वीरहा वा एष देवानां योऽग्निमुद्वासयते' (तै.सं.१-५-२) इत्यादिका । अतः ते न सन्त्येव ।। १८ ।।

४३७. अनुष्ठेयं बादरायणः साम्यश्रुतेः । (३-४-१९)

गृहस्थाश्रमवत् आश्रमान्तरमपि अनुष्ठेयं भगवान् बादरायणो मन्यते ।

कुतः ?

तस्यापि तत्साम्यश्रुतेः । 'त्रयो धर्मस्कन्धाः' (छां.उ.२-२३-१) इत्येवमादौ हि सर्वेषाम् आश्रमाणाम् एकरूपं [1]कीर्तनम्[1] ।। १९ ।।

४३८. विधिर्वा धारणवत् । (३-४-२०)

'वा'शब्दो अवधारणे । सर्वेषाम् आश्रमाणां विधिरेव अयम् । धारणवत् - यथा 'अधस्तात्समिधं धारयन्ननुद्रवेत् । उपरि हि देवेभ्यो धारयति' (तै.ना.२-२२) इति

१. हि संकीर्तनम्-ग

अनुवादसरूपेऽपि उपरिधारणस्य अप्राप्तत्वेन विधिराश्रीयते, एवम् इहाश्रमाणामपि । अत ऊर्ध्वरेतस्स्वपि विद्यादर्शनात् विद्यातः पुरुषार्थः - इति ।। २०।।

।। इति पुरुषार्थाधिकरणम् ।। १ ।।

११०. स्तुतिमात्राधिकरणम् ।। (३-४-२) (सू.२१-२२)

[अधिकरणार्थः-'स एष रसानाम्' इत्यादि वाक्यानाम् उद्गीथादौ रसतमादिदृष्टिविधिपरत्वमेव]

४३९. स्तुतिमात्रमुपादानादिति चेन्नापूर्वत्वात् । (३-४-२१)

४४०. भावशब्दाच्च । (३-४-२२)

'ओमित्येतदक्षरमुद्गीथमुपासीत' (छां.उ.१-१-१) स एव रसानां रसतमः 'परमः परार्ध्योऽष्टमो यदुद्गीथः' (छां.उ.१-१-३) इत्येवं जातीयके, किं कर्माङ्गाश्रयाणां दृष्टिविशेषाणां विधिः आस्थेयः? उत उद्गीथादिस्तुतिमात्रम्? इति संशयः ।

विधित्वे सिद्धे हि [1]गोदोहनादिवत्[1] भवति; विधित्वमेव न सम्भवति - इति पूर्वः [2]पक्षः[2] ।

'इयमेव जुहूर्यत्स्वर्गलोक आहवनीयः' (छां.उ.६-३-२) इतिवत् कर्माङ्गभूतोद्गीथादिसम्बन्धितया उपादानात् रसतमत्वादेः तत्स्तुतिमात्रत्वमेव, न रसतमत्वादि दृष्टिविधिः ।

राद्धान्तस्तु - जुह्वादिविधिवत्, उद्गीथादिविधेः अत्रासन्निधानात् रसतमत्वादेः अप्राप्तत्वाच्च 'उपासीत' इति विधिप्रत्ययेन च, न स्तुतिमात्रम् तत् दृष्टिविधिरेव ।।

सूत्रद्वयं व्याख्यातम् ।। २१,२२ ।।

।। इति स्तुतिमात्राधिकरणम् ।। २ ।।

१११. पारिप्लवार्थाधिकरणम् (३-४-३) (सू.२३-२४)

[अधिकरणार्थः-उपनिषत्सु उपलभ्यमानानाम् आख्यानानां विद्याविध्यर्थत्मेव न तु अश्वमेधाङ्गपारिप्लवनामकशास्त्रर्थत्वम्]

४४१. पारिप्लवार्था इति चेन्न विशेषितत्वात् । (३-४-२३)

४४२. तथा चैकवाक्योपबन्धात् । (३-४-२४)

---

१. रसतमत्वादिवत्-ग २. पक्षः । कुतः?-घ

'प्रतर्दनो ह वै दैवोदासिः' (कौ.उ.३-१) इत्यादयो वेदान्तेषु आख्यानविशेषाः, किं पारिप्लवप्रयोगार्थाः? उत तत्र तत्र विद्याविशेषप्रतिपादनार्थाः? इति संशयः । 'आख्यानानि शंसन्ति'(?) इति पारिप्लवे विनियोगात् तदर्थाः - इति पूर्वः पक्षः ।

राद्धान्तस्तु - 'आख्यानानि शंसन्ति'(?) इत्युक्त्वा, 'मनुर्वैवस्वतो राजा'(?) इति मन्वाद्याख्याने विनियोगस्य विशेषितत्वात्, 'तं मामायुरमृतमित्युपास्व' (कौ.उ.३-१४) 'आत्मा वा अरे द्रष्टव्यः' (बृ.उ.६-५-६) इत्यादिविधिना एकवाक्यत्वाच्च, 'सोऽरोदीत्' (तै.सं.१-५-१) इत्यादिवत् विद्याविध्यर्था एव । सूत्रद्वयमपि व्याख्यातम् ।। २३,२४ ।।

।। इति परिप्लवार्थाधिकरणम् ।। ३ ।।

११२. अग्नीन्धनाधिकरणम् । (३-४-४)

[अधिकरणार्थः-परिव्राजिनां विद्यासिद्धिः, स्वाश्रमविहितमकर्मापेक्षैव; न तु अग्न्याधानपूर्वकर्मापेक्षा]

४४३. अत एव चाग्नीन्धनाद्यनपेक्षा । (३-४-२५)

ऊर्ध्वरेतस्सु आश्रमेषु ब्रह्मविद्या सम्भवति? न? इति संशयः यज्ञाद्यभावात् तेषां तदङ्गिका विद्या न सम्भवति - इति पूर्वपक्षः ।

राद्धान्तस्तु - 'यदिच्छन्तो ब्रह्मचर्यं चरन्ति' (कठ.उ.२-१५) एतमेव प्रव्राजिनो 'लोकमिच्छन्तः प्रव्रजन्ति' (बृ.उ.६-४-२२) इत्यादि श्रुतेः तेषां विद्यावत्त्वावगमात्, तेषु अग्निहोत्राद्यनपेक्षा विद्या - इति निश्चीयते ।

सूत्रार्थस्तु - अत एव - विद्यावत्त्वश्रुतेरेव, आधानाद्यनपेक्षा तेषु विद्या । अग्नीन्धनं तु आधानम् ।। २५ ।।

।। इति अग्नीन्धनाधिकरणम् ।। ४ ।।

११३. सर्वापेक्षाधिकरणम् (३-४-५)

[अधिकरणार्थः-कर्माधिकृताश्रमिणां तु ब्रह्मविद्या कर्म सापेक्षैव निष्पन्ना भवेत्]

४४४. सर्वापेक्षा च यज्ञादिश्रुतेरश्ववत् । (३-४-२६)

कर्मवत्सु गृहस्थेषु किं यज्ञादिकर्मापेक्षा विद्या? उत तत्रापि केवलैव - इति संशयः ।

ऊर्ध्वरेतस्सु यज्ञाद्यनपेक्षैव अमृतत्त्वं साधयति चेत् - कर्मनिरपेक्षाया विद्याया एव साधनत्वम् अभ्युपगमनीयम्; तथा सति गृहस्थेष्वपि तन्निरपेक्षैव साधयितुं समर्था - इति पूर्वपक्षः । न हि स्वर्गादिसाधनभूतम् अग्निहोत्रादिकर्म पुरुषभेदेन नानाविधाङ्गकं दृष्टम् । विविदिषन्ति इति शब्दोऽपि वेदनेच्छायामेव कर्माणि विनियुंक्ते; न विद्यायाम् ।

राद्धान्तस्तु - कर्मवत्सु गृहस्थेषु यज्ञादिसर्वकर्मापेक्षा विद्या ।

कुतः ?

यज्ञादिश्रुतेः । 'तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसाऽनाशकेन' (बृ.उ.६-४-२२) इति हि यज्ञादयो विद्याङ्गत्वेन विनियुज्यन्ते । अतो गृहस्थेषु [1]कर्मापेक्षा[1] विद्या । इच्छाया इष्यमाणप्रधानत्वात् विविदिषन्ति इति इष्यमाणं ज्ञानमेव [2]इत्यवगम्यते[2] । यथा - अश्वो गमनसाधनभूतोऽपि स्वपरिकरबन्धरूपपरिकर्मापेक्षः एवं मोक्षसाधनभूता विद्या नित्यनैमित्तिकपरिकर्मापेक्षा । ऊर्ध्वरेतस्सु च स्वाश्रमविहितं कर्मैव परिकर्म भवतीति, तेष्वपि विद्यासम्बन्धः शास्त्रादवगम्यते । शास्त्रैकसमधिगम्ये हि यथाशास्त्रम् [3]अभ्युपगमनीयम्[3] ।। सूत्रमपि व्याख्यातम् ।। २६ ।।

।। इति सर्वापेक्षाधिकरणम् ।। ५ ।।

११४. शमदमाद्यधिकरणम् (३-४-६)

[अधिकरणार्थः-गृहस्थस्य यज्ञादिवत् विद्याङ्गतया शमदमादयोऽप्यनुष्ठेया एव]

४४५. शमदमाद्युपेतः स्यात् तथापि तु तद्विधेस्तदङ्गतया तेषामप्यवश्यानुष्ठेयत्वात् (३-४-२५)

किं विद्यानिवृत्तये गृहस्थैः शमदमादय उपादेयाः ? उत न ? इति संशयः ।

गृहस्थानां आन्तरबाह्यकरणव्यापाररूपकर्माङ्गकत्वात् विद्यायाः तद्विपरीतरूप-शमदमाद्युपादानसामर्थ्यात् ऊर्ध्वरेतस्सु कर्मरहितेषु शमदमादिविनियोगो भविष्यति । यथा यज्ञादिविनियोगः कर्मवत्सु गृहस्थेषु, तस्मात् गृहस्थैरनुपादेयाः शमादयः - इति पूर्वः पक्षः ।

---

१. तदपेक्षा-ग २. अर्थतोवगम्यते-ग ३. अभ्युपगन्तव्यम्-ग

राद्धान्तस्तु - 'तस्मादेवं विच्छान्तो दान्त उपरतस्तितिक्षुः समाहितो भूत्वाऽत्मन्येवात्मानं पश्येत्' (बृ.उ.६-४-२३) इति सामान्येन विद्याङ्गतया विनियोगात् गृहस्थैरपि उपादेयाः । न च कर्मवतां तेषां शमाद्युपादानासामर्थ्यम्; भिन्नविषयत्वाच्छमादेः । विहितेषु हि कर्मसु करणव्यापारः; अविहितेषु प्रयोजनशून्येषु च शमदमादयः । अतः [१]शमादि[१]विनियोगो यज्ञादिविनियोगवन्न सङ्कोचमर्हति इति ।

[२]सूत्रार्थस्तु[२] - यद्यपि गृहस्थो यज्ञादिकर्मसु विनियुक्तः; [३]तथापि[३] शमदमाद्युपेतः स्यात् ।

कुतः ?

'शान्तो दान्त' इत्यादिना तद्विधेः । तदङ्गतया विद्याङ्गतया विद्यानिष्पत्तये तेषामवश्यानुष्ठेयत्वाच्च । एकाग्रतानिष्पाद्यत्वात् शमदमादिभिरेव विद्यानिष्पत्तिः इत्यर्थः । यज्ञादिकर्माण्यपि पापनिबर्हणद्वारेण एकाग्रताम् आपादयन्ति इत्यभिप्रायः ।

।। इति शमदमाद्यधिकरणम् ।। ६ ।।

११५. सर्वान्नानुमत्यधिकरणम् (३-४-७)

[अधिकरणार्थः-उपासकेषु उपासननिष्पत्तेः आहारशुचित्वाद्यपेक्षा]

४४६. सर्वान्नानुमतिश्च प्राणात्यये तद्दर्शनात् । (३-४-२८)

वाजिनां छन्दोगानां च प्राणविद्यायां - 'न ह वा एवंविदि किंचनानन्नं भवति' (छां.उ.५-२-१) इति सर्वान्नानुमतिः सङ्कीर्त्यते । किं प्राणविदः सर्वान्नानुमतिः सर्वदा? उत प्राणात्ययापत्तौ - इति संशयः ।

अविशेषात् सर्वदा - इति पूर्वपक्षः ।

अतिशयितशक्तेः ब्रह्मविदोऽपि हि उच्छिष्टपरिग्रहभक्षणयोः प्राणात्ययापत्तावेव दर्शनात्, अल्पशक्तेः प्राणविदः किं पुनरिति प्राणात्ययापत्तावेवेति राद्धान्तः ।

सूत्रार्थस्तु - चशब्दः अवधारणे । प्राणविदः सर्वान्नानुमतिः प्राणात्यये एव ।

कुतः ?

तद्दर्शनात् अतिशयितशक्तेर्ब्रह्मविदः प्राणात्यय एव सर्वन्नानुमतिदर्शनात् ।। २८ ।।

---

१. शमदमादि-ग २. सूत्रार्थः-ख,घ ३. तथापि तु-ग

४४७. अबाधाच्च । (३-४-२९)

'आहारशुद्धौ सत्त्वशुद्धिः, सत्त्वशुद्धौ ध्रुवा स्मृतिः' (छां.उ.७-२६-२) इति आहारशुद्धिविधेः अबाधाच्च प्राणात्यय एव ।। २९ ।।

४४८. अपि स्मर्यते । (३-४-३०)

'प्राणसंशयमापन्नो योऽन्नमत्ति यतस्ततः । लिप्यते न स पापेन पद्मपत्रमिवाम्भसा' ।। इति प्राणसंशय एव सर्वान्नानुमतिः स्मर्यते च ।। ३०।।

४४९. शब्दश्चातोऽकामकारे । (३-४-३१)

[१]यतः सर्वान्नानुमतिः प्राणात्यये अतः अकामकारे शब्दश्च कामकारस्य प्रतिषेधकशब्दश्च उपपद्यते इत्यर्थः । अस्ति हि कामकारे 'प्रतिषेधकः शब्दः' तस्माद्ब्राह्मणः सुरां न [२]पिबति[२] पाप्मनोत्सृजा (कठसंहिता) इति पाप्मना संसृष्टो न भवामि इति मत्त्वा सुरां न पिबतीत्यर्थः ।। ३१ ।।

।। इति सर्वान्नानुमत्यधिकरणम् ।। ७ ।।

११६. विहितत्वाधिकरणम् (३-४-८)

[अधिकरणार्थः-उपासनप्रवृत्तेषु कर्मणां विद्याङ्गत्वेऽपि तद्रहितेषु केवलाश्रमाङ्गत्वमपि]

४५०. विहितत्वाच्चाश्रमकर्माऽपि । (३-४-३२)

किं यज्ञादयो विद्याङ्गभूताः केवलाश्रमस्याप्यङ्गभूताः ? उत न इति संशयः।

केवलाश्रमस्यापि अङ्गत्वे नित्यानित्यसंयोगरूपविरोधः प्रसज्यते इति, न अङ्गभूताः केवलाश्रमस्य - इति पूर्वपक्षः ।

राद्धान्तस्तु - यदा - एकेनैव विनियोगेन उभयाङ्गत्वमिष्यते; तदा नित्यानित्य-संयोगविरोधः । इह तु -

'यावज्जीवमग्निहोत्रं जुहुयात्' । (आप. श्रौ.३-१४-८) 'तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसाऽनाशकेन' (बृ.उ.६-४-२२) इति विनियोगपृथक्त्वेन

---

१. अकामकारे कामकार निवृत्तौ शब्दश्च अत एव यत एव यतः सर्वान्नानुमतिः प्राणात्यये तस्मात् ब्रह्मणः सुरा न पिबेत् इत्यादिभिः-ख,घ २. सुरां न पिबेत् इत्यादिकः-ग

विरोधः परिह्रियते । यथाऽग्निहोत्रादीनामेव कर्मणाम् । जीवनाधिकार कामनाधिकारयोरेव अधिकारभेदस्य अस्फुटत्वात् स्फुटीकरणाय पुनरिह चिन्त्यते ।

सूत्रार्थस्तु - 'यावज्जीवमग्निहोत्रं जुहुयात्' इत्यादिना केवलगृहस्थाश्रमिणो जीवननिमित्ततया विहितत्वादेव यज्ञादिकेवलमाश्रमकर्मापि ।

४५१. सहकारित्वेन च । (३-४-३३)

'तमेतं वेदानुवचनेन' (बृ.उ.६-४-२२) इत्यादिना, विद्यासाधनत्वेन विहितत्वाच्च विद्यासहकारित्वेन च अनुष्ठेयं यज्ञादिकर्म । विनियोगपृथक्त्वेन विरोधः परिह्रियते इत्यभिप्रायः ।। ३३ ।।

४५२. सर्वथाऽपि त एवोभयलिङ्गात् । (३-४-३४)

सर्वथापि - उभयत्र विनियोगेऽपि, ते एव - यज्ञादयः ।

कुतः ?

उभयलिङ्गात् - उभयत्र प्रत्यभिज्ञानाख्यलिङ्गात् ।। ३४ ।।

४५३. अनभिभवं च दर्शयति । (३-४-३५)

'धर्मेण पापमपनुदति' (तै.ना.उ.५०) [१]इत्यादिभिश्च यज्ञादिधर्मान्निर्दिश्य तैः विद्यायाः[१] अनभिभवं पापकर्मभिः उत्पत्तिप्रतिबन्धाभावं दर्शयति । अतः उभयत्र विनियोगात्, केवलाश्रमिणां मुमुक्षूणां च अनुष्ठेयाः यज्ञादयः ।। ३५ ।।

।। इति विहितत्वाधिकरणम् ।। ८ ।।

११७. विधुराधिकरणम् (३-४-९) (सू.३६-३९)

[अधिकरणार्थः-अनाश्रमिणामपि चेतनानां त्रैवर्णिकानां ब्रह्मविद्याधिकारालोपः]

४५४. अन्तरा चाऽपि तु तद्दृष्टेः । (३-४-३६)

विधुरादीनाम् अनाश्रमिणां ब्रह्मविद्यायाम् अधिकारः अस्ति ? न? इति संशयः ।

आश्रमधर्मेतिकर्तव्यताकत्वात् विद्यायाः, तदभावात् तेषां अनधिकारः इति पूर्वपक्षः ।

---

१. इत्यादिना तैरेव यज्ञादिभिः विद्यायाद्युत्पत्ति प्रतिबन्धाभावरूप-ग

राद्धान्तस्तु - ऊर्ध्वरेतस्स्वपि रैक्वादिषु अनाश्रमिषु विद्यानिष्ठत्वदर्शनात् आश्रमानियतैः जपोपवासदानादिभिरेव तेषां विद्यानुग्रहो भवतीति अस्त्येव अधिकारः ।

सूत्रार्थस्तु - 'तुशब्दात्[१] । चशब्दः अवधारणे । अन्तराऽपि आश्रमानन्तरा वर्तमानानाम् अनाश्रमिणामपि अधिकारः अस्त्येव ।

कुतः?

तद्दृष्टेः रैक्वादिषु विद्यानिष्ठत्वदृष्टेः ।। ३६ ।।

४५५. अपि स्मर्यते । (३-४-३७)

अपि च अनाश्रमिणामपि जपादिभिरेव विद्यानुग्रहः स्मर्यते -'जप्येनापि च संसिद्ध्येत्' (म.स्मृ.२-८७) इत्यादिना ।। ३७ ।।

४५७. विशेषानुग्रहश्च । (३-४-३८)

आश्रमानियतधर्मविशेषेण विद्यानुग्रहः श्रूयते च - 'तपसा ब्रह्मचर्येण श्रद्धया विद्यया चात्मानमन्विष्येत्' (प्र.उ.१-१०) इति ।

४५७. अतस्त्वितरज्ज्यायो लिङ्गाच्च । (३-४-३९)

अतः - अनाश्रमित्वात्, इतरत् - आश्रमित्वं, ज्यायः, धर्मभूयस्त्वात् । लिङ्गाच्च - स्मृतेश्च इत्यर्थः । 'अनाश्रमी न तिष्ठेत्तु दिनमेकमपि द्विजः' (द.स्मृ.१-१६) इति हि स्मर्यते । तस्मात् अनाश्रमित्वेन विद्यानिष्ठत्वम् आपद्विषयम् इत्यभिप्रायः ।। ३९ ।।

।। इति विधुराधिकरणम् ।। ९ ।।

११८. तद्भूताधिकरणम् (३-४-१०)

[अधिकरणार्थः-ब्रह्मविद्यायाम् सर्वथा आश्रमप्रच्युतानां अनधिकार एव]

४५८. तद्भूतस्य तु नाऽतद्भावो जैमिनेरपि नियमात्तद्रूपाभावेभ्यः । (३-४-४०)

नैष्ठिकवैखानसपरिव्राजकानां स्वाश्रमेभ्यः प्रच्युतानामपि विद्याधिकारः अस्ति? न? इति संशयः ।

---

१. तु शब्दात् पक्षो व्यावृत्तः-ग

विधुरादिवत् जपादिभिरपि अनुग्रहसम्भवात् अस्त्येवाधिकारः - इति पूर्वः पक्षः ।

राद्धान्तस्तु - नैष्ठिकादीनां स्वाश्रमभ्रष्टानां प्रायश्चित्ताभावस्मरणात्, शिष्टबहिष्कृतत्वाच्च तेषाम् अनधिकारः ।

सूत्रार्थस्तु - तद्भूतस्य तु नातद्भावः - नैष्ठिकादिभूतस्य [1]'अतथाभावो न संभवति'[1] ।

कुतः ?

तद्रूपाभावेभ्यः शास्त्रे नियमात् । तद्रूपाभावाः नैष्ठिकाद्याश्रमधर्माभावाः तेभ्यो नियच्छन्ति हि शास्त्राणि -

'ब्रह्मचार्याचार्यकुलवासी तृतीयोऽत्यन्तमात्मानमाचार्यकुलेऽवसादयन्' (छां.उ.२-२३-१) इति नैष्ठिकस्य तत्रैव नियमः । 'अरण्यमियात्ततो पुनरेयात्' (बृ.उ.६-४-५, श्वे.उ.६-१९) इति च वैखानसस्य, 'संन्यस्याग्नीन्न पुनरावर्तयेत्' (काठके यजुषि) इति च परिव्राजकस्य । अत एव एतेषाम् अनाश्रमित्वेनावस्थानाभावात् विद्याधिकारो न सम्भवतीति जैमिनेरपि अविगीतोऽयम् ।। ४० ।।

४५९. न चाऽऽधिकारिकमपि पतनानुमानात्तदयोगात् । (३-४-४१)

आधिकारिकम् - अधिकारलक्षणोक्तम् 'अवकीर्णिपशुश्च तद्वत्'? (पू.मी.सू.६-८-२१) इत्येतत् प्रायश्चित्तं नैष्ठिकस्य न सम्भवति, कुतः? पतनानुमानान्नैष्ठिकस्य तदयोगात् । तस्य हि पतनं स्मर्यते प्रायश्चित्ताभाववचनेन ।

'आरूढो नैष्ठिकं धर्मं यस्तु प्रच्यवते द्विजः । प्रायश्चित्तं न पश्यामि येन शुद्ध्येत्स आत्महा' ।। (आग्रेय.१६-४-२३, अत्रि.स्मृ.८-१६) इति । अत उपकुर्वाण-ब्रह्मचारिविषयम् आधिकारिकम् ।।

४६०. उपपूर्वमपीत्येके भावमशनवत्तदुक्तम् । (३-४-४२)

एके प्रायश्चित्तभावमपि - मन्यन्ते । यत उपपूर्वम् - उपपातकमिदम् । अशनवत् - मध्वशनादिनिषेधतत्प्रायश्चित्तवत् भवत्येव इत्यर्थः ।

कुतः ?

---

१. तथाभावो न भवति-ग

उपकुर्वाणब्रह्मचारिणः उक्तमाधिकारिकम् अस्यापि भवति । तदुक्तं स्मृतिकारैः - 'उत्तरेषां चैतदविरोधि' (गौत.१-३-४) इति उपकुर्वाणे ब्रह्मचारिणि उक्तो धर्मः उत्तरेषाञ्चाश्रमिणां स्वाश्रमाविरोधी भवत्येवेत्यर्थः ।। ४२ ।।

४६१. बहिस्तूभयथाऽपि स्मृतेराचाराच्च । (३-४-४३)

उभयथाऽपि - उपपातकित्वे, महापातकित्वेऽपि, नैष्ठिकात् प्रच्युतो बहिर्भूतः कर्माधिकारात् ।

'प्रायश्चित्तं न पश्यामि' (आग्नेय.१६-४-१३, अत्रि.स्मृ.८-१६) इति स्मृतेः आचाराच्च, वर्जयन्त्येनं शिष्टाः विद्योपदेशादौ । यद्यपि कल्मषनिर्हरणाय कैश्चित् प्रायश्चित्त'मुपदिश्यते[1]', तथापि कर्माधिकारापादनी शुद्धिः तेषां न सम्भवति इत्यभिप्रायः ।। ४३ ।।

।। इति तद्भूताधिकरणम् ।। १० ।।

११९. स्वाम्यधिकरणम् (३-४-११) (सू.४४-४५)

[अधिकरणार्थः-कर्माङ्गयोः उद्गीथाद्युपासनानाम् ऋत्विजैवाऽनुष्ठेयत्वम् फलश्रुत्यविरोधश्च]

४६२. स्वामिनः फलश्रुतेरित्यात्रेयः । (३-४-४४)

उद्गीथाद्युपासनं, किं यजमानेनानुष्ठेयम् ? उत ऋत्विजा ? इति संशयः ।

'यदेव विद्यया करोति तदेव वीर्यवत्तरम्' (छां.उ.१-१-१०) इति क्रतुवीर्यवत्तरत्वफलं यजमानस्येति, दहरोपासनादिवत्, यजमानेन अनुष्ठेयम् - इति पूर्वः पक्षः ।

कर्माङ्गाश्रयत्वात् अस्योपासनस्य, कर्मणश्च आर्त्विज्यत्वेन एतदपि ऋत्विजा अनुष्ठेयम् गोदोहनादिवत् - इति राद्धान्तः ।

सूत्रार्थस्तु - स्वामिनः - यजमानस्य उद्गीथाद्युपासने कर्तृत्वम् ।

कुतः ? तस्यैव फलश्रुतेः - इत्यात्रेयो मन्यते ।। ४ ।।

४६३. आर्त्विज्यमित्यौडुलोमिस्तस्मै हि परिक्रियते । (३-४-४५)

क्रत्वङ्गत्वेन क्रत्वधिकृतस्यैव अस्मिन् उपासने अधिकारात् क्रतोश्च आर्त्विज्यत्वेन एतदप्यार्त्विज्यम् - इति औडुलोमिः आचार्यो मन्यते । यजमानफलसाधनत्वेऽपि क्रतोः तदनुष्ठानाय हि ऋत्विक् परिक्रियते ।। ४५ ।।

।। इति स्वाम्यधिकरणम् ।। ११ ।।

---

१. प्रायश्चित्तमुच्यते-ग

१२०. सहकार्यन्तरविध्यधिकरणम् (३-४-१२) (सू.४६-४८)
[अधिकरणार्थः-'अथ मुनिः' इति मौनरूपस्य विद्यासहकार्यन्तरस्य विधानमेव; नाऽनुवादः]

४६४. सहकार्यन्तरविधिः पक्षेण तृतीयं तद्वतो विध्यादिवत् । (३-४-४६)

'तस्माद्ब्राह्मणः पाण्डित्यं निर्विद्य बाल्येन तिष्ठासेत् बाल्यं च पाण्डित्यं च निर्विद्याथ मुनिः' (बृ.उ.५-५-१) इत्यत्र मौनं विद्याङ्गतया विधीयते? उत अनूद्यते - इति संशयः ।

मौनस्य मननरूपत्वात् 'श्रोतव्यो मन्तव्यः' (बृ.उ.४-४-५) इति च प्राप्तत्वेन अनूद्यते - इति पूर्वः पक्षः ।

राद्धान्तस्तु - मुनिशब्दस्य प्रकृष्टमननशीले प्रसिद्धेः, प्रकृष्टमननम् उपास्य विषयाभ्यासरूपं विद्यानिष्पत्तये विधीयते - इति ।

सूत्रार्थस्तु - तद्वतः - विद्यावतः, सहकार्यन्तरं विधिः; विधीयते इति विधिरिति मौनं मौनं विधिः विधीयते इति उक्तम् । विध्यादिवत् अत्रापि विधीयत - इति विधिः - यज्ञदानप्रभृत्याश्रमधर्मः, आदिशब्दात्, श्रवणमनने गृह्येते । आश्रमधर्मवत् श्रवणमननवच्च, पाण्डित्यबाल्ययोस्तृतीयं इदं सहकार्यन्तरं मौनम् अपूर्वं विधीयते । कुत इत्यत्राह-पक्षेणेति । मुनिशब्दस्य प्रकृष्टमननयुक्ते पक्षेण - प्रसिद्धेः इत्यर्थः ।। ४६ ।।

४६५. कृत्स्नभावात्तु गृहिणोपसंहारः । (३-४-४७)

सर्वाश्रमिणां विद्यावत्वेऽपि, छान्दोग्ये 'स खल्वेवं वर्तयन् यावदायुषं ब्रह्मलोकमभिसम्पद्यते' (छां.उ.८-१५-१) इति गृहस्थधर्मेण उपसंहारः सर्वाश्रम-धर्मप्रदर्शनार्थः ।

कुतः?

कृत्स्नभावात् - कृत्स्नेषु भावात्, कृत्स्नेषु आश्रमिषु विद्यायाः सद्भावात् इत्यर्थः ।। ४७ ।।

४६६.मौनवदितरेषामप्युपदेशात्। (३-४-४८)

'अथ मुनिः' (बृ.उ.५-५-१) इत्यस्मिन् वाक्ये, 'अथ भिक्षाचर्यं चरति' (बृ.उ.५-५-१) इति पारिव्राज्यैकान्तधर्मेण उपसंहारः, सर्वाश्रमधर्मप्रदर्शनार्थः। भिक्षाचर्यमौनादिवत् इतरेषां च आश्रमधर्माणां यज्ञादीनामपि उपदेशात् ।। ४८ ।।

।। इति सहकार्यन्तरविध्यधिकरणम् ।। १२ ।।

१२१. अनाविष्काराधिकरणम् (३-४-१३)

[अधिकरणार्थः-'बाल्येन तिष्ठासे'दिति विद्यासहकारित्वेन विहित बाल्यस्वरूपम्]

४६७. अनाविष्कुर्वन्नन्वयात् । (३-४-४९)

'तस्माद्ब्राह्मणः पाण्डित्यं निर्विद्य बाल्येन तिष्ठासेत्' (बृ.उ.५-५-१) इत्यत्र, किं बाल्यस्य कर्म कामचारादिकं सर्वं विदुषोपादेयम्? उत विद्यामाहात्म्यानाविष्कारः? इति संशयः ।

'बाल्येन तिष्ठासेत्' (बृ.उ.५-५-१) इति अविशेषविधानात् कामचारादिकं सर्वमपि उपादेयम् इति पूर्वः पक्षः । विदुषो विशेषविधानात् विद्यामाहात्म्याच्च निषेधश्रुतयो बाधिता भवेयुः इति ।

राद्धान्तस्तु - पाण्डित्यप्रयुक्तस्वमाहात्म्याद्यनाविष्कार एव विद्यान्वययोग्यतया उपादेयः । इतरस्य कामचारादेः 'नाविरतो दुश्चरितात्' (कठ.उ.२-२४) इत्यादिशास्त्रैः विद्योत्पत्तिविरोधित्वावगमात् । अतः-यथा [१]बालः[१] स्वाभिजनाद्यनाविष्कुर्वन् वर्तते-तथा विद्वान् वर्तते इति एतदेव युक्तम् । सूत्रमपि व्याख्यातम् ।। ४९ ।।

।। इति अनाविष्काराधिकरणम् ।। १३ ।।

१२२. ऐहिकाधिकरणम् (३-४-१४)

[अधिकरणार्थः-उपासनस्य निरन्तरायत्वे फलशैघ्यम् सान्तरायत्वे विलम्बः]

४६८. ऐहिकमप्रस्तुतप्रतिविन्धे तद्दर्शनात् । (३-४-५०)

मोक्षव्यतिरिक्ताभ्युदयफलम् उपासनं, किं स्वसाधनभूतपुण्यकर्मानन्तरमेव उत्पद्यते ? उत अनन्तरम् अन्यदा वा? इति अनियम इति संशयः । साधननिर्वृत्तौ विलम्बहेत्वभावात् अनन्तरमेव इति पूर्वपक्षः ।

---

१. ब्राह्मणः-ग

राद्धान्तस्तु - अप्रस्तुते । प्रबलकर्मान्तरप्रतिबन्धे सति अनन्तरम्, प्रस्तुते तदुत्तरकालमिति अनियमः । दृश्यते हि, प्रबलकर्मान्तरेण फलप्रतिबन्धः ।

'यदेव विद्यया करोति .... तदेव वीर्यवत्तरम्' (छां.उ.१-१-१०) इति उद्गीथोपासनस्य क्रतोः कर्मान्तरेण फलाप्रतिबन्धः फलमिति - पृथग्ध्यप्रतिबन्धः फलम् इत्यभ्युपगमात् ।

सूत्रमपि व्याख्यातम् । ऐहिकम् - अभ्युदयफलमित्यर्थः ।। ५० ।।

।। इति ऐहिकाधिकरणम् ।। १४ ।।

१२३. मुक्तिफलाधिकरणम् (३-४-१५)

[अधिकरणार्थः-विद्यानिष्पत्तिं प्रति ब्रह्मविदपचारस्य प्रतिबन्धकत्वम्]

४६९. एवं मुक्तिफलानियमस्तदवस्थावधृतेस्तदवस्थावधृतेः । (३-४-५१)

किं मुक्तिफलानि उपासनानि स्वसाधनभूतातिशयितपुण्यकर्मानन्तरम् उत्पद्यन्ते उत पूर्ववदनियमः? इति संशयः ।

मुक्तिफलोपासनसाधनभूतकर्मणां सर्वकर्मभ्यो बलवत्तरत्वेन प्रतिबन्धाभावात्, अनन्तरमेव उत्पद्यन्ते - इति पूर्वः पक्षः ।

तत्रापि ब्रह्मविदपचारस्य ततोऽपि बलवत्तरत्वेन प्रतिबन्धसम्भवात् अनियम एव इति राद्धान्तः ।

सूत्रार्थस्तु - मुक्तिफलानामपि एवम् अनियमः ।

कुतः?

तदवस्थावधृतेः प्रतिबन्धाभावे सति फलावधृतेः । द्विरुक्तिः अध्यायपरिसमाप्तिं द्योतयति ।। ५१ ।।

।। इति मुक्तिफलाधिकरणम् ।। ५ ।।

।। इति श्रीमद्भगवद्रामानुजविरचिते श्रीवेदान्तदीपे तृतीयस्याध्यायस्य चतुर्थः पादः ।।

।। समाप्तश्च तृतीयोऽध्यायः ।।

- - -

चतुर्थोऽध्यायः - फलाध्यायः (अधि.३३, सू.७६)

प्रथमः पादः - आवृत्तिपादः

१२४. आवृत्त्यधिकरणम् । (४-१-१) (सू.१-२)

[अधिकरणार्थः-निरन्तरध्यानात्मकस्य मोक्षार्थोपासनस्य असकृदावृत्तस्यैव मोक्षोपायता]

४७०. आवृत्तिरसकृदुपदेशात् । (४-१-१)

'ब्रह्मविदाप्नोति परम्' (तै.आ.१-१) 'तमेवं विद्वानमृत इह भवति' (पु.सू.१७) इत्यादिवेदान्तविहितं वेदनं, किं सकृत्कृतमेव शास्त्रार्थः? उतासकृदावृत्तम् इति संशयः ।

'स यो ह वै तत् परमं ब्रह्म वेद ब्रह्मैव भवति' (मुं.उ.३-२-९) इत्यादौ [१]वेदनस्यैव[१] मुक्त्युपायत्वप्रतिपादनात्, सकृत्कृतेऽपि वेदने शास्त्रार्थनिर्वृत्तेः, तस्यासकृदावृत्तौ प्रमाणाभावात् ।

राद्धान्तस्तु - 'यस्तद्वेद यत्स वेद स मयैतदुक्तः' (छां.उ.४-१-४) इत्युपक्रम्य, 'अनु म एतां भगवो देवतां शाधि यां देवतामुपास्से' (छां.उ.४-२-२) इति एकस्मिन्वाक्ये विद्युपास्योः व्यतिरेकेण प्रयोगदर्शनात्, समानार्थेषु 'ब्रह्मविदाप्नोति परम्' (तै.आ.न.१-१) 'आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः' (बृ.उ.४-४-५) इत्यादिषु [२]ध्यानविद्योः[२] व्यतिकरदर्शनाच्च, ध्यानोपासनादिशब्दवाच्यम् असकृदावृत्तं स्मृतिसन्तानरूपं वेदनमेव शास्त्रार्थः इति निश्चीयते ।

[३]सूत्रार्थस्तु - आवृत्तिः असकृत् - ब्रह्मप्राप्तिसाधनं वेदनमसकृदावृत्तमेव शास्त्रार्थः[३] वेदनं ध्यानशब्दवाच्यमित्यर्थः ।

[४]कुतः[४]? [५]उपदेशात्[५] - 'ओमित्यात्मानं ध्यायथ' (मुं.उ.२-२-६) 'निचाय्य तं मृत्युमुखात्प्रमुच्यते', 'आत्मानमेव लोकमुपासीत' (बृ.उ.३-४-२५) 'आत्मा वाऽरे द्रष्टव्यः' (बृ.उ.६-५-६) इत्यादिना उपासनोपसंहारोपदेशात् । उपासनं च अविच्छिन्नस्मृति-सन्तानरूपमिति पूर्वमेवोक्तम् ।। १ ।।

---

१. ब्रह्मवेदन-ख,घ २. ध्यानवेदनयोः-ख,घ ३. सूत्रार्थः-वेदनशास्त्रार्थः । आवृत्तिरसकृत् असकृदावृत्तं-ग ४. कुतः? ख पुस्तके नास्ति ५. उपदेशात्-वेदनम् विधाय समानशास्त्रैः ध्यातव्यः उपासितेति उपदेशात्-ख,ग,घ

४७१. लिङ्गाच्च । (४-१-२)

लिङ्गम्-स्मृतिः । स्मर्यते च अयमर्थः 'मां ध्यायन्त उपासते' (भ.गी.१२-६) 'तेषामहं समुद्धर्ता मृत्युसंसारसागरात्' (भ.गी.१२-७) 'येत्वक्षरमनिर्देश्यमव्यक्तं पर्युपासते' (भ.गी.१२-३) 'तद्रूपप्रत्यये चैका सन्ततिश्चान्यनिःस्पृहा । 'तद्ध्यानं प्रथमैः षड्भिरङ्गैर्निष्पाद्यते तथा' ।। (वि.पु.६-७-९१) इति ।। २ ।।

।। इति आवृत्त्यधिकरणम् ।। १ ।।

१२५. आत्मत्वोपासनाधिकरणम् (४-१-२)

[अधिकरणार्थः-उपास्यं ब्रह्म उपासितुः आत्मत्वेनैवोपास्यम्; न अन्यत्वेन]

४७२. आत्मेति तूपगच्छन्ति ग्राहयन्ति च । (४-१-३)

किं उपास्यं ब्रह्म, उपासितुः अन्यत्वेन अनुसन्धेयम्? उत आत्मत्वेन? इति [१]संशयः[१] ।

'अधिकं तु भेदनिर्देशात्' (ब्र.सू.२-१-२२) 'अधिकोपदेशात्' (ब्र.सू.३-४-८) इत्यादिषु उपासितुः उपास्यस्य अर्थान्तरत्वेनैवोपपादनात् यथावस्थितस्यैव उपास्यत्वाच्च अन्यत्वेन उपास्यम् इति पूर्वः पक्षः ।

राद्धान्तस्तु - 'त्वं वा अहमस्मि भगवो देवते अहं वै त्वमसि भगवो देवते' (वरा.उ.२-३४) इति पूर्वे उपासितारः उपास्यमात्मत्वेन उपगच्छन्ति । अतः आत्मेत्येव उपास्यमिति । तान् उपासितॄन् प्रति अर्थान्तरभूतस्य अपि ब्रह्मणः उपासितुरात्मत्वं ग्राहयन्ति शास्त्राणि - 'य आत्मनि तिष्ठन्नात्मनोऽन्तरो यमात्मा न वेद यस्यात्मा शरीरम् य आत्मानमन्तरो यमयति स त आत्माऽन्तर्याम्यमृतः'।। (बृ.उ.५-७-२२) इत्यारभ्य उपासिता परमात्मनः शरीरं, परमात्मा च उपासितुरात्मा इति प्रतिपादनेन, तथा - 'सर्वं खल्विदं ब्रह्म तज्जलान्' (छां.उ.३-१४-१) इति, 'सन्मूलाः सोम्येमाः सर्वाः प्रजाः सदायतनाः सत्प्रतिष्ठाः' (छां.उ.६-८-४) 'ऐतदात्म्यमिदं सर्वम्' (छां.उ.६-८-७) इति च तदायत्तस्वरूपास्थितिप्रवृत्तिताप्रतिपादनेन च । एवम् उपासितुः स्वात्मनोऽप्यात्मत्वात्,

१. स्थित्यदनाभ्यां च सुषुप्त्युत्क्रान्त्योः भेदेन इत्यधिकः पाठः-ख,घ

ब्रह्मणो यथावस्थितस्वात्मशरीरकब्रह्मानुसन्धाने अहम् इत्येवानुसन्धेयम् । यथा - 'मनुष्योऽहम् अस्मि' इति स्वशरीरस्य स्वप्रकारतैकस्वभावतया प्रकारिणि स्वात्मनि पर्यवसानम्; [1]स्वात्मनः अहंप्रत्ययः अहंशब्दश्च न केवलस्वात्मविषयौ परमात्मशरीरतया तद्विशेषणत्वेनैव स्वात्मनः अवस्थानात्[1] । सूत्रमपि व्याख्यातम् ।। ३ ।।

।। इति आत्मत्वोपासनाधिकरणम् ।। २ ।।

१२६. प्रतीकाधिकरणम् (४-१-३) (सू.४-५)

[अधिकरणार्थः-प्रतीकोपासनस्थले न आत्मत्वानुसन्धानं प्रतीके कार्यम्]

४७३. न प्रतीके न हि सः । (४-१-४)

४७४. ब्रह्मदृष्टिरुत्कर्षात् (४-१-५)

'मनो ब्रह्मेत्युपासीत' (छां.उ.३-१८-१) इत्यादिप्रतीकोपासनेषु आत्मत्वेनानुसन्धानम् कर्तव्यम् ? उत न ? इति संशयः ।

'मनो ब्रह्मेत्युपासीत' (छां.उ.३-१८-१) इति ब्रह्मोपासनत्वाविशेषात् आत्मेत्येव अनुसन्धानं इति पूर्वः पक्षः ।

राद्धान्तस्तु - न प्रतीके आत्मत्वानुसन्धानं कार्यम् ।

कुतः ?

न हि । मन आदिः उपासितुः आत्मा, न च तत्र ब्रह्म उपास्यम्, ब्रह्मदृष्ट्या मन आदिः, उपास्यः । अपकृष्टे उत्कृष्टदृष्टिः अभ्युदयाय भवति । यथा भृत्यादौ राजदृष्टिः । सूत्रद्वयं च व्याख्यातम् ।। ४,५ ।।

।। इति प्रतीकाधिकरणम् ।। ३ ।।

१२७. आदित्यादिमत्यधिकरणम् (४-१-६)

अधिकरणार्थः-क्रत्वङ्गभूतेषूद्गीथादिष्वेव आदित्यादिदृष्टिः; न तु आदित्यादिषूद्गीथादिदृष्टिः]

४७५. आदित्यादिमतयश्चाऽङ्ग उपपत्तेः । (४-१-६)

---

१. तथा स्वात्मनोऽपि परमात्मशरीरतया परमात्म प्रकारत्वेन प्रकारिणि परमात्मन्येव अहंबुद्धिशब्दयोः पर्यवसानमित्यस्य अर्थस्य स्थेनोऽहं ब्रह्मेत्येव उपासीत इत्युक्तं भवति-ख,घ

'य एवासौ तपति तमुद्गीथमुपासीत' (छां.उ.१-३-१) इत्यादिषु कर्माङ्गाश्रयोपासनेषु किम् उद्गीथादौ ? आदित्यादिदृष्टिः कार्या ? उत आदित्यादिषु उद्गीथादिदृष्टिः ? इति संशयः ।

कर्मणः फलसाधनतया उत्कर्षात् आदित्यादेः देवतात्वेन तद्गुणत्वाच्च, आदित्यादौ उद्गीथादिदृष्टिः कार्या - इति पूर्वः पक्षः ।

राद्धान्तस्तु - कर्मणोऽपि फलसाधनत्वराधनम् आदित्यादिदेवताद्वारेणेति आदित्यादेरेव उत्कर्षोपपत्तेः, आदित्यादिमतय एव - आदित्यादिदृष्ट्य एव, कर्माङ्गे उद्गीथादौ कार्याः । सूत्रं च व्याख्यातम् ।। ६ ।।

।। इति आदित्यादिमत्यधिकरणम् ।। ४ ।।

१२८. आसीनाधिकरणम् (४-१-५) (सू.७-११)

[अधिकरणार्थः-मोक्षार्थोपासनरूपं ध्यानं सापाश्रये आसीनस्यैव पुरुषस्य]

४७६. आसीनः सम्भवात् । (४-१-७)

किमिदं ब्रह्मोपासनम् आसीनः कुर्यात् ? उत आसीनः शयानः तिष्ठन् गच्छन्वा इति अनियमः ? इति संशयः ।

विशेषाश्रवणात् अनियमः - इति पूर्वः पक्षः ।

राद्धान्तस्तु - आसीनस्यैव एकाग्रतासम्भवात्, एकाग्रतामूलत्वाच्च उपासनस्य, [1]आसीन एव[1] कुर्यात् । सूत्रमपि व्याख्यातम् ।। ७ ।।

४७७. ध्यानाच्च । (४-१-८)

'निदिध्यासितव्यः' (बृ.उ.६-५-६) इति उपासनस्य ध्यानरूपत्वाच्च, [2]एकाग्रता[2] अवश्यं भाविनी । ध्यानं हि, विजातीयप्रत्ययान्तराव्यवहितं तैलधारावदविच्छिन्नस्मृति सन्तानरूपम् ।। ८ ।।

४७८. अचलत्वं चापेक्ष्य । (४-१-९)

निश्चलत्वं च अपेक्ष्य, ध्यानवाचोयुक्तिः पृथिव्यादिषु दृश्यते; 'ध्यायतीव पृथिवी ध्यायतीवान्तरिक्षं ध्यायतीव द्यौः' (छां.उ.७-६-१) इत्यादिका । अतः ध्यायतः पृथिव्यादिवत् अचलत्वम् आसीनस्यैव सम्भवतीति ।। ९ ।।

---

१. आसीनस्य आसीनः-ग २. एकाग्रचिन्ता-ग

४७९. स्मरन्ति च । (४-१-१०)

स्मरन्ति च, आसीनस्यैव ध्यानं 'उपविश्याऽऽसने युञ्ज्याद्योगमात्मविशुद्धये' (भ.गी.६-१२) इति ।। १०।।

४८०. यत्रैकाग्रता तत्राविशेषात् । (४-१-११)

यस्मिन् देशे यस्मिंश्च काले मनस एकाग्रता, तत्र देशे काले च उपासनं कार्यम्; 'शर्करादिरहिते 'मनोऽनुकूले शुचौ देशे' (श्वे.उ.२-१०) इत्येतदतिरिक्तविशेषाग्रहणात् । यथा - देशकालयोः एकाग्रतायाम् अविशेषः न तथा [1]स्थिति[1]गत्यादौ । आसीनस्य [2]तु[2], विशेषोऽस्ति इत्यभिप्रायः ।। ११ ।।

।। इति आसीनाधिकरणम् ।। ५ ।।

१२९. आप्रयाणाधिकरणम् । (४-१-६)

[अधिकरणार्थः-मोक्षोपायभूतं ध्यानं देहपातं यावत् प्रत्यहमनुवर्तनीयम्; न तु एकस्मिन्नेवाऽहनि निर्वर्त्यम्]

४८१. आप्रयाणात्तत्राऽपि हि दृष्टम् । (४-१-१२)

तदिदम् अपवर्गसाधनम् उपासनम् एकस्मिन्नहनि कार्यम्? उत प्रत्यहम् आप्रयाणात् अनुवर्तनीयम्? इति संशयः ।

एकस्मिन्नेव अहनि शास्त्रार्थस्य कृतत्वात् तावतैव परिसमापनीयम्, 'यावदायुषम्' (छां.उ.८-१५-१) इति तु वचनं विधिशब्दाभावात्, विद्यायाः फलेन उपसंहारपरम् - इति पूर्वपक्षः ।

राद्धान्तस्तु - आप्रयाणात् अनुवर्तनीयम् ।

कुतः ? तत्रापि हि दृष्टं - 'स खल्वेवं वर्तयन् यावदायुषं ब्रह्मलोकमभिसम्पद्यते' (छां.उ.८-१५-१) इति अप्राप्तत्वेन अनुवादत्वासम्भवात् विधिरेव अयम् इति ।। १२ ।।

।। इति आप्रयाणाधिकरणम् ।। ६ ।।

---

१. अवस्थिति-ग २. एव हि-ग

१३०. तदधिगमाधिकरणम् (४-१-७)

[अधिकरणार्थः-ब्रह्मविद्यालाभे सति, तन्माहात्म्यात् पश्चात्तनानां पाप्मनामश्लेषः प्राक्तनानां च तेषां विनाशश्च]

४८२. तदधिगम उत्तरपूर्वाघयोरश्लेषविनाशौ तद्व्यपदेशात् । (४-१-१३)

विदुषः उत्तरपूर्वाघयोः अश्लेषविनाशौ किं सम्भवतः? उत न? इति संशयः ।

'नाभुक्तं क्षीयते कर्म कल्पकोटिशतैरपि' (ब्र.वै.पु.२६-७०) इति भोगादेव कर्मक्षयश्रवणात् अश्लेषविनाशश्रुतिः कथञ्चित् विद्यास्तुत्यर्थतया नेया - इति पूर्वः पक्षः ।

राद्धान्तस्तु - द्वयोः शास्त्रयोः भिन्नविषयत्वेन विरोधाभावात् सम्भवत एव । [1]कर्मणां हि[1] फलजननसामर्थ्यं द्रढयति । 'नाभुक्तं क्षीयते कर्म' (ब्र.वै.पु.२६-७०) इति । 'एवमेवंविदि पापं कर्म न श्लिष्यते' । (छां.उ.४-१४-३) 'एवं हास्य सर्वे पाप्मानः प्रदूयन्ते' (छां.उ.५-२४-३) इति च श्रुतिः विद्यायाः तत्सामर्थ्यनिवारणशक्तिविषया इति । यथा अप्तेजसोः शीतजननतन्निवारणशक्तिविषये प्रमाणे न विरुध्येते । सूत्रमपि व्याख्यातम् ।। १३ ।।

।। इति तदधिगमाधिकरणम् ।। ७ ।।

१३१. इतराधिकरणम् (४-१-८)

[अधिकरणार्थः-निष्पन्नोपासनस्य ब्रह्मविदः पापानामिव पूर्वोत्तरपुण्यानामपि यथाक्रमं विनाशाश्लेषौ]

४८३. इतरस्याप्येवमसंश्लेषः पाते तु । (४-१-१४)

किम् असंश्लेषविनाशौ पुण्यकर्मणोऽपि समानौ? उत न? इति संशयः । पुण्यकर्मफलस्य सुखरूपत्वेन विदुषः अनिष्टत्वाभावात्, न समानौ इति पूर्वपक्षः ।

राद्धान्तस्तु - मुमुक्षोः मोक्षविरोधित्वेन अनिष्टत्वसाम्यात् अश्लेषविनाशौ समानावेव ।

सूत्रार्थः - इतरस्य पुण्यस्यापि [2]अनिष्टफलत्वसाम्यात्[2], एवम्-अश्लेषविनाशौ । विद्यानुगुणस्य तु वृष्ट्यन्नारोग्यादिफलस्य, शरीरपातादूर्ध्वम् अनिष्टत्वात् अश्लेषः ।। १४ ।।

।। इति इतराधिकरणम् ।। ८ ।।

---

१. कर्मणाम्-ग   २. अनिष्टसाम्यात्-ग

१३२. अनारब्धकार्याधिकरणम् (४-१-९)

[अधिकरणार्थः-भगवदुपासकस्योक्तः सुकृतादिविनाशः फलदानाप्रवृत्तपुण्यपापमात्रविषयः]

४८४. अनारब्धकार्ये एव तु पूर्वे तदवधेः । (४-१-१५)

विद्योत्पत्तेः पूर्वकृतयोः पुण्यपापयोः अविशेषेण विनाशः ? उत आरब्धकार्ययोः एव ? इति संशयः ।

'सर्वे पाप्मानः प्रदूयन्ते' (छां.उ.५-२४-३) इति विशेषाभावात् अविशेषेण इति पूर्वः पक्षः ।

राद्धान्तस्तु - 'तस्य तावदेव चिरं यावन्न विमोक्ष्ये अथ सम्पत्स्ये' (छां.उ.६-१४-३) इति उत्पन्नविद्यस्यापि शरीरमोक्षावधित्वश्रुतेः, सर्वविनाशे शरीरस्थित्यनुपपत्तेश्च अनारब्धकार्ययोरेव विनाशः । सूत्रं च व्याख्यातम् ।। १५ ।।

।। इति अनारब्धकार्याधिकरणम् ।। ९ ।।

१३३. अग्निहोत्राद्यधिकरणम् (४-१-१०) (सू.१६-१८)

[अधिकरणार्थः-अग्निहोत्रादि नित्यनैमित्तिकरूपं कर्म अनुष्ठेयविद्यार्थत्वात् अवश्यं कर्तव्यमेव]

४८५. अग्निहोत्रादि तु तत्कार्यायैव तद्दर्शनात् । (४-१-१६)

अग्निहोत्राद्याश्रमधर्मः किं विदुषः अनुष्ठेयः ? उत न ? इति संशयः । सुकृतदुष्कृतयोः अश्लेषविनाशाभिधानात् आश्रमधर्मस्यापि सुकृतत्वसाम्येन कार्याश्लेषात् अननुष्ठेयः - इति पूर्वः पक्षः ।

राद्धान्तस्तु - आश्रमधर्मस्य तु विद्योत्पत्तिरेव कार्यमिति, तत्कार्यायैव अनुष्ठेयः । दृश्यते हि - 'तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन' (छां.उ.६-४-२२) इत्यादिना विद्योत्पत्तिकार्यत्वम् । विद्या च, आप्रयाणादहरहरभ्यासाधेयातिशयोत्पाद्यैव । सूत्रं च व्याख्यातम् ।। ६ ।।

यदि अग्निहोत्रादिसाधुकृत्या विद्योत्पत्त्यर्था, पूर्वकृता च साधुकृत्या [१]अनुभूतफला प्रारब्धफला च 'सुहृदः साधुकृत्याम्' (शाठ्यायनीयम्) इत्यस्य[१] को विषयः इत्याशङ्क्याह -

---

१. विद्यया विनिष्टासुहृत्साधुकृत्यामिति अस्य-ग

४८६. अतोऽन्यापि ह्येकेषामुभयोः । (४-१-१७)

अतः अग्निहोत्रादिसाधुकृत्यायाः अन्याऽपि विद्याधिगमात् पूर्वोत्तरयोः पुण्यकर्मणोः [1]उभयोश्च[1] कारीर्यादिका वृष्ट्यन्नाद्यर्थतया विदुषा अनुष्ठिता, विद्योत्पत्तेः पूर्वं कृता अनादिकालप्रवृत्ता च प्रबलकर्मान्तरप्रतिबद्धफला साधुकृत्या [2]अस्ति हि[2] । अतः एकेषां शाखिनां 'सुहृदः साधुकृत्याम्' इति वचनम् तद्विषयम्, [3]विद्यया अश्लेषविनाशश्रुतिश्च तद्विषया[3] ।। १७ ।।

अनुष्ठितस्य कर्मणः प्रबलकर्मप्रतिबन्धसम्भवं पूर्वोक्तं स्मारयति -

४८७. यदेव विद्ययेति हि । (४-१-१८)

उक्तं हि उद्गीथविद्यायाः क्रतोः कर्मान्तरप्रतिबन्धाभावः फलम् इति । अतः प्रतिबद्धाफला साधुकृत्या [4]अस्यैव सुहृत्संक्रमणम्[4] ।। १८ ।।

।। इति अग्निहोत्राद्यधिकरणम् ।। १० ।।

१३४. इतरक्षपणाधिकरणम् (४-१-११)

[अधिकरणार्थः-विदुषो ब्रह्मसम्पत्तिः, आरब्धकार्यपुण्यपापयोः फलभोगेन क्षपणानन्तरमेव]

४८८. भोगेन त्वितरे क्षपयित्वाऽथ सम्पद्यते । (४-१-१९)

इतरे-आरब्धकार्ये पुण्यपापे, किं विद्यायोनिशरीरावसाने एव विनश्येते? उत तच्छरीरवसाने, शरीरान्तरावसाने वा इत्यनियमः? इति संशयः ।

'यावन्न विमोक्ष्ये अथ सम्पत्स्ये' (छां.उ.६-१४-२) इति सम्पत्तेः शरीरविमोक्ष विलम्बमात्रश्रुतेः तच्छरीरावसाने - इति पूर्व पक्षः ।

राद्धान्तस्तु - प्रारब्धफलयोः कर्मणोः भोगेनैव क्षपयितव्यत्वाभिप्रायेण 'यावन्न विमोक्ष्ये अथ सम्पत्स्ये' (छां.उ.६-१४-२) इत्युच्यते । [5]न शरीरमात्रम्[5] । कर्मविषयौ

---

१. उभयोरपि प्रबलकर्मान्तर-ख,घ २. अस्त्येव-ख,घ ३. विदुषाचारो हि अन्नाद्याहि सिद्धये अनुष्ठितं पुण्यकर्मास्त्येव विद्याविनाशश्रुतिश्च तद्व्यतिरिक्तविषयाः इत्यधिकः पाठः-ख,घ ४. अस्त्येव अनन्तानादिकालप्रवृत्ता-ख,ग,घ ५. शरीरमात्रम्-ख,ग,घ

हि बन्धमोक्षौ । अतः प्रारब्धफले पुण्यपापे यावता शरीरेण समापनीये, तावता क्षपयित्वा, 'अथ सम्पत्स्ये' (छां.उ.६-१४-२) इति अनियम एव ।। सूत्रं च व्याख्यातम् ।।

।। इति इतरक्षपणाधिकरणम् ।। १९ ।।

।। इति श्रीभगवद्रामानुजविरचिते श्रीवेदान्तदीपे चतुर्थस्याध्यायस्य प्रथमः पादः ।।

द्वितीयः पादः - उत्क्रान्तिपादः । (अधि.११, सू.१०)

१३५. वागधिकरणम् (४-२-१) (सू.१-२)

[अधिकरणार्थः-प्रयतोजीवस्योक्तावाचो मनसि सम्पत्तिः, वाक्स्वरूपसम्पत्तिरेव; न तु तद्वृत्तिमात्रस्य]

४८९. वाङ्मनसि दर्शनाच्छब्दाच्च । (४-२-१)

'अस्य सोम्य पुरुषस्य प्रयतो वाङ्मनसि सम्पद्यते मनः प्राणे' (छां.उ.६-८-६) इत्यादिका उत्क्रान्तिविषया आम्नायते ।

तत्र किं वागिन्द्रियं मनसि सम्पद्यते? उत वाग्वृत्तिमात्रम्? इति संशयः ।

वाचो मनः प्रकृतित्वाभावात् स्वरूपलयः तत्र न सम्भवतीति, [1]'वाग्वृत्ति-मात्राभिप्रायम्'[1] - इति पूर्वः पक्षः ।

राद्धान्तस्तु - अकारणे सम्पत्त्यभावस्य, वाग्वृत्तावपि तुल्यत्वदर्शनात्, 'वाङ्मनसि' इति [2]'वाक्स्वरूपस्यैव'[2] सम्पत्तिः शब्दाच्च, स्वरूपमेव सम्पद्यते । वाङ्मनसि सम्पद्यते इति वाक्स्वरूपसम्पत्तावेव हि शब्दः न वृत्तिमात्रसम्पत्तौ अकारणे लयाभावात् 'सम्पत्ति' शब्दः संयोगाभिप्रायः । सूत्रं च व्याख्यातम् ।

४९०. अत एव सर्वाण्यनु । (४-२-२)

यथो वाचो मनसि संयोगमात्रम् उच्यते ; न तु लयः अतएव, तदानीं, 'सर्वाणीन्द्रियाणि वाचमनु मनसि सम्पद्यन्ते' इति वचनम् उपपन्नम्, 'तस्मादुपशान्ततेजाः अपुनर्भव-मिन्द्रियैर्मनसि सम्पद्यमानैः वाङ्मनसि सम्पद्यत वचनवत्' इति ।। २ ।।

।। इति वागधिकरणम् ।। १ ।।

---

१. वा युक्तिमात्रम्-ग २. स्वरूपस्यैव-ग

१३६. मनोऽधिकरणम् (४-२-२)

[अधिकरणार्थः-सर्वेन्द्रिययुक्तस्य मनसः संयोगरूपा प्राणेसम्पत्तिः]

४९१. तन्मनः प्राणः उत्तरात् । (४-२-३)

'मनः प्राणे' (छां.उ.६-८-६) इत्यत्र किं प्राणशब्देन आप उच्यन्ते? उत प्राण एव? इति संशयः ।

प्राणस्य मनः प्रकृतित्वाभावात्, 'अन्नमयं हि सोम्य मनः' (छां.उ.६-६-५) इति मनसः अन्नमयत्वश्रवणात्, अपाञ्च अन्नस्य प्रकृतित्वेन, तत्सम्पत्तिः उपपद्यते इति, प्राणशब्देन आप उच्यन्ते - इति पूर्वपक्षः । 'आपोमयः प्राणः' (छां.उ.६-६-५) इति हि अम्मयत्वात् प्राणस्य प्राणशब्देन आपो वक्तुम् युज्यन्ते ।

राद्धान्तस्तु - 'अन्नमयं हि सोम्य मनः आपोमयः प्राणः' (छां.उ.६-६-५) इति मनःप्राणयोः न तत्तत्प्रकृतित्वमुच्यते; अपि तु तदाप्यायनम् । आहङ्कारिकत्वात् मनसः प्राणस्य च आकाशप्रकृतित्वात् । अतो 'वाङ्मनसि' इतिवत्, तदुत्तरात् - 'मनः प्राणे' इति शब्दात् तत् सर्वेन्द्रियसंयुक्तं मनः प्राणे संयुज्यते ।। ३ ।।

।। इति मनोऽधिकरणम् ।। २ ।।

१३७. अध्यक्षाधिकरणम् (४-२-३)

[अधिकरणार्थः-वागादिमनोन्तयुक्तस्य प्राणस्य जीवे सम्पत्तिः]

४९२. सोऽध्यक्षे तदुपगमादिभ्यः । (४-२-४)

सः प्राणः, किं तेजसि संयुज्यते? उत जीवे? इति संशयः । 'प्राणस्तेजसि' (छां.उ.६-८-६) इति वचनात्, तेजस्येव - इति पूर्व पक्षः ।

राद्धान्तस्तु - उत्क्रान्तौ प्राणस्य जीवोपगमादिश्रुतेः, प्राणः करणाध्यक्षे जीवे संयुज्यते । एतदविरोधाय जीवे संयुज्य, पश्चात् तेजः संयोगम् 'प्राणस्तेजसि' (छां.उ.६-८-६) इति वदति । श्रूयन्ते हि प्राणस्य जीवोपगमादयः- 'एवमेवेममात्मानमन्तकाले सर्वे प्राणा [१]अभिसमायन्ति' (बृ.उ.६-३-३८) 'तमुत्क्रामन्तं प्राणोऽनूत्क्रामति' । (बृ.उ.६-४-२) 'कस्मिन्वा प्रतिष्ठिते प्रतिष्ठास्यामि' (प्रश्न.उ.६-३) इत्यादिषु ।

।। इति अध्यक्षाधिकरणम् ।। ३ ।।

---

१. अभिसमायान्ति-ग

१३८. भूताधिकरणम् । (४-२-४) (सू.५-६)

[अधिकरणार्थः-प्राणसंयुक्तस्य जीवस्य संहतेषु सर्वेषु भूतेष्वेव सम्पत्तिः; न केवले तेजसि]

४९३. भूतेषु तच्छ्रुतेः । (४-२-५)

४९४. नैकस्मिन् दर्शयतो हि । (४-२-६)

'प्राणस्तेजसि' (छां.उ.६-८-६) इति किं तेजोमात्रे प्राणः संयुज्यते ? उत भूतान्तरसंसृष्टे ? इति संशयः ।

'तेजसि' (छां.उ.६-८-६) इति वचनात् तेजोमात्रे - इति पूर्वपक्षः ।

'पृथिवीमयः' (बृ.उ.६-४-५) इत्यादिना सञ्चरतो जीवस्य सर्वभूतमयत्वश्रुतेः, त्रिवृत्करणश्रुतिस्मृतिभ्यां च तेजस एकस्य कार्याक्षमत्वात्, भूतान्तरसंसृष्टे - इति राद्धान्तः । सूत्रद्वयं च व्याख्यातम् ।। ५,६ ।।

।। इति भूताधिकरणम् ।। ४ ।।

१३९. आसृत्युपक्रमाधिकरणम् (४-२-५) (सू.७-१३)

[अधिकरणार्थः-देहादुत्क्रमं प्राप्नुवतोर्विद्वदविदुषोदद्वयोरपि गतिः, नाडीप्रवेशपर्यन्तं समानैव]

४९५. समाना चासृत्युपक्रमादमृतत्वं चानुपोष्य । (४-३-७)

इयम् उत्क्रान्तिः, किं विद्वदविदुषोः समाना ? उत अविदुष एव ? इति संशयः । विदुषो अत्रैव अमृतत्वप्राप्तिश्रुतेः अविदुषः एव - इति पूर्वः पक्षः । श्रूयते हि विदुषः अत्रैव ब्रह्मप्राप्तिः - 'यदा सर्वे प्रमुच्यन्ते कामा येऽस्य हृदि स्थिताः' 'अथ मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुते' (कठ.उ.२-६-१४) इति ।

राद्धान्तस्तु - विदुषः अर्चिरादिकंयैव ब्रह्मप्राप्तिः । अर्चिरादि गत्युपक्रमात्प्राक् इयमुत्क्रान्तिः विद्वदविदुषोः समाना । गतिश्च मूर्द्धन्यनाड्या, 'शतं चैका च हृदयस्यनाड्यस्तासां मूर्द्धानमभिनिस्सृतैका, तयोर्ध्वमायन्नमृतत्वमेति' (कठ.उ.२-६-१६) इति श्रुतेः । 'यदा सर्वे प्रमुच्यन्ते' (कठ.उ.२-६-१४) इत्यनेन गतिश्रुत्यविरोधाय [१]अमृतत्व[१]साधनभूतोपासननिष्पत्तिरुच्यते । हृदि स्थिताः कामाः, यदा प्रमुच्यन्ते, तदैव

---

१. प्राप्तिसाधन-ख

उपासनारम्भात् मर्त्यः अमृतो भवति इति । अत्र कामविमोकपूर्वोपासने अवस्थितो मर्त्यः अर्चिरादिकया गत्या, ब्रह्म समश्नुते - इत्यर्थः ।

सूत्रार्थस्तु - सृतिः - गतिः, आगत्युपक्रमात् उत्क्रान्तिः विदुषः अविदुषोऽपि समाना । विदुषः अर्चिरादिगतिश्रुतेः । 'अथ मर्त्योऽमृतो भवति' (कठ.उ.२-६-१४) इत्युच्यमानम् अमृतत्वं अनुपोष्य च अदग्ध्वैव शरीरेन्द्रियादिसम्बन्धम् उपासनारम्भ-परिकररूपम् इत्यर्थः ।। ७ ।।

४९६. तदापीतेः संसारव्यपदेशात् । (४-२-८)

तत् - अमृतत्वम् उक्तप्रकारमेव ।

कुतः ?

आपीतेः संसारव्यपदेशात् । [१]अपीतिः[१] ब्रह्मप्राप्तिः । अर्चिरादिकयागत्या देशविशेषं गत्वा, यावत् ब्रह्म प्राप्यते, तावत् संसारः - शरीरसम्बन्धो हि व्यपदिश्यते ।। ८ ।।

गतिव्यपदेशादेव शरीरादुत्क्रान्तस्य कथं शरीरसम्बन्ध इत्यत्राह -

४९७. सूक्ष्मं प्रमाणतश्च तथोपलब्धेः । (४-२-९)

सूक्ष्मशरीरमनुवर्तते, गतिव्यपदेशात् । न केवलं गतिव्यपदेशादेव । प्रमाणान्तरतः तथा सूक्ष्मशरीरवत्त्वोपलब्धिश्च । विदुषः अर्चिरादिकया गत्या गच्छतः, चन्द्रमसा संवादोऽयमुपदिश्यते ।

'तं प्रतिब्रूयात्' । (कौषी.उ.१-५१) सत्यं ब्रूयात् (कौषी.उ.१-५६) इत्यादिना ।। ९ ।।

४९८. नोपमर्देनाऽतः । (४-२-१०)

अतः उक्तात् हेतुकलापात्, 'अथ मर्त्योऽमृतो भवति' (कठ.उ.२-६-१४) इति वचनं, न देहसम्बन्धोप[२]मर्देन[२] अमृतत्वं वदति । अपि तु, उक्तमेवोपासनारम्भरूपं वदति - इत्यर्थः ।। १० ।।

---

१. आपीतिः-ख,घ २. मर्दनेन-ग

४९९. अस्यैव चोपपत्तेरूष्मा । (४-२-११)

अस्य सूक्ष्मशरीरस्य, विद्यमानत्वोपपत्तेश्च, न देहसम्बन्धोपमर्देन । उपलभ्यते हि उत्क्रममाणस्य विदुषः, क्वचित् ऊष्मा सूक्ष्मदेहगुणः । न चायं स्थूलदेहगुणः अन्यत्र अनुपलब्धेः । अतो विद्वान्सूक्ष्मशरीरेण उत्क्रामति ।। ११ ।।

५००. प्रतिषेधादिति चेन्न शारीरात् स्पष्टो ह्येकेषाम् । (४-२-१२)

'स एतास्तेजोमात्राः' (बृ.उ.६-४-१) इत्यारभ्य, 'इति तु कामयमानः' (बृ.उ.६-४-६) इत्यन्तेन अविदुषः उत्क्रान्तिप्रकारं, लोकान्तरगमनं, पुनरावृत्तिं च अभिधाय 'अथाकामयमानः' (बृ.उ.६-४-६) इत्यादिना, 'न तस्य प्राणा उत्क्रामन्ति ब्रह्मैव सन् ब्रह्माप्येति' (बृ.उ.६-४-६) इति, विदुषः, उत्क्रान्तिप्रतिषेधात्, उक्तप्रकारो नोपपद्यते इति चेत् - तन्न शरीरात् प्राणानाम् अविश्लेषः अनेनोच्यते । तस्य अकामयमानस्य विदुषः शारीरस्य, प्राणाः स्वस्मात् न उत्क्रामन्ति । देवयानेन गमनाय, सहैव तिष्ठन्ति । अयमर्थः स्पष्टो ह्येकेषाम् माध्यन्दिनशाखिनां पाठे -

'योऽकामो निष्काम आप्तकाम आत्मकामो न तस्य प्राणा उत्क्रामन्ति' (बृ.उ.६-४-६) इति ।। १२ ।।

५०१. स्मर्यते च । (४-२-१३)

स्मर्यते च-विदुषोऽपि मूर्द्धन्यनाड्या उत्क्रान्तिः - 'ऊर्ध्वमेकः स्थितस्तेषां यो भित्त्वा सूर्यमण्डलम् । ब्रह्मलोकमतिक्रम्य तेन याति परां गतिम्' ।। (याज्ञ.स्मृ.३-१६७) इति ।। १३ ।।

।। इति आसृत्युपक्रमाधिकरणम् ।। ५ ।।

१४०. परसम्पत्त्यधिकरणम् (४-२-६)

[अधिकरणार्थः-विदुषि जीवे परिष्वक्तानि भूतसूक्ष्माणि परमात्मन्येव सम्पद्यते]

५०२. तानि परे तथा ह्याह । (४-२-१४)

'प्राणस्तेजसि' (छां.उ.६-८-६) इति तेजःशब्दनिर्दिष्टानि भूतानि, जीवपरिष्वक्तानि, किं परस्यां देवतायां सम्पद्यन्ते ? उत यथाकर्म यथाविद्यं गच्छन्ति ? इति संशयः ।

तदानीं सुखदुःखोपभोगाद्यभावेन परसम्पत्तौ प्रयोजनाभावात्, यथा कर्म यथाविद्यम् इति पूर्वपक्षः ।

सर्वस्य परदेवताकार्यत्वेन तदात्मकत्वात्, गन्तव्य[1]स्थान[1]मिदं 'परस्यां देवतायाम्' (छां.उ.६-८-६) इत्युच्यते ।

राद्धान्तस्तु - तानि परे परस्मिन् ब्रह्मणि सम्पद्यन्ते; 'तेजः परस्यां देवतायाम्' (छां.उ.६-८-६) इति हि आह श्रुतिः । यथाश्रुति विश्रमस्थानत्वेन कार्यं परिकल्प्यम् - इत्यर्थः । सूत्रं च व्याख्यातम् ।। १४ ।।

।। इति परसम्पत्त्यधिकरणम् ।। ६ ।।

१४१. अविभागाधिकरणम् (४-२-७)

[अधिकरणार्थः-जीवस्य विदुषः उत्क्रान्तौ परमात्मनि सम्पत्तिः अविभागरूपैव; न कारणापत्तिरूपा]

५०३. अविभागो वचनात् (४-२-१५)

सेयं परमात्मनि सम्पत्तिः - किं प्राकृतप्रलयवत् कारणापत्तिरूपाः ? उत मनःप्रभृतिसम्पत्तिवत् अविश्लेषमात्रम् ? इति संशयः ।

परमात्मनः कारणत्वात्, तत्सम्पत्तिवचनाच्च कारणापत्तिरेव - इति, पूर्वः पक्षः ।

राद्धान्तस्तु - 'वाङ्मनसि सम्पद्यते' (छां.उ.६-८-६) इति श्रुतस्यैव सम्पत्ति वचनस्य पदस्य सर्वत्र अनुषङ्गात्, [2]अत्र[2] अनुषक्तस्य अभिधानवैरूप्यासंभवात् प्रमाणाभावात्, अत्रापि अविभागः - अविश्लेष एवोच्यते ।।

सूत्रमपि व्याख्यातम् ।। १५ ।।

।। इति अविभागाधिकरणम् ।। ७ ।।

१४२. तदोकोऽधिकरणम् । (४-२-८)

[अधिकरणार्थः-परमपुरुषप्रसादात् विदुषो जीवस्य उत्क्रान्तिकाले मूर्धन्यनाडीप्रकाशः तया गतिश्च]

५०४. तदोकोग्रज्वलनं तत्प्रकाशितद्वारो विद्यासामर्थ्यात् तच्छेषगत्यनुस्मृति योगाच्च हार्दानुगृहीतः शताधिकया (४-१-१६)

१. साधन-ग २. अनेकत्र-ग

'शतं चैका च हृदयस्य नाड्यस्तासां मूर्धानमभिनिःसृतैका । तयोर्ध्वमायन्नमृतत्वमेति विष्वङ्ङन्या उत्क्रमणे भवन्ति' । (कठ.उ.२-६-१६) इति, 'शताधिकया मूर्धन्यया नाड्या विदुषो गमनम्' इति नियमः सम्भवति ? न ? - इति संशयः ।

नाडीनाम् अतिसूक्ष्मत्वेन दुर्विवेचनत्वात्, नियमो न सम्भवतीति, यादृच्छिकीं तया गतिम्, अनुवदति इदं वचनम् - इति पूर्वपक्षः ।

राद्धान्तस्तु - परमपुरुषाराधनभूतया विद्यया, तदङ्गभूतगतिचिन्तनेन च प्रीतेन, परमपुरुषेण अनुगृहीतो जीवः, तत्प्रसादप्रकाशितद्वारः, तयैव मूर्धन्यया नाड्या गच्छति - इति ।

सूत्रार्थस्तु - हार्दपरमपुरुषाराधनविद्यासामर्थ्यात्, तच्छेषगत्यनुस्मृतिभोगाच्च प्रीतहार्दानुगृहीतो भवति जीवः । ततः तदोकः - जीवस्य स्थानं हृदयम् अग्रज्वलनं - प्रकाशिताग्रम् भवति । एवं परमपुरुषप्रकाशितद्वारः । शताधिकया गच्छति ।

'तस्याः शिखाया मध्ये परमात्मा व्यवस्थितः' (तै.ना.उ.११-८) 'सर्वस्य चाऽहं हृदि सन्निविष्टः' (भ.गी.१५-१५) इति, हार्दः - परमात्मा ।। १६ ।।

।। इति तदोकोऽधिकरणम् ।। ८ ।।

१४३. रश्म्यनुसाराधिकरणम् (४-२-९)

[अधिकरणार्थः-विदुषां जीवानां सूर्यरश्म्यनुसारेणैव ब्रह्मप्राप्तिः]

५०५. रश्म्यनुसारी (४-२-१७)

'अथ यत्रैतदस्माच्छरीरादुत्क्रामति; अथैतैरेव रश्मिभिरूर्ध्वमाक्रमते' (छां.उ.८-६-५) इति, 'विद्वान् रश्म्यनुसारी गच्छति' इति नियमः सम्भवति ? न ? इति संशयः ।

निशि मृतस्य विदुषः, आदित्यरश्म्यनुसारासम्भवात्, अनियमः इति पूर्वपक्षः । वचनं तु, पक्षप्राप्तम् अनुवदति ।

राद्धान्तस्तु - पक्षप्राप्त्यनुवादित्वे, 'अथैतैरेव' इत्यवधारणविरोधः । न च - निशि रश्मयो न सन्ति - इति; निश्यपि निदाघसमये ऊष्मोपलब्धेः, सूक्ष्माः सन्त्येवेति, रश्म्यनुसार्येव गच्छति । हेमन्ते अनुपलब्धिः, दुर्दिने इव हिमाभिभवात् ।।

।। इति रश्म्यनुसाराधिकरणम् ।। ९ ।।

१४४. निशाधिकरणम् (४-२-१०)

[अधिकरणार्थः-विदुषः निशि मृतस्याऽपि ब्रह्मप्राप्तिः अवश्यंभाविनी]

४०६. निशि नेति चेन्न सम्बन्धस्य यावद्देहभावित्वाद्दर्शयति च (४-२-१८)

विदुषः निशि मृतस्य, ब्रह्मप्राप्तिरस्ति ? न? - इति संशयः । 'दिवा च शुक्लपक्षश्च उत्तरायणमेव च । मुमूर्षतां प्रशस्तानि विपरीतं तु गर्हितम्' ।। (भा.अ.२२०-३१) इति निशामरणस्य गर्हितत्वेन अधोगतिहेतुत्वात्, न ब्रह्मप्राप्तिः सम्भवति - इति पूर्वः पक्षः ।

राद्धान्तस्तु - विद्यामाहात्म्यात् उत्तर-पूर्वाघयोः-अश्लेष-विनाशश्रुतेः अश्लिष्ट-विनष्टत्वात्, प्रारब्धस्याऽपि कर्मणः चरमदेहावधित्वाश्च बन्धहेत्वभावात्, निशि मृतस्यापि ब्रह्मप्राप्तिरस्त्येव - इति । अविद्वद्विषय निशामरणनिन्दा ।

सूत्रार्थस्तु - निशामरणनिन्दया, निशि मृतस्य न ब्रह्मप्राप्तिः - इति चेत्, तन्न, सम्बन्धस्य यावद्देहभावित्वात् । अनारब्धकार्यकर्मसम्बन्धस्य [१]विद्यया विनष्टत्वात्, प्रारब्ध[१]कार्य कर्मसम्बन्धस्यापि यावच्चरमदेहभावित्वात्, बन्धहेत्वभावेन ब्रह्मप्राप्तिरस्त्येव इत्यर्थः । तदेतत् श्रुतिश्च दर्शयति - 'तस्य तावदेव चिरं यावन्न विमोक्ष्ये अथ सम्पत्स्ये' (छां.उ.६-१४-२) इति ।। १८ ।।

।। इति निशाधिकरणम् ।। १० ।।

१४५. दक्षिणायनाधिकरणम् (४-३-११) (१९-२०)

[अधिकरणार्थः-दक्षिणायने मृतस्यापि, विदुषः ब्रह्मप्राप्तिरस्त्येव;

न चन्द्रं प्राप्य पुनरावृत्तिः]

५०७. अतश्चायनेऽपि हि दक्षिणे (४-२-१९)

दक्षिणायने मृतस्य विदुषः ब्रह्मप्राप्तिरस्ति ? न ? - इति संशयः 'अथ यो दक्षिणे प्रमीयते पितॄणामेव महिमानं गत्वा चन्द्रमसः सायुज्यं गच्छति' (तै.ना.उ.८०) इति विदुषः दक्षिणायने मृतस्य चन्द्रसायुज्य[२]श्रवणात्[२], चन्द्रप्राप्तानाम् 'अथैतमेवाध्वानं पुनर्निवर्तन्ते' (छां.उ.५-१०-५) इति वचनाच्च, दक्षिणायने मृतस्य ब्रह्मप्राप्तिर्न सम्भवति- इति पूर्वः पक्षः ।

---

१. यावत् विद्याप्राप्तिभावित्वात् आरब्ध-ख,ग,घ २. प्राप्तिश्रवणात्-ग

राद्धान्तस्तु - पूर्वोक्तात् बन्धहेत्वभावात्, विदुषः चन्द्रं प्राप्तस्यापि पुनरावृत्तिर्न-सम्भवति । चन्द्रसायुज्यवचनं, विदुषः ब्रह्मप्रेप्सोः, विश्रमस्थानमात्रविषयम् । आवृत्तिवचनं तु अविदुषामेव ।

सूत्रार्थस्तु - यतो हेतोः निशि मृतस्यापि ब्रह्मप्राप्तिः, तत एव बन्धहेत्वभावात्, दक्षिणायने मृतस्याऽपि ब्रह्मप्राप्तिरस्त्येव ।। १९ ।।

५०८. योगिनः प्रति स्मर्येते स्मार्ते चैते (४-२-२०)

योगिनः प्रति - ब्रह्मविद्यानिष्ठान् प्रति, एते - देवयानपितृयाणगती, स्मार्ते स्मर्येते - स्मार्ते-स्मृतिविषयभूते अहरहः स्मर्तव्ये स्मर्येते इत्यर्थः ।

'यत्र काले त्वनावृत्तिमावृत्तिञ्चैव योगिनः' (भ.गी.८-२३) इत्यादिना, 'नैते सृती पार्थ जानन् योगी मुह्यति कश्चन । तस्मात् सर्वेषु कालेषु योगयुक्तो भवार्जुन' ।। (भ.गी.८-२७) इत्यन्तेन न मुमूर्षून् प्रति कालविशेषोपादानं स्मर्यते । आतिवाहिकगणस्य कालाभिमानिदेवताविशेषभूयस्त्वेन, 'यत्र काले' (भ.गी.८-२३) इत्युच्यते ।। २० ।।

।। इति दक्षिणायनाधिकरणम् ।।

।। इति भगवद्रामानुजविरचिते वेदान्तदीपे चतुर्थस्याध्यायस्य द्वितीयः पादः ।। ११ ।।

तृतीयः पादः - गतिपादः

१४६. अर्चिराद्यधिकरणम् (४-३-१)

[अधिकरणार्थः-परं प्राप्नुवतः पुरुषस्य अर्चिरादिरेक एव मार्गः, नियतश्चिन्तनीयः; नाऽन्यः]

५०९. अर्चिरादिना तत्प्रथितेः (४-३-१)

किं विद्वान्, अर्चिरादिना एकेन मार्गेण गच्छति? उत 'तेन वा, अन्येन वा' इति अनियमः ? इति संशयः ।

तदर्थं परीक्ष्यते - किं, सर्वासु श्रुतिषु, अर्चिरादिः, एक एव मार्गः आम्नायते ? उत, तत्र तत्र अन्यः ? इति ।

यदा अर्चिरादिः एक एव सर्वत्रोक्तः, तदा तेनैव गच्छति । यदा तत्र आम्नाताः अन्ये, तदा, 'अन्यैर्वा अनेन वा' इत्यनियमः - इति ।

छान्दोग्यवाजसनेयकादिषु नानाविधाः गतिप्रकाराः श्रूयन्ते । छान्दोग्ये 'यथा पुष्करपलाश आपो न श्लिष्यन्ते' (छां.उ.४-१४-३) [१]इत्युपक्रम्य, 'सर्वाणि ... नयति' (छां.उ.४-१५-३) 'सर्वेषु लोकेषु भाति, य एवं वेद[१]' (छां.उ.४-१५-४) 'अथ यदु चैवाऽस्मिन् शव्यं कुर्वन्ति, यदु च न; अर्चिषमेवभिसम्भवन्ति, अर्चिषोऽह; अह्न आपूर्यमाणपक्षम्, आपूर्यमाणपक्षात् यान् षडुदङेति मासांस्तान्, मासेभ्यः संवत्सरं, संवत्सरादादित्यम्, आदित्याच्चन्द्रमसं, चन्द्रमसो विद्युतं, तत्पुरुषोऽमानवः, स एनान् ब्रह्म गमयति, एष देवपथो ब्रह्मपथः, एतेन प्रतिपद्यमानाः इमं मानवमावर्तं नाऽवर्तन्ते' (छां.उ.४-१५-५,६) इति ।

बृहदारण्यके - 'य एवमेतद्विदुर्ये चामी अरण्ये श्रद्धां सत्यमुपासते, तेऽर्चिषमभिसम्भवन्ति, अर्चिषोऽहं, अह्न आपूर्यमाणपक्षम्, आपूर्यमाणपक्षात्, यान् षण्मासानुदङ्ङादित्य एति, मासेभ्यो देवलोकं, देवलोकादादित्यम्, आदित्याद्वैद्युतम्, तान् वैद्युतान् पुरुषो मानस एत्य ब्रह्मलोकान् गमयति' (बृ.उ.८-२-१५) तत्रैवान्यथा -

'यदा वै पुरुषोऽस्माल्लोकात् प्रैति, स वायुलोकमागच्छति, स वै तत्र विजिहीते, यथा रथचक्रस्य खं तेन स ऊर्ध्वमाक्रमते, स आदित्यमागच्छति, तस्मै तत्र विजिहीते, यथाऽऽडम्बरस्य खं, तेन स ऊर्ध्वमाक्रमते, स चन्द्रमसमागच्छति, 'तस्मै तत्र विजिहीते, यथा दुन्दुभेः खम्' (बृ.उ.७-१०-१) इत्यादिषु । तेषां ब्रह्मप्राप्तौ नैरपेक्ष्यश्रवणात्, तैर्वा अर्चिरादिना वा इति विकल्पः - इति पूर्वःपक्षः ।

राद्धान्तस्तु - सर्वत्र अर्चिराद्यन्तर्भूतादित्यादीनां दर्शनात्, 'स एव' इति प्रत्यभिज्ञानात्, अन्यत्रोक्तानाम् अन्यत्र उपसंहाराच्च, सर्वत्र अर्चिरादिः एक एवमार्ग इति, तेनैवगच्छति [२]विद्वान्[२] ।

सूत्रार्थस्तु - अर्चिरादिनैव गच्छति विद्वान् । कुतः तत्प्रथितेः । प्रथितिः - प्रसिद्धिः । सर्वत्र तत्प्रत्यभिज्ञानात् इत्यर्थः ।। १ ।।

।। इति अर्चिराद्यधिकरणम् ।। १ ।।

---

१. ब्रह्मविद्यामुपादिश्य आम्नायते-ग २. इति-ग

१४७. वाय्वधिकरणम् (४-३-२)

[अधिकरणार्थः-अर्चिरादिपथगत 'वायु-देवलोक'शब्दयोरेकार्थता; अतः तत्र गच्छतां आदित्यतः पूर्वं वायोरेव प्राप्तिः]

५१०. वायुमब्दादविशेषविशेषाभ्याम् (४-३-२)

'तेऽर्चिषमभिसंभवन्त्यर्चिषोऽहरह्नः' इत्यारभ्य 'मासेभ्यस्संवत्सरं संवत्सरादादित्यम्' इति छान्दोग्ये श्रुतम् । तत्र संवत्सरादित्ययोर्मध्ये देवलोको वायुश्च श्रुतौ श्रुत्यन्तरे । द्वयोः प्रकरणयोः - किं देवलोकः वायुश्च अर्थान्तरभूतौ? उत वायु? एक एव? - इति संशयः ।

शब्दभेदात् अर्थान्तरभूतौ - इति पूर्वः पक्षः । अर्थान्तरत्वे सति, 'देवलोकादादित्यम्' (बृ.उ.८-२-१५) इति [1]देवलोकस्य[1], 'तेन स ऊर्ध्वमाक्रमते, स आदित्यम्' (बृ.उ.७-१०-१) इति वायोश्च आदित्यात् पूर्वत्वेन [2]श्रौतक्रम[2]निर्दिष्टत्वात्, देवलोक - वायू यथेष्टक्रमेण निवेशयितव्यौ ।

राद्धान्तस्तु - वायुरेव 'देवलोक' शब्देन निर्दिष्ट इति, तस्मात् अनन्यः । 'देवानां लोकः' (इति हि) देवलोकः - देवानाम् आवासस्थानम्, इति अविशेषेण निर्दिष्टम् ।

'योऽयं पवते एष एव देवानां गृहाः' (जै.उप.ब्रा.३-१) इति वायोः, विशेषेण - देवानां वासस्थानत्वेन श्रुतत्वात्, अविशेषनिर्दिष्टो देवलोकः, वायुरेवेति निश्चीयते - इति, 'संवत्सरादूर्ध्वं वायुः, वायोरादित्यः' इति क्रमश्च स्यात् ।

सूत्रार्थस्तु - अब्दात् - संवत्सरादूर्ध्वम्, आदित्यात् पूर्वम्, वायुम् एकमेव निवेशयेत् । देवलोकवायुशब्दाभ्याम् अविशेषविशेषाभ्यां वायोरेकस्यैव निर्दिष्टत्वात् । 'देवानां निवासस्थानम्' इति अविशेषेण हि 'देवलोक' शब्दः, वायुं देवानाम् आवासस्थानभूतम्, अभिदधाति । 'वायु' शब्दः तमेव विशेषेणेति, द्वयोः प्रकरणद्वयविहितयोः एकत्वात् - [3]इत्यर्थः[3] ।।

।। इति वाय्वधिकरणम् ।। २ ।।

---

१. देवलोकत्वेन च-ग २. श्रुतौ तत्क्रम-ग ३. इत्युक्तं भवति-ख,घ

१४८. वरुणाधिकरणम् (४-३-३)

[अधिकरणार्थः-अर्चिरादिपथस्थस्य वरुणस्य विद्युतोऽनन्तरमेव निवेशनीयता]

५११. तटितोऽधि वरुणः सम्बन्धात् (४-३-३)

छान्दोग्यवाजसनेयककौषीतकीप्रभृतिषु आम्नातस्य अर्चिरादिमार्गस्य, अर्चिरहरापूर्यमाणपक्षोत्तरायणसंवत्सरवाय्वादित्यचन्द्रविद्युद्वरुणेन्द्रप्रजापतिरूपस्य उपसंहारे, वायुपर्यन्तस्य, श्रुत्यादिभिः क्रमप्रकार उक्तः ।

वरुणेन्द्रप्रजापतीनां किं विद्युत उपरि निवेशः ? उत वायोरुपरि ? इति संशयः ।

'स वायुलोकं स वरुणलोकम्' । इति कौषीतकीपाठक्रमेण, वायोरुपरि वरुणस्य निवेशः । इन्द्रादेरपि, वरुणनिवेशाय वाय्वादित्ययोः क्रमस्य बाधितत्वात्, तत्रैव वरुणोपरि- इति पूर्वः पक्षः ।

राद्धान्तस्तु - विद्युतः मेघोदरवर्तित्वेन, विद्युद्वरुणयोः लोके वेदे च सम्बन्धावगमात्, पाठक्रमात् अर्थक्रमस्य बलीयस्त्वेन वरुणस्य विद्युत उपरि निवेशः कार्यः । इन्द्रादेरपि, वरुणनिवेशाय विद्युतो व्यवधानसहत्वदर्शनात्, वरुणोपरि निवेशः । सूत्रं च व्याख्यातम् ।। ३ ।।

।। इति वरुणाधिकरणम् ।। ३ ।।

१४९. आतिवाहिकाधिकरणम् (४-३-४) (सू.४-५)

[अधिकरणार्थः-ब्रह्मप्रेप्सोर्मध्येमार्गं श्रुतानामर्चिरादीनाम्, अतिवोढृदेवताविशेषत्वमेव; न मार्गचिह्नत्वं, नाऽपि भोगभूमित्वम्]

५१२. आतिवाहिकास्तल्लिङ्गात् (४-३-४)

किम् अर्चिरादयः, विदुषः ब्रह्मप्रेप्सोः मार्गचिह्नभूताः ? उत गमयितारः ? इति संशयः ।

'अमुकं वृक्षम्, अमुकां नदीम्, अमुकं पर्वतपार्श्वं गत्वा, अमुकं ग्रामं गच्छ' इत्यादिदेशिकोपदेशप्रकारदर्शनात्, मार्गचिह्नभूताः - इति पूर्वः पक्षः ।

राद्धान्तस्तु - 'स एनान् ब्रह्म गमयति' (छां.उ.४-१५-५) इति वैद्युतपुरुषस्य गमयितृत्वदर्शनात्, इतरेषां च अविशेषनिर्दिष्टानां, स एव सम्बन्धः - इति निश्चीयते।

'अग्निलोकम्' (कौषी.उ.१-३) इत्यादिलोकशब्दोऽपि, मध्ये भोगाभावात्, गमयितृत्वे एव उपपद्यते ।

सूत्रार्थस्तु - आतिवाहिकाः - विदुषामतिवाहे परमपुरुषेण नियुक्ताः अर्चिराद्यभिमानि-देवताविशेषाः गमयितारः इत्यर्थः 'स एनान् ब्रह्म गमयति' इति लिङ्गात् ।। ४ ।।

५१३. वैद्युतेनैव ततस्तच्छ्रुतेः (४-३-५)

ततः - विद्युत उपरि, वैद्युतेन विदुषो गमनम्, तच्छ्रुतेः - 'स एनान् ब्रह्म गमयति' (छां.उ.४-१५-६) इति तस्यैव श्रुतेः । वरुणादीनां तदनुग्राहकत्वेन गमयितृत्वम् - इति निश्चीयते इत्यर्थः ।। ५ ।।

।। इति आतिवाहिकाधिकरणम् ।। ४ ।।

१५०. कार्याधिकरणम् (४-३-५) (सू.६-१५)

[अधिकरणार्थः-अर्चिरादिरातिवाहिको गणः ब्रह्म ब्रह्मात्मकं प्रकृतिवियुक्तात्मानं च उपासीनानेव ब्रह्मपदं नयति; न तु कार्यं हिरण्यगर्भादिकमुपासीनान्]

५१४. कार्यं बादरिरस्य गत्युपपत्तेः (४-३-६)

किम् अर्चिरादिको गणः, कार्यं हिरण्यगर्भमुपासीनान् नयति? उत परं ब्रह्म उपासीनान्? अथ परं ब्रह्मोपासीनान्, प्रत्यगात्मानं ब्रह्मात्मकतया [१]उपासीनांश्च[१]? - इति संशयः ।

कार्यं हिरण्यगर्भमुपासीनान् - इति पूर्वः पक्षः, तेषामेव गत्युपपत्तेः । न हि परिपूर्णं सर्वगतं परं ब्रह्म उपासीनानां, तत्प्राप्तये गतिः उपपद्यते, नित्यप्राप्तत्वात् । अविद्यानिवृत्तिरेव हि कार्या । परमेव उपासीनान् - इति, अपरः पक्षः । 'स एनान् ब्रह्म गमयति' (छां.उ.४-१५-६) इति 'ब्रह्म' शब्दस्य तत्रैव मुख्यत्वात् । अविद्यानिवृत्तेः फलाभिसन्धिरहितयज्ञाद्यपेक्षावत्, श्रवणाद्यपेक्षावच्च, गतिश्रुत्या देशविशेषापेक्षा च विद्यते - इति निश्चीयते ।

राद्धान्तस्तु - परम् उपासीनान्, अन्यानपि नयति । 'तद्य इत्थं विदुर्ये चेमेऽरण्ये श्रद्धा तप इत्युपासते, तेऽर्चिषमभिसम्भवन्ति' (छां.उ.५-१०-१) इति पञ्चाग्निविदां, परंब्रह्म उपासीनानां च अर्चिरादिगतिश्रुतेः ।

---

१. उपासीनान्-ग

पञ्चाग्निविदो हि? प्रकृतिविमुक्तब्रह्मात्मकात्मस्वरूपविदः । ते च तत्प्राप्य पुनर्न निवर्तन्ते । परंब्रह्म उपासीनास्तु यथावस्थितं परिपूर्णं परंब्रह्मैव प्राप्य, पुनर्न निवर्तन्ते ।

'तद्य इत्थं विदुर्ये चेमेऽरण्ये श्रद्धां तप इत्युपासते, तेऽर्चिषमभिसम्भवन्ति' (छां.उ.५-१०-१) इति उभयविधान् भेदेनोपादाय, अर्चिरादिगतिश्रुतेः अपुनरावृत्तिश्रुतेश्च, एवम् - इति निश्चीयते ।

सूत्रार्थस्तु - कार्यम् हिरण्यगर्भम् उपासीनान्, आतिवाहिको गणो नयति इति बादरिराचार्यो मन्यते अस्यैव गत्युपपत्तेः । परमुपासीनस्य हि ! न तत्प्राप्तये गतिरुपपद्यते ; सर्वगतत्वात् परस्य ब्रह्मणः ।

५१५. विशेषितत्वाच्च (४-३-७)

'पुरुषोऽमानव एत्य ब्रह्मलोकान् गमयति' (बृ.उ.८-२-१५) इति, 'प्रजापतेः सभां वेश्म प्रपद्ये' (छां.उ.८-१४-१) इति च प्राप्यस्थानस्य विशेषितत्वाच्च, हिरण्यगर्भमुपासीनमेव नयति ।। ७ ।।

५१६. सामीप्यात्तु तद्व्यपदेशः (४-३-८)

एवं निश्चिते सति, 'स एनान् ब्रह्म गमयति' (छां.उ.४-१५-६) इति हिरण्यगर्भस्य ब्रह्मशब्दव्यपदेशः ब्रह्मसामीप्यात्, 'यो ब्रह्माणं विदधाति पूर्वम्' (श्वे.उ.६-१८) इति प्रथमजत्वेन ब्रह्मसामीप्यं हि विद्यते ।। ८ ।।

५१७. कार्यात्यये तदध्यक्षेण सहातः परमभिधानात् (४-३-९)

हिरण्यगर्भप्राप्तावपि - [१]अपुनरावृत्तिः[१] उपपद्यते । कार्यस्य हिरण्यगर्भलोकस्य अत्यये, तदध्यक्षेण - हिरण्यगर्भेण आधिकारिकपुरुषेण विदुषा सह परप्राप्त्यभिधानात् ।

'ते ब्रह्मलोके तु परान्तकाले परामृतात्परिमुच्यन्ति सर्वे' (तै.ना.३-३०-२४) इति ।। ९ ।।

५१८. स्मृतेश्च (४-३-१०)

'ब्रह्मणा सह ते सर्वे सम्प्राप्ते प्रतिसञ्चरे । परस्यान्ते कृतात्मानः प्रविशन्ति परं पदम्' ।। (कूर्म.पू.खं.१२-२६९) इति स्मृतेश्च अवगम्यते ।। १० ।।

---

१. अपुनरावृत्ति श्रुतिः-ग

५१९. परं जैमिनिर्मुख्यत्वात् (४-३-११)

'परं ब्रह्म उपासीनमेव नयति, आतिवाहिकगणः' इति जैमिनिराचार्यो मन्यते । 'ब्रह्म गमयति' (छां.उ.१२-४-२) इति ब्रह्मशब्दस्य तत्रैव मुख्यत्वात् । 'ब्रह्म लोकान्' इति शब्दश्च, 'ब्रह्मैव लोके ब्रह्मलोकः' इति कर्मधारयपरिग्रहस्यैव न्याय्यत्वात् उपपद्यते । एवं निश्चिते, बहुवचनं च, 'अदितिः पाशान्' (पू.मी.९-३-५) इतिवत् उपपन्नम् ।। ११ ।।

५२०. दर्शनाच्च । (४-३-१२)

'अस्माच्छरीरात्समुत्थाय परंज्योतिरुपसम्पद्य स्वेन रूपेणाभिनिष्पद्यते' (छां.उ.८-३-४) इति अर्चिरादिना गतस्य, परंब्रह्मप्राप्तिं च दर्शयति ।। १२ ।।

५२१. न च कार्ये प्रत्यभिसन्धिः ।। (४-३-१३)

'प्रजापतेः सभां वेश्म प्रपद्ये' (छां.उ.८-१४-१) इति अभिसन्धिश्च न कार्ये । 'धूत्वा शरीरमकृतं कृतात्मा ब्रह्मलोकमभिसम्भवामि' (छां.उ.८-१३-१) इति 'अकृतं, ब्रह्मलोकम्' इति, तत्रैव विशेषितत्वात् ।

'यशोऽहं भवामि ब्राह्मणानाम्' (छां.उ.८-१४-१) इति सर्वात्मभावाभिसन्धानाच्च ।। १३ ।।

५२२. अप्रतीकालम्बनान्नयतीति बादरायण उभयथा च दोषातत्क्रतुश्च । (४-३-१४)

'कार्यमुपासीनानेव' इति न अयं [1]नियमः[1] । 'परमेवोपासीनान्' इति च अयमपि [2]नियमो[2] न सम्भवति । कुतः ?

उभयथा च दोषात् । 'कार्यमुपासीनान्' इति [3]नियमे[3], 'अस्माच्छरीरात्समुत्थाय परंज्योतिरुपसम्पद्य स्वेन रूपेणाभिनिष्पद्यते ।' (छां.उ.८-३-४) इत्यादिकाः श्रुतयः, 'ये चेमेऽरण्ये श्रद्धां तप इत्युपासते' (छां.उ.५-१०-१) इति च प्रकुप्येयुः । परं एवेति नियमे, 'तद्य इत्थं विदुः' (छां.उ.५-१०-१) इति प्रकुप्येत् । तस्मात् अप्रतीकालम्बनान्नयति - इति भगवान् बादरायणो मन्यते । प्रतीकालम्बनास्तु - अचिन्मिश्रं केवलं वा चिद्वस्तु, सिंहो देवदत्तः इतिवत् ब्रह्मदृष्ट्या स्वरूपेण वा तद्वस्तु य उपासते, अप्रतीकालम्बनाः तद्व्यतिरिक्ताः सर्वकारणं सत्यसङ्कल्पं निखिलहेयप्रत्यनीकानवधिकातिशयानन्दस्वरूपं

---

१. पक्षः-ख २. पक्षे-ख,घ ३. पक्षे-ख,घ

ब्रह्म उपासते, ते च प्रत्यगात्मानं भूतसूक्ष्मैः संपरिष्वक्तं सर्वत्र वर्तमानं भूतसूक्ष्मव्यतिरिक्तं ज्ञानैकस्वरूपं नित्यं निर्विकारं 'य आत्मनि तिष्ठन्' (बृ.उ.मा.पा.५-७-२२)इत्यादिना अवगतब्रह्मात्मभावं पञ्चाग्निविद्योदितं उपासते तान् उभयविधान् नयति ।

'तद्य इत्थं विदुर्ये चेमेऽरण्ये' (छां.उ.५-१०-१) [1]इति उभय[1]श्रुतेः । तत्क्रतुश्च - 'यथा क्रतुरस्मिंल्लोके पुरुषो भवति तथेतः प्रेत्य भवति' (छां.उ.३-१४-१) इति उभयेषामेव अपुनरावृत्तिः सम्भवति । अचिन्मिश्रं, केवलं अचिद्वस्तु च उपासीनानां तत्क्रतुन्यायेनैव पुनरावृत्तिः अवर्जनीया ।। १४ ।।

५२३. विशेषं च दर्शयति । (४-३-१५)

प्रतीकाद्युक्तलक्षणं अचिन्मिश्रं केवलं अचिद्वस्तु च उपासीनानां सर्वेषां गत्यनपेक्षं परिमितफलविशेषं च दर्शयति श्रुतिः -

'यावन्नाम्नो गतं तत्रास्य यथा कामचारो भवति' (छां.उ.७-१-५) इत्यादिका । अतः - 'ब्रह्मणा सह ते सर्वे' (कू.पु.१२-२८६) इति वचनं, न अर्चिरादिना गतानां गतिप्रकारविषयम् । अर्चिरादिना गतानां, देहावसानसमय एव, सुकृतदुष्कृतयोर्नाशात्, हिरण्यगर्भलोकप्राप्तितद्वास तत्रस्थ भोगानुभवहेत्वाभावात्, तत्क्रतुन्यायविरोधात् तदानीमेव ब्रह्मप्राप्तिश्रुतिविरोधाच्च । तद्वचनं तु, पुण्यकर्मविशेषेण हिरण्यगर्भलोकं प्राप्तानां, 'तदुपर्यपि बादरायणः' (ब्र.सू.१-३-२५) इति न्यायेन तत्रैव निष्पन्नविद्यानां गतिप्रकारविषयम् । 'ते ब्रह्मलोके' (तै.ना.उ.११-२२) इति तु, ब्रह्मलोकशब्दस्य कर्मधारयवृत्त्या ब्रह्मविषयत्वात्, ब्रह्मणि उपास्ये [2]वर्तमानाः[2] परान्तकाले चरमदेहावसानसमये, परामृतात् परस्माद्ब्रह्मणः उपासनप्रीताद्धेतोः, परिमुच्यन्ति सर्वे अस्मात् बन्धात् विमुच्यन्ते, इति, 'वेदान्तविज्ञान-सुनिश्चितार्थाः' । (तै.ना.उ.११-२२) इति प्रकरणात् अवगम्यते ।

'तद्य इत्थं विदुः' (छां.उ.५-१०-१) इति पञ्चाग्निविदः ब्रह्मप्राप्त्यपुनरावृत्तिश्रवणात् तत्क्रतुन्यायेन अचिद्वियुक्तब्रह्मात्मकात्मस्वरूपोपासनं विवक्षितं इति निश्चीयते । तथैव तत्र श्रुतिरपि, 'इति तु पञ्चम्यामाहुतावापः पुरुषवचसो भवन्ति' (छां.उ.५-९-१) इति, 'रमणीयचरणाः' (छां.उ.५-१०-७) इति च । कर्महेतुकमनुष्यादिभावः अपामेव

१. श्रद्धाम् उभयविधश्रुतेः-ग २. चरमदेहावसाने वर्तमानाः-ग

भूतान्तरसंसृष्टानां इति चिदचिद्विवेकं प्रतिपाद्य, 'तद्य इत्थं विदुः' (छां.उ.५-१०-१) इति भूतसूक्ष्म[1]व्यतिरिक्ता[1]ऽत्मस्वरूपोपासनमेव विदधाति ।। १५ ।।

।। इति कार्याधिकरणम् ।। ५ ।।

।। इति श्रीभगवद्रामानुजविरचिते वेदान्तदीपे चतुर्थाध्यायस्य तृतीयः पादः ।।

चतुर्थः पादः - मुक्ति(फल)पादः

१५१. सम्पद्याविर्भावाधिकरणम् (४-४-१) (सू.१-३)

[अधिकरणार्थः-मुक्तात्मनां ब्रह्मोपसम्पत्त्या प्राप्यो दशाविशेषः स्वाभाविकस्वरूपाविर्भाव एव; नत्वपूर्व आकारः]

५२४. सम्पद्याऽऽविर्भावः स्वेनशब्दात् ।। (४-४-१)

'एवमेवैष संप्रसादोऽस्माच्छरीरात्समुत्थाय परंज्योतिरूपसम्पद्य स्वेन रूपेणाभिनिष्पद्यते' (छां.उ.८-१२-२) इति, किं परं ज्योतिरूपसम्पन्नस्य प्रत्यगात्मनः स्वरूपाविर्भावः प्रतिपद्यते? उत अन्येन साध्येन रूपेण सम्बन्धः ? इति - संशयः ।

स्वस्वरूपस्य सुषुप्त्यादौ निरानन्दत्वदर्शनात् स्वरूपमात्रस्य नित्याविर्भूतत्वाच्च, साध्येन सुखैकान्तेन रूपेण संबध्यते; एवं च 'अभिनिष्पद्यते' इति सङ्गच्छते, परं ज्योतिरूपसम्पन्नस्य हि आनन्दित्वं श्रूयते -

'रसो वै सः, रसं ह्येवायं लब्ध्वाऽऽनन्दीभवति' (तै.उ.आन.७-१) 'स एको ब्रह्मण आनन्दः श्रोत्रियस्य चाकामहतस्य' (तै.उ.आन.८-४) इत्यादिषु । अतः साध्येन रूपेण इति - पूर्वः पक्षः ।

राद्धान्तस्तु - 'स्वेन रूपेणाभिनिष्पद्यते' (छां.उ.८-१२-२) इति विशेषणात् स्वरूपाविर्भाव एव । स्वरूपस्य च अपहतपाप्मत्वादिगुणकतया प्रजापतिवाक्योदितस्य, कर्मकृतदेहसंबन्धतिरोहितस्य, परं ज्योतिरूपसंपत्त्या सूक्ष्मासूक्ष्मदेहविनिर्मुक्तस्य असंकुचितज्ञानादिगुणकस्वरूपाविर्भावात्, स्वयाथात्म्यानुभवपूर्वकानवधिकातिशयानन्द-ब्रह्मानुभवः [2]संपत्स्यते[2] - इति च [3]उपपन्नम्[3]।

१. वियुक्ता-ग   २. सम्पद्यते इति अभिनिष्पद्यत इति च -ख,ग   ३. उपपन्नतरम्-ख,घ

सूत्रार्थस्तु - परं ज्योतिरुपसंपद्य, स्वस्वरूपाविर्भावः प्रतिपाद्यते ।

कुतः ? स्वेन शब्दात् । साध्यस्यापि [१]रूपस्य[१] स्वासाधारणत्वेन स्वेन इति विशेषणं हि अनर्थकम् ।। १ ।।

स्वस्वरूपमात्रस्य 'अहं जानामि' इति नित्याविर्भूतत्वेन 'परं ज्योतिरुपसम्पद्य' (छां.उ.८-१२-२) इत्यनर्थकं इत्याशङ्क्याह -

५२५. मुक्तः प्रतिज्ञानात् ।। (४-४-१)

कर्मसंबन्ध तत्कृतदेहादेर्मुक्त[२]स्वरूपं अत्र[२] 'स्वेन रूपेणाऽभिनिष्पद्यते'। (छां.उ.८-१२-२) इत्युच्यते । कथमिदमवगम्यते ? 'एतं त्वेव ते भूयोऽनुव्याख्यास्यामि' (छां.उ.८-९-३) इति कर्महेतुकदेहसंबन्धतत्कृतजागरिताद्यवस्था विनिर्मुक्तस्वरूपस्य अत्र वक्तव्यतया प्रतिज्ञानात् ।। २ ।।

एवमपि, स्वरूपमात्राविर्भावस्य पुरुषार्थत्वं न सिद्धयति इत्याशङ्क्याह -

५२६. आत्मा प्रकरणात् ।। (४-४-३)

देहादिविनिर्मुक्तः स्वरूपेणावस्थित आत्मा, अपहतपाप्मत्वादिसत्यसंकल्पत्व-पर्यन्तगुणकः । तस्य हि आविर्भाव उच्यते । कुतः ?

प्रकरणात् - 'य आत्मा अपहतपाप्मा' (छां.उ.८-७-१) इति प्रकृत्य, 'एवं त्वेव ते भूयोऽनुव्याख्यास्यामि' (छां.उ.८-९-३) इत्यादिनोच्यते । अतः अपहतपाप्मत्वादि[३]गुणकस्य[३], कर्माख्याविद्यातिरोहितस्य, परंज्योतिरुपसंपद्य निवृत्ततिरोधानस्य आविर्भावः प्रतिपाद्यते ।। ३ ।।

।। इति सम्पद्याविर्भावाधिकरणम् ।। १ ।।

१५२. अविभागेन दृष्टत्वाधिकरणम् (४-४-२) (सू.४०)

[अधिकरणार्थः-मुक्तस्य मोक्षदशायां स्वानुभवः, स्वात्मभूतपरमात्मापृथग्भावेनेति निरूपणम्]

५२७. अविभागेन दृष्टत्वात् । (४-४-४)

---

१. स्वरूपमात्रं-घ २. स्वरूपस्य-ग ३. गुणकस्वरूपस्य-ग

किमयं मुक्तः आविर्भूतस्वरूपः प्रत्यगात्मा, परं ब्रह्म स्वात्मनो विभक्तं अनुभवति ? उत स्वात्मनोऽप्यात्मतया अविभागेन 'अहं ब्रह्मास्मि' - इति संशयः।

'निरञ्जनः परमं साम्यमुपैति' (मुं.उ.३-१-३) 'सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चिता' (तै.उ.आन.१-२) 'इदं ज्ञानमुपाश्रित्य मम साधर्म्यमागताः' (भ.गी.१४-२) इति श्रुतिस्मृतिभ्यः विभक्तं मुक्तात्मा अनुभवति - इति पूर्वपक्षः ।

राद्धान्तस्तु - 'सर्वं खल्विदं ब्रह्म' (छां.उ.३-१४-१) 'ऐतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत्त्वमसि' (छां.उ.६-८-७) इत्यादिसामानाधिकरण्येन[1], 'यः पृथिव्यां तिष्ठन् .... यस्य पृथिवी शरीरम्' (बृ.उ.मा.पा.५-७-७) 'य आत्मनि तिष्ठन् .... यस्यात्मा शरीरम्' (बृ.उ.५-७-२२) इत्यादिषु सर्वस्य चिदचिद्वस्तुनो ब्रह्मशरीरतया ब्रह्म प्रकारतया तत्तद्बुद्धिशब्दाः तत्पर्यन्तविषयाः इत्यवगम्य, 'आत्मेति तूपगच्छति' (ब्र.सू.४-१-३) इति न्यायेन स्वात्मनोप्यात्मतया, अहं ब्रह्मास्मि इत्युपासनेन यथावस्थितपरमात्मात्मकस्वात्मनो दृष्टत्वात् मुक्तः स्वात्मनोऽपि आत्मभूतं ब्रह्म 'अहं ब्रह्मास्मि' इति अविभागेनैव अनुभवति ।

सूत्रार्थस्तु - 'अहं ब्रह्मास्मीति' अविभागेन ब्रह्मानुभवति मुक्तः, स्वात्मानोऽप्यात्मतया उपासनेन, यथावस्थितपरमात्मात्मकस्वरूपस्य दृष्टत्वात्, साधर्म्यश्रुतिस्तु - परमात्मशरीरभूतस्य प्रत्यगात्मनः अपहतपाप्मत्वादिगुणैः तत्साधर्म्यं प्रतिपादयति ।

'सोऽश्नुते सर्वान्कामान्सह ब्रह्मणा विपश्चिता' (तै.उ.आन.१-२) इति ब्रह्मशरीरतया ब्रह्मप्रकारभूतत्वात् स्वात्मभूतेन ब्रह्मणा सह तद्गुणाननुभवति इति वदति । काम्यन्ते इति [2]कामाः कल्याणगुणाः[2] । सर्वकल्याणगुणविशिष्टं ब्रह्म अनुभवति इत्यर्थः ।। ४ ।।

।। इति अविभागेन दृष्टत्वाधिकरणम् ।। २ ।।

१५३. ब्राह्माधिकरणम् । (४-४-३) (सू.५-७)

[अधिकरणार्थः-मुक्तौ आत्मस्वरूपाविर्भावः विज्ञानस्वरूपेण अपहतपाप्मत्वादिना चेति]

५२८. ब्राह्मेण जैमिनिरुपन्यासादिभ्यः ।। (४-४-५)

किं जीवस्य स्वाभाविकं रूपं 'अपहतपाप्मत्वादिगुणकम्' उत चैतन्यमात्रम् ? उत उभयम् ? इति संशयः ।

---

१. करण्यैः-ख,ग,घ २. गुणाः कामाः-ख,घ

'अपहतपाप्मत्वादिगुणकम्' - इति प्रथमः पक्षः । 'य आत्माऽपहतपाप्मा' (छां.उ.८-७-१) इति प्रतिपादनात् ।

चैतन्यमात्रम् - इति द्वितीयः पक्षः, 'एवं वा अरेऽयमात्माऽनन्तरोऽबाह्यः कृत्स्नः प्रज्ञानघन एव (बृ.उ.६-५-१३) विज्ञानघन एव' (बृ.उ.४-४-१२) इत्यवधारणात् ।

राद्धान्तस्तु - विज्ञानस्वरूपस्यैव अपहतपाप्मत्वादिगुणकत्वप्रतिपादनात् अविरोधाच्च, उभयस्वरूपम् । न च, "विज्ञानघन एव' (बृ.उ.४-४-१२) इत्यवधारणं गुणान्तरासहम् । यथा - सैन्धवघनस्य 'रसघन एव' इत्यवधारणेऽपि, रसाश्रयद्रव्यं रूपस्पर्शादिगुण्यन्तरं च सहते, 'रसघन एव' इत्यवधारणं तु रसवद्द्रव्यान्तरस्वभावव्यावृत्तिपरम् । द्रव्यान्तराणां हि ! स्वस्यैकदेशे रसवत्त्वं, सैन्धवघनस्य तु सर्वत्र । एवं अत्रापि जडवस्तुव्यावृत्त्या संवित्स्वभावस्य सगुणस्यात्मनः स्वप्रकाशतावधारणं क्रियते, 'विज्ञानघन एव' इति क्रियते।

सूत्रार्थस्तु - ब्राह्मेण अपहतपाप्मत्वादिना अस्य स्वारूपाविर्भावः । अपहतपाप्मत्वादयो दहरवाक्ये ब्रह्मगुणाः श्रुताः । 'उपन्यासादिभ्यः' - तेषां ब्रह्मगुणानां प्रत्यगात्मन्यपि 'य आत्माऽपहतपाप्मा' (छां.उ.८-७-१) इत्यादिना उपन्यासात् । आदिशब्दात्- 'जक्षत् क्रीडन् रममाणः' (छां.उ.८-१२-३) इत्यादिभ्योऽपि सत्यसङ्कल्पत्वादयः अवगम्यन्ते - इति जैमिनिराचार्यो मन्यते ।। ५ ।।

५२९. चितितन्मात्रेण तदात्मकत्वादित्यौडुलोमिः ।। (४-४-६)

चैतन्यमात्रेण स्वरूपाविर्भावः । 'विज्ञानघन एव' (बृ.उ.४-४-१२) इति तदात्मकत्वावधारणात् - इत्यौडुलोमिराचार्यो मन्यते ।। ६ ।।

५३०. एवमप्युपन्यासात्पूर्वभावादविरोधं बादरायणः ।। (४-४-७)

एवं - विज्ञानस्वरूपस्यैव, स्वप्रकाशस्वरूपस्यैव पूर्वेषाम् - अपहतपाप्मत्वादि-सत्यसंकल्पत्वपर्यन्तानामपि, 'य आत्माऽपहतपाप्मा' (छां.उ.८-७-१) इत्युपन्यासात् सद्भावावगमात्, उभयोः अविरोधं भगवान् बादरायणो मन्यते । उभयश्रुत्याऽवगतस्य इतरेतरविरोधाभावात्, न अन्यतरबाधे प्रमाणमस्ति - इत्यभिप्रायः ।। ७ ।।

।। इति ब्राह्माधिकरणम् ।। ३ ।।

१५४. सङ्कल्पाधिकरणम् । (४-४-४) (सू.६-९)

[अधिकरणार्थः-मुक्तात्मनोऽपि ज्ञात्यादिरूपेष्टार्थसम्पत्तिः सङ्कल्पमात्रादेव; न प्रयत्नान्तरात्]

५३१. सङ्कल्पादेव तच्छ्रुतेः ।। (४-४-८)

'परं ज्योतिरुपसम्पद्य स्वेन रूपेणाभिनिष्पद्यते, स उत्तमः पुरुषः, स तत्र पर्येति जक्षत् क्रीडन् रममाणः स्त्रीभिर्वा यानैर्वा ज्ञातिभिर्वा' (छां.उ.८-१२-२,३) इत्याम्नायते ।

किमेते ज्ञात्यादयः मुक्तस्य सङ्कल्पादेव भवन्ति? उत प्रयत्नान्तरसव्यपेक्षात्सङ्कल्पात् ? - इति संशयः । लोके राज्ञां सत्यसङ्कल्पानामपि, प्रयत्नान्तरसापेक्षत्वदर्शनात्, मुक्तस्यापि तथैव तत्सापेक्षात् - इति पूर्वः पक्षः । 'सङ्कल्पादेव' इत्यवधारणं 'विज्ञानघन एव' इतिवद्भविष्यति ।

राद्धान्तस्तु - 'सङ्कल्पादेवास्य पितरः समुत्तिष्ठन्ति' (छां.उ.८-२-१) इत्यवधारणात् न अन्यापेक्षत्वम् । न चेह सत्यकामत्वाद्युपन्यासवत् मुक्तस्य अन्यापेक्षत्वे प्रमाणमस्ति । लोके सत्यसङ्कल्पत्वाभावादेव प्रयत्नान्तरापेक्षत्वम् । न हि परमपुरुषव्यतिरिक्तः कश्चित् सत्यसंकल्पोऽस्ति । मुक्तश्च तत्प्रसादात् तत्साम्यमुपगतः तथैव ।

सूत्रमपि व्याख्यातम् ।। ८ ।।

५३२. अत एव चाऽनन्याधिपतिः ।। (४-४-९)

अतः - श्रुतेरेव, मुक्तः अनन्याधिपतिश्च । अन्याधिपतित्वं - कर्माधीनत्वम् । 'अपहतपाप्मा सत्यसङ्कल्पः' (छां.उ.८-७-१) इति हि श्रूयते । अतः मुक्त न अन्याधिपतिः ।। ९ ।।

।। इति सङ्कल्पाधिकरणम् ।। ४ ।।

अभावाधिकरणम् (४-४-५) (सू.१०-१६)

[अधिकरणार्थः-मुक्तस्यात्मनः, सशरीरत्वाशरीरत्वयोर्द्वयोरपि न्याय्यतास्थापनम्]

५३३. अभावं बादरिराह ह्येवम् ।। (४-४-१०)

किं मुक्तस्य शरीरेन्द्रियाद्यस्ति? उत न? अथवा यथासङ्कल्पं अस्ति न वा इति संशयः ।

'न ह वै सशरीरस्य सतः प्रियाप्रिययोरपहतिरस्ति अशरीरं वाव सन्तं न प्रियाप्रिये स्पृशतः' (छां.उ.८-१२-१) इति मुक्तस्य अशरीरत्वश्रवणात् नास्त्येव इत्येकः पक्षः । 'स एकधा भवति त्रिधा भवति' (छां.उ.७-२६-२) इति सशरीरत्वश्रुतेः अशरीरत्वश्रुतिः कर्मगृहीतशरीरविषयेति, शरीरेन्द्रियाद्यस्त्येव इति द्वितीयः पक्षः ।

राद्धान्तस्तु - 'मनसैतान् कामान् पश्यन् रमते य एते ब्रह्मलोके' (छां.उ.८-१२-५) इति अशरीरस्यैव भोगश्रुतेः, 'स एकधा भवति' (छां.उ.७-२६-२) इति श्रुतेश्च यथासङ्कल्पं अस्ति न चेति ।

सूत्रार्थस्तु - शरीराभावं बादरिः मेने । एवमाह हि श्रुतिः - 'अशरीरं वाव सन्तम्' (छां.उ.८-१२-१) इति ।। १० ।।

५३४. भावं जैमिनिर्विकल्पामननात् ।। (४-४-११)

शरीरादिभावं जैमिनिः मेने ।

कुतः ? विकल्पामननात् । विविधः कल्पो - विकल्पः । 'स एकधा भवति त्रिधा भवति' (छां.उ.७-२६-२) इत्यादिना मुक्तस्य हि विविधः कल्पनं आम्नायते । आत्मनः एकरूपस्य अच्छेद्यस्य वैविध्यासम्भवात् शरीरद्वारेणैव हि वैविध्यं विज्ञायते ।। ११ ।।

५३५. द्वादशाहवदुभयविधं बादरायणोऽतः ।। (४-४-१२)

अतः उभयश्रुतेः इच्छातः, उभयविधं स शरीरत्वं अशरीरत्वं च, भगवान्बादरायणो मेने । द्वादशाहवत् - यथा द्वादशाहः उभयश्रुतेः, सत्रं अहीनं च । 'द्वादशाहमृद्धिकामा उपेयुः' । (पू.मी.८-२-५, १०-६-१६) इति सत्रम् भवति, 'द्वादशाहेन प्रजाकामं याजयेत्' (पू.मी.८-२-५, १०-६-१६) इति [१]अहीनम्[१] ।। १२।।

५३६. तन्वभावे सन्ध्यवदुपपत्तेः ।। (४-४-१३)

स्वेनैव सृष्टतनुप्रभृत्युपकरणाभावे, परमपुरुषसृष्टैः उपकरणैः भोगोपपत्तेः सत्यसङ्कल्पोऽपि स्वयं न सृजति । सन्ध्यवत् । यथा स्वप्ने - 'अथ रथान्'

१. अहीनम् । यदा शरीराद्युपकरमत्वं तदा तानि शरीराद्युपकरणानि स्वेनैव सृष्टानि इति नास्ति नियम इत्याह । इत्यधिकः पाठः-ख,घ

(बृ.उ.६-३-१०) इत्यारभ्य, 'स हि कर्ता' (बृ.उ.६-३-१०) इति, 'य एषु सुप्तेषु' (कठ.उ.५-८) इत्यारभ्य, 'तदु नात्येति कश्चन' (कठ.उ.५-८) इति च ईश्वरसृष्टैः, रथाद्युपकरणैः जीवो भुङ्क्ते, तथा मुक्तोऽपि लीलाप्रवृत्तेन ईश्वरेण सृष्टैः पितृलोकादिभिः लीलारसं भुङ्क्ते ।। १३ ।।

५३७. भावे जाग्रद्वत् ।। (४-४-१४)

स्वसङ्कल्पादेव सृष्टतनुप्रभृतिपितृलोकाद्युपकरणसद्भावे, [1]जाग्रत्पुरुषवत्[1] मुक्तो लीलारसं भुङ्क्ते । परमपुरुषोऽपि लीलार्थं दशरथवसुदेवादिपितृलोकादिकमात्मनस्सृष्ट्वा स्वयमेव सृष्ट्वा, [2]तैः मनुष्यधर्मलीलारसं भुङ्क्ते । तथा मुक्तश्च सत्यसङ्कल्पत्वात् परमपुरुषलीलान्तर्गतं स्वपितृलोकादिकं स्वयमेव सृष्ट्वा, तैः लीलारसं अनुभवति[2] ।

ननु आत्मा अणुपरिमाणः इत्युक्तम् कथं अनेकेषु शरीरेषु एकस्य अणोः आत्माभिमानसम्भवः इत्यत्राह -

५३८. प्रदीपवदावेशस्तथा हि दर्शयति ।। (४-४-१५)

यथा - प्रदीपस्य एकस्य एकदेशवर्तिनः स्वया प्रभया अनेकदेशप्रवेशः, तद्वत् आत्मनोऽपि एकदेशस्थस्य स्वप्रभारूपेण ज्ञानेन सर्वदेहेषु यथासङ्कल्पम् आत्माभिमानानुगुणाव्याप्तिः सम्भवति । यथा एकस्मिन् देहे - हृदयादिदेशे वर्तमानस्य अणोरपि सर्वस्मिन्देहे 'अहम्' इत्यभिमानानुगुणव्याप्तिः स्वप्रभारूपचैतन्येन, तद्वत् । तथा हि दर्शयति श्रुतिः -

'वालाग्रशतभागस्य शतधा कल्पितस्य च, भागो जीवः स विज्ञेयः स चानन्त्याय कल्पते' (श्वे.उ.५-९) इति । प्रत्यगात्मनो हि अणुत्वमेव स्वरूपम् इति सूत्रकारमतम् । 'नाऽणुरतच्छ्रुतेरिति चेन्नेतराधिकारात् (ब्र.सू.२-३-२२) इति परस्यैव महत्ववचनात् ।। १५ ।।

ननु - परं ब्रह्म प्राप्तस्य [3]अन्यतर[3]बाह्यज्ञान[4]बाधं[4] दर्शयति श्रुतिः - 'प्राज्ञेनात्मना संपरिष्वक्तो न बाह्यं किञ्चन वेद नान्तरम्' (बृ.उ.६-३-२१) इति तत्कथं मुक्तस्य ज्ञानानन्त्यम् उच्यते ? इत्यत्राह -

---

१. जाग्रत् पुरुषभोगवत्-ख,घ २. मनुष्यलीलारसं यदा भुङ्क्ते तदा मुक्तानामपि स्वलीलायै पितृलोकादिकं स्वयमेव सृजति । कदाचित् कदा मुक्तात् सत्यसङ्कल्पत्वात् परमपुरुषलीलान्तर्गत स्वपितृलोकादिकं स्वयमेव सृजन्तीति सर्वमुपपन्नम्-ख,घ ३. आन्तर-ग ४. लोपम्-ग

५३९. स्वाप्ययसम्पत्त्योरन्यतरापेक्षमाविष्कृतं हि ।। (४-४-१६)

नेदं मुक्तविषयम् । सुषुप्तिमरणयोः अन्यतरापेक्षम् । आविष्कृतं हि श्रुत्या सुषुप्तिमरणयोः निःसम्बोधत्वं, मोक्षदशायां सर्वज्ञत्वं च । सुषुप्तौ तावत् - 'नाऽहं खल्वयमेवं संप्रत्यात्मानं जानात्ययमहमस्मीति' - 'नो एवेमानि भूतानि विनाशमेवापीतो भवति' (छां.उ.८-११-२) इति । विनाशम् अदर्शनमित्यर्थः । मरणे च 'एतेभ्यो भूतेभ्यः समुत्थाय तान्येवानुविनश्यति' (बृ.उ.४-४-१२) इति । विनश्यति न पश्यतीत्यर्थः । मोक्षे तु, 'स वा एष दिव्येन चक्षुषा मनसैतान् कामान्पश्यन् रमते य एते ब्रह्मलोके' (छां.उ.८-१२-५) इति । 'सर्वं ह पश्यः पश्यति सर्वमाप्नोति सर्वशः' (छां.उ.७-२६-२) इति च ।। १६ ।।

।। इति अभावाधिकरणम् ।। ५ ।।

१५६. जगद्व्यापारवर्जाधिकरणम् ।। (४-४-६) (सू.१७-२२)

[अधिकरणार्थः-मुक्तात्मनां ब्रह्मणा परमसाम्यं भगवदसाधारणान् धर्मान्विहायैव]

५४०. जगद्व्यापारवर्जं प्रकरणादसन्निहितत्वाच्च । (४-४-१७)

किं मुक्तस्य भोगः निखिलहेयप्रत्यनीककल्याणैकतानसकलेतर विलक्षणानवधिक अतिशयानन्दमहाविभूतिरूपपरब्रह्मानुभव एव ? उत जगत्सृष्ट्यादिजगन्नियमनरूपलीलाऽपि इति संशयः ।

'निरञ्जनः परमं साम्यमुपैति' (मुं.उ.३-१-३) इत्यादिश्रुतेः जगन्नियमनरूपलीलाऽपि इति पूर्वः पक्षः ।

राद्धान्तस्तु - 'यतो वा इमानि भूतानि जायन्ते' (तै.उ.भृगु.१-२) 'सदेव सोम्येदमग्र आसीत्' (छां.उ.६-२-१) 'ब्रह्म वा इदमेक एवाग्र आसीत्' (बृ.उ.३-४-१०) 'आत्मा वा इदमेक एवाग्र आसीत्' (ऐत.उ.१-१) 'एको ह वै नारायण आसीत्' (महो.उ.१-१) इत्यादिषु परं ब्रह्म प्रकृत्यैव जगद्व्यापारः श्रूयते । 'तत्र'[1] तत्र प्रकरणे, न मुक्तस्य सन्निधिरप्यस्ति । अतः जगन्नियमनरूपधुरावर्जम्, 'सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चिता' (तै.उ.आन.१-२) 'स एको ब्रह्मण आनन्दः । श्रोत्रियस्य चाकामहतस्य' (तै.उ.आन.८-४)

---

१. न च-ग

इति अनवधिकातिशयानन्दब्रह्मानुभवे, मुक्तस्य साम्यम् । ब्रह्म हि स्वस्य परस्य च अनुभूयमानं अविशेषेण अनवधिकातिशयानन्दं भवति, आनन्दस्वरूपत्वाविशेषात् । सूत्रमपि व्याख्यातम् ।। १७ ।।

५४१. प्रत्यक्षोपदेशादिति चेन्नाधिकारिकमण्डलस्थोक्तेः ।। (४-४-१८)

प्रत्यक्षं - श्रुतिः । 'तस्य सर्वेषु लोकेषु कामचारो भवति' (छां.उ.७-२५-२) 'इमान् लोकान् कामान्नी कामरूप्यनुसञ्चरन्' (तै.उ.भृगु.१०-५) इत्यादिश्रुत्या मुक्तस्य जगद्व्यापारोपदेशात् सोऽपि इति चेत्, न, आधिकारिकमण्डलस्थोक्तेः । आधिकारिकाः परमपुरुषेण लोकनियमनाधिकारे नियुक्ताः हिरण्यगर्भादयः । मण्डलानि - तेषां लोकाः । तत्स्थभोगेषु मुक्तस्य यदीच्छा वर्तते, तत्र तत्र यथाकामं परमपुरुषानुग्रहेण वर्तमानः तत्रस्थान् भोगान् भुङ्क्ते इति, तथा श्रुत्योक्तेः ।

'कामान्नी' 'कामचारो भवति' इति हि श्रूयते, न नियुङ्क्ते - इति ।। १८ ।।

ननु उत्पत्त्यादिविकारवर्तिहेयमिश्रः अत्यल्पश्च कथं मुक्तस्य भोगो भवति, यदिच्छातः सर्वेषु लोकेषु कामचार उच्यते - इत्यत्राह -

५४२. विकारावर्त्ति च तथा हि स्थितिमाह ।। (४-४-१९)

चशब्दः अवधारणे, उत्पत्त्यादिविकारेषु न वर्तत इति विकारावर्ति परं ब्रह्मैव । निर्धूतनिखिलविकारं निखिलहेयप्रत्यनीककल्याणैकतानं निरतिशयानन्दं परब्रह्म सविभूति सकलकल्याणगुणं मुक्तस्य [1]भोग्यम्[1]; तद्विभूत्यन्तर्गतत्वेन विकारवर्तिनां लोकानामपि मुक्तभोग्यत्वम्, तथाहि - परस्मिन्ब्रह्मणि मुक्तस्य अनुभवितृत्वेन स्थितिमाह श्रुतिः -

'यदा ह्येवैष एतस्मिन्नदृश्येऽनात्म्येऽनिरुक्तेऽनिलयनेऽभयं प्रतिष्ठां विन्दते, अथ सोऽभयं गतो भवति' (तै.उ.आन.७-२) 'रसो वै सः । रसं ह्येवायं लब्ध्वाऽऽनन्दी भवति' (तै.उ.आन.७-२) ब्रह्मनिष्ठो ब्रह्मैव लब्ध्वाऽऽनन्दी भवति इत्यर्थः । ब्रह्म हि [2]निरतिशय[2]कल्याणानन्तगुणकम्, अनन्तमहाविभूति च । तत्र सविभूतिकब्रह्मानुभवाय विभूत्येकदेशभूतलोकेषु सञ्चरतः तत्र तत्र कामचारो भवतीति उच्यते ।। १९ ।।

---

१. भोगः-ग २. निरतिशयानन्दस्वरूपनिरतिशय-ख,ग,घ

५४३. दर्शयतश्चैवं प्रत्यक्षानुमाने ।। (४-४-२०)

उत्पत्यादिजगन्नियमनं परस्यैव, मुक्तस्य तु परब्रह्मानुभव एव भोगः इति उक्तमर्थं प्रत्यक्षानुमाने - श्रुतिस्मृती दर्शयतः ।

'तस्माद्वा एतस्मादात्मन आकाशः संभूतः' (तै.उ.आन.१-२) 'भीषास्माद्वातः पवते' (तै.उ.आन.८-१) 'एतस्य वा अक्षरस्य प्रशासने गार्गि सूर्याचन्द्रमसौ विधृतौ तिष्ठतः' (बृ.उ.५-८-९) इत्यादिका श्रुतिः, स्मृतिरपि - 'अहं सर्वस्य प्रभवः' (भ.गी.१०-८) 'अहं सर्वस्य जगतः प्रभवः प्रलयस्तथा' (भ.गी.७-६) 'विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत्' (भ.गी.१०-४२) 'मत्तः सर्वं प्रवर्तते' (भ.गी.१०-८) 'सोऽभिध्याय शरीरात्स्वात्सिसृक्षुर्विविधाः प्रजाः' (म.स्मृ.१-८) 'प्रशासितारं सर्वेषाम्' (म.स्मृ.१२-१२२) इत्यादिका परविषया ।

'अथाकामयमानो योऽकामो निष्काम - आप्तकाम आत्मकामः' (बृ.उ.६-४-६) इत्यादिका श्रुतिः । स्मृतिरपि - 'प्रियो हि ज्ञानिनोऽत्यर्थमहम्' (भ.गी.७-१७) 'आस्थितः स हि युक्तात्मा मामेवानुत्तमां गतिम्' (भ.गी.७-१८) 'वासुदेवः सर्वमिति स महात्मा सुदुर्लभः' (भ.गी.७-१९) 'मां च योऽव्यभिचारेण भक्तियोगेन सेवते । स गुणान्समतीत्यैतान्ब्रह्मभूयाय कल्पते' ।। (भ.गी.१४-२६) 'ब्रह्मणो हि प्रतिष्ठाऽहममृतस्याव्ययस्य च । शाश्वतस्य च धर्मस्य सुखस्यैकान्तिकस्य च' ।। (भ.गी.१४-२७) इत्यादिका मुक्तिविषया ।। २०।।

५४४. भोगमात्रसाम्यलिङ्गाच्च ।। (४-४-२१)

'सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चिता' (तै.उ.आन.१-२) इति हि मुक्तस्य ब्रह्मानुभवभोगमात्रवचनात्, ब्रह्मसाम्यलिङ्गाच्च जगद्व्यापारवर्जम् इति निश्चीयते ।। २१ ।।

यदि नियन्तृत्वं परस्यैव 'तर्हि'[१] स्वतन्त्रत्वेन मुक्तं परः कदाचित् पुनरावर्त्तयिष्यति इत्याशङ्क्याह -

१. एवं तर्हि-ग

५४५. अनावृत्तिः शब्दादनावृत्तिः शब्दात् ।। (४-४-२२)

[१]अस्य[१] मुक्तस्य अनावृत्तिः शब्दात् अवगम्यते । यथा - 'यतो वा इमानि भूतानि जायन्ते' (तै.उ.भृगु.१) 'सोऽकामयत बहु स्यां प्रजायेयति' (तै.उ.आन.६-२) 'यः पृथिवीमन्तरो यमयति' (बृ.उ.५-७-३) 'य आत्मानमन्तरो यमयति' (बृ.उ.मा.पा.५-७-२२) इति शब्दात् परमपुरुषस्य स्रष्टृत्वं नियन्तृत्वं च अवगम्यते तथा - 'एतेन प्रतिपद्यमाना इमं मानवमावर्तं नावर्तन्ते' (छां.उ.४-१५-६) 'स खल्वेवं वर्तयन् यावदायुषं ब्रह्मलोकमभिसंपद्यते न च पुनरावर्तते' (छां.उ.८-१५-१) 'मामुपेत्य पुनर्जन्म दुःखालयमशाश्वतम् । नाप्नुवन्ति महात्मानः संसिद्धिं परमां गताः' । 'आ ब्रह्मभुवनाल्लोकाः पुनरावर्तिनोऽर्जुन । मामुपेत्य तु कौन्तेय पुनर्जन्म न विद्यते' ।। (भ.गी.८-१५,१६) इदं ज्ञानमुपाश्रित्य मम [२]साधर्म्यमागताः[२] । सर्गेऽपि नोपजायन्ते प्रलये न व्यथन्ति च' ।। (भ.गी.१४-२) इति शब्दात् एवैनं कदाचिदपि न आवर्तयति इत्यवगम्यते । सूत्रावृत्तिः तु शास्त्रपरिसमाप्तिं द्योतयतीति सर्वं समञ्जसम् ।। २२ ।।

।। इति जगद्व्यापारवर्जाधिकरणम् ।। ६ ।।

।। इति श्रीभगवद्रामानुजविरचिते वेदान्तदीपे चतुर्थस्याध्यायस्य चतुर्थः पादः ।।

।। समाप्तश्चतुर्थोऽध्यायः ।।

।। शास्त्रं च परिसमाप्तम् ।।

---

१. अत्र-ग २. गोचराः-ग

अनुबन्धाः

१. ब्रह्मसूत्राणाम् अकारादिसूचनी

(अ - अध्यायः; पा - पादः; सू - सूत्रसंख्या)

* * *

२. अधिकरणानाम् अकारादिसूचनी

* * *

३. प्रमाणानाम् अकारादिसूचनी

* * *

४. शारीरकचतुरध्यायीविभक्तार्थसङ्क्षेपः

अध्यायनामानि	अधि.	सू.	प्रतिपाद्या अर्थाः
१. समन्वयाध्यायः	३५	१३८	सर्वे च वेदान्ताः परतत्वभूतस्य परस्य ब्रह्मणः परमपुरुषार्थत्वेन रूपेण प्रतिपाद्यत्वान्वययोग्यता प्रमितिजनकाः इति प्रतिपादनम्, तदर्थं च तस्मिन् जगत्कारणत्वायोगव्यवच्छेदस्य, जगत्कारणत्वे ब्रह्मान्ययोगव्यवच्छेदस्य च साधनम् ।।
२. अविरोधाध्यायः	३३	१४९	वेदान्तानां प्रथमाध्यायोक्तार्थविषयकप्रमिति-जनकत्वविषये, तर्क-तन्त्रादिभिः प्रतिरोध-माशङ्क्य, आवश्यकैः न्यायैः तादृशप्रति-रोधाभावनिर्णयः ।।
३. साधनाध्यायः	५५	१८२	वेदान्तेषु परमपुरुषार्थभूतपरब्रह्मप्रापकतया विहितानां हितात्मकानां विविधानां विद्यानां चिन्तनम्।
४. फलाध्यायः	३३	७६	वेदान्तोदितसर्वविद्याफलभूतस्य परमपुरुषार्थ-रूपस्य परिपूर्णब्रह्मानुभवस्य चिन्तनम् ।

आहत्य अधिकरणानि १५६ आहत्य सूत्राणि ५४५

* * *

५. शारीरकचतुरध्यायीगतानां षोडशपादानाम् अर्थसारः

पादाः	अधि.	सू.	पादार्थः	वेद्यं रूपम्
			१. समन्वयाध्यायः	
१. अयोगव्यवच्छेदः	११	३२	उपनिषद्गतैः अस्पष्टतरजीवादि-लिङ्गकैः वाक्यैः 'ब्रह्म जगत्कारणमेव', इति समर्थनम्।	स्रष्टृत्वम्
२. अन्ययोगव्यवच्छेदः	६	३३	अस्पष्टजीवादिलिङ्गकैः श्रुतिगतैः वाक्यैः 'ब्रह्मैव जगत्कारणम्' इति समर्थनम् ।	देहित्वम्
३. अन्ययोगव्यवच्छेदः	१०	४४	स्पष्टजीवादिलिङ्गकैः श्रुतिगतैः वाक्यैः 'ब्रह्मैव जगतः कारणम्' इति स्थापनम्।	स्वनिष्ठत्वम्
४. अन्ययोगव्यवच्छेदः	८	२९	स्पष्टतरजीवादिलिङ्गकैः श्रुतिगतैः वाक्यैः 'ब्रह्मैव जगतो निदानम्' इति साधनम्।	निरवधिमहि-मत्वम्
			२. अविरोधाध्यायः	
५. स्मृतिपादः	१०	३६	ब्रह्मणः जगदुपादानत्वे, जगन्निमित्तत्वे च आशङ्कितानां अशेषाणां दोषाणां निरसनम् ।	अपास्तबाधत्वम्
६. तर्कपादः	८	४२	साङ्ख्यादिपक्षाणां प्रतिक्षेपः, पाञ्चरात्र-प्रामाण्यसमर्थनं च ।	श्रिताप्तत्वम्
७. वियत्पादः	७	५२	वियदादेः प्रपञ्चस्य ब्रह्मकार्यत्वचिन्ता।	आकाशात्मादेः उचितजनकृत्त्वम्
८. प्राणपादः	१	१९	प्राणादीनां जीवोपकरणानां ब्रह्म-कार्यत्वचिन्तनम् ।	इन्द्रियादेः उचित-जनकृत्त्वम्

पादाः	अधि.	सू.	पादार्थः	वेद्यं रूपम्
			३. साधनाध्यायः	
९. वैराग्यपादः	६	२७	जाग्रदवस्थजीवगतानां दोषाणां चिन्तनम्।	संसृतौ तन्त्रवाहित्वम्
१०. उभयलिङ्गपादः	१	४०	परस्य ब्रह्मणः हेयप्रत्यनीकत्व-कल्याणगुणाकरत्वयोः चिन्तनम् ।	निर्दोषत्वादि-रम्यत्वम्
११. गुणोपसंहारपादः	२६	६४	उपनिषदुक्तानां विद्यानां मिथो-भेदाभेदचिन्ता।	बहुभजन-पदत्वम्
१२. अङ्गपादः	१५	५१	विद्याङ्गकर्मादिविषयिणी चिन्ता ।	स्वार्हकर्म-प्रसाद्यत्वम्
			४. फलाध्यायः	
१३. आवृत्तिपादः	११	१९	विद्यास्वरूपशोधनपूर्वकं विद्याफल-चिन्तनम्।	पापच्छेत्तृत्वम्
१४. उत्क्रान्तिपादः	११	२०	निष्पन्नोपासनस्य तदितरस्य च देहादुत्क्रमणप्रकारचिन्ता ।	ब्रह्मनाडीगति-कृत्त्वम्
१५. गतिपादः	५	१५	देहादुत्क्रान्तस्य अर्चिरादिना मार्गेण गतिप्रकारचिन्ता ।	अतिवोढृत्वम्
१६. मुक्ति(फल)पादः	६	२२	मुक्तैश्वर्यप्रकारचिन्ता ।	साम्यदत्वम्

आहत्य अधिकरणानि १५६ आहत्य सूत्राणि ५४५

।। इति शारीरकीयाणां षोडशपादानामर्थाः ।।

* * *

६. अधिकरणानामर्थसारसूचनी

अधिकरणनामानि	सू.सं.	अधिकरणार्थः, प्रतिपाद्यगुणाश्च
	अध्यायः १-पादः १	
१. जिज्ञासाधिकरणम्	१	सिद्धेऽपि वस्तुनि शब्दानां व्युत्पत्तिसमर्थनम्, ततश्च ब्रह्मणो जिज्ञास्यत्वसाधनम् ।
२. जन्माद्यधिकरणम्	२	ब्रह्मणः लक्षणतः प्रतिपत्तुमर्हत्वात्, जगज्जन्मादि कारणत्वं ब्रह्मलक्षणतामाप्नोतीति ब्रह्मणो जिज्ञास्यत्वसमर्थनम् ।
३. शास्त्रयोनित्वाधिकरणम्	३	ब्रह्मणि प्रमाणान्तरतः अप्राप्तिरूपायाः अपूर्वतायाः सत्वेन, शास्त्रैकगम्यतया, जिज्ञास्यत्वं ब्रह्मणः, तेन च शास्त्रस्यारम्भणीयता ।
४. समन्वयाधिकरणम्	४	वेदान्तवेद्यस्य परस्य ब्रह्मणः परिनिष्पन्नत्वेऽपि, परमपुरुषार्थतया अन्वयसत्त्वेन, तज्ज्ञानस्य सफलतया, ब्रह्मणो जिज्ञास्यत्वम् शास्त्रस्य-चारम्भणीयता ।
५. ईक्षत्यधिकरणम्	५-१२	'सदेव सोम्य' इति 'सत्' पदाभिधेयं परं ब्रह्मैव; न प्रधानम् । 'स्वेच्छातः सर्वहेतुः प्रभुः'।
६. आनन्दमयाधिकरणम्	१३-२०	तैत्तिरीयानन्दवल्लीगतानन्दमयशब्दाभिधेयं वस्तुनिरवधिकानन्दप्रचुरं परं ब्रह्मैव; न जीवः । 'शुभगुणविभवानन्तनिःसीमहर्षः प्रभुः' ।
७. अन्तरधिकरणम्	२१-२२	'य एषोऽन्तरादित्ये' 'य एषोऽक्षिणि' इत्यत्र अक्ष्यादित्यान्तर्वर्तितया उपास्यः पुरुषः परमात्मैव न जीवः । 'शुद्धाकर्मोत्थदि-व्याकृतिः प्रभुः' ।

८. **आकाशाधिकरणम्**	२३	'आकाशादेव समुत्पद्यन्ते' इत्यादौ उपास्यत्वेनोक्तः आकाशः परमात्मैव; न भूताकाशः। 'अनुपधिकाकाशनादिस्वभावः प्रभुः' ।
९. **प्राणाधिकरणम्**	२४	'प्राणमेवाभिसंविशन्ति' इत्यादिवाक्ये उपास्यत्वेनोक्तः प्राणः परमात्मैव; न प्रसिद्धः प्राणः। 'सप्राणाप्राणभेदव्यतिभिदुरजगत्प्राणनः प्रभुः' ।
१०. **ज्योतिरधिकरणम्**	२५-२८	'परो दिवो ज्योतिः' इत्यादौ ज्योतिष्ट्वेनोपास्योऽर्थः परमपुरुष एव; न आदित्यादिरूपं ज्योतिः । 'दिव्यदीप्तिः प्रभुः' ।
११. **इन्द्रप्राणाधिकरणम्**	२९-३२	'प्राणोऽस्मि प्रज्ञात्मा' इत्यादिवाक्ये 'इन्द्र-प्राण' वाचकशब्देन उपास्यतयोक्तः अर्थः, तच्छरीरकः परमात्मैव; न केवल इन्द्रादिः । 'प्राणेन्द्राद्यन्तरात्मा प्रभुः' ।

अध्यायः १ - पादः २

१. **सर्वत्रप्रसिद्ध्यधिकरणम्**	१-८	'सर्वं खल्विदं ब्रह्म' इत्युक्तसर्वजगत्तादात्म्याश्रयः, परमात्मैव; न जीवः । तत्क्रतुन्यायसिद्धिश्च । 'स्वाधीनाशेषसत्तास्थितियतनतया सर्वभावेन तिष्ठन् श्रीनिवासः' ।
२. **अत्त्रधिकरणम्**	९-१२	'यस्य ब्रह्म च.......ओदनः' इत्युक्तम् अत्तृत्वम्, ब्रह्मकर्तृकसर्वजगत्संहारात्मकमेव, न जीवकृतं कर्मफलादनम् । 'ग्रस्ताशेषः श्रीनिवासः' ।
३. **अन्तराधिकरणम्**	१३-१८	'य एषोऽन्तरक्षिणि' इत्युक्ताक्ष्याधारः पुरुषः परमात्मैव; न जीवादिः । 'अक्षिनित्यस्थितिः श्रीनिवासः' ।
४. **अन्तर्याम्यधिकरणम्**	१९-२१	'यः पृथिव्यां.....अन्तर्याम्यमृतः' इत्युक्तः सर्वान्तर्यामी परमपुरुष एव; न देहाधिष्ठाता जीवः । 'अखिलतनुः श्रीनिवासः' ।

५. अदृश्यत्वादिगुणकाधिकरणम्	२२-२४	'यया तदक्षरमधिगम्यते' इत्यत्र, अक्षरशब्दवाच्यत्वं ब्रह्मण एव; न प्रधान-पुरुषादेः । 'कल्पिताग्र्यादिगात्रः श्रीनिवासः' ।
६. वैश्वानराधिकरणम्	२५-३३	'वैश्वानरमुपास्ते' इत्युक्तः उपास्यो वैश्वानरः परंब्रह्मैव; न जाठराग्न्यादिः । 'स्वर्लोकाद्यङ्गवैश्वानरमतिविषयः श्रीनिवासः' ।

अध्यायः १ - पादः ३

१. द्युभ्वाद्यधिकरणम्	१-६	'यस्मिन् द्यौः' इत्युक्तपृथिव्याद्याधारत्ववानर्थः परमात्मैव; न कर्माधीनसर्वलोकसम्बन्धवान् जीवः । 'विश्वात्मा प्रभुः' ।
२. भूमाधिकरणम्	७-८	'भूमा त्वेव विजिज्ञासितव्यः' इत्युपास्यतयोक्तो भूमा परमात्मैव; न जीवः । 'अनन्तभूमा प्रभुः' ।
३. अक्षराधिकरणम्	९-११	'एतद्वै तदक्षरं गार्गि' इत्युक्ताक्षरशब्दाभिधेयः निरुपाधिकसर्वप्रशास्तृत्ववान् प्रधानस्यापि धारकः परमपुरुष एव; न अव्याकृतं प्रधानम्। 'नियमनधृतिकृत् प्रभुः' ।
४. ईक्षतिकर्माधिकरणम्	१२	'परात्परं..........पुरुषमीक्षते' इत्युक्तेक्षणक्रियाकर्मभूतः पुरुषः परमपुरुष एव; न समष्टिपुरुषः । 'मुक्तभोग्यस्वभावः प्रभुः' ।
५. दहराधिकरणम्	१३-२२	'दहरोऽस्मिन्नन्तर आकाशः' इति दहराकाशपदोक्तः परंब्रह्मैव; न भूताकाशः, नापि प्रत्यगात्मा । 'दहस्वाधारसर्वः प्रभुः' ।
६. प्रमिताधिकरणम्	२३-२४	'अङ्गुष्ठमात्रः पुरुषः........हृदये' इत्युक्ताङ्गुष्ठप्रमाणप्रमितः पुरुषः परमात्मैव; न कर्मपरवशो जीवः । 'हृदयपरिमितावस्थया सर्वयन्ता प्रभुः' ।

७. देवताधिकरणम्	२५-२९	सर्वश्रुत्युक्तमोक्षाद्यर्थोपासनाधिकारः देवानामपि अस्त्येव । 'देवादीनामुपास्यः प्रभुः' ।
८. मध्वधिकरणम्	३०-३२	'असौ वा........देवमधु' इत्याद्युक्तमधुविद्यादिषु प्राप्तवस्वादिपदानामपि अधिकारोऽस्त्येव । 'वसुमुखविबुधैः स्वात्मभावेन सेव्यः प्रभुः'।
९. अपशूद्राधिकरणम्	३३-४१	त्रैवर्णिकभिन्नानां मुमुक्षुत्वादिमतामपि श्रुत्युक्तासु ब्रह्मविद्यासु नाधिकारः । 'शूद्राद्योपास्त्यनर्हः प्रभुः' ।
१०. अर्थान्तरत्वादिव्यपदेशाधिकरणम्	४२-४४	'आकाशो ह वै.........निर्वहिता' इत्युक्त आकाशः, नाम-रूपव्याकर्तृत्ववान् परमात्मैव; न मुक्तात्मा । 'नाम-रूपनिर्वहिता प्रभुः' ।

अध्यायः १ - पादः ४

१. आनुमानिकाधिकरणम्	१-७	'महतः परमव्यक्तम्' इति कठवल्लीगताव्यक्तशब्दवाच्यं रथत्वेन रूपितं शरीरमेव; न सांख्योक्तानुमानगम्यं प्रधानम् ।
२. चमसाधिकरणम्	८-१०	'अजामेकाम्' इति श्रुत्युक्ता प्रकृतिः, ब्रह्मात्मिका प्रकृतिरेव; न सांख्याभिमता अब्रह्मात्मिका प्रकृतिः ।
३. सङ्ख्योपसङ्ग्रहाधिकरणम्	११-१३	'यस्मिन् पञ्च पञ्चजनाः' इति श्रुत्युक्ताः पञ्चजनाः, ब्रह्माश्रितानि पञ्चेन्द्रियाण्येव; न साङ्ख्योक्तपञ्चविंशतितत्त्वानि ।
४. कारणत्वाधिकरणम्	१४-१५	'सत्, असत्, अव्याकृतम्' इत्यादिपदघटितानि वेदान्तवाक्यानि, ब्रह्मण एव जगत्कारणतापराणि; न प्रधानस्य ।
५. जगद्वाचित्वाधिकरणम्	१६-१८	'यो वै बालाके..........स वै वेदितव्यः' इति वेदितव्यतयोपदिष्टोऽर्थः, सर्वस्रष्टा परमपुरुष एव; न प्रकृतिवियुक्तः पुरुषः ।

६. **वाक्यान्वयाधिकरणम्**	१९-२२	*'आत्मा वा अरे द्रष्टव्यः' इति द्रष्टव्यतया* उपदिष्टोऽर्थः, परमात्मैव; न पञ्चविंशको जीवः।
७. **प्रकृत्यधिकरणम्**	२३-२८	ब्रह्मण एव यथा जगन्निमित्तत्वं, तथा जगदुपादनत्वमपि ब्रह्मण एव; नान्यस्य प्रधानादेः।
८. **सर्वव्याख्यानाधिकरणम्**	२९	जगत्कारणत्वप्रतिपादनपराणां सर्ववेदान्तगतानां सर्वेषामपि वाक्यानां ब्रह्मकारणतापरत्वमेव।

अध्यायः २ - पादः १

१. **स्मृत्यधिकरणम्**	१-२	ब्रह्मण एव जगत्कारणत्ववादिनां वेदान्तानां कापिलस्मृतिभिः विरोधनिरासः ।
२. **योगप्रत्युक्त्यधिकरणम्**	३	वेदान्तविरुद्धस्य योगशास्त्रोक्तार्थस्य भ्रान्ति-मूलतया, वेदान्तानां योगशास्त्रेण सहा-विरोधः।
३. **विलक्षणत्वाधिकरणम्**	४-१२	विलक्षणयोः कार्य-कारणभावो नास्तीति तर्कस्य, आभासरूपत्वात्, जगद्विलक्षणत्वेऽपि ब्रह्मणः, जगत्कारणत्वाविरोधः ।
४. **शिष्टापरिग्रहाधिकरणम्**	१३	काणादाद्यभिमतानां वेदान्तविरुद्धानां पक्षाणां तर्कमूलतायाः समानत्वात् अनादरणीयत्वमेव।
५. **भोक्त्रापत्त्यधिकरणम्**	१४	ब्रह्मणः अकर्मवश्यत्वेन, जीववत् शरीर-सम्बन्धायत्तस्य सुख-दुःखभोक्तृत्वस्याप्रसङ्गः।
६. **आरम्भणाधिकरणम्**	१५-२०	'वाचारम्भण' श्रुत्या कार्य-कारणयोः अनन्यत्व-सिद्ध्या, जगद्ब्रह्मणोः अनन्यत्वसिद्धिः ।
७. **इतरव्यपदेशाधिकरणम्**	२१-२३	ब्रह्मणः जगद्धिताकरणादिदोषप्रसङ्गाभावः ।
८. **उपसंहारदर्शनाधिकरणम्**	२४-२५	विचित्रसर्वशक्तेर्ब्रह्मणः, सङ्कल्पमात्रतः विचित्रजगत्सृष्टियोगः ।

९. **कृत्स्नप्रसक्त्यधिकरणम्**	२६-३१	निरवयवस्यापि ब्रह्मणः निखिलजगत्कारण-तायाः श्रुति-प्रतिपन्नतया कारणत्वासामञ्जस्य शङ्कापरिहारः ।
१०. **प्रयोजनवत्त्वाधिकरणम्**	३२-३६	अवाप्तसमस्तकामस्यापि परस्य ब्रह्मणः, लीलार्थं सर्वजगत्स्रष्टृत्वोपपत्तिः ।

अध्यायः २ - पादः २

१. **रचनानुपपत्त्यधिकरणम्**	१-९	परमात्मानधिष्ठितस्य कापिलोक्तप्रधानस्य जगत्कारणतानिरासः ।
२. **महद्दीर्घाधिकरणम्**	१०-१६	वैशेषिकसंमतस्य परमाणुकारणतावादस्य निरासः ।
३. **समुदायाधिकरणम्**	१७-२६	बौद्धवैभाषिकसौत्रान्तिकपक्षयोः निरसनम् ।
४. **उपलब्ध्यधिकरणम्**	२७-२९	बौद्धयोगाचारपक्षप्रतिक्षेपः ।
५. **सर्वथानुपपत्त्यधिकरणम्**	३०	बौद्धमाध्यमिकपक्षप्रतिक्षेपः ।
६. **एकस्मिन्नसम्भवाधिकरणम्**	३१-३४	जैनाभिमतस्याद्वादादिनिरासः ।
७. **पशुपत्यधिकरणम्**	३५-३८	वेदविरुद्धस्य पाशुपतमतस्य निरासः ।
८. **उत्पत्त्यसम्भवाधिकरणम्**	३९-४२	जीवोत्पत्तिवादतात्पर्यवर्णनेन पाञ्चरात्राप्रामाण्य-निरसनम् ।

अध्यायः २ - पादः ३

१. **वियदधिकरणम्**	१-९	आकाशस्य ब्रह्मकार्यत्वप्रकारचिन्ता ।
२. **तेजोऽधिकरणम्**	१०-१७	तेज आदिशरीरकात् परब्रह्मणः स्वसङ्कल्पादेव अबादिसृष्टिः; न केवलात् तेज आदेः ।
३. **आत्माधिकरणम्**	१८	जीवानाम् उत्पत्तिविनाशरहितत्वम् ।
४. **ज्ञाधिकरणम्**	१९-३२	आत्मनां ज्ञातृत्वस्वरूपतासाधनम् ।

५. **कर्त्रधिकरणम्**	३३-३९	जीवात्मनां कर्तृत्वस्य समर्थनम् ।
६. **परायत्ताधिकरणम्**	४०-४१	जीवात्मनां परमात्माधीनं कर्तृत्वम् ।
७. **अंशाधिकरणम्**	४२-५२	जीवात्मनां परब्रह्मांशरूपतासाधनम् ।

अध्यायः २ - पादः ४

१. **प्राणोत्पत्त्यधिकरणम्**	१-३	'प्राण' शब्दवाच्यानामिन्द्रियाणां वियदादिवदुत्पत्तिसमर्थनम् ।
२. **सप्तगत्यधिकरणम्**	४-५	इन्द्रियाणाम् एकादशसङ्ख्यत्वसाधनम् ।
३. **प्राणाणुत्वाधिकरणम्**	६-७	इन्द्रियाणाम् अणुपरिमाणत्वस्थापनम् ।
४. **वायुक्रियाधिकरणम्**	८-११	श्रेष्ठप्राणस्य वायुसामान्य-तत्क्रियातिरेकेण योग्यताविशेषापन्नवायुस्वरूपतासाधनम् ।
५. **श्रेष्ठाणुत्वाधिकरणम्**	१२	श्रेष्ठप्राणस्यापि अणुपरिमाणत्वम् ।
६. **ज्योतिराद्यधिष्ठानाधिकरणम्**	१३-१४	प्राणानाम् अग्न्यादिदेवताधिष्ठितत्वं परमात्मनः सङ्कल्पात्सिद्धम् ।
७. **इन्द्रियाधिकरणम्**	१५-१६	श्रेष्ठप्राणव्यतिरिक्तानामेव प्राणानाम् इन्द्रियपदवाच्यत्वम् ।
८. **संज्ञामूर्तिक्लृप्त्यधिकरणम्**	१५-१६	त्रिवृत्कर्तृसमानकर्तृकं नाम-रूपव्याकर्तृत्वं परमात्मा एव; न चतुर्मुखस्य ।

अध्यायः ३ - पादः १

१. **तदन्तरप्रतिपत्त्यधिकरणम्**	१-७	जीवात्मनां गतिः, भूतसूक्ष्मैः सम्परिष्वक्तानामेव।
२. **कृतात्ययाधिकरणम्**	८-११	जीवात्मनां, भुक्तशिष्टैः, कर्मभिः संश्लिष्टानामेव अवरोहः ।
३. **अनिष्टादिकार्यधिकरणम्**	१२-२१	इष्टापूर्ताद्यकुर्वतां आरोहावरोहयोः चन्द्रप्राप्त्यभावः ।

४. **तत्स्वाभाव्यापत्त्यधिकरणम्**	२२	अवरोहतां जीवानाम् 'यथेतमाकाशम्' इत्याद्युक्तम् आकाशभावादिकं, तत्संसर्गकृतं तत्सादृश्यमेव; न ताद्रूप्यम् ।
५. **नातिचिराधिकरणम्**	२३	अवरोहतां जीवात्मनाम् आकाशादिषु स्थानेषु अविलम्बेन अतिशैघ्र्येणैव गमनम् ।
६. **अन्याधिष्ठिताधिकरणम्**	२४-२७	अवरोहतां जीवानाम्, 'त इह व्रीहियवा ....जायन्ते' इत्याद्युक्तः व्रीह्यादिभावः, तत्तत्संश्लेषमात्रम्; न तु तत्तच्छरीरतैव ।

अध्यायः ३ - पादः २

१. **सन्ध्याधिकरणम्**	१-६	जीवात्मभिः स्वप्नावस्थायामनुभूयमाना अर्थाः, परमात्मनैव सृष्टाः; न जीवात्मभिः।
२. **तदभावाधिकरणम्**	७-८	जीवात्मनां सुषुप्तिस्थानत्वम्, हितानाडी-पुरीतत् परमात्मनां त्रयाणां समुच्चित्यैव; न विकल्पेन ।
३. **कर्मानुस्मृतिशब्दविध्यधि-करणम्**	९	जीवस्य सुषुप्तिकाले सत्सम्पत्तावपि, सुषुप्तस्यैव स्वापादुत्थानं; न अन्यस्य यस्य कस्यचन जीवस्य ।
४. **मुग्धाधिकरणम्**	१०	जीवानां मूर्च्छात्मिका अवस्था, जाग्रदादि-त्रितयातिरिक्तैव ।
५. **उभयलिङ्गाधिकरणम्**	११-२५	परमात्मनः तत्तद्देहसम्बद्धस्यापि, अपुरुषार्था-संस्पर्शः ।
६. **अहिकुण्डलाधिकरणम्**	२६-२९	अचिद्ब्रह्मणोरपि, जीवब्रह्मणोरिव अंशांशि-भावः ।
७. **पराधिकरणम्**	३०-३६	परस्य ब्रह्मण एव सर्वस्मात्परत्वम्; नान्यस्य।
८. **फलाधिकरणम्**	३७-४०	ईश्वरस्यैव यागोपासनादिप्रीतस्य भोगाप-वर्गात्मकसमस्तफलप्रदत्वम्; न यागो-पासनादेरेव ।

अध्यायः ३ - पादः ३

१. सर्ववेदान्तप्रत्ययाधिकरणम्	१-५	विद्याविधायकविधिस्वरूपाणाम् अविशिष्टत्वे, सर्ववेदान्तगताः वैश्वानरविद्यादयः न भिद्यन्ते।
२. अन्यथात्वाधिकरणम्	६-९	छान्दोग्य-वाजसनेयकगतयोः उद्गीथाख्य-विद्ययोः रूपभेदात्, भेद एव; न अभेदः ।
३. सर्वाभेदाधिकरणम्	१०	छान्दोग्य-वाजसनेयगतयोः प्राणविद्ययोः प्रकाराभेदकृतः अभेद एव; न भेदः ।
४. आनन्दाद्यधिकरणम्	११-१७	ब्रह्मस्वरूपगताः सत्य-ज्ञानानन्दामलत्वानन्त-त्वाख्याः गुणाः सर्वासु परविद्यासु उपसंहर्तव्याः ।
५. कार्याख्यानाधिकरणम्	१८	ज्येष्ठ-श्रेष्ठप्राणविद्यायां 'किंमे वासः ....आप इति' प्राणोपासने अपां प्राणवासत्वानुसन्धानस्य विधेयत्वम् ।
६. समानाधिकरणम्	१९	वाजसनेयकसम्बन्ध्यग्निरहस्य-बृहदारण्यक-गतयोः शाण्डिल्यविद्ययोः रूपभेदाभावात् ऐक्यमेव ।
७. सम्बन्धाधिकरणम्	२०-२२	उपास्यैक्येऽपि अक्ष्यादित्यमण्डलात्मको-पासनस्थानभेदात् विद्याभेदः; न ऐक्यम् ।
८. सम्भृत्यधिकरणम्	२३	ब्रह्मसम्बन्धि सम्भृत्यादिकं गुणजातं, सर्वासु विद्यासु नोपसंहर्तव्यम्; किन्तु अल्पस्थान-व्यतिरिक्तोपासनेष्वेव ।
९. पुरुषविद्याधिकरणम्	२४	छान्दोग्य-तैत्तिरीयकगतयोः पुरुषविद्ययोः, रूपादिभेदात् भेद एव; न नामैक्यादिकृतम् ऐक्यम् ।

१०. वेधाद्यधिकरणम्	२५	अध्ययनाद्यङ्गभूतानां वेधादिमन्त्राणां न विद्याङ्गतया उपसंहारः ।
११. हान्यधिकरणम्	२६	विभिन्नश्रुगितानां पुण्य-पापहानादीनां समन्वयेन सर्वविद्यास्वपि चिन्तनम् ।
१२. साम्परायाधिकरणम्	२७-३१	निष्पन्नोपासनस्य विदुषो जीवस्य, देहादुत्क्रमणकाले एव निरवशेषेण सुकृत-दुष्कृतयोः हानम् ।
१३. अनियमाधिकरणम्	३२	अर्चिरादिगतेः वेदान्तावगतसर्वविद्या-साधारणत्वम् ।
१४. अक्षरध्यधिकरणम्	३३-३४	अक्षरपरब्रह्मविद्योक्तानां ब्रह्मगतानाम् अस्थूलत्वादिगुणानां, सर्वासु परविद्यासु अविशेषेणोपसंहारः ।
१५. अन्तरत्वाधिकरणम्	३५-३७	उषस्तप्रश्नपतिवचनाभ्यां (तथा) कहोळ-प्रश्नप्रतिवचनाभ्यां चावगतयोः विद्ययो-रैक्यम्; न अनेकता ।
१६. कामाद्यधिकरणम्	३८-४०	छान्दोग्य-वाजसनेयोक्तयोः दहरविद्ययोः रूपाभेदात्, अभेद एव; न भिन्नता ।
१७. तन्निर्धारणानियमाधिकरणम्	४१	कर्माङ्गत्वेन उद्गीथाद्युपासने, नियमाभावः।
१८. प्रदानाधिकरणम्	४२	हविस्त्यागपार्थक्ये इन्द्रादीनामिव, परमात्म-गुणचिन्तनेऽपि प्रतिगुणचिन्तनं परमात्म-चिन्तनावश्यकता ।
१९. लिङ्गभूयस्त्वाधिकरणम्	४३	तैत्तिरीयकोक्तस्य 'सहस्रशीर्षं.....स्वराट्' इत्यस्य सर्वपरविद्योपास्यनिर्धारणार्थत्वमेव; न दहरविद्यामात्रार्थत्वम् ।
२०. पूर्वविकल्पाधिकरणम्	४४-५०	मनश्चितादीनामग्नीनां 'मनश्चितो.....ग्निचितः' इत्युक्तानां विद्यामयक्रत्वनुप्रवेश एव; न क्रियामयक्रत्वनुप्रवेशः ।

२१. **शरीरेभावाधिकरणम्**	५१-५२	उपासकस्य प्रत्यगात्मभूतस्वानुसन्धानं सर्वविद्यासु, मोक्षदशायामाविर्भवनीय-स्वरूपवत्त्वेनैव ।
२२. **अङ्गावबद्धाधिकरणम्**	५३-५४	उद्गीथाद्यङ्गावबद्धानामुपासनानां सर्वास्वपि शाखासु सम्बन्धः ।
२३. **भूमज्यायस्त्वाधिकरणम्**	५५	वैश्वानरविद्यायां समस्तस्यैव वैश्वानरात्मन उपासनस्य प्रामाणिकत्वम् ।
२४. **शब्दादिभेदाधिकरणम्**	५६	मोक्षैकफलानामपि ब्रह्मोपासनरूपाणां वेदान्तोदितानां विद्यानां शब्दादिभेदकृतः स्वरूपभेद एव; न अभेदः ।
२५. **विकल्पाधिकरणम्**	५७-५८	ब्रह्मप्राप्त्येकफलानामपि विद्यानां, ब्रह्मप्राप्ति-कामे पुरुषे विकल्प एव; न समुच्चयेन सर्वानुष्ठानम् ।
२६. **यथाश्रयभावाधिकरणम्**	५९-६४	उद्गीथाद्याश्रितानाम् उपासनानां पृथक्फल-तया, क्रत्वङ्गतया उपादानानियमः पूर्वोक्तः, अबाधित एव ।

अध्यायः ३ - पादः ४

१. **पुरुषार्थाधिकरणम्**	१-२०	कर्माङ्गकात् उपासनादेव पुरुषार्थप्राप्तिः; न तु विद्याङ्गकात् कर्मणः ।
२. **स्तुतिमात्राधिकरणम्**	२१-२२	उद्गीथादिषु उच्यमानं रसतमत्वं, दृष्टि-विधिरेव; न स्तुतिमात्रम् ।
३. **पारिप्लवार्थाधिकरणम्**	२३-२४	वेदान्तगतानां आख्यानश्रुतीनां विद्याविध्यर्थ-त्वमेव; न पारिप्लवप्रयोगार्थत्वम्।
४. **अग्नीन्धनाद्यधिकरणम्**	२५	ऊर्ध्वरेतस्कैः आश्रमिभिः अनुष्ठीयमानायाः विद्यायाः, आधानपूर्वकाग्निहोत्रादिकर्मा-नपेक्षत्वम् ।

५. **सर्वापेक्षाधिकरणम्**	२६	गृहस्थैरनुष्ठीयमानायाः विद्यायाः, गृहस्थाश्रम विहितसर्वकर्मापेक्षत्वम्; न संन्यासिष्विव तदनपेक्षत्वम् ।
६. **शमदमाद्यधिकरणम्**	२७	गृहस्थेष्वपि विद्यानिष्पत्तेः शमदमादि-सापेक्षत्वम् ।
७. **सर्वान्नानुमत्यधिकरणम्**	२८-३१	उपासकेषु उपासननिष्पत्तेः आहारशुचि-त्वाद्यपेक्षा ।
८. **विहितत्वाधिकरणम्**	३२-३५	केवलाश्रमिणापि(अमुमुक्षुणाऽपि) स्वाश्रम-विहितानि कर्माणि अनुष्ठेयान्येव ।
९. **विधुराधिकरणम्**	३६-३९	अनाश्रमिणामपि जपोपवासादिभिः विद्या-निष्पत्तिः ।
१०. **तद्भूताधिकरणम्**	४०-४३	नैष्ठिकादीनामनाश्रमित्वाभावः; आश्रम-प्रच्युतानां विद्यास्वनधिकारश्च ।
११. **स्वाम्यधिकरणम्**	४४-४५	कर्माङ्गाश्रयाणाम् उद्गीथाद्युपासनानाम् ऋत्विक्कर्तृकत्वमेव; न यजमानकर्तृकत्वम् ।
१२. **सहकार्यन्तरविध्यधिकरणम्**	४६-४८	मौनादिविद्यासहकारिविधिविचारः ।
१३. **अनाविष्काराधिकरणम्**	४९	विद्यानिष्पत्यङ्गभूतबाल्यस्वरूपम् ।
१४. **ऐहिकाधिकरणम्**	५०	निरन्तरायस्य उपासनस्य फलशैघ्र्यम् ।
१५. **मुक्तिफलाधिकरणम्**	५१	ब्रह्मविदपचारस्य विद्याविघ्नरूपता ।

अध्यायः ४ - पादः १

१. **आवृत्त्यधिकरणम्**	१-२	निरन्तरध्यानात्मकस्य मोक्षार्थोपासनस्य असकृदावृत्तस्यैव मोक्षोपायत्वेन शास्त्र-विहितत्वम् ।
२. **आत्मत्वोपासनाधिकरणम्**	३	परमात्मनः स्वात्मानं प्रति आत्मत्वात् अहङ्-ग्रहेणैवोपासनस्य शास्त्र-सम्प्रदायसिद्धत्वम् ।

३. प्रतीकाधिकरणम्	४-५	मन आदिषु निकृष्टेषु उत्कृष्टब्रह्मदृष्टिरेव कार्या; न तु आत्मत्वेनोपासनम् ।
४. आदित्यादिमत्यधिकरणम्	६	क्रत्वङ्गभूतेषूद्गीथादिष्वेव आदित्यदृष्टिः; न तु आदित्यादिषूद्गीथादिदृष्टिः ।
५. आसीनाधिकरणम्	७-११	निरन्तरध्यानरूपं मोक्षार्थमुपासनम् आसीनेनैव कार्यम्; न तु शयितादिना पुरुषेण ।
६. आप्रयाणाधिकरणम्	१२	मोक्षार्थमुपासनम् आमरणमनुवर्तनीयम् ।
७. तदधिगमाधिकरणम्	१३	निष्पन्नोपासनस्य ब्रह्मविदः पूर्वोत्तरपाप्मनां यथाक्रमं विनाशः अश्लेषश्च ।
८. इतराधिकरणम्	१४	निष्पन्नोपासनस्य ब्रह्मविदः पूर्वोत्तरपुण्यानामपि यथाक्रमं विनाशाश्लेषौ ।
९. अनारब्धकार्याधिकरणम्	१५	ब्रह्मविदः पुण्य-पापयोः विनाशाश्लेषौ, फलप्रदानार्थमप्रवृत्तानामेव; न तु आरब्ध-फलानाम् ।
१०. अग्निहोत्राद्यधिकरणम्	१६-१८	अग्निहोत्रादिरूपाणां नित्यनैमित्तिककर्मणां फलाभिसन्धानाभावेऽपि, विद्यानिष्पत्त्यर्थ-मनुष्ठेयत्वमेव ।
११. इतरक्षपणाधिकरणम्	१९	ब्रह्मविदोऽपि प्रारब्धकर्मणां क्षयः, तत्फल-भोगादेव ।

अध्यायः ४ - पादः २

१. वागधिकरणम्	१-२	'वाङ्मनसि सम्पद्यते' इत्युक्ता मनसि सम्पत्तिः, वाक्स्वरूपस्यैव; न तु वागादिवृत्तीनाम् ।
२. मनोऽधिकरणम्	३	'मनः प्राणे सम्पद्यते' इत्युक्ता मनसः प्राणे सम्पत्तिः, प्राणसंयोगरूपैव; न तु अपां तेजसीव सम्पत्तिः ।

३. अध्यक्षाधिकरणम्	४	'प्राणस्तेजसि सम्पद्यते' इत्युक्ता प्राणस्य तेजः सम्पत्तिः, करणाध्यक्षेण जीवेन संयोग एव ।
४. भूताधिकरणम्	५-६	जीवसंयुक्तस्य प्राणस्य भूतान्तरसंसृष्टे तेजस्येव सम्पत्तिः; न तु केवले तेजसि ।
५. आसृत्युपक्रमाधिकरणम्	७-१३	जीवानां देहादुत्क्रान्तिः नाडीप्रवेशात् प्राक् विद्वदविदुषोः एकरूपैव; न विरूपा ।
६. परसम्पत्त्यधिकरणम्	१४	जीवसंयुक्तानां तेजःप्रभृतिभूतानां परमात्मनि सम्पत्तिरेव; न तु स्वकार्याय गमनम् ।
७. अविभागाधिकरणम्	१५	जीवस्य परमात्मना सम्पत्तिः, पृथग्व्यवहारा-नर्हसर्गरूपा ।
८. तदोकोऽधिकरणम्	१६	'शतं चैका च हृदयस्य नाड्यः' इत्युक्तः विदुषो जीवस्य मूर्धन्यनाड्या निर्गमः, अनुग्रहया परमात्मनः कृपया अबाधितः ।
९. रश्म्यनुसाराधिकरणम्	१७	विदुषो जीवस्य निर्गमः, अहनि रात्रावपि च सूर्यरश्म्यनुसारेणैव ।
१०. निशाधिकरणम्	१८	रात्रौ मृतस्यापि विदुषः, अर्चिरादिगत्या ब्रह्मप्राप्तिः सिद्धा ।
११. दक्षिणायनाधिकरणम्	१९-२०	दक्षिणायने मृतस्याऽपि विदुषः बन्धहेत्वभावात् अपुनरावृत्त्या ब्रह्मप्राप्तिः ।

अध्यायः ४ - पादः ३

१. अर्चिराद्यधिकरणम्	१	विदुषां नियमेन अर्चिरादिनैव मार्गेण गतिः ।
२. वाय्वधिकरणम्	२	विदुषां अर्चिरादिमार्गेण गच्छतां, संवत्सरप्राप्त्य-नन्तरं आदित्यात्पूर्वं वायोरेव प्राप्तिः । 'देवलोक-वायु' शब्दयोः सामान्यविशेषभावेन एकार्थवाचिता ।

३. वरुणाधिकरणम्	३	अर्चिरादिमार्गे आतिवाहिकेषु विद्युत्पुरुषादनन्तरमेव वरुणस्य निवेशः; न तु वायोरनन्तरम्।
४. आतिवाहिकाधिकरणम्	४-५	अर्चिरादयः परमपुरुषेण मुक्तानामतिवहने नियुक्ताः देवताविशेषा एव; न मार्गचिह्नभूताः, नापि भोगभूमयः ।
५. कार्याधिकरणम्	६-१५	अर्चिरादिः आतिवाहिको गणः, ब्रह्म ब्रह्मात्मकं प्रकृतिवियुक्तमात्मानं च उपासीनान् नयति; न कार्यं हिरण्यगर्भमुपासीनान् ।

अध्यायः ४ पादः ४

१. सम्पद्याविर्भावाधिकरणम्	१-३	मुक्तात्मनां परंज्योतिरुपसम्पद्य प्राप्यमाणो दशाविशेषः स्वस्वरूपाविर्भाव एव; न अपूर्वाकारोत्पत्तिरूपः ।
२. अविभागेन दृष्टत्वाधिकरणम्	४	मुक्तस्यात्मनः, स्वात्मनोऽप्यात्मभूतस्य परमात्मनः अनुभवः अविभागेनैव; न तु विभक्तया ।
३. ब्राह्माधिकरणम्	५-७	मुक्तात्मनः आविर्भावः, ज्ञानाकारेण अपहतपाप्मत्वादिना च ।
४. सङ्कल्पाधिकरणम्	८-९	मुक्तस्य जीवस्याऽपि अप्रतिहतसङ्कल्पेनैव इष्टप्राप्तिः ।
५. अभावाधिकरणम्	१०-१६	मुक्तस्यात्मनः, शरीरसम्बन्ध-तदभावयोरुभयोरपि अविरुद्धता ।
६. जगद्व्यापारवर्जाधिकरणम्	१७-२२	मुक्तात्मनां ब्रह्मणा सह परमसाम्यं, भगवदसाधारणान् धर्मान् वर्जयित्वैव; न सर्वात्मना साम्यम् ।

। इति ब्रह्मसूत्रीयाणाम् अध्याय-पादाधिकरणार्थानां सूचनी समाप्ता ।

[अध्यायानां सङ्ख्या नाम च]

शारीरकाभिधे शास्त्रे भगवान् बादरायणः ।
निर्ममे चतुरोऽध्यायान् चतुर्भिश्चरणैर्युतान् ।। १ ।।

समन्वयोऽविरोधश्च साधनं फलमेव च ।
अध्यायानां तु नामानि ह्यन्वर्थानि यथायथम् ।। २ ।।

[शास्त्रे अधिकरणानां सूत्राणां च सङ्ख्या]

अध्याये प्रथमे(१) न्यायाः पञ्चत्रिंशदुदीरिताः(३५) ।
द्वितीये लक्षणे(२) न्यायाः त्रयस्त्रिंशत्(३३) प्रकीर्तिताः ।। ४ ।।

तार्तीयीके लक्षणे तु(३) पञ्चपञ्चाश(५५) दीरिताः ।
तुर्ये तु लक्षणे(४) न्यायाः त्रयस्त्रिंशत्(३३) स्मृतास्तथा ।। ५ ।।

[प्रत्यध्यायं सूत्रसङ्ख्या]

(१)अध्याये प्रथमे सूत्राण्यष्टत्रिंशत् शताधिकम्(१३८) ।
शतञ्चैकोनपञ्चाशत्(१४९) द्वितीये लक्षणे(२) सिताम् ।। ६ ।।

अध्याये तु(३) तृतीये स्यात् द्व्यशीत्युत्तरकं शतम्(१८२) ।
तुर्येऽध्याये तु(४) सूत्राणां(७६) सङ्ख्या षट्सप्ततिर्मता ।। ७ ।।

[प्रतिपादम् अधिकरणसङ्ख्या]

आद्ये(१) पादे दशैकं च(११) द्वितीये(२) चरणे तु षट् (६) ।
तृतीये(३) दश सङ्ख्याकाः(१०), तुरीये(४)ऽष्टावधिक्रियाः(८) ।। ८ ।।

पञ्चमे(५) तु दश न्यायाः(१०), षष्ठे(६)ऽष्टौ(८) परिकीर्तिताः ।
सप्तमे(७) सप्तसङ्ख्याताः(७), अष्टमेऽष्टौ(८) निरूपिताः ।। ९ ।।

पादे तु नवमे(९) षट्(६)स्युः, दशमे(१०)ऽष्टौ(८) निरूपिताः ।
एकादशे(११) षड्विंशतिः(२६) स्युः, द्वादशे(१२) दश पञ्च च(१५) ।। १० ।।

त्रयोदशे(१३) दशैकं च(११) स्याद्दशैकं(११) चतुर्दशे(१४) ।
पञ्च(५) पञ्चदशे(१५) चैव षोडशे(१६) षडुदीरिताः(६) ।। ११ ।।

[प्रतिपादं सूत्रसङ्ख्याः]

(१) पादेऽयोगव्यवच्छेदे सूत्रद्वात्रिंशकं(३२) मतम् ।
(२) अन्ययोगव्यवच्छेदे त्रयस्त्रिंशदुदीरिता(३३) ।। १२ ।।

(३) तत्रैव च तृतीये तु चत्वारिंशच्चतुष्टयम्(४४) ।
(४) तत्रैव च चतुर्थे स्यादेकोनत्रिंशसूत्रता(२९) ।। १३ ।।

(५) स्मृतिपादे पञ्चमे तु सूत्रषट्त्रिंशकं मतम्(३६) ।
(६) षष्ठे तु स्यात्तर्कपादे द्विचत्वारिंशकं मतम्(४२) ।। १४ ।।

(७) सप्तमे तु वियत्पादे पञ्चाशत् द्व्युत्तरं स्मृतम्(५२) ।
(८) अष्टमे तु प्राणपादे चैकोनं सूत्रविंशकम्(१९) ।। १५ ।।

(९) वैराग्यपादे नवमे सूत्राणां सप्तविंशकम्(२७) ।
(१०) द्विलिङ्गे दशमे पादे चत्वारिंशदुदीरितम्(४०) ।। १६ ।।

(११) एकादशो चतुष्षष्ठिः(६४) गुणानामुपसंहृतौ ।
(१२) अङ्गपादे द्वादशे तु पञ्चाशच्चैकमुच्यते(५१) ।। १७ ।।

(१३) पादे चावृत्तिसंज्ञेऽस्मिन् एकोनं सूत्रविंशकम्(१९) ।
(१४) उत्क्रान्तिसंज्ञके पादे सूत्रविंशकमुच्यते(२०) ।। १८ ।।

(१५) गतेः पादे पञ्चदशे सूत्राणि दश पञ्च च(१५) ।
(१६) मुक्तिसंज्ञेऽन्तिमे पादे सूत्रद्वाविंशकं मतम्(२२) ।। १९ ।।

अध्याय-पादाधिकृतिसूत्राणां गणनात्वियम् ।
श्रीमद्रामानुजमते निर्णीता सम्प्रदायतः ।। २० ।।

* * *

७. सङ्केताक्षरसूचनी

सङ्केताक्षराणि	आकरग्रन्थाः
अग्नि.र.	अग्निरहस्यम्
अत्रि.स्मृ.	अत्रिस्मृतिः
अधि.सू.	अधिकरणसूत्रम्
आप.श्रौ.सू.	आपस्तम्बश्रौतसूत्रम्
आ.प्र.	[illegible]
आग्ने.पु.	आग्नेयपुराणम्
[illegible]	[illegible]
ऐत.आर.	ऐतरेय आरण्यकम्
ऐत.उ.	ऐतरेयोपनिषत्
कठ.उ.	कठोपनिषत्
कू.पु.	कूर्मपुराणम्
कूर्म.पू.खं.	कूर्मपुराणपूर्वखण्डः
कौषी.उ.	कौषीतकी उपनिषत्
गौ.ध.सू.	गौतमधर्मसूत्रम्
गौ.स्मृ.	गौतमस्मृतिः
छां.उ.	छान्दोग्योपनिषत्
जै.उप.ब्रा.उ.	जैमिनीय ब्राह्मणोपनिषत्
तां.म.ब्रा.	ताण्ड्यमहाब्राह्मणम्
तै.आन.	तैत्तिरीय आनन्दवल्ली
तै.आर.	तैत्तिरीय आरण्यकम्
तै.ना.उ.	तैत्तिरीय नारायणोपनिषत्
तै.ब्रा.	तैत्तिरीयब्राह्मणम्
तै.भृ.	तैत्तिरीय भृगुवल्ली

सङ्केताक्षराणि	आकरग्रन्थाः
तै.शि.	तैत्तिरीय शिक्षावल्ली
तै.सं.	तैत्तिरीयसंहिता
द.स्मृ.	दक्षस्मृतिः
पा.सू.	पाणिनिसूत्रम्
पु.सू.	पुरुषसूक्तम्
प्र.उ.	प्रश्नोपनिषत्
बृ.उ.	बृहदारण्यकोपनिषत्
बृ.उ.मा.पा.	बृहदारण्यकोपनिषत् माध्यन्दिनपाठः
ब्रह्मवै.पु.	ब्रह्मवैवर्तपुराणम्
ब्र.सू.	ब्रह्मसूत्रम्
भ.गी.	भगवद्गीता
म.भा.आदि.	महाभारत आदिपर्व
म.स्मृ.	मनुस्मृतिः
महो.उ.	महोपनिषत्
मुं.उ.	मुण्डकोपनिषत्
यजु.आर.	यजुरारण्यकम्
याज्ञ.स्मृ.	याज्ञवल्क्यस्मृतिः
वरा.उ.	वराहोपनिषत्
वि.पु.	विष्णुपुराणम्
शत.ब्रा.	शतपतब्राह्मणम्
शत.ब्रा.मा.पा.	शतपतब्राह्मणम् माध्यन्दिन-पाठः
श्वे.उ.	श्वेताश्वतरोपनिषत्
सुबा.उ.	सुबालोपनिषत्

* * *



Academy of

Under the Dept. of

Melkote-57

Karn

Tel : +91-8236-29984

Email : a

www.sar

"Bridging the gap from th



Sanskrit Research

Higher Education (Universities)

71431, Mandya Dist.,

ataka, INDIA

-1, Tele fax : +91-8236-299981

.srbng@vsnl.com

skritacademy.org

e past to future through the present"